# Adhyātmarāmāyaṇe'pāṇinīya–prayogāṇām Vimarśaḥ

**Ācārya Giridharalāla Miśra Prajñācakṣu**

known later as

Jagadguru Rāmānandācārya Svāmī Rāmabhadrācārya



Edited with notes by

**Nityānanda Miśra**

२०३८तमे वैक्रमेऽब्दे सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
विद्यावारिधिः (पीएच्.डी.) इत्युपाधये प्रस्तुतः शोधप्रबन्धः

# अध्यात्मरामायणेऽपाणिनीयप्रयोगाणां विमर्शः


प्रणेतारः

पदवाक्यप्रमाणपारावारीणाः षड्दर्शनपरमप्रवीणाः सनातनधर्मसंरक्षणधुरीणाः

आचार्यगिरिधरलालमिश्राः प्रज्ञाचक्षुषः

(तुर्याश्रमे जगद्गुरुरामानन्दाचार्यस्वामिरामभद्राचार्याः इति ख्याताः)


स च विमर्शो गौतमान्वयेन पिपरागौतमग्राममूलकेन पण्डितगायत्रीभूषणमिश्रसूनुना

नित्यानन्दमिश्रेण

यथामति सम्पादित उद्धरणमूलग्रन्थनामश्लोकसङ्ख्याटिप्पणीप्रक्रियाभिः संवर्धितश्च

प्रकाशकः

श्रीतुलसीपीठसेवान्यासः
चित्रकूटः, सतनाजनपदः, मध्यप्रदेशः, भारतम्

तृतीयसङ्गणकीयसंस्करणम्

विजयदशमी, विक्रमाब्दः २०७१
(October 22, 2015)

© सर्वाधिकारः

प्रणेतृसम्पादकायत्तः

Cover art created using two images. The first image is of a manuscript of the work Śābdabodha (MS Add.2464) available from the UCDL website under http://cudl.lib.cam.ac.uk/view/MS-ADD-02464/1. The second image is that of a painting from Himachal Pradesh (1775-1800) titled as 'Rama's Court, Folio from a Ramayana (Adventures of Rama)' available from the LACMA website under http://collections.lacma.org/node/198599.

पुस्तकप्राप्तिस्थानम्

http://www.jagadgururambhadracharya.org

अक्षरसंयोजकः

नित्यानन्दमिश्रः
Typeset in XƎLaTeX using XƎTeX engine version 0.9998.

# अनुक्रमणिका


सम्पादकीयम् १

परिचयः ११

ग्रन्थकर्तृजीवनवृत्तम् १९

आचार्यचरणानां विरुदावली २७

प्रशस्तिवाचः २९

प्रशंसा ३७

आलोकनम् ३९

आभारप्रदर्शनम् ४१

मङ्गलाचरणम् ४५

प्रस्तावना ४७

१ सन्धिकारकसमासप्रकरणम् १२५

प्रथमः परिच्छेदः . . . १२७

बालकाण्डीयप्रयोगाणां विमर्शः . . . १२७

अयोध्याकाण्डीयप्रयोगाणां विमर्शः . . . १५९

द्वितीयः परिच्छेदः . . . १८२

अरण्यकाण्डीयप्रयोगाणां विमर्शः . . . १८२

किष्किन्धाकाण्डीयप्रयोगाणां विमर्शः . . . २०५

सुन्दरकाण्डीयप्रयोगाणां विमर्शः . . . २२०

युद्धकाण्डीयप्रयोगाणां विमर्शः . . . २२१

उत्तरकाण्डीयप्रयोगाणां विमर्शः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . २२७

## २ कृत्तद्धितप्रकरणम् २३१

### प्रथमः परिच्छेदः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . २३१

बालकाण्डीयप्रयोगाणां विमर्शः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . २३१

अयोध्याकाण्डीयप्रयोगाणां विमर्शः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . २५१

### द्वितीयः परिच्छेदः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . २७३

अरण्यकाण्डीयप्रयोगाणां विमर्शः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . २७३

किष्किन्धाकाण्डीयप्रयोगाणां विमर्शः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . २९२

सुन्दरकाण्डीयप्रयोगाणां विमर्शः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . २९९

युद्धकाण्डीयप्रयोगाणां विमर्शः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ३०१

उत्तरकाण्डीयप्रयोगाणां विमर्शः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ३०६

## ३ धातुप्रकरणम् ३०९

### प्रथमः परिच्छेदः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ३०९

बालकाण्डीयप्रयोगाणां विमर्शः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ३०९

अयोध्याकाण्डीयप्रयोगाणां विमर्शः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ३३९

### द्वितीयः परिच्छेदः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ३६९

अरण्यकाण्डीयप्रयोगाणां विमर्शः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ३६९

किष्किन्धाकाण्डीयप्रयोगाणां विमर्शः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ३८०

सुन्दरकाण्डीयप्रयोगाणां विमर्शः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ३९०

युद्धकाण्डीयप्रयोगाणां विमर्शः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ३९७

उत्तरकाण्डीयप्रयोगाणां विमर्शः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ४०३

## सङ्केताक्षरसूची ४०७

# सम्पादकीयम्

शुद्धाद्धातोः प्रकृत्यां णिचि सनि यङि वा नामजात्सोपसर्गा-
द्धातोर्वा तिङ्कृदन्तं विकरणविधिभिश्चागमादेशकार्यैः।
कृच्छब्दात्तद्धितान्तं प्रतिपदजनकात्साधयन् सुब्विभक्तिं
व्याकुर्वन् सर्वशास्त्रं जयति गुरुवरः प्रक्रियाज्ञाननेत्रः॥

“Deriving the conjugational form (*tiṅanta*) and the form with a primary suffix (*kṛdanta*) using the rules of inserted conjugational affixes (*vikaraṇa*-s) and the operations of augmentation (*āgama*) and substitution (*ādeśa*) in the natural (*prakṛti*), causative (*ṇic*), desiderative (*san*), or intensive (*yaṅ*) sense from an original root (*dhātu*), or from a denominative root (*nāmadhātu*), or from a root with a prefix (*upasarga*); [deriving] the form with a secondary suffix (*taddhitānta*) from a form with a primary suffix (*kṛdanta*); [and deriving] the inflected form (*subanta*) from a lemma (*prātipadika*)—thus explaining the entire scripture [of *Vyākaraṇa*]—the foremost Guru, one of whose eyes is the knowledge of the derivational process (*prakriyā*) [of *Vyākaraṇa*], is [ever] victorious.”

अष्टाध्यायीं सभाष्यां सवररुचिकृतिं स्वस्य कण्ठे दधानो
न्यायान् सर्वान् विजानन् भरणहरिकृतौ ब्रह्म वाक्यं प्रकीर्णम्।
सिद्धान्तान् कारिकार्थान् फणिपतिरचनाः कौण्डभट्टार्यसारं
चक्षाणः शाब्दबोधं जयति गुरुवरो दर्शनज्ञाननेत्रः॥

“Having committed to His memory the *Aṣṭādhyāyī*, along with the work of Vararuci (the *Vārttika*-s) and the

commentary (*Mahābhāṣyam*); specially knowing all the axioms (*nyāya*-s), [the three books titled] *Brahma*, *Vākya* and *Prakīrṇa* in the work of Bhartṛhari (*Vākyapadīyam*), the principles (*siddhānta*-s) [of *Vyākaraṇa*], the meanings of the *kārikā*-s [in the *Vaiyakaraṇasiddhāntakārikāḥ*], the works of Nāgeśa, and the *sāra* (*Vaiyākaraṇabhūṣaṇasāraḥ*) of the noble Kauṇḍabhaṭṭa; and expounding on verbal cognition (*śābdabodha*)—the foremost Guru, one of whose eyes is the knowledge of the philosophy [of *Vyākaraṇa*], is [ever] victorious. ”

This phenomenal work is the result of spontaneous dictation over only thirteen days by my Gurudeva, the polymath saint Jagadguru Rāmānandācārya Svāmī Rāmabhadrācārya, earlier known as Ācārya Giridharalāla Miśra Prajñācakṣu. While Gurudeva and His life need no introduction, the events which led to the authoring of this work certainly deserve a mention. Gurudeva entered the academic world of Vārāṇasī in 1971, after four years of schooling in Jaunpur. He completed His bachelor's (*śāstrī*) and master's (*ācārya*) degrees from the Sampurnanand Sanskrit University in 1974 and 1976, respectively. In 1976, He was awarded the Chancellor's gold medal, along with seven gold medals. He then registered for a doctoral (*vidyāvāridhi* or PhD) degree at the same university, but hardly spent any time on research over the next five years during which, as a wandering *kathā* artiste (*kathāvācaka*) and ascetic (*tapasvī*), He traversed across the length and breadth of northern and western India. In 1981, when Gurudeva wanted to be initiated as a *virakta saṃnyāsī* in the order (*sampradāya*) of Rāmānanda, one of His close associates suggested that He complete the task which He had set on five years ago before severing all ties of *pūrvāśrama*. Gurudeva then came to Vārāṇasī, and dictated this work over thirteen days, as I have heard from Him and His close

associates. It may sound incredible to some, but it does not take much to believe. All one needs to do is to take a look at the endless literary output of Gurudeva consisting of more than one hundred books and innumerable articles, speeches, songs, and verses—and consider the fact that all of this comes from somebody who has been without eyesight since the age of two months and had no formal education till the age of seventeen. Although I was not born in 1981, I can attest to another such miraculous feat in December 2013 when Gurudeva authored a 300-page book—the *Mūlārthabodhinī* commentary on the *Bhaktamāla* of Gosvāmī Nārayaṇadāsa (Nābhājī)—in just sixteen hours of recording spread over nine days.[1] Being a witness to this feat, I have no doubts that this PhD thesis was dictated by Gurudeva over thirteen days. On September 24 1981, the thesis was examined by Paṇḍita Bhūpendrapati Tripāṭhī, the former Head of Department of *Vyākaraṇa* at the Sampurnanand Sanskrit University, and recommended for the viva voce examination. The signature of Paṇḍita Bhūpendrapati Tripāṭhī in green ink still adorns the first page of the typed manuscript. The thesis was then successfully defended in Sanskrit by Gurudeva in the viva voce examination where the examiners included stalwarts like Paṇḍita Kālikāprasāda Śukla and Paṇḍita Paṭṭābhirāma Śāstrī.[2]

I had read about this work in the bibliography of Gurudeva published in many books authored by Him, as well as in *Svarṇayātrā*, Gurudeva's autobiographical account of His life till

[1] I co-edited the book. While proofreading, I listened to the complete recording twice. There was never a pause to think or reflect, and nobody recited or read the original text of the *Bhaktamāla* for Gurudeva during the recording.

[2] It is unfortunate that no recording of the session exists—technology was not as ubiquitous in India then as today. We all can only imagine what a wonderful treat for the ears it would have been to hear the conversations between the examiners and the researcher.

the year 2000. I was very curious to read this work given its rather interesting title. I unsuccesfully tried to search for this work at the Citrakūṭa *āśrama* of Gurudeva during my several visits to the *āśrama* between 2009 to 2012. Nobody at the *āśrama* remembered where Gurudeva's copy of the thesis was. In 2011, I tried to find it in the Rajkot *āśrama* of Gurudeva with no success. I had almost given up on my search and had decided to go to the Sampurnanand Sanskrit University, hoping against hope to procure this thirty-year old thesis, when fortunately, in the month of June 2012, I paid my first visit with my *gurubhrātā* Pavana Śarmā to *Vasiṣṭhāyanam*, Gurudeva's *āśrama* at Haridvāra. There, while going through a stack of rare and old books, I found Gurudeva's copy of the thesis—buried under many other books, and with a torn cover, weak binding, and yellow and brittle pages. I flipped through its pages and started reading—like a curious child, who has just learned the basics of linear algebra, going through derivations in the notes of Isaac Newton or Carl Friedrich Gauss. Though I had been teaching myself *Vyākaraṇa* since 2007, my five years of self-learning was cast away by reading a few lines of the thesis. So engrossed I was in the two or three derivations of the work that the typographic mistakes became invisible to me. After around five minutes, I could not read it any further—it was too much for me to understand. I put down the thesis and said to myself, "This work has to be published, else one day it may be lost forever." Gurudeva kindly gave me the permission to take the thesis with me, and also gave His blessing to my wish. I feel His blessing is what has materialized as this editor's note after three years.

For those who work in the investment banking industry, time is a luxury they can rarely afford. The typed manuscript was full of errors—unfortunately the scribe and the typist did

not have even basic knowledge of Sanskrit. Due to the many mistakes, I abandoned my idea of typing the work myself as it was too time-consuming. I decided to scan the book and posted a message on several mailing lists asking for help in data-entry. I was enthused by the several responses, some of them offering to work for free, that I received.[3] One of the responses was from the Bangalore-based scholar *Vedavāridhi* Dr. P. Ramanujan, the *āsthāna vidvān* (assembly scholar) of the Ahobilamaṭha, an authority on the *Kṛṣna Yajurveda*'s *Taittirīya Śākhā*, and currently a member of the Second Sanskrit Commission. Dr. Ramanujan's Parankushachar Institute of Vedic Studies (PIVS) is engaged in the digitization and publication of many Sanskrit works. Dr. K. S. Mukundan of the institute ably typed the work in a few months and Dr. Ramanujan did the first round of proofreading. I offer my fervent thanks to both Dr. Mukundan and Dr. Ramanujan without whose help this work would not have been published.

Over the next few months, I proofread and edited the work, adding original verses of *Adhyātma Rāmāyaṇa* and citing the work's around 1650 references in the process. Several members of the *Bhāratīyavidvatpariṣad* mailing list helped me trace the original sources of many citations, and I thank all of them. The first edition of the work was released online in HTML format in June 2013, one year after I had first seen the work. The second edition, which made many corrections, was released online in HTML format in October 2013.

Although the second edition was complete and many typographic mistakes in the typed manuscript had been corrected, I was nevertheless not satisfied as I knew I had not

[3] And also amused by a self-proclaimed Sanskrit scholar who tried his best to fleece me by quoting a ludicrously high price. Frustrated with his repeated questioning on who I was engaging and how much I was paying, when I told him even esteemed scholars were quoting one-fourth of his rate, he responded nonchalantly, "That is very reasonable [sic]."

understood the work and may had not done complete editorial justice to the work due to the lack of my understanding. In addition, I knew that at some places words or sentences were missing in the manuscript, leading to a lack of continuity. The following words of Gosvāmī Tulasīdāsa in the *Rāmacaritamānasa* (1.30A-B) were echoing in my mind—

मैं पुनि निज गुरु सन सुनी कथा सो सूकरखेत।
समुझी नहिं तसि बालपन तब अति रहेउँ अचेत॥
श्रोता बक्ता ग्याननिधि कथा राम कै गूढ़।
किमि समुझौं मैं जीव जड़ कलि मल ग्रसित बिमूढ़॥

“And then I heard the same *kathā* from my Guru at *Vārāhakṣetra*, but I could not understand it as I was extremly ignorant in that phase of childhood. The *kathā* of Rāma is difficult to understand; the listeners and speakers are rich with knowledge. How could I, an especially foolish and unintelligent being seized by the vices of the *Kali* age, understand it?”

The answer came from what Tulasīdāsa had said next in the *Rāmacaritamānasa* (1.31.1)—

तदपि कही गुरु बारहिं बारा। समुझि परी कछु मति अनुसारा॥

“Still, the Guru narrated it again and again, and then I understood it somewhat, in accordance with my intellect.”

I decided to read the work, my edited version, again and again. After three iterations, I was confident of my understanding, and decided to publish a third edition with footnotes reflecting my insights. In addition, I decided that the this new edition would be typeset in XƎLaTeX. The typesetting was completed in December 2013, following which I started editing the work again. My understanding of grammatical process and philosophy increased manifold while editing the work second time, and I could successfully solve the derivations for the explanations. These derivations were also included as

footnotes. The work on the third edition began in January 2014 and was completed in February 2015, interrupted by another book of Gurudeva which I proofread, typeset and co-edited;[4] and my move from Hong Kong to Mumbai in July 2014. From February to August 2015, I was occupied with authoring, typesetting, designing, and publishing my first English book, *Mahāvīrī: Hanumān-Cālīsā Demystified*.[5] This delayed the online publication of the third edition of this book, *Adhyātmarāmāyaṇe'-pāṇinīyaprayogāṇām Vimarśaḥ*.

The text of the third edition with nearly 1,200 footnotes runs into nearly 375 pages now, as opposed to around 240 pages for the text of the first and second editions. The number of works cited in the second addition is close to 175 as opposed to 65 in the first and second editions. Hundreds of *vyutpatti*-s (etymologies) and *prakriyā*-s (derivations) have been included in footnotes. Most of the original text in this third edition is the same as that in the first and second editions except for orthographic and editorial corrections, and supplying the text missing from the manuscript after consultations with Gurudeva. Some minor additions have been made at some places following my discussions with Gurudeva regarding several usages and forms, in order to facilitate better understanding of the matter at hand.

I am indebted to the many sources I have used for my understanding and editing of Gurudeva's work. The Hindi commentaries on the *Aṣṭādhyāyi* by Devaprakāśa Pātañjala and Paṇḍita Īśvaracandra (each in two volumes), the six-volume English commentary by Prof. Ramānātha Śarmā, and the three-volume Hindi commentary on the *Laghusiddhāntakaumudī*

4 This book was the *Mūlārthabodhinī* commentary on the *Bhaktamāla*.

5 The book is a translation and expansion, with notes, of the *Mahāvīrī* commentary on the *Hanumān-Cālīsā* by Gurudeva.

by Ācārya Govindaprasāda Śarmā have been of invaluable help. Their focus on the derivational process of Pāṇinian grammar is remarkable. Puṣpā Dīkṣita's *Aṣṭādhyāyī Sahajabodha*, T. R. Kṛṣṇācārya's *Bṛhaddhāturūpāvalī*, and S. Rāmasubrahmaṇya Śāstrī's *Kṛdantarūpamālā* have been especially helpful in understanding the third chapter (*Dhātuprakaraṇam*), arguably the most involved chapter of the work.[6] The *Kṛdantarūpamālā* has also been helpful in understanding the second chapter (*Kṛttaddhitaprakaraṇam*). The *Upasargārthacandrikā* of Cārudeva Śāstrī is another work which I have found very useful. The *Śabdakalpadrumaḥ* and *Vācaspatyam*—possibly the greatest dictionaries ever written in any language—and the *Amarakoṣa* and its various commentaries (especially *Vyākhyāsudhā*) have been helpful for many etymologies, as has been Apte's Sanskrit-Hindi dictionary. Comments and responses over emails from members of the *Bhāratīyavidvatpariṣad* mailing list and discussions over phone and email with Mātājī Puṣpā Dīkṣita, Prof. Ramānātha Śarmā, and Prof. George Cardona on specific forms and derivations have greatly benefitted my understanding. The meticulous proofreading by Dr. H. N. Bhat has helped correct several errors in the draft and add some more insightful footnotes. Lastly, I am indebted to all the traditional commentaries including the great *Mahābhāṣya*, the brilliant *Kāśikā*, the useful *Nyāsa*, the illuminating *Siddhāntakaumudī*, the delightful *Bālamanoramā*, the enlightening *Tattvabodhinī*, and the small yet illuminating *Laghusiddhāntakaumudī*.

I cannot thank enough Prof. Mādhava Deśapāṇḍe, Devarṣi Kalānātha Śāstrī, Dr. Himāṃśu Poṭā, and Dr. Baladevānanda Sāgara for taking time out of their busy schedules to write

[6] I have heard that mastering verbal derivations is the most challenging part of Sanskrit grammar, and I can attest to the same—(s)he who can derive verbal forms can easily derive all other forms.

*praśasti*-s for this work. I offer special thanks to Śatāvadhāni R. Gaṇeśa for writing a *citrakāvya praśasti* in praise of Gurudeva. All these are exemplary scholars in the field of Sanskrit, and it is a privilege for me that they have adorned my first edited work in Sanskrit with their words. I shall be forever indebted to all of them.

Before I end this note, I would like to offer thanks to my near and dear ones who made this work possible. The cooperation of my wife was indispensable in completion of the work—her support has always been present for the digitization and editing of Gurudeva's works. My children Nilayā and Nirāmāya often made me get up from long sessions spent with my books and laptop, and return afresh to solve intricate derivations. My elder sister and her children were often troubled by my early morning and late night work on the this edition for nearly a month in Hong Kong, and were very kind to adjust. Relentless and selfless hard work is what my mother has taught me, not by her words but by her actions, and the same spirit kept me going during the editing. The genius of my father and his indomitable self-belief has been and will continue to be my inspiration. Lastly, the work is dedicated to my late grandparents, Śrīmatī Kausalyā Devī Miśra and Śrī Śrīgopāla Miśra, to whom I owe my love of all the three treasures of humans—literature (*sāhitya*), music (*saṅgīta*), and art (*kalā*).

No part of this work would have been even conceivable without the divine grace of Gurudeva, the saint of our times and the personification of all of India's traditional knowledge. I bow to His lotus-feet again and again for giving me this opportunity to serve Him and taking time out to adress doubts I had while editing the work.

I respectfully offer this work to all scholars and students of

Sanskrit grammar, and request them to excuse and point out any editorial mistakes that may have still remained. I summarize my humble effort as—

रामभद्रो हि जानाति रामभद्रसरस्वतीम्।
रामभद्रो हि जानाति रामभद्रसरस्वतीम्॥
तत्कृपयैव जानाति नित्यानन्दः क्वचित्क्वचित्॥

“Verily, [only] Rāmabhadrācārya understands the speech of the auspicious Rāma. Verily, [only] the auspicious Rāma understands the speech of Rāmabhadrācārya. By the divine grace of both, Nityānanda understands [the speech of Rāmabhadrācārya] here and there.”

Nityānanda Miśra
Mumbai, August 22 2015

# परिचयः

**Adhyātmarāmāyaṇe'pāṇinīyaprayogāṇāṃ Vimarśaḥ** (English: *Deliberation on non-Pāṇinian usages in the Adhyātma Rāmāyaṇa*) is a comprehensive Sanskrit essay (*nibandha*) in around 50,000 words, authored in 1981 by my Gurudeva, Ācārya Giridharalāla Miśra Prajñācakṣu (known in his current Āśrama as Jagadguru Rāmanandācārya Svāmī Rāmabhadrācārya). The work was spontaneously dictated by Gurudeva over only thirteen days in 1981. A disciple of Gurudeva, Dayāśaṅkara Pāṇḍeya, was the scribe who took dictation from Gurudeva. The entire work was authored by Gurudeva without any book or references, with all the text of *Adhyātma Rāmāyaṇa*, *Aṣṭādhyāyī*, *Mahābhāṣya* and many other works in the memory (*kaṇṭhastha*) and all the Pāṇinian *prakriyā*-s in the mind (*buddhistha*). At the end of the work, Gurudeva says—

बुद्ध्या श्रीगुरुपादपद्मरजसा संशुद्धया सादरं
कृत्वा लेखकमाप्तशीलयशसं शिष्यं शिशुं राघवम्।
बालो नष्टविलोचनो गिरिधरः शब्दान् विभाव्याऽत्मना
बध्नाति स्म निबन्धमेतममलं तोषाय सीतापतेः॥

“Making the infant Rāma, his disciple endowed with moral conduct and fame, as the scribe, the child Giridhara, devoid of physical vision, after respectfully examining words with his intellect which was made especially pure by the pollen from the lotus-feet of the revered Guru, composed this work for the pleasure of the lord of Sītā.”

The work was then typed and presented as a doctoral thesis (*śodhaprabandha*) at the Sampurnanand Sanskrit University, for which the degree of *Vidyāvāridhi* (Ph.D.) was conferred upon Gurudeva in 1981. The thesis was reviewed by the grammarian (*vaiyākaraṇa*) and epic-poet (*mahākavi*) Kālikāprasāda Śukla, who wrote the following verse in the *Vasantatilakā* metre to describe it—

शोधप्रबन्धपरिशीलनतः समन्तात्सञ्जायते मतमिदं मम युक्तियुक्तम्।
शोधप्रबन्धमकरन्दमधुव्रतोऽयं विद्वद्भिमृग्यविरुदं लभतामिदानीम्॥

“ My logical conclusion, that arises from having thoroughly examined the dissertation, is that he (Giridhara Miśra) is the bumblebee for the nectar of literary compositions for purification. May he now [effortlessly] obtain the praise and fame which is especially sought after by the learned. ”

The work is divided into four parts—*Prastāvanā*, *Sandhi-kārakasamāsaprakaraṇam*, *Kṛttaddhitaprakaraṇam*, and *Dhātu-prakaraṇam*.

**Prastāvanā**: The introduction begins with tracing the tradition of *Vyākaraṇa*. A wide range of topics are first covered like nature of *Veda*, origin of *Veda*, *apauruṣeyatā* of *Veda*, *vedatrayī* and *vedacatuṣṭayī*, *śruti* and *Veda*, *lakṣaṇa* of *vidhi* and *niṣedha*, relation between *śruti* and *smṛti*, five *sampradāya*-s based on *smṛti*-s, five types of *Vaiṣṇava upāsanā*-s, *Vedānta*, *Purāṇa*, *Itihāsa*, fourteen *vidyā*-s including six *darśana*-s, three types of *āgama*-s and two types of *mārga*-s, and the six *vedāṅga*-s—the chief amongst which is *Vyākaraṇa*. Next, the importance of *Vyākaraṇa* is stressed. The nine *vyākaraṇa*-s are mentioned, following which some unique aspects of Pāṇini's grammar are discussed. The terms *āpta* and *śiṣṭa* are defined, along with generic definitions of *śiṣṭaprayoga* and *sādhutva*, which are to be followed by *Vyākaraṇa* and not the other way round. *Sādhutva* is

then redefined in the context of the *prakriyā* of Pāṇini's grammar. Deeper insights going beyond the realm of grammar are arrived at from some *sūtra*-s of Pāṇini. The essay then delves on *sūtratva* and *lakṣaṇa* of six types of *sūtra*-s and their interplay is explained with the comprehensive example of *iko yaṇaci* (PS 6.1.77). This is followed by the position of works of Kātyāyana and Patañjali in the *Vyākaraṇa* tradition. *Mahābhāṣya* and its position is described in detail with examples. Following this, *prakriyā* and *darśana*—the two eyes of the *Vyākaraṇa* tradition—are described with the works of both, and the philosophy of *Vyākaraṇa* tradition is compared with that of other *darśana*-s. *Śābdbodha* and *śakti* are then explained as per *Vyākaraṇa*. The relevance of Pāṇini's grammar is discussed in the context of the *Rāmāyaṇa* tradition, including the *Adhyātma Rāmāyaṇa*. Some insights into the *Rāmāyaṇa* tradition from Pāṇini's grammar are discussed, and all the fourteen *Śiva Sūtra*-s are then interpreted in the context of *Rāmāyaṇa*. The question of seemingly non-Pāṇinian usages in *śiṣṭaprayoga*-s, like those in *Adhyātma Rāmāyaṇa*, is raised. Gurudeva says that it is very much possible to explain all *śiṣṭaprayoga*-s by Pāṇini's grammar. After explaining the the relation between *Vyākaraṇa* and *Adhyātma Rāmāyaṇa,* the latter work is described in some detail. *Adhyātma Rāmāyaṇa*'s origin, poetic features, *rasa*-s, *nāyaka* and its relevance and usefulness in the context of the *Rāmāyaṇa* tradition is discussed. The author stresses that since both Pāṇini's grammar and *Adhyātma Rāmāyaṇa* come from Lord Śiva, there must be consistency (*ekavākyatā*) between the two. Gurudeva says that in the *Adhyātma Rāmāyaṇa*, there are 700-odd usages that "appear to be non-Pāṇinian." Around half of these usages are examined and explained using the Pāṇinian framework (others being similar to those explained).

**I. Sandhikārakasamāsaprakaraṇam**: The first chapter is split into two parts and examines 140 sequential usages in the *Adhyātma Rāmāyaṇa* pertaining to *sandhi, kāraka* and *samāsa*. It begins with an insightful grammatical explanation of the compound *Adhyātma Rāmāyaṇa*. Quite often two or three solutions, and sometimes upto six or seven solutions in the Pāṇinian framework are given for the seemingly non-Pāṇinian forms.

**II. Kṛttaddhitaprakaraṇam**: The second chapter is also split into two parts and examines 90 sequential usages in the *Adhyātma Rāmāyaṇa* pertaining to *kṛt* and *taddhita* affixes. Again, multiple Pāṇinian explanations are offered for many usages.

**IIII. Dhātuprakaraṇam**: The third chapter explains 135 sequential *tiṅanta* usages in the *Adhyātma Rāmāyaṇa* that are seemingly non-Pāṇinian. Mostly one and sometimes two or three explanations are offered in the Pāṇinian framework for these usages.

**Features**

Some unique features of the work include—

1. Pāṇinian explanations of 365 seemingly non-Pāṇinian usages using various Pāṇinian *sūtra*-s, *vārttika*-s, *kārikā*-s, *niyama*-s, *paribhāṣā*-s, and *jñāpaka*-s, in accordance with traditional commentaries.
2. More than 1500 citations from works of diverse fields, and many more from oral traditions. On including the editor's footnotes and derivations in the third edition, there are more than 6500 citations from around 175 works.
3. *Śiva Sūtra*-s explained in the context of *Rāmāyaṇa*, with a *Rāmāyaṇa*-centric interpretation of each *sūtra*. This section of the work compares with the *Nandikeśvara Kāśikā*.

4. Hundreds of Pāṇinian *prakriyā*-s, some abridged and some detailed. In the second addition, hundreds of complete Pāṇinian derivations are given in the editor's footnotes, corresponding to the abridged and detailed derivations by the author.
5. Lucid explanations of complex grammatical concepts.
6. Vivid descriptions in poetic style, with some *daṇḍaka*-style *samāsa*-s formed from several hundreds of words compounded together.
7. Didactic approach with many counter-questions and doubts raised by *nanu*, *na ca*, et cetera, and all of them resolved in favour of the proposed solutions.
8. *Nyāya*-styled *lakṣaṇa*-s of many concepts, both grammatical and non-grammatical.
9. *Vaiyākaraṇa śābdabodha*-s of common terms (*śruti*, *veda*, *anuśāsana*, *vyākaraṇa*, et cetera) and involved grammatical usages (*vāraṇārtha*, *karmamūlakasambandha*, *samāsa*, *śaiṣika-ṣaṣṭhī*, *tatkaroti* usage, *tadiva ācarati* usage, *tiṅanta* usage from a *pacādyajantakvibanta nāmadhātu*, *ṇijanta* usage, *svārtha-ṇijanta* usage, *vartamānasāmīpya* usage, et cetera).
10. Critical insights into many original verses of *Adhyātma Rāmāyaṇa* using traditional methods of interpretation. The work may be thought of as a mini-commentary on the *Adhyātma Rāmāyaṇa*.

Besides satisfying scholars of *Vyākaraṇa* and the connoisseurs of *Adhyātma Rāmāyaṇa*, the work is very useful for students learning Pāṇini's *Vyākaraṇa*. Having acquired all my limited learning in Sanskrit grammar exclusively from self-study (*svādhyāya*), I can personally attest to the extraordinary benefits the work offers for grammar students, especially those studying

by *svādhyāya*. Just like a picture is worth a thousand words, similarly a *prakriyā* is worth the understanding of tens of *sūtra*-s, a grammatical insight is worth tens of such *prakriyā*-s, and a *śābdabodha* is worth tens of such grammatical insights. The work—replete with *prakriyā*-s, insights and *śābdabodha*-s—offers a rare source of learning for students and scholars of Pāṇinian *Vyākaraṇa*.

I am a quantitative analyst by profession, and Applied Statistics is one of my areas of work. From the viewpoint of Statistics, I see the Pāṇinian grammar as a parsinomious statistical model which Pāṇini formulated to explain the variation in the infinitely many *śiṣṭa prayoga*-s which formed his dataset. No statistical model with finite predictors can explain all of the variation in an infinitely large dataset. Pāṇini's model was the best model ever formulated for this purpose, and could account for a very large degree of variation. Vararuci's *vārttika*-s and Patañjali's *bhāṣya* extended the model by introducing additional model complexity, and explaining further variation in the data of *śiṣṭa prayoga*-s. All of these great grammarians were mathematicians, and I see them as statisticians since like Statistics, Sanskrit grammar also combines mathematics and philosophy—the two eyes of Sanskrit grammar being *prakriyā* (mathematical derivations) and *darśana* (philosophy). This work is also largely mathematical in nature, interpreting or extending Pāṇini's model to explain the variation of *śiṣṭa prayoga*-s seen in the *Adhyātma Rāmāyaṇa*. With this conclusion, I believe students and scholars of computational liguistics also stand to gain from the study of this work.

The original work and the editor's footnotes in the third edition (except for some citations) are entirely in Sanskrit. For the benefit of students of Sanskrit and linguistics, I plan to

translate the work into English and Hindi some day. The next edition of the work will hopefully come with an English or Hindi translation.

Nityānanda Miśra
Mumbai, August 22 2015

# ग्रन्थकर्तृजीवनवृत्तम्

लेखकौ – वाचस्पतिमिश्रः, तुलसीदासपरौहा
(सम्पादकः – नित्यानन्दमिश्रः)

संस्कृतसाहित्यजगति प्रथितकीर्तयो विलक्षणप्रतिभावन्तः पदवाक्यप्रमाणपारावारीणाः पद्मविभूषणसाहित्याकादमीराष्ट्रियपुरस्कारादिपुरस्कृताः कविकुलरत्नानि मध्यप्रदेशस्य सतनामण्डलवर्तिनि मन्दाकिनीसलिलविमलसलिलासक्ते चित्रकूटे कृतनिवासा अहोरात्रं काव्यरचनाव्याजेन सुरभारतीसमर्चने समर्पितजीवनास्तथा च विकलाङ्गजनतोपासनायां सततं संलग्नाः शतावधानिकवयः स्वामिरामभद्राचार्याः केन न ज्ञायन्ते।

वदनं प्रसादसदनं सदयं हृदयं सुधामुचो वाचः।
करणं परोपकरणं येषां केषां न ते वन्द्याः॥

इति यद्भर्तृहरिणा साकूतं समान्वभाणि तदेतदशेषं समञ्जसं प्रस्तुतग्रन्थरत्नस्य प्रणेतृषु धर्मचक्रवर्तिषु महामहोपाध्यायेषु वाचस्पतिषु महाकविषु सर्वतन्त्रस्वतन्त्रेषु प्रस्थानत्रयीभाष्यकारेषु सर्वाम्नायश्रीचित्रकूटतुलसीपीठाधीश्वरेषु श्रीमज्जगद्गुरुश्रीरामानन्दाचार्यास्पदस्वामिश्रीरामभद्राचार्यचरणेषु।

जन्म – स्वामिरामभद्राचार्याणां जनिरुत्तरप्रदेशे जौनपुरजनपदान्तर्वर्तिनि शाण्डिखुर्दनामके ग्रामे द्विसहस्राधिकषष्ठे वैक्रमेऽब्दे माघकृष्णैकादश्यां तदनुसारं पञ्चाशदुत्तरैकोनविंशतिशत ईसवीयाब्दे मकरसङ्क्रान्तौ (१४ जनवरी १९५०) वैवस्वतवासरे निशि निशीथाभिमुख्यां मकरराशिगते सवितरि वसिष्ठगोत्रीयसरयूपारीणविप्रामले कुले विश्वविश्रुतब्राह्मणकुलालङ्कारस्य श्रीराजदेवमिश्रस्य चतुर्थापत्यरूपेणाखण्डसौभाग्यवत्याः श्रीमत्याः शचीदेव्या दक्षिणकुक्षितः समभवत्। एतेषां नामकरणं गिरिधरलाल इति कृत्वा पितरौ मोदमावहन्तौ मासद्वयावधिमेव यापितवन्तौ हा हन्त तदानीमेव दैवदुर्विपाकात् रोहुआरुजाप्रकोपाद्बालकस्य बाह्यदृष्टिर्गता। वस्तुतस्त्वसारमेतं संसारं नावलोकयितुकामेनानेन नवजातशिशुनैव द्विमासेन भौतिके चक्षुषी निमीलिते इत्युत्प्रेक्षामहे। एतान् दृष्टिबाधितान् विज्ञाय महद्दुःखमनुभवन्तः पितामहाः श्रीसूर्यबलि-

मिश्रमहोदयास्तान् श्रीमद्भगवद्गीतां वारं वारं श्रावितवन्तः। तेन पञ्चवर्षस्यावस्थायामेव जन्मान्तरीयप्रतिभाप्रागल्भ्यभगवद्भजनसाधनधना विलक्षणप्रतिभाशीलाः प्रज्ञाचक्षुष्मन्तो गिरिधरनामानोऽशेषां गीतां कण्ठस्थीकृतवन्तः।

शिक्षार्जनम् – बाल्ये गिरिधरलालाभिधेयानां जगद्गुरुरामभद्राचार्याणां प्राथमिकी शिक्षा पितामहसन्निधावेव सम्पन्ना। एते जानकीजीवनलीलालालित्य-लुब्धधियो पितामहचरणेभ्यो गोस्वामितुलसीदासप्रणीतं श्रीमद्रामचरितमानसं साङ्गोपाङ्गं सानुपूर्वीकं पङ्क्तिसङ्ख्यासहितं द्वाभ्यामेव मासाभ्यां कण्ठस्थीकृत्याष्टम एव वर्षे रामनवम्यामश्रावयन्। एतेषां विशिष्टां प्रज्ञां लोचं लोचं पितामहाः सूर्यबलि-महोदयाः पितरौ च संस्कृतस्य पारम्परिकशिक्षां दापयितुं निकटवर्तिनं सुजानपुरस्थं श्रीगौरीशङ्करसंस्कृतमहाविद्यालयमेतान् प्रैषयन्। कुशाग्रबुद्धिसम्पन्ना एकश्रुता[१] गिरिधरमिश्रास्तत्र प्रारम्भिकव्याकरणशिक्षां तत्रत्यव्याकरणविभागाध्यक्षेभ्यः श्रीशीतला-प्रसादमिश्रेभ्यः सम्प्राप्तवन्तः श्लोकसंस्काररचनां च समधिगतवन्तः तत्रत्यसाहित्य-विभागाध्यक्षेभ्यः श्रीराममनोरथत्रिपाठिमहाभागेभ्यः। श्रीगौरीशङ्करसंस्कृतमहाविद्यालये नव्यव्याकरणं मुख्यविषयत्वेन स्वीकृत्य प्रथमातो मध्यमाश्रेणीपर्यन्तं सर्वाः परीक्षाः सविषेशाङ्कं सर्वप्राथम्येन प्रथमश्रेण्या समुत्तीर्योच्चशिक्षार्थं वाराणस्यां सम्पूर्णानन्द-संस्कृतविश्वविद्यालयं प्रविष्टवन्तः। तत्कालीनव्याकरणविभागाध्यक्षाणां श्रीभूपेन्द्रपति-त्रिपाठिनां शीतलस्नेहच्छायायां वैयाकरणभूषणसारम् एवं शाब्दिकशिरोमणिश्रीपण्डित-कालिकाप्रसादशुक्लमहाभागानां श्रीचरणकमलसन्निधावन्यांश्च व्याकरणटीकाग्रन्थान् समधीत्य पुनश्चातिरिक्तसमये प्रतिदिनं सायं षड्ढोरावधिं[२] समुपविश्य शब्दसागर-मन्दरमतिव्याकरणविभागाध्यक्षचराणानामभिनवपाणिनीनां डॉ०रामप्रसादत्रिपाठिनां सन्निधौ भाष्यान्तव्याकरणग्रन्थानामन्येषां नव्यव्याकरणस्य पदवाक्यप्रमाणग्रन्थानां सपरिष्कारं निगूढतत्त्वबोधपुरःसरं विशेषमध्ययनं विधिवत्कुर्वाणाः शास्त्रिकक्षामीसवीयाब्दे चतुःसप्तत्युत्तरैकोनविंशतिशते विश्वविद्यालये सर्वोत्तमाङ्कैः सह समुत्तीर्य प्रथमं स्थानं लब्धवन्तः। आचार्यकक्षायामधीयानाः सन्तो भारतसर्वकारद्वारा प्रायोजितास्वखिल-भारतीयप्रतियोगितासु सर्वानपि प्रतियोगिनः प्रतिभया परिभाव्य वादविवादान्त्याक्षरी-समस्यापूर्तिव्याकरणसाङ्ख्येतिपञ्चप्रतियोगितासु प्रथमं स्थानं लब्धवन्तः। तत्र पुरस्कर्तुं स्वयं समागता तत्कालीना प्रधानमन्त्रिणी श्रीमतीन्दिरागान्धी पञ्चपुरस्कारैः सहोत्तरप्रदेशस्य कृते विशालरजतपट्टिकारूपं चलवैजयन्तीपुरस्कारमपि ससाधुवादमदात्। ईसवीयाब्दे षट्सप्तत्युत्तरैकोनविंशतिशत आचार्यकक्षां विश्वविद्यालयस्य सर्वेष्वपि विभागेषु सर्वाधिकाङ्कैः

[१] एकपाठिन एकसन्धिग्राहिणो वा।

[२] कालाध्वनोरत्यन्तसंयोगे (पा०सू० २.३.५) इत्यनेन द्वितीया।

सह समुत्तीर्य विशिष्टां कीर्तिमाभजन्त्यः स्वामिवर्येभ्यो गिरिधरलालाभिधेयेभ्यः सप्तस्वर्णपदकानि कुलाधिपतिस्वर्णपदकं चामिलन्। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्यैव पी०एच्०डी० (विद्यावारिधिः) इत्युपाधये अध्यात्मरामायणेऽपाणिनीयप्रयोगाणां विमर्शः इति विषये शोधप्रबन्धमपि लिखितवन्तोऽनुसन्धानविधया केवलैस्त्रयोदशभिरेव दिवसैः। तथा च पाणिनीयाष्टाध्याय्याः प्रतिसूत्रं शाब्दबोधसमीक्षा इति विषये द्विसहस्रपृष्ठात्मकं शोधप्रबन्धं प्रणीय तस्मादेव विश्वविद्यालयतो डी०लिट्० (वाचस्पतिः) इत्युपाधिमप्यलभन्त।

विरक्तदीक्षोत्तरजीवनम् – १९८३ ईसवीयाब्दे कार्त्तिकशुक्लपौर्णमास्यां श्रीरामानन्दवैष्णवसम्प्रदाये विरक्तवेषो गृहीतो गिरिधरलालमिश्रचरणैः श्रीमदलर्कपुरीप्रयागनिवासिभ्यः फलाहारिसञ्ज्ञया प्रसिद्धेभ्यः श्रीश्रीरामचरणदासमहाभागेभ्यः। यद्यपि मिश्रचरणैः श्रीराममन्त्रो विरक्तवैष्णवसम्प्रदायदीक्षा च गृहीते जीवनस्याष्टम एव वर्षे श्रीमद्रामवल्लभाशरणमहाराजचरणारविन्दप्रमुखकृपापात्रेभ्यः श्रीमदीश्वरदासमहाभागेभ्यो विरक्तवेषसमकालमेव पञ्चसंस्कारविधिनाऽमीषां पूर्वाश्रमौपचारिकताऽपीतिहासपृष्ठं समधिशिश्रिये। अतोऽच्युतगोत्राणामेषां महात्मनां रामभद्रदासः इति नाम ख्यातिमगमत्। रामभद्रदासाः समष्टिमङ्गलाय १९८७ ईसवीये तुलसीजयन्त्यां मन्दाकिनीविमलसलिलासक्त आमोदवने श्रीतुलसीपीठस्य प्रामाणिकीं प्रतिष्ठां विधाय श्रीचित्रकूटतुलसीपीठाधीश्वरपदालङ्कृता जाताः। नारदभक्तिसूत्र ईशाद्येकादशोपनिषत्सु श्रीमद्भगवद्गीतायां ब्रह्मसूत्रे च श्रीराघवकृपाभाष्यं विलिख्य प्रस्थानत्रयीभाष्यकारत्वेन प्रथितयशसः सारस्वत्या प्रतिभया योग्यतया स्वामिवर्यान् श्रीरामानन्दसम्प्रदायस्य जगद्गुरुपदे काशीविद्वत्परिषत्सम्मत्याऽखाड़ापरिषन्महान्तो मनीषिणो गण्यमान्या विद्वांसो जगद्गुरवश्च समवेतघोषणेन ससम्मानं प्रतिष्ठापितवन्तोऽभिषेचितवन्तश्च। एवं हि स्वामिवर्याः श्रीचित्रकूटतुलसीपीठाधीश्वरप्रस्थानत्रयीभाष्यकारजगद्गुरुरामानन्दाचार्यस्वामिरामभद्राचार्या इत्याख्येन भुवि लब्धयशोराशयः सततमेव विकलाङ्गजनतोपासनायां समष्टिहिताय राष्ट्रसेवायै च समर्पितजीवना राजमाना जाताः।

विशेषः – निगूढानां शास्त्रविषयाणामवगमनं नवनवोन्मेषशालिनी प्रतिभाकल्पनाकमनीयता तर्ककर्कशमस्तिष्कं प्रौढपाण्डित्यं गुरुजने विनम्रता नैष्ठिकं ब्रह्मचर्यं श्रीरामोपासनारुचिश्चामीषां देशिकवर्याणां निसर्गसिद्धा विशेषता। काव्यरचनापाटवं त्वमीषां सार्धत्रिवर्षावस्थायामेव सुस्पष्टमुद्भूतम्। राष्ट्रभाषासंस्कृतभाषयोरप्याशुकवित्वं सहजसिद्धम्। एभिः श्रीचित्रकूटे नव पयोव्रतान्यापि विशालानि षण्मासपर्यन्तानि विहितानि। शरीरस्य वसिष्ठगोत्रीयत्वादिमे शिशुरूपराघवमेव समुपासते लालयन्ति च वात्सल्यभावनया। देवतुल्यसमाराध्या अस्माकं सद्गुरवः जगद्गुरुस्वामिरामभद्राचार्यमहाराजाः शाश्वतं भासन्तामिह लोके यावच्चन्द्रदिवाकराविति मङ्गलं कामयमानास्तेषां

चरणकमलयोर्पर्यन्तश्च प्रणतीः कथयन्त इदं विरमामः –

रामभद्रो हि जानाति रामभद्रसरस्वतीम्।
रामभद्रो हि जानाति रामभद्रसरस्वतीम्॥

ग्रन्थसूची – जगद्गुरुरामभद्राचार्यप्रणीताः प्रमुखग्रन्था अधोलिखिताः सन्ति।

- पद्यकृतयः
  - महाकाव्यानि
    * अरुन्धती (१९९४)। हिन्द्याम्।
    * श्रीभार्गवराघवीयम् (२००२)। संस्कृते। हिन्द्यनुवादसहितम्।
    * अष्टावक्र (२०१०)। हिन्द्याम्।
    * गीतरामायणम् (२०११)। संस्कृते। हिन्द्यनुवादसहितम्।
  - खण्डकाव्यानि
    * काका विदुर (१९८०)। हिन्द्याम्।
    * माँ शबरी (१९८२)। हिन्द्याम्।
    * आजादचन्द्रशेखरचरितम् (१९९६)। संस्कृते। हिन्द्यनुवादसहितम्।
    * लघुरघुवरम् (२००१)। संस्कृते। हिन्दीपद्यगद्यानुवादसहितम्।
    * श्रीसरयूलहरी (२००१)। संस्कृते। हिन्द्यनुवादसहिता।
    * भृङ्गदूतम् (२००४)। संस्कृते। हिन्द्यनुवादसहितम्।
    * अवध कै अँजोरिया (२०११)। अवध्याम्।
    * श्रीसीतासुधानिधिः (२०११)। संस्कृते। हिन्द्यनुवादसहितः।
  - पत्रकाव्यम्
    * कुब्जापत्रम् (२००३)। संस्कृते। हिन्द्यनुवादसहितम्।
  - गीतकाव्यानि
    * राघवगीतगुञ्जन (१९९१)। हिन्द्याम्।
    * भक्तिगीतसुधा (१९९३)। हिन्द्याम्।
  - रीतिकाव्यम्
    * श्रीसीतारामकेलिकौमुदी (२००८)। ब्रजभाषायाम्। हिन्द्यनुवादसहिता।
  - शतककाव्यानि

* आर्याशतकम् (१९९६)। संस्कृते। हिन्द्यनुवादसहितम्।
* श्रीगणपतिशतकम् (१९९६)। संस्कृते। हिन्द्यनुवादसहितम्।
* श्रीचण्डीशतकम् (१९९६)। संस्कृते। हिन्द्यनुवादसहितम्।
* श्रीराघवेन्द्रशतकम् (१९९६)। संस्कृते। हिन्द्यनुवादसहितम्।
* श्रीरामभक्तिसर्वस्वम् (१९९७)। संस्कृते। हिन्द्यनुवादसहितम्।
* श्रीराघवचरणचिह्नशतकम् (२००१)। संस्कृते। हिन्द्यनुवादसहितम्।
* श्रीजानकीचरणचिह्नशतकम् (२००१)। संस्कृते। हिन्द्यनुवादसहितम्।
* मन्मथारिशतकम् (२००७)। संस्कृते। हिन्द्यनुवादसहितम्।
* श्रीरघुनाथशतकम् (२०११)। संस्कृते। हिन्द्यनुवादसहितम्।

– स्तोत्रकाव्यानि

* श्रीहनुमच्चत्वारिंशिका (१९८३)। संस्कृते। हिन्द्यनुवादसहिता।
* श्लोकमौक्तिकम् (१९८३)। संस्कृते। हिन्द्यनुवादसहितम्।
* मुकुन्दस्मरणम् (१९९६)। संस्कृते। हिन्द्यनुवादसहितम्।
* श्रीजानकीकृपाकटाक्षस्तोत्रम् (१९९६)। संस्कृते।हिन्द्यनुवादसहितम्।
* भक्तिसारसर्वस्वम् (१९९७)। संस्कृते। हिन्द्यनुवादसहितम्।
* श्रीगङ्गामहिम्नःस्तोत्रम् (१९९८)। संस्कृते। हिन्द्यनुवादसहितम्।
* नमोराघवायाष्टकम् (२००१)। संस्कृते। हिन्द्यनुवादसहितम्।
* श्रीचित्रकूटविहार्यष्टकम् (२००१)। संस्कृते। हिन्द्यनुवादसहितम्।
* श्रीरामवल्लभास्तोत्रम् (२००१)। संस्कृते। हिन्द्यनुवादसहितम्।
* श्रीराघवभावदर्शनम् (२००२)। संस्कृते। हिन्द्यनुवादसहितम्।
* चरणपीडाहराष्टकम् (२००८)। संस्कृते। हिन्द्यनुवादसहितम्।
* सर्वरोगहराष्टकम् (२०१०)। संस्कृते। हिन्द्यनुवादसहितम्।

– सुप्रभातकाव्यम्

* श्रीसीतारामसुप्रभातम् (२००९)। संस्कृते। हिन्द्यनुवादसहितम्।

– वृत्तिकाव्यम्

* अष्टाध्याय्याः प्रतिसूत्रं शाब्दबोधसमीक्षा (१९९७)। संस्कृते।

• नाटके

– उत्साह (१९९६)। हिन्द्याम्।

– श्रीराघवाभ्युदयम् (१९९६)। संस्कृते। हिन्द्यनुवादसहितम्।

- गद्यकृतयः

  – प्रस्थानत्रय्यां श्रीराघवकृपाभाष्याणि

    * श्रीब्रह्मसूत्रेषु श्रीराघवकृपाभाष्यम् (१९९८)। संस्कृते हिन्द्यां च।
    * श्रीमद्भगवद्गीतासु श्रीराघवकृपाभाष्यम् (१९९८)। संस्कृते हिन्द्यां च।
    * कठोपनिषदि श्रीराघवकृपाभाष्यम् (१९९८)। संस्कृते हिन्द्यां च।
    * केनोपनिषदि श्रीराघवकृपाभाष्यम् (१९९८)। संस्कृते हिन्द्यां च।
    * माण्डूक्योपनिषदि श्रीराघवकृपाभाष्यम् (१९९८)। संस्कृते हिन्द्यां च।
    * ईशावास्योपनिषदि श्रीराघवकृपाभाष्यम् (१९९८)। संस्कृते हिन्द्यां च।
    * प्रश्नोपनिषदि श्रीराघवकृपाभाष्यम् (१९९८)। संस्कृते हिन्द्यां च।
    * तैत्तिरीयोपनिषदि श्रीराघवकृपाभाष्यम् (१९९८)। संस्कृते हिन्द्यां च।
    * ऐतरेयोपनिषदि श्रीराघवकृपाभाष्यम् (१९९८)। संस्कृते हिन्द्यां च।
    * श्वेताश्वतरोपनिषदि श्रीराघवकृपाभाष्यम् (१९९८)। संस्कृते हिन्द्यां च।
    * छान्दोग्योपनिषदि श्रीराघवकृपाभाष्यम् (१९९८)। संस्कृते हिन्द्यां च।
    * बृहदारण्यकोपनिषदि श्रीराघवकृपाभाष्यम् (१९९८)। संस्कृते हिन्द्यां च।
    * मुण्डकोपनिषदि श्रीराघवकृपाभाष्यम् (१९९८)। संस्कृते हिन्द्यां च।

  – अन्ये श्रीराघवकृपाभाष्ये

    * श्रीनारदभक्तिसूत्रेषु श्रीराघवकृपाभाष्यम् (१९९१)। संस्कृते हिन्द्यां च।
    * श्रीरामस्तवराजस्तोत्रे श्रीराघवकृपाभाष्यम् (२०००)। संस्कृते हिन्द्यां च।

  – हिन्दीभाष्याणि

    * श्रीहनुमानचालीसायां महावीरी टीका (१९८३)। हिन्द्याम्।
    * श्रीरामचरितमानसे भावार्थबोधिनी टीका (२००५)। हिन्द्याम्।
    * श्रीभक्तमाले मूलार्थबोधिनी टीका (२०१४)। हिन्द्याम्।

  – विमर्शौ

    * अध्यात्मरामायणेऽपाणिनीयप्रयोगानां विमर्शः (१९८१)। संस्कृते।
    * श्रीरासपञ्चाध्यायीविमर्शः (२००७)। हिन्द्याम्।

  – प्रवचनसङ्ग्रहाः

    * मानस में तापस प्रसंग (१९८२)। हिन्द्याम्।

* सुग्रीव का अघ और विभीषण की करतूति (१९८५)। हिन्द्याम्।
* श्रीगीतातात्पर्य (१९८५)। हिन्द्याम्।
* सनातनधर्म की विग्रहस्वरूप गोमाता (१९८८)। हिन्द्याम्।
* श्रीतुलसीसाहित्य में कृष्णकथा (१९८८)। हिन्द्याम्।
* मानस में सुमित्रा (१९८९)। हिन्द्याम्।
* सीता निर्वासन नहीं (१९९०)। हिन्द्याम्।
* प्रभु करि कृपा पाँवरी दीन्ही (१९९२)। हिन्द्याम्।
* परम बड़भागी जटायु (१९९३)। हिन्द्याम्।
* श्रीसीताराम विवाह दर्शन (२००१)। हिन्द्याम्।
* तुम पावक मँह करहु निवासा (२००४)। हिन्द्याम्।
* अहल्योद्धार (२००६)। हिन्द्याम्।
* हर ते भे हनुमान (२००८)। हिन्द्याम्।
* सत्य रामप्रेमी श्रीदशरथ (२००९)। हिन्द्याम्।
* वेणुगीत (२०११)। हिन्द्याम्।

# आचार्यचरणानां विरुदावली

॥ श्रीसीतारामपदपद्ममकरन्दमधुव्रतश्रीसम्प्रदायप्रवर्तकसकलशास्त्रार्थमहार्णवमन्दरमति-
श्रीमदाद्यजगद्गुरुरामानन्दाचार्यचरणारविन्दचञ्चरीकाः समस्तवैष्णवालङ्कारभूता
आर्षवाङ्मयनिगमागमपुराणेतिहाससन्निहितगम्भीरतत्त्वान्वेषणतत्पराः
पदवाक्यप्रमाणपारावारीणाः साङ्ख्ययोगन्यायवैशेषिकपूर्वमीमांसावेदान्तनारदशाण्डिल्य-
भक्तिसूत्रगीतावाल्मीकीयरामायणभागवतादिसिद्धान्तबोधपुरःसरसमधिकृताशेष-
तुलसीदाससाहित्यसौहित्यस्वाध्यायप्रवचनव्याख्यानपरमप्रवीणाः
सनातनधर्मसंरक्षणधुरीणाश्चतुराश्रमचातुर्वर्ण्यमर्यादासंरक्षणविचक्षणा
अनाद्यविच्छिन्नसद्गुरुपरम्पराप्राप्तश्रीमत्सीतारामभक्तिभागीरथीविगाहनविमलीकृतमानसाः
श्रीमद्रामचरित्रमानसराजमरालाः सततं शिशुराघवलालनतत्पराः
समस्तप्राच्यप्रतीच्यविद्याविनोदितविपश्चितो राष्ट्रभाषागीर्वाणगिरामहाकवयो विद्वन्मूर्धन्याः
श्रीमद्रामप्रेमसाधनाधनधन्याः श्रोत्रियब्रह्मनिष्ठाः प्रस्थानत्रयीभाष्यकारा महामहोपाध्याया
वाचस्पतयो जगद्गुरुरामभद्राचार्यविकलाङ्गविश्वविद्यालयस्य जीवनपर्यन्तकुलाधिपतयः
श्रीचित्रकूटस्थमन्दाकिनीविमलपुलिननिवासिनः श्रीतुलसीपीठाधीश्वरा धर्मचक्रवर्तिनः
श्रीमज्जगद्गुरुरामानन्दाचार्या अनन्तश्रीसमलङ्कृतस्वामिरामभद्राचार्यमहाराजा
विजयन्तेतराम् ॥

# प्रशस्तिवाचः

## नवीना संशोधनदिक्

– प्राचार्या माधवशर्माणो देशपाण्डे इत्युपाह्वाः

१९८१ ईसवीसंवत्सरे सम्पूर्णानन्दसंस्कृतविश्वविद्यालये विद्यावारिधिउपाधिप्राप्तये महापण्डितै रामभद्राचार्यैर्लिखितः प्रबन्धः अध्यात्मरामायणेऽपाणिनीयप्रयोगाणां विमर्शः इति नाम्ना सम्प्रति तच्छिष्येण पण्डितनित्यानन्दमिश्रेण संस्कृत्य प्राकाश्यं नीयत इति ज्ञात्वा नितरां मोदते मे चेतः। व्यासवाल्मीकिप्रभृतिभिर्मुनिभिर्विरचितेषु महाभारतरामायणादि-महाकाव्येषु सर्वत्रापाणिनीयाः प्रयोगा दृश्यन्त इति नाविदितं विदुषाम्। तेषामुपपत्तिः कथं दर्शयितव्येति चिन्तां कुर्वद्भिः प्राचीनैरेते प्रयोगा यद्यप्यपाणिनीयास्तथाऽपि तेषामार्षत्वात्तेषु दोषो नारोपणीयः किन्तु तेषां यद्यप्यार्षत्वात्साधुत्वं तथाऽपि न देवचरितं चरेत् इतिवत् न ऋषिचरितं चरेत् इति नियमेनार्षप्रयोगाणां लौकिकैर्नानुकरणं कर्तव्यमित्यभिप्रायो दर्शितः। अन्ये तु –

यान्युज्जहार माहेन्द्राद्व्यासो व्याकरणार्णवात्।<br>
पदरत्नानि किं तानि सन्ति पाणिनिगोष्पदे॥

इत्यूचुः। अनया दिशा पाणिनीयव्याकरणादपि प्राचीनतराणि माहेन्द्रादिव्याकरणान्यासन् यान्यनुसृत्य व्यासादिभिः कृताः शब्दप्रयोगा अपाणिनीया अपि साधव एव तेषां च साधुत्वं पाणिनिं प्रमाणीकृत्य न परीक्षितव्यमिति केषाञ्चिन्मतम्। अध्यात्मरामायण-स्थानीयानपाणिनीयप्रयोगानधिकृत्य रामभद्राचार्यैर्लिखितोऽयमधुना प्रकाश्यमानः प्रबन्धः स्वीयं वैशिष्ट्यमावहति। अस्य ग्रन्थस्यानया दिशा परीक्षणं न केनापि कृतपूर्वम्। काव्येषु कोमलधियो वयमेव नान्ये तर्केषु कर्कशधियो वयमेव नान्ये इति पण्डितराजजगन्नाथ-सरणिमनुकुर्वद्भी रामभद्राचार्यैः काव्यविषये शास्त्रविषये च बहु पराक्रान्तम्। अस्मिन् प्रबन्धे ते सर्वत्र प्राचीनां निरुक्तव्याकरणादिशास्त्रपरम्परामनुसृत्य शब्दव्युत्पत्त्यादिप्रदर्शनं कुर्वन्ति यथा तैः स्वीयप्रबन्धप्रस्तावनायाम् अथर्वशब्दः अथशब्देन अर्वशब्दं संयोज्य व्युत्पादितः। नवीने विषये प्राचीना शास्त्रसरणिः कथमुपयुज्येतेत्यस्यायं प्रबन्धः परमं

निदर्शनम्। आपाततोऽपाणिनीयत्वेन प्रतीयमानानां प्रयोगाणामेते रीत्यन्तरेण पाणिनीयत्वं साधयन्ति तदेतेषां सर्वतन्त्रस्वतन्त्रत्वं प्रमाणयति। एतद्ग्रन्थरत्नं प्रणीय रामभद्राचार्यैर्व्याकरण-शास्त्रस्य नवीना संशोधनदिगुद्घाटिता। अतस्ते सर्वथा धन्यवादानर्हन्ति। इति शम्।

माधवशर्मा देशपाण्डे इत्युपाह्वः
३१/०८/२०१४
प्राचार्यः, मिशिगन्विश्वविद्यालयः
ऍन् आर्बर्, मिशिगन्, यू.एस्.ए.

## अभिनन्दनवाचः

– देवर्षिकलानाथशास्त्रिणः

सकलशास्त्रपारगैः संस्कृतवाङ्मयवारिधिमन्दरायमाणैः पदवाक्यप्रमाणपताका-वाहकैः सरस्वतीपुत्रैस्तुलसीपीठाधिपतिभिर्जगद्गुरुरामानन्दाचार्यमहालङ्कारभूतैर्महा-महोपाध्यायैः श्री१०८स्वामिश्रीरामभद्राचार्यैः पूर्वाश्रमे विलिखितं शोधप्रबन्धं वीक्ष्य सुमहान्तं प्रमोदमन्वभवम्। यद्यपि शोधप्रबन्धस्यास्य प्रधानविषयत्वेन तैरध्यात्म-रामायणीयास्ते प्रयोगा गहनविमर्शदृशा परीक्षिता ये अपाणिनीयाः इति व्यपदिश्यन्ते किन्त्वेतेन विमर्शव्याजेन तैः पाणिनीयस्य बहवः सिद्धान्ताः सूक्ष्मदृशा विवेचितास्तेषु तेषु च प्रसङ्गेष्वनेके संस्कृतग्रन्थाः श्रीतुलसीदासग्रन्था अन्ये च शास्त्रविधयोऽलौकिकविश्लेषण-पद्धत्याऽनुशीलिता इति व्यापकस्य शोधप्रबन्धस्य फलकं संवृत्तम्।

बहुमूल्यस्यास्य विमर्शग्रन्थस्य बहोः कालादनन्तरं ससम्पादनमुपस्थापनं कुर्वाणो बह्वायामिप्रतिभाधनः श्रीनित्यानन्दमिश्रोऽस्माकं शतशः साधुवाचां पात्रमिति श्रीरामभद्राचार्यचरणान् सप्रश्रयं प्रणमन् सभाजयामि श्रीनित्यानन्दमिश्रं धन्यवादैः।

अध्यात्मरामायणवाक्प्रयोगानाधाररूपेण सकृद्गृहीत्वा।
यो व्यापकं पाणिनिशब्दशास्त्रं ममन्थ साधुत्वपरीक्षणाय॥
स्थले स्थले प्रातिभदृष्टिशोधैः प्रातिष्ठिपन्नूतनशास्त्रयुक्तीः।
गभीरमन्वेषणकृत्यमित्थं शोधप्रबन्धे निबबन्ध सम्यक्॥
शोधोपाधिं गिरिधरवरो मिश्रलक्ष्मा गृहीत्वा
सन्न्यस्तोऽभूदथ च तुलसीपीठकं चित्रकूटे।
पीठाधीशो विमलधिषणो रामभद्रेति नाम्ना
सम्भूष्यात्र प्रथयति नवं विश्वविद्यालयं तम्॥

शोधग्रन्थं तमिह गहनप्रौढशैलीनिबद्धं
नित्यानन्दः कुशलधिषणः साधु सम्पाद्य धत्ते।
सम्प्रेक्षायै सकलविदुषां सन्निधौ देववाणी-
ग्रन्थस्यास्य प्रमुदितहृदा स्वागतं व्याहरामः॥

देवर्षिकलानाथशास्त्री
१४/१०/२०१४
अध्यक्षचरः, राजस्थानसंस्कृताकादमी
निदेशकः, संस्कृतशिक्षाभाषाविभागः, राजस्थानसर्वकारः
प्रधानसम्पादकः, भारती (संस्कृतमासिकपत्रिका)
सदस्यः, संस्कृतायोगः, भारतसर्वकारः
अध्यक्षः, आधुनिकसंस्कृतपीठम्, ज०रा०रा०संस्कृतविश्वविद्यालयः
जयपुरम्, भारतम्


# प्रशस्तिपद्यानि

– शतावधानिनो रा.गणेशाः

इयमिह मदुपज्ञा काचिल्पीयसी तथाऽपि भक्तिमकरन्दभरनम्रा सुवर्णमयी च प्रशस्तिपद्यसुमनोमालिका। अनया प्रज्ञाविलोकनवतां तत्र भवतां महतां सतां श्रीश्रीरामभद्राचार्यमस्करिणां मत्परतया वरिवस्या भवेदित्याशासे। चित्रावहा खलु श्रीचरणानां सारस्वतसाधना शास्त्रे काव्ये च। अतो हि चित्रकवितैव विहिताऽत्र मया। ईदृशानां वैरल्येन च साम्प्रतिके युगे प्रायेण कामपि प्रतिनवां सुषमामर्हतीयं मम वागुपक्रमप्रक्रियेति मन्ये। अन्यच्च कवितल्लजा नैके ध्वन्यध्वन्यध्वनीनाः खलु कुर्युरन्यया चानन्यया रसमयरीत्या पद्यानीति मत्वा मदीयमिदं तार्तीयकं वर्त्म समादृतम्।


गोमूत्रिकाबन्धः—

रामभद्रयतिर्जीयाच्चलुकीकृतवाग्विधिः।
धीमद्भद्रकृतिर्भूयाद्वालुकीकृतवारिधिः॥




गतप्रत्यागतम्—

जय हे यजने ध्याने भजनेऽजभणेक्षणे।
महिमन् हिमहस्तोह स्तवनावस्त शस्त्यश॥





पद्मबन्धः—

नमस्ते मनसा भासा नव्यकाव्यनयप्रिय।
नभश्शोभनसत्त्वास नन्दनन्दनवल्लव॥





मृदङ्गबन्धः—

भजे महितमादर्शं व्रजेम परमादरम्।
विन्देम गरिमागल्भं वन्देमहि तमागमम्॥




पुष्पगुच्छबन्धः—

अलोकलोक्यलोकनं दयाऽभयास्मयाग्रहं वचोरुचोऽधिचोदनं कवित्वविव्त्वविग्रहम्।
श्रयाम्ययाम्ययाजनं नमामि मापमास्पृहं भवेऽभवेड्यवेतनं जनावनात्मना महम्॥




शतावधानी रा.गणेशः
२६/१०/२०१४
बेङ्गलूरुनगरम्, भारतम्

## अपि अपि रक्षति डुकृञ्करणे

– पोटोपाख्या हिमांशवः

भज गोविन्दं भज गोविन्दं गोविन्दं भज मूढमते।
सम्प्राप्ते सन्निहिते काले नहि नहि रक्षति डुकृञ्करणे॥

– चर्पटपञ्जरिकास्तोत्रे १

आदिशङ्कराचार्य उद्घोषयति नहि नहि रक्षति डुकृञ्करणे इति। अस्मिन् ग्रन्थे जगद्गुरुरामभद्राचार्य उद्घोषयति अपि अपि रक्षति डुकृञ्करणे इति। अस्मिन् ग्रन्थे जगद्गुरुरामभद्राचार्यः शुष्कं व्याकरणं रामरसेनौतप्रोतं कृत्वा पाठकायोपहरति। एकैकः शब्दो रामरसेन लिप्तोऽस्ति। व्याकरणव्याजेन जगद्गुरुरामभद्राचार्यो रामचन्द्रेणास्मान्मुक्तिं प्रदापयति। अपि अपि रक्षति डुकृञ्करणे।

संस्कृतज्ञानां गोविन्दलालमेहतामहाराजानां दौहित्रः
हिमांशुः पोटा
१२/८/२०१५
प्राचार्यः, अभियान्त्रिकीसूचनाप्रौद्योगिकीविद्यालयः
ऑस्ट्रेलियारक्षाबलाकादमी
न्यूसाऊथ्वेल्स्विश्वविद्यालयः
कॅनबेरा, ऑस्ट्रेलिया

## लोकोपकारकोऽनुसन्धानग्रन्थः

– बलदेवानन्दसागराः

कतिपयदिवसेभ्यः प्राक् स्वसुहृदा हिमांशुपोटावर्येण सार्धं वैद्युतान्तर्जालमाध्यमेन सम्भाषमाणोऽहं जगद्गुरुवर्याणां श्रीमतां रामानन्दाचार्याणां रामभद्राचार्यस्वामिपादानां विषये श्रीमद्भगवद्गीताया दशमाध्यायस्य श्लोकमिमम्–

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्॥

– भ०गी० १०.४१

उद्धरन्न्यगादिषं यदेता विभूतयः मानवसमाजस्य कल्याणार्थं समुद्धारार्थञ्च जगती-तलेऽवतरन्ति।

अध्यात्मरामायणेऽपाणिनीयप्रयोगाणां विमर्शः इति महतो लोकोपकारस्यानुसन्धान-ग्रन्थस्य रचनायां प्रकाशने च गुरुशिष्ययोः परिनिष्ठितप्रयासा नूनं वर्तमानानां भाविनाञ्च जनानां कृते प्रेरणास्पदीभूताः सेत्स्यन्तीति मे द्रढीयान् विश्वासः।

अनयोः सर्वविधानामयहेतोः भगवन्तं राघवं प्रार्थये।

विदुषां वशंवदः
बलदेवानन्दसागरः
२१/८/२०१५
महासचिवः, भारतीयसंस्कृतपत्रकारसङ्घः
देहलीनगरम्, भारतम्

# प्रशंसा

शोधप्रबन्धपरिशीलनतः समन्तात्
सञ्जायते मतमिदं मम युक्तियुक्तम्।
शोधप्रबन्धमकरन्दमधुव्रतोऽयं
विद्वद्भिमृग्यविरुदं लभतामिदानीम्॥

कालिकाप्रसादशुक्लः
१४/१०/८१

आचार्योऽध्यक्षश्च
व्याकरणविभागः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

# आलोकनम्

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये विद्यावारिधिः (पी-एच्.डी.) इत्युपाधिप्राप्तये गिरिधरलालमिश्रः (प्रज्ञाचक्षुः) अध्यात्मरामायणेऽपाणिनीयप्रयोगाणां विमर्शः इति विषयमधिकृत्य मम निर्देशने शोधप्रबन्धं प्रस्तुतवान्। शोधप्रबन्धोऽयं मया सम्यगालोकितः। परीक्षणार्होऽयमिति संस्तौति –

दिनाङ्कः २४/९/८१

भूपेन्द्रपतित्रिपाठी
भूतपूर्वव्याकरणविभागाध्यक्षः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

# आभारप्रदर्शनम्

(१)

उर्वीं गुर्वीं प्रकुर्वन्निजपदकमलान्मेखलां यज्ञसूत्रं
बिभ्राणः शिक्षमाणः सनियमनिगमां बाणविद्यां वसिष्ठात्।
कन्दश्यामोऽभिरामो विहितजनमनस्सद्मवासो वसानः
पातु श्रीरामचन्द्रस्त्वचमथ रुचिरां रौरवीं रौरवान्माम्॥

(२)

साकार जगदाधार कृष्ण कृष्णाजिनाम्बर।
तुष्टसान्दीपने चित्तं ज्ञानदीपेन दीपय॥

(३)

मन्दरौ भवपाथोधेः काशीकैलासमन्दिरौ।
रातां रामे रतिं रम्यां भवानीभूतभावनौ॥

(४)

भागीरथीविमलवीचिविलासरम्या
वृन्दारकाविबुधवन्दिवरप्रणम्या।
श्रीविश्वनाथपदपङ्कजपूतरेणु-
र्वाराणसी विजयते जनकामधेनुः॥

(५)

दिव्योल्लसद्गिरिधरान्वितगाङ्गधारा
चण्डांशुजासितजलाश्रितचारुगीता।
बिभ्रत्सुगुप्तसलिला जनरञ्जना सा
धारात्रयी लसति पूतमनःप्रयागे॥

(६)

श्यामप्रिया श्याममुखप्रसूता जगत्कृते पार्थमिषेण भूता।
श्यामावदाता धृतशास्त्रजाता मन्मानसे सा विचकास्तु गीता॥

(७)

मुखात्पूज्यगोस्वामिनः सम्प्रवृत्ते भवानीपतेः काकवर्यस्य वित्ते।
लसद्रामसीतायशोवारिपूरे मनो राजहंसो भवेन्मानसे मे॥

(८)

यत्प्रेरणा समभवन्मम जीवनाय
पीयूषयूषविलसन्नवचन्द्रलेखा।
तां रामचन्द्रचरणाम्बुजचञ्चरीकां
गीतां भजे बहुमतां भगिनीं स्वकीयाम्॥

(९)

श्रीराजदेवं पितरं शचीं तथा स्वां मातरं पूज्यपितामहं तथा।
स्वभ्रातरं ज्येष्ठमहं रमापतिं नमामि पुष्टोऽस्मि शिशुर्यदाशिषा॥

(१०)

श्रीचन्द्रकान्तः सशशाङ्कशेखरो हिमांशुरम्यो महितो मनीषया।
सदोम्प्रकाशः भवतात्प्रसन्नधीर्यत्सेवयाऽहं विपदो न्यवारयम्॥

(११)

पिण्डीजनिं सज्जनशिष्यवश्यं विद्वद्वरं शाब्दिकपूज्यपादम्।
चरित्रमूर्तिं स्वगुरुं सुशीलं त्रिपाठिभूपेन्द्रपतिं प्रपद्ये॥

(१२)

अध्यात्मरामायणशब्दजातमपाणिनीयं यदनुग्रहेण।
व्यमर्शयं स्वीयनिदेशकं तं सदैव भूपेन्द्रपतिं स्मरामि॥

(१३)

यदाशिषा नष्टविलोचनोऽप्यहं शोधप्रबन्धाब्धिमहोऽवतीर्णवान्।
निर्देशकं स्वं सरलं त्रिपाठिनं नमामि भूपेन्द्रपतिं समादरात्॥

(१४)

शब्दाटवीसिंहमदभ्रबुद्धिं शिष्यप्रियं मञ्जुलभाषणञ्च।
त्रिपाठिनं शास्त्रसुपाठिनं तं रामप्रसादं गुरुमानतोऽस्मि॥

(१५)

नव्यप्राच्यसुशब्दशासनविधाप्रारब्धसङ्काययो-
राध्यक्ष्यं कलयन्मुदा सुरगवीश्रीविश्वविद्यालये।
श्रीराधाचरणारविन्दमधुपो वैदुष्यभूषान्वितो
नित्यं शुक्लवरो गुरुर्विजयते वात्सल्यरत्नाकरः॥

(१६)

शब्दाटवीकेसरिणं महामतिं छात्त्रप्रियं शिष्यदयावशंवदम्।
कविं च शुक्लं प्रणमामि कालिकाप्रसादमार्यं स्वगुरुं मुहुर्मुहुः॥

(१७)

दोषाः शोधप्रबन्धे चेन्ममैते नष्टचक्षुषः।
गुणाश्चेत्परिलोक्येरन्मद्गुरूणां च ते स्फुटम्॥

(१८)

प्रायः प्रबन्धेऽत्र विमृश्य बुद्ध्या मयैव भावा निहिताः समग्राः।
त्रुटिर्यदि स्यान्मनुजस्वभावान्मत्वा शिशुं तां सुधियः क्षमन्ताम्॥

(१९)

हिन्द्युदाहरणं दत्तं मौलिकत्वान्मया क्वचित्।
तद्दृष्ट्वा चापलं क्षान्त्वा भावं गृह्णन्तु साधवः॥

(२०)

अध्यायत्रितये चास्मिन् बहिर्भूताश्च पाणिनेः।
शब्दाः स्वीयोपपत्त्या च यथाबुद्धि समाहिताः॥

(२१)

गतदृक्स्वल्पबुद्धिश्च शास्त्रसाधनवर्जितः।
प्रयासमाचरं चैनं दृष्ट्वा नन्दन्तु सज्जनाः॥

(२२)

निरीक्ष्य भावुका बन्धं परीक्षन्तां परीक्षकाः।
सकृन्मां करुणादृष्ट्या रामभद्रोऽपि वीक्षताम्॥

(२३)

मद्भावान् परिधाप्य वर्णवसनं शोधप्रबन्धेऽत्र हि
संस्थाप्य प्रगुणान्स्म संवितनुते रम्या च यल्लेखनी।
सेवाभावपरायणं कृतधियं वात्सल्यभाजं मुदा
स्वाशीर्भिः परिलालयामि सततं शिष्यं दयाशङ्करम्॥

(२४)

नीलनीरजसङ्काशकान्तये दिव्यकान्तये।
रामाय पूर्णकामाय जानकीजानये नमः॥

(गिरिधरलालमिश्रः प्रज्ञाचक्षुः)

# मङ्गलाचरणम्

(क)
कौसल्यास्तनपानलालसमना मन्दस्मितोऽव्यक्तवा-
गेकं ब्रह्म गुडालकावृतमुखाम्भोजो घनश्यामलः।
खेलन्पङ्क्तिरथाजिरे रघुपतिर्बालानुजैः सुन्दरो
देवो धूलिविधूसरो विजयते रामो मुकुन्दः शिशुः॥
(ख)
श्रीजानकीनयननीरजनीरजेशो
बिभ्रद्धनुर्नवतमालतनुर्नरेशः।
सौमित्रिमारुतिनुतो भरताग्रजन्मा
अस्मन्मनोवियति राजतु रामचन्द्रः॥
(ग)
श्रीरामचन्द्रमुखचन्द्रमसश्चकोरी
भूनन्दिनी च मिथिलानृपतेः किशोरी।
श्रीहंसवंशवरवैभववैजयन्ती
सा जानकी जयति मे जननी च सीता॥
(घ)
वाणीं गौरिगिरीश्वरौ गणपतिं गङ्गां च काशीं गुरून्
पाणिन्यादिमुनीन्स्वकीयपितरौ देवोपमौ सादरम्।
नत्वा सङ्कटमोचनं कपिपतिं मिश्रो वसिष्ठान्वयः
सानन्दं कुरुते शिशुर्गिरिधरः शोधं सतां तुष्टये॥
(ङ)
शर्वाण्यै गिरिशेन सन्निगदिते अध्यात्मरामायणे
शब्दाः पाणिनिशासनाद्बहिरथो ये वै प्रयुक्ताः श्रुताः।
तानेवात्र विमर्शये गुरुकृपासंलब्धया मेधया
दोषं मे परिशोधयन्तु सुधियः शोधप्रबन्धे कृतम्॥

# प्रस्तावना

वेदो वै विगलितविभेदो विखातखेदो विच्छिन्नदोषच्छेदो निरस्ताशेषभ्रमप्रमाद-विप्रलिप्साकरणापाटवादिपुंदोषशङ्कापङ्ककलङ्कावकाशो विलसितभगवल्लीलाविलासो विलसति लीलागृहीतदिव्यविग्रहस्य विहितखलगणनिग्रहस्य निखिलविभूतिसङ्ग्रहस्य सीता-परिग्रहस्य नारायणादिसहस्रपरनामलक्ष्यतावच्छेदकतया सम्प्रतीतस्य दाशरथेः सन्निहित-सच्चिदानन्दशर्मणो धर्मवर्मणो व्यापकब्रह्मणः परब्रह्मणो निश्श्वासभूतो लोकाभिरामस्य श्रीरामस्येति निखिलतार्किकविपश्चिदपश्चिममनस्विमानिता मान्यता। अतो यस्य निश्श्वसितं वेदाः (ऋ०वे०सं० सा०भा० उ०प्र० २) इत्यभियुक्तोक्तिः। भाषाविद्वांसोऽपि तुलसीदासप्रभृति-मनीषिणः कवयो मान्यतामिमां नतमस्तका मानयन्तो महीयन्ते। यथा रामचरितमानसे श्रीतुलसीदासः कथयति –

जाकी सहज श्वास श्रुति चारी। सो हरि पढ़ यह कौतुक भारी॥ [१]

– रा०च०मा० १.२०४.५

अस्यापौरुषेयताऽपि निर्विवादा। यद्यपि वैयाकरणधौरेयाः शब्दं ब्रह्मेत्यामनन्ति तथा च पातञ्जलमहाभाष्यपस्पशाह्निके प्राञ्जलिः पतञ्जलिः शब्दनित्यत्वं प्रतिपादयन् वार्त्तिकमाह सिद्धे शब्दार्थसम्बन्धे (भा०प०) इति तथाऽपि शब्दयोजनाक्रमोल्लङ्घनधिया वेदातिरिक्तवाङ्मयस्य पौरुषेयता। अर्थाद्भगवतो वेदस्य शब्दक्रमोऽपि सनातनः। यथा पूर्वं मन्त्राणां पाठस्तथाऽस्मिन् कल्पे तद्वत्पश्चाद्भाविनि कल्पेऽपि। कल्पादौ जीवैः सह स्वस्मिन्नेवोपसंहृतपूर्वो वेदोऽपि यथाऽऽनुपूर्व्या भगवतो ब्रह्मणो हृदये समुद्भासितो भगवता नारायणेन। तथा चास्य राद्धान्तस्य पुष्टौ गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ (पा०सू० १.४.५२) इति सूत्रस्य प्रयोगदिग्दर्शनावसरे कारकप्रकरणे वैयाकरणसिद्धान्त-कौमुद्यां श्रीभट्टोजिदीक्षितोऽपि लिखति यत् –

---

[१] एतद्रूपान्तरम्–यस्य स्वाभाविकः श्वासश्चतस्रः श्रुतयो मताः। स हरिः पठतीत्येतत्परमं कौतुकं स्थितम्॥ (मा०भा० १.२०४.५)।

शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत्।
आशयच्चामृतं देवान्वेदमध्यापयद्विधिम्॥
आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः।

– वै०सि०कौ० ५४०

इति। एवं च पुराणेष्वपि समाख्यायत इयमाख्यायिका। कल्पक्षये सलिलसम्प्लव-परिप्लाविते सागरीभूते निखिलेऽवनितले चराचरे च निमग्ने लग्ने च निद्रायां भगवति विष्णौ शेषशायिनि दैत्य एको ब्रह्ममुखच्युतं वेदराशिमहार्षीत्। ततो निरीक्ष्य वेदापहरणं मत्स्यरूपेण समवतीर्य हत्वा दितिसुतं पृथ्वीं शृङ्गबद्धनौकामारोप्य समुपदिश्य ब्रह्मविद्यां वैवस्वतमनवे प्रत्यर्पयामास भूयो वेदं विधात्रे भगवान् वासुदेवः। तथा च भागवते –

प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः श्रुतिगणमपनीतं प्रत्युपादत्त हत्वा।
दितिजमकथयद्यो ब्रह्म सत्यव्रतानां तमहमखिलहेतुं जिह्ममीनं नतोऽस्मि॥

– भा०पु० ८.२४.६१

अनुमानरीत्याऽपि वैदिक्यपौरुषेयताऽवगन्तुं शक्यते। यथा वेदोऽपौरुषेयोऽविच्छिन्न-गुरुपरम्परापाठक्रमत्वात्। यन्नैवं तन्नैवमेष व्यतिरेकिव्याप्तिमूलकानुमानप्रकारः। अस्य माहात्म्यं सकलशाब्दिकशिरोमणिर्दार्शनिककुञ्जरहरिः श्रीभर्तृहरिः पाणिनीयव्याकरण-दार्शनिकसंस्करणभूते स्वकीयवाक्यपदीयनामके ग्रन्थे ब्रह्मकाण्डे शब्दब्रह्मप्राप्तिमुख्य-माध्यमतया श्लोकषट्केन मुक्तकण्ठं सञ्जगौ। यथा –

प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः।
एकोऽप्यनेकवर्त्मेव समाम्नातः पृथक्पृथक्॥
भेदानां बहुमार्गत्वं कर्मण्येकत्र चाङ्गता।
शब्दानां यतशक्तित्वं तस्य शाखासु दृश्यते॥
स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः।
तमेवाश्रित्य लिङ्गेभ्यो वेदविद्भिः प्रकाशिताः॥
तस्यार्थवादरूपाणि निश्रिताः स्वविकल्पजाः।
एकत्विनां द्वैतिनां च प्रवादा बहुधा मताः॥
सत्या विशुद्धिस्तत्रोक्ता विद्यैवैकपदागमा।
युक्ता प्रणवरूपेण सर्ववादाविरोधिना॥
विधातुस्तस्य लोकानामङ्गोपाङ्गनिबन्धनाः।
विद्याभेदाः प्रतायन्ते ज्ञानसंस्कारहेतवः॥

– वा०प० १.५–१०

एवं निखिलज्ञानप्रादुर्भूतिस्थानमखिलदर्शननिधानं स्वर्गापवर्गसोपानं चतुर्वर्गसाधनं

भागवतपरमधनं वर्णाश्रमधर्मसदनं सकलकलिकलुषकदनं वदनं कमलवदनस्य वेदमिमं चतुर्धा व्याचक्रिरे वेदव्यासवर्या ऋग्यजुःसामाथर्वभेदेन। यथा भागवते –

ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः।
इतिहासपुराणं च पञ्चमो वेद उच्यते॥
तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः।
वैशम्पायन एवैको निष्णातो यजुषामभूत्॥
अथर्वाङ्गिरसामासीत्सुमन्तुर्दारुणो मुनिः।
इतिहासपुराणानां पिता मे रोमहर्षणः॥
त एत ऋषयो वेदं स्वं स्वं व्यस्यन्ननेकधा।
शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन्॥
तथैव वेदा दुर्मेधैर्धार्यन्ते पुरुषैर्यथा।
एवं चकार भगवान् व्यासः कृपणवत्सलः॥

– भा०पु० १.४.२०–२४

तत्रर्ग्वेद ऋचां सङ्ग्रह एवं च यजुर्वेदे याज्ञिकप्रयोगाणां समुपग्रह एवं सामवेदे ललित-स्तोत्रद्वारा भगवद्यशोगानपरिग्रहस्तथाऽथर्ववेदे सामरिकशास्त्रसम्प्रतिग्रहः। यद्वा मुख्या वेद-त्रयी। अत एव शिवमहिम्नःस्तोत्रादौ त्रयीत्वेन चर्चा। तद्यथा –

त्रयी साङ्ख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव॥

– शि०म०स्तो० ७

एवं च महर्षिवाल्मीकिप्रणीत आदिकाव्ये श्रीमद्वाल्मीकीयरामायणे किष्किन्धा-काण्डस्य तृतीयसर्गे भगवद्दर्शनेन शङ्कमानेन सुग्रीवेण प्रेषितं परिचयमनीषया पृष्टवन्तं धीमन्तं हनुमन्तं प्रशंसता लक्ष्मणं प्रति वदमानेन[२] विगतमानेन भगवता राघवेन्द्रेण श्रीरामचन्द्रेण त्रयाणामेव वेदानां चर्चा समचर्चि।[३] यथा –

---

[२] वदमानेन इत्यत्र भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः (पा०सू० १.३.४७) इत्यनेन भासने (भासमानेन वदता) यत्ने (उत्साहं प्रकटयता वदता) उपमन्त्रणे (लक्ष्मणं प्रति रहसि वदता) वाऽऽत्मनेपदम्।

[३] चर्चा समचर्चि इति कर्मणि प्रयोगः। षिद्भिदादिभ्योऽङ् (पा०सू० ३.३.१०४) इत्यनेन चिन्ति-पूजिकथिकुम्बिचर्चश्च (पा०सू० ३.३.१०५) इत्यनेन वा निष्पन्नस्य चर्चा शब्दस्य कर्मत्वं यतोऽनुजीविना पराधिकारचर्चा सर्वथा न कर्तव्या (हि० २.३१) मम नियोगस्य चर्चा त्वया न कर्तव्या (हि० २.३२) स्वनियोगचर्चा क्रियताम् (हि० २.३५) इतिवत्।

नानृग्वेदविनीतस्य नायजुर्वेदधारिणः।
नासामवेदविदुषः शक्यमेवं प्रभाषितुम्॥

– वा०रा० ४.३.२८

मार्कण्डेयपुराणान्तर्भूतायाः स्तोत्ररत्नदुर्गासप्तशत्याश्चतुर्थाध्याये शक्रोऽपि त्रयीमयीमेव भगवतीं स्तौति यथा –

शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नाम्।
देवी त्रयी भगवती भवभावनाय वार्ता च सर्वजगतां परमार्तिहन्त्री॥

– दु०स०श० ४.१०

श्रीमद्भागवतेऽपि श्रीकृष्णबाललीलाप्रसङ्गे मृद्भक्षणलीलायां भगवन्मुखे निखिल-ब्रह्माण्डमवलोक्य स्तब्धा यशोदा पुनस्तत्कृपया प्राप्तभगवदैश्वर्यविस्मृतिर्वात्सल्यधिया श्रीकृष्णमुखकमलं लालयन्ती साश्चर्यं शुकाचार्येणाऽक्षिप्ता। अत्रापि च त्रयीशब्देनैव चर्चां चकार भगवान् बादरायणिः। यथा –

त्रय्या चोपनिषद्भिश्च साङ्ख्ययोगैश्च सात्वतैः।
उपगीयमानमाहात्म्यं हरिं साऽमन्यतात्मजम्॥

– भा०पु० १०.८.४५

एवमेव श्रीमद्भगवद्गीतायामपि श्रीकृष्णचन्द्रस्त्रयीमिमां सानुरागं समगायद्यथा –

त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते।
ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान्॥

– भ०गी० ९.२०

गद्यकाव्यनिष्णातो महाकविर्बाणोऽपि कादम्बर्या मङ्गलाचरणे प्रथमश्लोके भगवन्तं त्रयीमयमेव तुष्टाव। यथा –

रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौ प्रजानां प्रलये तमःस्पृशे।
अजाय सर्गस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मने नमः॥

– का० १.१

उपबृंहणेनैतेन वेदानां त्रैविध्यं सुस्पष्टम्। तथा च ज्ञानसिद्धान्तवर्णनप्रधान ऋग्वेदो यज्ञनिर्देशकतया कर्मकाण्डप्राधान्यप्रतिपादनपरो यजुर्वेदः स्तवनगानपरायणतयोपासना-सिद्धान्तसङ्कीर्तनतत्परः सामवेदः। अथर्ववेदस्त्रिष्वत्रान्तर्भवति यद्यप्यस्मिन् युद्धविद्यायाः प्राधान्येन वर्णनमवलोक्यते। यतो ह्यथर्वशब्दः शब्दद्वयस्य संहितरूपः। अर्वशब्दो घोटकपरः। अर्वणस्त्रसावनञः (पा०सू० ६.४.१२७) इति सूत्रमपि प्रमाणम्। अथ-शब्दोऽधिकारवाची यथा पातञ्जलमहाभाष्ये अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते। शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम् (भा०प०) इति। इत्थमधिकारवाचकाथ-

शब्देन सहार्वशब्दस्य सन्धिः। तत्राकृतिगणत्वादथर्वशब्दः शकन्ध्वादिगण आकृत्या गण्यते मनीषादिवत्। एवं शकन्ध्वादिषु पररूपं वाच्यम् (वा० ६.१.९१) इति वार्त्तिकसहकारेण अचोऽन्त्यादि टि (पा०सू० १.१.६४) इति टिसञ्ज्ञया[४] पररूपम्। इत्थमथर्वशब्दस्य सिद्धिः। अन्यथाऽथशब्दघटकाकारेण सहार्वशब्दघटकाकारस्य सन्धौ दीर्घः स्यात्। अतोऽधिकृतोऽर्ववेद इति सरलार्थः। सङ्क्षेपत ऋग्वेदे मन्त्रदेवताध्यानं यजुर्वेदे यज्ञोपयोगिदेवतानामाह्वानं सामवेदे भगवद्विभूतिभूतदेवानां भगवतश्च यशोगानमथर्ववेदे रणप्रयाणं वर्णितं पर्यवसीयते। इमे वेदा एव निखिलज्ञानविज्ञानकलाकौशलसकल-सृष्टिसमुद्भवस्थानानि। भगवानपि सर्वतन्त्रस्वतन्त्रः सर्वद्रष्टा सर्वान्तर्यामी सत्यकामः सत्यसङ्कल्पः सत्यसन्धः सर्वाधिष्ठानस्वरूपः कर्तुमकर्तुमन्यथाकर्तुं समर्थोऽपि कदाऽपि स्वेच्छया जगदिदन्तनं सिसृक्षति। सोऽपि वेदप्रतिपादनप्रकारमेवानुकरोति। किं बहुना परमात्मनः प्रामाण्यमपि वेदमेवाधिशेते। अत एव वेदमान्यताबहिर्भूतमीश्वरोक्तं वयमास्तिका नाद्रियामहे यथा बुद्धोक्तम्। ईश्वरोऽपि कदाचिद्धर्मसमुद्दिधीर्षया भक्तहृदयविजिहीर्षयाऽसुर-दर्पापजिहीर्षया चिकीर्षया च सुरकार्यस्य समवतीर्णोऽवनितले विडम्बयन्मनुजलोकं मानवोचितच्छलप्रपञ्चादिकमङ्गीकरोति। अस्यां युक्तौ जालन्धरवधप्रसङ्गः प्रमाणम्। किन्तु वेदः कदाचिदपि भ्रमप्रमादविप्रलिप्साकरणापाटवादिपुंदोषान्दूरतो न परामृशति। अत एव वेदानां स्वतः प्रामाण्यमिति मीमांसकसिद्धान्तः सन्नपि सकलपण्डितसम्मतः। वेदाः स्वतः प्रमाणम्। ततः पूर्वं कस्यापि ग्रन्थस्यानुपलब्धत्वाद्वेदस्य स्वतः प्रामाण्यमपरशास्त्राणां च परतः प्रामाण्यम्। इमे वेदाः परम्परयेतरदेवताः प्रतिपादयन्तोऽपि परमात्मानमेव प्रतिपादयन्ति यथा काचित्कुलाङ्गना परिवारजनाञ्छ्वश्रुप्रभृतीञ्छुश्रूषमाणाऽपि साक्षात्पतिमेव परिचरति तथैव वेदापरनामधेयाः श्रुतयोऽपि परिवारजनानिवेतरदेवान् गायन्त्योऽपि साक्षान्महातात्पर्यतया स्वकीयं पतिं परमेश्वरमेव प्रतिपद्यन्ते। इयं भगवती श्रुतिरेव समेषां माता परमात्मा च परापराणां पिता। यथा च पुत्रस्य कृते पितुः सत्तायां माता प्रमाणं तथैव परमेश्वरसत्तायामस्मत्कृते श्रुतिः प्रमाणम्। अतोऽभियुक्ता आमनन्ति सर्वे वेदा यत्पदमामनन्ति (क०उ० १.२.१५)। भगवती श्रुतिरपि श्रावयति अमृतस्य पुत्राः (शु०य०वा०मा० ११.५, श्वे०उ० २.५) तमेव विजिज्ञासस्व (तै०उ० ३.१.१) तमेव ब्राह्मणाः व्रतेन तपसाऽनाशकेन च विविदिषन्ति (बृ०उ० ४.४.२२) सत्यं ज्ञानमनन्तं ब्रह्म (तै०उ० २.१.१) इदं विष्णुर्वि चक्रमे (ऋ०वे०सं० १.२२.१७, शु०य०वा०मा० ५.१५) खं ब्रह्म (शु०य०वा०मा० ४०.१७, बृ०उ० ५.१.१) इत्यादिमन्त्रैः। गीताऽपि परमात्मन एव वेदवेद्यत्वं तस्यैव च वेदवेत्तृत्वं गायति। यथा –

---

[४] 'शकन्ध्वादिषु पररूपं वाच्यम्।' तच्च टेः (वै०सि०कौ० ७९)। शकन्ध्वादित्वात् अथर्वशब्दसिद्धौ टिसञ्ज्ञाया उपयोगिता नास्ति परन्तु मनीषा पतञ्जलि इत्यादिषु टिसञ्ज्ञया विना शब्दसिद्धिर्न।

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च।
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम्॥

– भ०गी० १५.१५

श्रुतिशब्दः श्रवणार्थकश्रुधातोर्निष्पद्यते (श्रु श्रवणे धा०पा० ९४२)। एवं च श्रूयत आनुपूर्व्याऽनादिकालाद्गुरुपरम्परया या सा श्रुतिः इति व्युत्पत्तौ कर्मणि क्तिन्प्रत्ययेऽनुबन्ध-लोपे कृत्प्रत्ययान्तत्वाद्विभक्तिकार्ये प्रथमैकवचने श्रुतिः। इत्थं हि अस्मदभिन्नकर्तृक-वर्तमानकालिकश्रवणानुकूलव्यापारविशिष्टनिःसीमशब्दकर्मकश्रवणकर्मरूपं फलम् इति फलमुख्यविशेष्यकः शाब्दबोधः। यद्वा श्रूयते परमात्मा यया सा श्रुतिः इति व्युत्पत्तौ स्त्रियां क्तिन् (पा०सू० ३.३.९४) इति सूत्रेण करणे क्तिन्। एवं वर्तमानकालिकश्रवणानुकूल-व्यापारावच्छिन्नश्रवणकर्मत्वाभिन्नफलत्वनिष्ठप्रकारतानिरूपितफलनिष्ठविशेष्यताशालिफल-करणम् एव श्रुतिः। अथवा श्रावयति परमात्मानं पितरं पुत्रैः परिचाययति या सा श्रुतिः इति व्युत्पत्तावन्तर्भावितण्यर्थतावच्छेदकधातुत्वावच्छिन्नश्रुधातोर्बाहुलकक्तिन् प्रत्ययः। एवं च वर्तमानकालावच्छिन्नब्रह्मविषयकश्रवणानुकूलव्यापारानुकूलव्यापाराश्रयः श्रुतिरिति दिक्। एवमेव वेदशब्दोऽपि चतुर्भिर्धातुभिर्निष्पादयितुं शक्यते। तत्र विदँ सत्तायाम् (धा०पा० ११७१) इत्यस्मात्सत्तार्थकधातोः विद्यते निरन्तरं वर्तते यद्ब्रह्मविषयकज्ञानं तदेव वेद इति कर्तरि घञ्प्रत्ययेऽचि वा गुणे कृते सति वेदशब्दः सिध्यति। एवं वर्तमान-कालावच्छिन्नभवनफलानुकूलव्यापाराश्रयः इति शाब्दबोधः। द्वितीयस्मिन् कल्पे विदँ विचारणे (धा०पा० १४५०) इत्यस्माद्धातोः विन्ते ब्रह्मतत्त्वं विचारयति जनो यस्मिन् स वेदः इति विग्रहे हलश्च (पा०सू० ३.३.१२१) इत्यनेनाधिकरणे घञ्प्रत्ययः। तथा चानुबन्धकार्ये पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) इत्यनेन गुणे निष्पन्नो वेदशब्दः। तथा च विचारकाभिन्नकर्तृकवर्तमानकालावच्छिन्नमनोबुद्धिसंयोगानुकूलव्यापाराधिकरणं वेदः इति निर्गलितोऽर्थः। तृतीयस्मिन् कल्पे विदँ ज्ञाने (धा०पा० १०६४) इत्यस्माद्धातोः वेत्ति जानाति सनातनं परमं ब्रह्म निरञ्जनं निर्गुणं निराकारं निष्प्रकारं निर्लेपं निर्मानं निर्मोहं सच्चिदानन्दसन्दोहं निर्विकल्पं तथा चानन्दकन्दमुकुन्दसततमुनिजनपरिपीत-चरणारविन्दामन्दमकरन्दसच्चिदानन्दचिन्मयसमलङ्कृतप्रणयिहृदयकोसलेन्द्रसरयूतरल-तरङ्गभङ्गिविक्षालितचरणसरोजमनोजवैरिवन्दितपादपयोजकोशलवीचिविघूर्णधूलिधूसर-सरसशिरोजकपोलावलम्बिरोलम्बनिन्दककुटिलकुन्तलसंस्मारितपाटलकोशविहारिभृङ्ग-सौभगकौसल्याक्रोडवर्त्तिदशरथनयनवर्तिवर्तुलमुखमृगाङ्कसंव्रीडितशारदशशाङ्कपरम-करुणनीलतरुणतामरसशरीरपरमरणधीररघुवीरपूर्णचन्द्रनिभाननिहतदशाननश्याम-सुन्दरपरब्रह्मसगुणविग्रहसाकारभगवन्तं श्रीरामचन्द्रं वा येन स वेदः। अथ साधकाभिन्न-कर्तृकवर्तमानकालावच्छिन्नज्ञानानुकूलव्यापारविशिष्टनिर्गुणसगुणब्रह्मविषयकज्ञानरूपफल-

मुख्यव्यापाराख्यं करणं वेदः इति फलितार्थः। चतुर्थकल्पे विदॢँ लाभे (धा०पा० १४३२) इति लाभार्थकधातोः विन्दति लभते सगुणब्रह्म श्रीरामचन्द्रं येन स वेदः इति व्युत्पत्तौ करणे घञ्यनुबन्धकार्ये गुणे च सति वेदशब्दस्य सिद्धिः। एवं वर्तमानकालावच्छिन्नलाभानुकूल-व्यापारविशिष्टफलकरणं वेदः। निर्गुणं सगुणं वा ब्रह्म वेदप्रतिपाद्यैरुपायैरेवानुभवितुं द्रष्टुं वा शक्यते। तत्र वेदे त्रय उपायास्त्रिभिः काण्डैः प्रतिपादिताः। कर्म उपासना ज्ञानं चेति। कर्मकाण्डं कर्मप्रतिपादकमशीतिसहस्रमन्त्रात्मकम्। उपासनाकाण्डमुपासनां बोधयति। तच्च षोडशसहस्रमन्त्रात्मकम्। ज्ञानकाण्डं ज्ञाननिरूपणपरम्। तच्च चतुस्सहस्रमन्त्रात्मकम्। तत्र वेदप्रणिहितो धर्मः (भा०पु० ६.१.४०) इति वचनेन वेदप्रतिपाद्यमेव कर्म। तच्च द्विविधं नित्यं नैमित्तिकञ्च। नित्यत्वं नाम कृते सत्यदृष्टफलाजनकत्वेऽपि न कृते पापजनकत्वम्। नैमित्तिकत्वं नाम निमित्ते विधीयमानत्वे सति पुण्यजनकतावच्छेदकत्वम्। नित्यं कर्म सन्ध्यादिकं श्रौतं स्मार्तं च। तस्यावश्यं करणीयता यथा गीतायामशेषविशेषातीतोऽतसी-कुसुमोपमेयकान्तिः पार्थसारथिर्निखिलगुणगणनिलय उत्तमश्लोको भक्तानुग्रहकातरः श्रीकृष्णचन्द्रः साटोपं पार्थं प्रति प्रत्यपादयद्यत् –

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्राऽपि च ते न प्रसिद्ध्येदकर्मणः॥

– भ०गी० ३.८

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम्॥

– भ०गी० ४.१५

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥

– भ०गी० २.४७

किं बहुना कार्याकार्यव्यवस्थायां शास्त्रमेव प्रमाणं गीताकारः प्रमिमीते यथा –

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि॥

– भ०गी० १६.२३–२४

इत्थं कर्मणोऽस्य द्वौ भागौ विधिर्निषेधश्चेति। तत्रान्यकर्मणोऽत्यन्ताप्राप्तौ विधीयमानकर्मतावच्छेदकत्वं विधित्वम्। तद्यथा अहरहः सन्ध्यामुपासीत[५] इति

[५] मूलं मृग्यम्।

विधिः। अत्रैव निषेधस्यैव क्रोडे द्वावपरावप्यंशौ नियमः परिसङ्ख्या च। नियमः पाक्षिके सति (त०वा० १.२.४२)। यथा व्रीहीनवहन्ति। अत्रावहननमावश्यकं नखैर्वाऽन्यैः साधनैर्वा। परिसङ्ख्या। तत्र विधेयांशेऽन्यत्राविधेयांशे चाप्राप्तौ परिसङ्ख्या। यथा विद्वांसो निगदन्ति –

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति।
तत्र चान्यत्र चाप्राप्तौ परिसङ्ख्येति कीर्त्यते॥

– त०वा० १.२.४२

निषेधो नाम कृते सति पापजनकतावच्छेदकः शास्त्रसमभिव्याहृतनञर्थावच्छेदकवदभित्याज्यः कर्मविशेषः। यथा स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् (तै०उ० १.११.१) मा हिंस्याः सर्वभूतानि,[६] मा गृधः कस्यस्विद्धनम् (ई०उ० १) इत्यादि। एवमुपासनाकाण्डप्रतिपादनं भगवन्तं वेदमाश्रित्यैवोपास्यमानः परमात्मा साधकानां कामदो भवति। शास्त्रमतिरिच्य किमपि कृतं नैव फलदम्। अतो गीतायाः पूर्वनिर्दिष्टे यः शास्त्रविधिम् (भ०गी० १६.२३) इत्यादिश्लोके शास्त्रविधेरेव सफलत्वं सकलं प्रत्यपादि भगवता श्रीकृष्णेन। उपासनायां श्रुतिसम्मतत्वं नितरामपेक्षितम्। तत्र वेदार्थप्रतिपादकस्मृत्यनुसारं पञ्च सम्प्रदायाः। स्मृतेर्हि वेदमूलकत्वेन प्रामाण्यम्। वेदस्य निगूढार्थान् स्मृतिः स्मरति। स्मृतिकर्तार ऋषयो मन्वादयः। स्मृतेः प्रामाण्यं पूर्वमेव वेदः प्रशंसति यथा यद्वै किं च मनुरवदत्तद्भेषजम् (कृ०य० तै०सं० २.२.१०.२)। महाकविकालिदासोऽपि स्मृतेर्वेदानुगन्तृत्वमुपमया स्तौति। यथा रघुवंशमहाकाव्ये –

तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्तनीया।
मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत्॥

– र०वं० २.२

तस्माच्छ्रुत्यनुमोदितानेवार्थान् स्मृतिः स्मरति। तस्यां गाणपत्यसौरशाक्तशैववैष्णवनामधेयाः पञ्च सम्प्रदायाः। गाणपत्यसम्प्रदायो गणेशमेव मुख्यमाद्रियतेऽन्यान् गौणत्वेनैवोपास्ते। तस्य बाहुल्यमद्यापि महाराष्ट्रे विलोक्यते। सौरसम्प्रदायः सूर्यमेव प्रधानत्वेन समर्थयतीतरान् तदङ्गत्वेनैवाञ्चति। अस्य प्राधान्यं गुर्जरप्रान्ते। शाक्तसम्प्रदाये शक्तेः प्राधान्यम्। अयं सम्प्रदायश्च कश्मीरबङ्गयोः प्रचुरः प्रसरति। शैवसम्प्रदाये प्रामुख्येन शशाङ्कशेखरो भूतभावनोऽभयङ्करः प्रलयङ्करः काशीश्वरः प्रचण्डताण्डवोपसंहृतभूतवरूथभसितभासितभालपट्टिकः करालभालक्रतुवेदिकाजाज्वल्यमानसमिन्धनघनधर्षितनिखिलजन्तुजलारिधनञ्जयसमुच्छलत्स्फुलिङ्गसमाहुतीकृतनिखिलजनमनःक्षोभकरमकरकेतनः कैलासनिकेतनो विरसितवैराग्यरसनिमग्नजगतीतलभीषणभोगलालसामनोनिकेतनभवानीसमलङ्कृतवामविग्रहः कृतजालन्धरगजासुरत्रिपुरप्रभृतिप्रचण्डदानवनिग्रहः शान्तवासनाग्रहो

[६] मूलं मृग्यम्।

भगवाञ्छिवः प्राधान्येन परिगण्यते। एतत्प्राचुर्यं केरलकर्णाटकादौ। वैष्णवसम्प्रदाये प्रमुखतया निखिलकोटिब्रह्माण्डाधीशो जगदीशः पुरन्दरत्रिपुरहरवसुविरिञ्चिपावकपवमान-हिमभानुचित्रभानुकृशानुनिखिलनक्षत्रगणसकलसुरासुरयक्षगन्धर्वकिन्नरचारणसिद्धसाध्य-नरनागलोकपालनाकपालकालकरालव्यालमालमौलिसम्पूजितपादारविन्दलेखाधीश-मुकुटमणिसंलालितचरणसरोजरजोमकरन्दत्रैलोक्यलक्ष्मीनवनलिनललितलोचनलसित-कमनकटाक्षसंवीक्षितशुभेक्षितभव्यसौन्दर्यसारसर्वस्वसकलसुषमासारभूतमनोरमसार्वभौम-शर्वरीप्राणवल्लभसंव्रीडकमदनमानपीडकवदनसरसीरुहनिसर्गनिहितसुधितसुधामाधुरीक-श्रीवत्सलाञ्छनशरच्छशाङ्काननमधुरमन्दस्मिततुहिनांशुदीधितिविहितप्रपन्नहृदयसरसी-कैरवविकासललितलीलाविलासमहालक्ष्मीनिवासक्षीरसागरसम्मन्थनसञ्जातकणसंस्पर्श-भग्नभक्तभूरिभवभयव्रणपाणिपल्लवजगतीतलपाथोधिप्लवनाशितप्रणिपातक्लवविरचित-गणिकागजाजामिलपङ्किलपङ्ककलङ्कभवविहितभवसंस्तवकरुणार्णवसकलशरण्यवरेण्य-तरुणारुणसरसिजचरणतरुणतमालनीलसरसीरुहमरकतमणिकालिन्दीकीलालविनिन्दक-भुवनाभिरामश्यामशरीरदामिनीद्युतिविनिन्दकसंवीतपीतपरिधानम्लानमदमत्तमनोभवधीर-मधुकैटभनरकमुरप्रचुरमहासुरभूरिमदगर्वितगजेन्द्रगण्डस्थलविनिर्गतशोणितकरकमल-कलितकौमोदकीधरशङ्खचक्रधरकमलकलितकमलकरकेयूरकुण्डलकटकवनमालानूपुरादि-भूषणमण्डितसकलकलाकलापपण्डितकमलामलमुखचन्द्रचकोरवैकुण्ठविहरणपरायण-नारायणप्रभविष्णुविष्णुर्हृदयमन्दिरे महीयते। अस्य प्रायशो विश्वस्मिन् विश्वे प्रचारः प्रसारश्च। अस्य प्रवर्तका रामानुजरामानन्दवल्लभनिम्बार्कमध्वसूरतुलसीदासप्रमुखाः। उपासनाप्रतिपादकशास्त्रेषु वेदमूलकेषु नारदपाञ्चरात्रशाण्डिल्यसूत्रनारदभक्तिसूत्रभक्ति-रसायनभक्तिरसामृतसिन्धुभक्तिसुधाप्रभृतिनामानि। तत्रोपासनायां भावानुसारिणः पञ्च प्रकाराः। ते सन्ति शान्तवात्सल्यदास्यसख्यमधुराख्याः। शान्ते शान्तपरमप्रकाशरूपं परमज्योतिर्मयमखण्डमनन्तं भगवन्तं हृदयसहस्रदलकमले समुपासते योगिनः शिवादयः। वात्सल्ये पुत्रं शिष्यं वा मत्वा शिशुरूपं निर्गुणमपि सगुणं निरञ्जनमपि साञ्जनं व्यापकमपि व्याप्यं पितरमपि पुत्रं पुराणमपि नूतनं प्राचीनमप्यार्वाचीनं निराकारमपि साकारमकलमपि सकलं निरामयमपि सामयं दुर्लभमपि सुलभमचलमपि चलं निर्लेपमपि धूलिलेपं निरावरणमपि साभरणावरणमवर्णमप्यनुगतपितृवर्णमव्यक्तमपि व्यक्तकौतुकमविषादमपि स्तन्यपानार्थविलसितविषादं निराधारमपि स्वीकृतकौसल्यकाधारं श्रीराममरूपमपि समाश्रितनीलनीरधरश्यामं भुवनाभिरामसकलविश्राम[७]धामनिखिललावण्यललामलोक-लोचनाभिरामबालरूपं परमेश्वरं सम्भजन्ते दशरथकौसल्याविश्वामित्रवसिष्ठादयः। दास्ये जगदात्मानं परमात्मानमैश्वर्यबुद्ध्या सकलनिर्मातारं रचयितारं त्रिभुवनस्य निखिलप्रपञ्चभूतं

[७] विश्रामो विश्रमश्चापि इति द्विरूपकोशे श्रीहर्षः।

त्रिलोकपितरं कर्तुमकुर्तुमन्यथाकर्तुं समर्थं सत्यसङ्कल्पसत्यकामसौन्दर्यैश्वरमाधुर्य-सौशील्यसौजन्यसौलभ्यसौरभ्यसारल्यतारल्यकारुण्यतारुण्यवात्सल्यादिगुणगणरत्नाकरं करुणाकरं श्रीराघवेन्द्रं स्वामिनं स्वसर्वस्वं मत्वा सर्वभावेन भावयन्ति हनुमत्प्रमुखाः सन्तः। सख्ये कूटस्थमपि भूयिष्ठं हृदयेशमपि विडम्बितनरेशवेषमदेहमपि लीलागृहीतदेहं सर्वगेहमपि स्वीकृतपर्णकुटीरगेहं सच्चिदानन्दसन्दोहं कोशलेन्द्रं प्रणतसहायं सखायं मत्वा सञ्चक्षते सुग्रीवादयः। माधुर्येण निखिलरसामृतमूर्तिं सौन्दर्यक्षीरनिधिरोहिणीशं भुवनसुन्दरं सीतापाणिग्रहणलालसं धृतवरवेषं धनुर्धरमपि कामारिकार्मुकखण्डनपरं परमात्मानं मधुरं तत्तत्सम्बन्धसमाश्रयं मत्वा भजन्ते भावुका मिथिलानिवासिनः। एषु सर्वेषु भावेषु मौलिकतया दास्यमेव। भावनावैषम्यदृष्ट्या प्रकाराः प्रादर्शिषत। अतो विपश्चितो ब्रुवन्ति दासभूतास्स्वतः सर्वे ह्यात्मानः परमात्मनः (अहि०सं० ११) इति। उपासनाऽपि श्रुतिमूलिका। अर्वाचीनकल्पितायां भक्तौ नैव फलजनकतावच्छेदकता। अतो मान्यतैषा मान्यानां महात्मनाम् –

श्रुतिस्मृतिपुराणादिपञ्चरात्रविधिं विना।
ऐकान्तिकी हरेर्भक्तिरुत्पातायैव कल्पते॥[८]

तुलसीदासोऽपि वेदानुमोदितामेव भक्तिं वरीयसीं वरयाम्बभूव। यथा –

श्रुति सम्मत हरि भक्ति पथ संजुत बिरति बिबेक।
तेहिं न चलहिं नर मोहबश कल्पहिं पंथ अनेक॥[९]

– रा०च०मा० ७.१००ख

ज्ञानकाण्डं ज्ञानप्रतिपादकं चतुःसहस्रमन्त्रात्मकम्। इदमेव वेदान्तदर्शनमिति कथ्यते। तत्र वेदस्यान्तः सिद्धान्तः परमतात्पर्यं वा यस्मिन् सः इति विग्रहे अतिँ बन्धने (धा०पा० ६१) इत्यस्माद्धातोरन्तति बध्नाति व्यवस्थापयति वेदानां महातात्पर्यं यः स वेदान्तः। अन्तः इत्यत्र पचादित्वात् अच् प्रत्ययः।[१०] तस्य वेदशब्देन सह व्यधिकरणबहुव्रीहिः। यद्यपि अनेकमन्यपदार्थे (पा०सू० २.२.२४) इति सूत्रं समानाधिकरणबहुव्रीहिपरम्। तस्य ह्यर्थोऽन्यपदार्थे वर्तमानमनेकसुबन्तं समस्यते स च बहुव्रीहिः। अन्यपदार्थे इत्यत्र सप्तमी। सा चाधिकरणसञ्ज्ञापरा। तत्र च विषयतारूपाऽधिकरणता। सा च वर्तमानत्वरूपा। तस्मादन्यपदार्थनिष्ठवर्तमानत्वविषयतापरमनेकसुबन्तं तदेव परस्परं समस्यत इत्यर्थानुरोधेन प्रथमान्तानामेव समासः। तत्र समानाधिकरणत्वं नाम शब्दविशिष्टत्वम्। वैशिष्ट्यं च स्वसमभिव्याहृतत्वस्वसमानविभक्तिकत्वमित्येतदुभयसम्बन्धेन। तथाऽपि सप्तमीविशेषणे

[८] मूलं मृग्यम्।

[९] एतद्रूपान्तरम्–यो मार्ग आस्ते श्रुतिसम्मतः श्रीनाथस्य भक्तेः सविरक्तिबोधः। तस्मिन्नरा यान्ति न मोहनिघ्ना मार्गाननेकानपि कल्पयन्ति॥ (मा०भा० ७.१००ख)।

[१०] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन कर्तरि।

बहुव्रीहौ (पा०सू० २.२.३५) इति सूत्रे सप्तमीशब्दस्य विशेषणात्पृथगुपादानेन व्यधिकरण-बहुव्रीहेः कल्पना। अन्यथा विशेषणशब्देनैव समानाधिकरणबहुव्रीहेः सङ्ग्रहः किमेतेन सप्तमीपदविन्यासेन। अत्र सप्तमीशब्दस्य पृथक्श्रवणाद्विशेषणं विशेष्यसमानविभक्तिकमेव तत्र प्रथमान्तमेव। तेन पीतमम्बरं यस्य स पीताम्बरः इत्यादिस्थलानि सुसङ्गतानि। पीत-शब्दो ह्यम्बरशब्दस्य विशेषणत्वावच्छेदकतया पूर्वं प्रयुक्तः। यद्यपि भूतले घटः इत्यादौ सप्तम्यन्तस्यापि विशेषणता। अत एव गदाधरभट्टाचार्या व्युत्पत्तिवादे वेदाः प्रमाणम् इत्यस्य स्थलस्य[११] व्याख्यावसरे विशेषणविशेष्यपदयोः समानविभक्तिकत्वनियमं सार्वकालिकं न स्वीचक्रुः। अतस्ते व्युत्पत्तिमिमां प्रणिन्युर्यत् यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्य-विषयसङ्ख्याविरुद्धसङ्ख्याया अविवक्षितत्वं तत्र विशेष्यविशेषणवाचकपदयोः समानवचनकत्व-नियमः (व्यु०वा० का०प्र०)। तद्यथा सुन्दरो रामः इत्यत्र विशेष्यवाचकपदं रामस्तदुत्तर-विभक्तिः सुविभक्तिस्तत्तात्पर्यविषयसङ्ख्यैकत्वसङ्ख्या तद्विरुद्धसङ्ख्यायाद्वित्वादेः सुन्दरपदोत्तर-सुविभक्त्या विवक्षा नास्ति। अतोऽत्र समानवचनकत्वम्। किन्तु वेदाः प्रमाणम् इत्यत्र विशेष्यवाचकपदं वेदास्तदुत्तरविभक्तिर्जस्विभक्तिस्तत्तात्पर्यविषयसङ्ख्या बहुत्वसङ्ख्या तद्विरुद्ध-सङ्ख्याया एकत्वनामसङ्ख्यायाः प्रमाणपदोत्तरसुविभक्त्या विवक्षितत्वमेव। अतोऽत्र विषम-वचनता। विगतसप्तमीपदस्य पृथगुपादानादस्मिन्नियमेऽत्र सङ्कोचं चकार भगवान् पाणिनिः। अतः सिद्धान्ते व्यधिकरणबहुव्रीहौ कण्ठेकालः (कण्ठे कालो यस्य सः)[१२] पाणौमहा-सायकचारुचापम् (पाणौ महान् सायकश्चारु चापं च यस्य तम्) इत्यादिस्थलमिवात्रापि समाधातव्यम्। वेदान्तेऽस्मिन्मायाब्रह्मजीवानां निरूपणम्। वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च (वे०सा० ३) इति वेदान्तसारे। वेदान्तेऽप्यद्वैत-वादो विशिष्टाद्वैतवादः शुद्धाद्वैतवादो द्वैताद्वैतवादोऽचिन्त्याद्वैतवादो द्वैतवाद इति मतानि प्रस्तुतान्याचार्यैः। इदमेव दर्शनमुत्तरमीमांसाशब्देन व्यवह्रियते।

इममेव वेदमधिकृत्याष्टादश पुराणान्युपबृंहितानि वेदव्यासेन। तत्रैषां सङ्ग्रहश्लोकः –

[११] स्थलशब्दः प्रसङ्गे विषये भागे चेत्याप्टेकोशः।

[१२] कण्ठेकालः इत्यत्र अमूर्धमस्तकात्स्वाङ्गादकामे (पा०सू० ६.३.१२) इति सूत्रेण काशिकाकौमुदी-शब्दकल्पद्रुमवाचस्पत्यादिषु समासः प्रादर्शि। कण्ठे कालोऽस्य कण्ठेकालः (का०वृ० ६.३.१२) इति काशिका। कण्ठेकालः (वै०सि०कौ० ९७०) इति कौमुदी। कण्ठे कालः क्षीरोदमन्थनोद्भवविषपाननिदर्शन-रूपनीलवर्णो यस्य। सप्तम्या अलुक् इति शब्दकल्पद्रुमः। कण्ठे कालः कण्ठे कालोऽस्य वा सप्तम्या अलुक् इति वाचस्पत्यम्। भाष्ये च समानाधिकरणसमासाद्बहुव्रीहिः (वा० २.१.६९) इति वार्त्तिके बहुव्रीहेरवकाशः – कण्ठेकालः इति बहुव्रीहिसमासमुदाहृत्य सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च (वा० २.२.२४) इति वार्त्तिके कण्ठेस्थः कालोऽस्य कण्ठेकालः इत्युक्तम्। इत्युभयथा विग्रहः।

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।
अनापकूष्कलिङ्गानि पुराणानि प्रचक्षते॥

– सङ्ग्रहश्लोकः[१३]

इति। आचार्या इति शेषः। यथा मत्स्यपुराणं मार्कण्डेयपुराणं भविष्योत्तरपुराणं भागवतपुराणं ब्रह्मवैवर्तपुराणं ब्रह्माण्डपुराणं ब्रह्मपुराणं वाराहपुराणं वामनपुराणं विष्णुपुराणं वायव्यपुराणमग्निपुराणं नारदपुराणं पद्मपुराणं कूर्मपुराणं स्कन्दपुराणं लिङ्गपुराणं गरुडपुराणमित्यष्टादश पुराणानि। तत्र देवीभागवतमेषु। श्रीमद्भागवतमहापुराणं त्वेभ्यः पृथक्। महापुराणत्वात्। इदमेवोनविंशं वेदव्यासदेवस्य चरमा रचनेति विपश्चितां मनीषा।[१४] इतिहासश्च द्वेधा रामायणं महाभारतं चेति। रामायणस्य प्रवर्तक आदिकविवाल्मीकिर्यः खलु पुरा लुण्ठकोऽपि सप्तर्षिप्रसादसंलब्धलालित्यपूर्णप्रतिमालवित्रसञ्छिन्नमोहमहामहीरुहो हृदयसरसीसमुल्लसितसीतानिवासचरणसरोरुहो मुनिव्रतस्वीकारसंवर्धितललाटतपस्तपनदीधितिसमिद्धतीव्रतरतापसहिष्णुतपोऽनुष्ठानोपयोगियोगिजनदुर्लभजटीभूतशिरोरुहो विमलवैराग्यविहिततृणायमानकुटुम्बत्यागपरिपीतरामचन्द्रपदपाथोजपरागरससरसमानसकूजितमङ्गलमयकाव्यगानसंस्मृतमुकुन्दकरुणावत्सलत्वसौशील्यसौलभ्यादिमनुजेतरगुणगणविहितभूतिवल्मीकवरूथशरीरव्रणरघुपतिचिन्तनविचक्षणकविकुलशरणसम्मण्डितारण्यवरेण्यवागीश्वरप्रसादबृंहितवाचस्पतिशेमुषीदुर्लभमनीषोत्कर्षचरणपङ्कजभावितभारतवर्षप्रस्तुतोत्कटादर्शरघुनाथलीलातरलतरसुरतरङ्गिणीनिस्यन्दमानप्रेमसुधापानसञ्जन्यमानहर्षोत्कर्षपुण्यपुलकिततनूरुहः श्रीरामविपरीतनामजपप्रभावसंलब्धब्रह्मसमानवैभवोऽपि[१५] सीतापतिपदपद्मभक्तिमदिरया मदिरेक्षणो नरपिशाचितगृहदारादिजगतीतलभोगसम्भारं समुल्लसितषड्विकारमनुभूतपत्नीपुत्रभ्रातृकठोरतिरस्कारं स्वार्थशृङ्गारं पतितं परिवारं तृणमिव तिरश्चकार। यस्य खलु धारिततपोव्रतस्य कविकुलगुरोः प्राचेतसस्य भगवतो वाल्मीकेः केकोपमा निरुपमा कोविदकुलमनोरमा गतिविभ्रमा विलसितत्रिविक्रमविक्रमा परिष्कृतपण्डितपरिश्रमा भग्नभवभयभ्रमा समुल्लसितकाव्यकलाकलापसर्वोत्तमसंस्करणसम्भ्रमा श्रीरामलीलासुरधुनीविमलवीचिकीलालक्रीडागीतकविकुलव्यतिक्रमा मङ्गलमयी लोकहितैषिणी जगदुपकारिणी कविताकाननस्वच्छन्दविहारिणी धूर्जटिजटाचारिणीव त्रिपथविहारिणी मुनिमनोहारिणी पतिततारिणी तरणिकिरणमालिकेव निर्मला मनीषा क्रौञ्चद्वन्द्वनिधननिरीक्षणसञ्जाततरुणकरुणशोकसमालोकितजगदीशा प्रथमं काव्य-

---

१३ मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्। अनापलिङ्गकूस्कानि पुराणानि पृथक्पृथक्॥ (दे०भा०पु० १.३.२)।

१४ श्रीमद्भागवतमष्टादशपुराणेभ्यो भिन्नं महापुराणं व्यासदेवस्यान्तिमा रचनेति विपश्चितां मतमिति भावः। उपपुराणानि तु नात्र परामृष्टानि।

१५ विपरीतनामजपोऽध्यात्मरामायणे वर्णितः – इत्युक्त्वा राम ते नाम व्यत्यस्ताक्षरपूर्वकम्। एकाग्रमनसाऽत्रैव मरेति जप सर्वदा॥ (अ०रा० २.६.८०)।

सर्गं व्यधत्त करतलचतुर्वर्गापवर्गसम्मोदितभर्गसुलभीकृतस्वर्गं श्लोकमेव विरचितसर्गमिव समुत्ससर्ज च। स च श्लोकोऽनुष्टुप्छन्दसा समगीयत –

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥

– वा०रा० १.२.१५

अयमेव निखिलकाव्यजगति प्रथमो रचनाविशेषः। शापात्मकोऽस्यार्थः – हे निषाद नीचैः सीदति तिष्ठतीति निषादस्तत्सम्बुद्धौ निषाद। निम्नगामिन्निति भावः। त्वं शाश्वतीः समाः अनन्ताः समा वर्षाणि यावत् प्रतिष्ठां सम्मानं मा अगमः मा प्राप्नुहि यत् यतो हि क्रौञ्चमिथुनात् क्रौञ्चयुग्मतः काममोहितमेकं पुरुषमिति भावस्त्वम् अवधीः। पुरुषं हत्वा शृङ्गाररसमपि करुणरसे परिवर्तितवानिति भावः। विचारे कृतेऽयं श्लोकः सर्वकाव्य-प्राथम्यभाक्तयाऽमङ्गलशापोक्तिमत्तया कथं परिणमितः। अतोऽपरा व्याख्या – मा सीता। इन्दिरा लोकमाता मा (अ०को० १.१.२७क) इति कोशात्। सैव मा सीता नितरां सीदति तिष्ठति यस्मिन् स मानिषादः। अधिकरणे घञ्।[१६] अथवा मायां सीतायां नितरां सीदति तिष्ठति यः स मानिषादः। कर्तरि घञ्।[१७] श्रीरामचन्द्र इति भावः। अर्थात् – हे मानिषाद सीतानिवास श्रीराम त्वं भवान् शाश्वतीः समाः अनन्तवर्षाणि यावत् प्रतिष्ठां सम्मानं पूजाम् अगमः प्राप्तवान् यत् यतो हि क्रौञ्चमिथुनात् क्रौञ्चयोः पक्षिवद्रावणमन्दोदर्यो-र्मिथुनाद्युग्मात् काममोहितं कामिनम् एकं रावणम् अवधीः हतवान्। रावणं हत्वा भवता महती प्रतिष्ठा समर्जितेति श्लोकस्य भावः। अयमेव सर्वप्रथमः श्लोकोऽनन्तरं नारदोपदिष्ट-सङ्क्षिप्तसीतारामकथां विगतव्यथां भगवान् वाल्मीकिरादिकाव्यरूपां पञ्चशतसर्गात्मिकां षट्काण्डां रामायणनामधेयां चतुर्विंशतिसाहस्रीसंहितामिमां[१८] काव्यवसन्तकोकिलः कोकिल-काकलीमिव चुकूज। इदमितिहासभूतं वेदसम्मतम्। तत्रेत्थं ज्ञातव्यम्। यथा विज्ञाने सम्प्रति साईन्स् नामधेये योगप्रयोगौ थिअरीप्रैक्टिकल् शब्दाभ्यां व्यवह्रियेते। तथैव वेदः थिअरी इति। अर्थात्सिद्धान्तसङ्ग्रहः। रामायणं प्रैक्टिकल् इति। अर्थात्प्रयोगसङ्ग्रहः। अत्र वेदस्य सम्पूर्णाः सिद्धान्ता अनेककथाव्याजेन सविस्तरं प्रतिपादिताः। अयमेवेतिहासः। इतिहास-शब्दो हि त्रिभिः शब्दैर्निष्पद्यते इति ह आस। इतिशब्दः पूर्वकालघटनाक्रमसूचको हशब्दो

---

[१६] नितरां सीदति यस्मिन्स निषादः। निपूर्वकात् सद् धातोः (षद्लृँ विशरणगत्यवसादनेषु धा०पा० ८५४, १४२७) हलश्च (पा०सू० ३.३.१२१) इत्यनेनाधिकरणे घञि धात्वादेः षः सः (पा०सू० ६.१.६४) इत्यनेन सत्वे अत उपधायाः (पा०सू० ७.२.११६) इत्यनेन वृद्धौ सदिरप्रतेः (पा०सू० ८.३.६६) इत्यनेन षत्वे विभक्तिकार्ये निषादः। माया निषाद इति मानिषादस्तत्सम्बुद्धौ मानिषाद।

[१७] नितरां सीदति निषीदतीति निषादः। सञ्ज्ञायां बाहुलकात्कर्तरि घञ्। प्रक्रिया पूर्ववत्। मायां निषाद इति मानिषादस्तत्सम्बुद्धौ मानिषाद।

[१८] चतुर्विंशत्सहस्राणि श्लोकानामुक्तवानृषिः। तथा सर्गशतान्पञ्च षट् काण्डानि तथोत्तरम्॥ (वा०रा० १.४.२)।

निश्चयवाचक आसशब्दो भूतकालक्रियासूचकः। एवमिदं निश्चितमासीदित्येवमितिहासशब्दार्थः। अस्य सम्पूर्णतो वेदमूलतां स्वयं वाल्मीकिरकथयत् –

इदं पवित्रं पापघ्नं पुण्यं वेदैश्च सम्मितम्।
यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते॥

– वा०रा० १.१.९८

द्वितीय इतिहासग्रन्थो महाभारतनामधेयः। अयमष्टादशपर्वयुक्तो लक्षश्लोकात्मकः। अस्य रचयिता श्रीमन्नारायणकलावतारः साक्षाद्भगवान् वेदव्यासः। यथा रामायणे महर्षिणा वाल्मीकिना परब्रह्मणः सनातस्य मर्यादापुरुषोत्तमस्य चारुचरित्रं सजीवचित्रमिव चित्रितं तस्य रामो महाविष्णुः परं ब्रह्म सुरकार्यचिकीर्षया दशरथपुत्रतां स्वीकृत्य कौसल्यायां प्रकटयाम्बभूव यथा –

स हि देवैरुदीर्णस्य रावणस्य वधार्थिभिः।
अर्थितो मानुषे लोके जज्ञे विष्णुः सनातनः॥

– वा०रा० २.१.७

तथैव महाभारतेऽपि परमभागवतस्य पाण्डुवंशस्य वर्णनच्छलेनातसीकुसुमोपमेयकान्ते रुक्मिणीरमणस्य भगवतो गृहीतनराकारस्य पार्थसूतस्य वासुदेवस्य श्रीकृष्णचन्द्रस्य भक्तवश्यतोपबृंहिता वेदव्यासेन। अत्र भगवान् कृपणवत्सलो व्यासः स्त्रीशूद्रद्विजबन्धूनां कृतेऽपि वेदार्थो यथा सरलः स्यादिति हेतोः समस्तवेदे वर्णितविषयाणां कथोदाहरणप्रसङ्गेषु निबन्धनमकार्षीत्। अतः श्रूयते यन्न भारते तन्न भारते इति। श्रीमद्भागवतेऽपि महाभारतरचनाकारणमिदमेव प्रादर्शि –

स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा।
कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह।
इति भारतमाख्यानं कृपया मुनिना कृतम्॥

– भा०पु० १.४.२५

एवं निगूढा वेदार्था इतिहासपुराणाभ्यामुपबृंह्यन्ते। स्वयमेव वेदव्यासः कथयति –

इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत्।
बिभेत्यल्पश्रुताद्वेदो मामसौ प्रहरेदिति॥

– म०भा० १.१.२६७, १.१.२९३, १.१.२९४

इममेव वेदमाधारीकृत्य प्रवर्तिताश्चतुर्दश विद्याः। तत्र षड्दर्शनान्यान्वीक्षिकी त्रयी वार्ता दण्डनीतिः पुराणं मीमांसा धर्मशास्त्रं सङ्गीतं चेति। तत्र षड्दर्शनेषु साङ्ख्यं योगो वैशेषिकं न्यायः पूर्वमीमांसोत्तरमीमांसा चेति। दर्शनं नाम दृश्यते ज्ञायते परमात्मतत्त्वं येन तत् इति व्युत्पत्तौ दृश् धातोः (दृशिँर् प्रेक्षणे धा०पा० ९८८) करणाधिकरणयोश्च (पा०सू० ३.३.११७)

इति सूत्रेण ल्युट्। टकारस्येत्सञ्ज्ञा हलन्त्यम् (पा०सू० १.३.३) इति सूत्रेण तस्य लोपः (पा०सू० १.३.९) इत्यनेन लोपश्च। लकारस्य लशक्वतद्धिते (पा०सू० १.३.८) इति सूत्रेणेत्सञ्ज्ञा पुनर्लोपः।[१९] उकारस्य विधानसामर्थ्यादुपदेशानुनासिकत्वेऽपि नेत्त्वम्। लकारस्य लित्स्वरार्थः प्रयोगः।[२०] तस्मिंश्चादृष्टजनकत्वरूपं फलम्। ततो युवोरनाकौ (पा०सू० ७.१.१) इत्यनेनानादेशे गुणे[२१] रपरत्वे[२२] कृते दर्शनम् इति सिद्धम्। तत्रास्तिक-दर्शनानि षट्। आस्तिको नाम वेदप्रतिपादकवेदप्रतिपाद्यमान्यतास्वास्थावान्। अस्ति-नास्तिदिष्टं मतिः (पा०सू० ४.४.६०) इति सूत्रेण अस्तिशब्दात् ठक्प्रत्ययः। विधान-सामर्थ्यात् चुटू (पा०सू० १.३.७) इत्यनेन ठकारस्य नेत्त्वं कस्येत्सञ्ज्ञालोपयोः ठस्येकादेशे ठस्येकः (पा०सू० ७.३.५०) इति सूत्रेण यचि भम् (पा०सू० १.४.१८) इत्यनेन भसञ्ज्ञायां यस्येति च (पा०सू० ६.४.१४८) इत्यनेनास्तिघटकेकारलोपे तद्धितेष्वचामादेः (पा०सू० ७.२.११७) इत्यनेन वृद्धौ विभक्तिकार्ये आस्तिकः इति सिद्धम्। अर्थाद्वेद-शास्त्रेतिहासपुराणस्मृतिधर्मशास्त्रे सिद्धान्ते श्रद्धधानत्वे सतीश्वरपूजकत्वे सति गोविप्रप्रतिमा-पूजकत्वमास्तिकत्वम्। अत एव व्यास आस्तिकानुत्साहयति –

सन्दिग्धेऽपि परे लोके कर्तव्यो धर्मसङ्ग्रहः।
नास्ति चेदस्ति का हानिरस्ति चेन्नास्तिको हतः॥[२३]

इति महाभारते शान्तिपर्वणि। तत्र साङ्ख्यदर्शनप्रवर्तको भगवदंशावतारः साक्षाद्भगवान् कपिलः। अत्र त्रीणि तत्त्वानि व्यक्तमव्यक्तं ज्ञ इति। व्यक्तं त्रयोविंशतितत्त्वनिकरः। महदहङ्कारो दशेन्द्रियाणि चक्षुःश्रोत्ररसनाघ्राणत्वक्पाणिपादपायूपस्थवागाख्यानि मनः शब्द-स्पर्शरूपरसगन्धाः क्षितिजलपावकगगनसमीरा इति त्रयोविंशतितत्त्वानि व्यक्तानि। अव्यक्तं

[१९] दृशिँर् इत्यत्र इर उपसङ्ख्यानम् (वा० १.३.७) इत्यनेनेर इत्सञ्ज्ञा तस्य लोपः (पा०सू० १.३.९) इत्यनेन लोपश्च बोध्यः।

[२०] लिति (पा०सू० ६.१.१९३) इत्यनेन लित्स्वरे प्रत्ययात्पूर्वः स्वर उदात्तः। दर्शनम् → लिति (पा०सू० ६.१.१९३) → अनुदात्तौ सुप्पितौ (पा०सू० ३.१.४) → अनुदात्तं पदमेकवर्जम् (पा०सू० ६.१.१५८) → द॒र्श॑न॒म् → उदात्तादनुदात्तस्य स्वरितः (पा०सू० ८.४.६६) → द॒र्श॑न॑म् → स्वरितात्संहितायामनुदात्तानाम् (पा०सू० १.२.३९) → द॒र्श॑नम्। ऋग्वेदसंहितायां च द॒र्श॑नाय (ऋ०वे०सं० १.११६.२३) इति। न च उदात्तादनुदात्तस्य स्वरितः (पा०सू० ८.४.६६) इत्यस्य त्रिपादीस्थत्वात् स्वरितात्संहितायामनुदात्तानाम् (पा०सू० १.२.३९) इत्यस्य सपादसप्ताध्यायीसूत्रस्यासिद्धे स्वरितकार्ये कथं प्रवृत्तिरिति चेत्। विधानसामर्थ्यात्त्रिपादीसूत्रकार्यं सिद्धम्। यद्वा स्वरितस्यार्धह्रस्वोदात्तादोदात्तस्वरित-परस्य सन्नतरादूर्ध्वमुदात्तादनुदात्तस्य स्वरितात्कार्यं स्वरितादिति सिद्ध्यर्थम् (पा०सू० १.२.३२) इति वार्त्तिकवचनात्सिद्धम्। यद्वा न मु ने (पा०सू० ८.२.३) इत्यत्र न इति योगविभागात् पूर्वत्रासिद्धम् (पा०सू० ८.२.१) इति सूत्रस्याप्रवृत्तिः क्वाचित्का। अन्तिमपक्षस्य विस्तराय २००तमे पृष्ठे १.८५ जायेति सीतेति इति प्रयोगस्य विमर्शं पश्यन्तु।

[२१] पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) इत्यनेन।

[२२] उरण् रपरः (पा०सू० १.१.५१) इत्यनेन।

[२३] मूलं भारते शान्तिपर्वणि मृग्यम्।

प्रकृतिः पुरुषश्च। ज्ञः षड्विंशो हि पुरुषः। इदं तावत्साङ्ख्ये सम्यक्ख्यायन्ते गण्यन्ते योद्धारो यस्मिन् तादृशे दुःखत्रयाभिघातरूपे युद्धे सङ्ख्ये प्रवर्तितमिति साङ्ख्यम्। सङ्ख्यं बहुशो युद्धादौ प्रयुक्तं यथा एवमुक्त्वाऽर्जुनः सङ्ख्ये (भ०गी० १.४७) इति।[२४] आधिभौतिकाधिदैविकाध्यात्मिक-नामधेयानां त्रयाणां दुःखानां प्रतिकूलतयाऽऽत्मनि व्याघातात्तदभिघातकहेतुविषयक-जिज्ञासायां व्यक्ताव्यक्तज्ञज्ञानदीपकरूपमिदं प्राचीनतमम्। तद्यथा –

दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।
दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात्॥

– सा०का० १

अत्र प्रकृतिपुरुषसंयोगेन सृष्टिः। तयोः संयोगस्तत्र पङ्ग्वन्धवत्संयोगः। अत्र धाराद्वयी। केचिन्निरीश्वरवादं केचिच्च सेश्वरवादं व्यवस्थापयन्ति। इदं दर्शनं द्वैतवादपरम्। अत्र पञ्चविंशतितत्त्वानां सङ्ग्रहः। प्रकृतिः कर्त्री पुरुषः पुष्करपलाशवन्निर्लेपः। पुरुषेण संयुक्तायां प्रकृतौ पुरुषनिष्ठचेतनत्वमारोप्यते। पुरुषे च प्रकृतिगतकर्तृत्वमध्यस्यते। तथा चोक्तम् –

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥

– सा०का० ३

अस्मिन्दर्शने त्रीण्येव प्रमाणानि स्वीचक्रिरे दृष्टमनुमानमाप्तवचनं च।[२५] अनुमानमपि त्रिविधं पूर्ववच्छेषवत्सामान्यतोदृष्टभेदेन।[२६] यत्र हेतुं दृष्ट्वा व्याप्तिस्मरणपुरःसरं भूतपूर्वं कार्यमनुमीयते तत्र पूर्ववद्यथा जलसङ्कुलं जलाशयं दृष्ट्वा पूर्ववर्षाऽनुमिता।[२७] यत्र शेषं दृष्ट्वा कार्यमनुमीयते तत्र शेषवद्यथा बिन्दुमात्रं समुद्रजलं निपीय शेषं क्षारमनुमीयते। यत्र सामान्यपरिस्थित्या विशेषस्यानुमानं तत्र सामान्यतोदृष्टम्। यथा कुत्रचिदाम्रफलानां दर्शनेनेतरत्र रसालफलत्वानुमानम्। शास्त्रेऽस्मिन्नात्मैव पुरुषशब्देन व्यवह्रियते। तथा च पुरि शरीरे शेते साक्षित्वेन तिष्ठति यः स पुरुष आत्मा।[२८] साङ्ख्याः पुरुषबहुत्वमपि साधयन्ति।[२९]

[२४] युद्धमायोधनं जन्यं प्रधनं प्रविदारणम्॥ मृधमास्कन्दनं सङ्ख्यं समीकं साम्परायिकम्। (अ०को० २.८.१०३-१०४) इत्यमरः।

[२५] दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्। त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि॥ (सा०का० ४)।

[२६] त्रिविधमनुमानमाख्यातम् (सा०का० ५)। त्रिविधमनुमानमाख्यातम्। पूर्ववच्छेषवत्सामान्यतोदृष्टं चेति (सा०का० गौ०भा० ५)। न्यायशास्त्रेऽपि – अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतो दृष्टं च (न्या०सू० १.१.५)।

[२७] वर्षत्वर्थे वर्षाशब्दो बहुवचनान्तो वृष्ट्यर्थे चैकवचनान्त इत्याप्टेकोशः।

[२८] पृषोदरादित्वात्साधुः। पुरि देहे शेते शी–ड पृषो० इति वाचस्पत्यकारः। भागवते च – पुराण्येन सृष्टानि नृतिर्यगृषिदेवताः। शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ॥ (भा०पु० ७.१४.३७)।

[२९] जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च। पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव॥ (सा०का० १८)।

यतो ह्येकस्मिन् सति पुरुषे सर्वेषां सहैव युगपज्जन्ममरणे स्याताम्।[३०] यथैका विद्युद्यदा गच्छति तदा सहैव सर्वेषु कक्षेष्वन्धकारो भवति तदागमने युगपदेव सकलधामसु सुप्रकाशः सहैव विद्युद्व्यजनवीजनम्। तस्मात्पुरुषाणां बहुत्वम्। एकत्वे सति जनानां सुखदुःखप्रभृतीनां स्वभावस्य च वैषम्यं कथमपि न सङ्गच्छेत। राद्धान्तोऽयं समीचीनो युक्तियुक्तो वैष्णव-सम्मतश्च। अन्यथा यदि सर्वेष्वेक एवाऽत्मा तर्हि कथमेकस्मिन्नेव क्षणे कोऽपि म्रियते कोऽपि जायते कोऽपि तिष्ठति कोऽपि वर्धते कश्चन विपरिणमति कश्चिद्धसति। कथं वा कोऽपि विद्वान् कश्चिन्मूर्खः केचन खलाः केचित्साधवः। अस्तु। इदं शास्त्रं चापि वेदमूलकमेव। पुरुषबहुत्वे श्रुतिरपि प्रमाणं यथा इन्द्रो॑ मा॒याभिः॑ पुरु॒रूप॑ ईयते (ऋ०वे०सं० ६.४७.१८)।

योगश्च चित्तवृत्तिनिरोधपरः। यथा योगसूत्रे योगश्चित्तवृत्तिनिरोधः (यो०सू० १.२)। चित्तवृत्तिनिरोधायाष्टाङ्गयोगस्य चर्चा। यमनियमासनप्राणायामप्रत्याहारधारणाध्यान-समाधयोऽष्टाङ्गानि। एतैश्चित्तवृत्तिर्निरुध्यते। अयं च हठयोग इति कथ्यते। राजयोगस्त्वीश्वर-प्रणिधानात्मकः। यथा योगसूत्रे ईश्वरप्रणिधानाद्वा (यो०सू० १.२३)। हठयोगे प्राणजयेन मनो जयन्ति योगिनः। राजयोगे च मनोजयद्वारेण प्राणमतिशेरते संयमिनः। अस्याऽचार्यो भगवान् पतञ्जलिः। स एव पाणिनिव्याकरणमहाभाष्यकारः। स एव चाऽयुर्वेदे चरक-संहितारचयितेति श्रूयते गुरुभ्यः। तथा च सङ्कीर्तयन्ति गुरुचरणाः –

योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥[३१]

अर्थाद्योगसूत्रं निर्माय चित्तमलममलितवन्तं व्याकरणशास्त्रे पदपदार्थप्रतिपादकपरम-प्रमाणभूतमहाभाष्यसागरसंरचनया वाणीं निर्दोषयन्तं चरकसंहिताप्रतिपादनेन शरीरं भूषयन्तं प्राञ्जलिः पतञ्जलिं प्रणिपतामीति तात्पर्यम्। शब्दस्यास्य व्युत्पत्तिप्रकारश्च अञ्जलौ पतन् इति विग्रहे सप्तम्यन्ताञ्जलिशब्दस्य शतृप्रत्ययान्तप्रथमान्तपतन् शब्देन मयूर-व्यंसकादित्वात्समासः[३२] पतन् शब्दस्य च पूर्वनिपातः।[३३] एवं शकन्ध्वादिगणमाकृतिगणं मत्वा शकन्ध्वादिषु पररूपं वाच्यम् (वा० ६.१.९४) इति वार्त्तिकेन पररूपे विभक्तिकार्ये पतञ्जलिः। इत्थमाख्यायिका श्रुता गुरुमुखेभ्यो यदीसापूर्वान्तिमशताब्द्यां पाणिनिसूत्रार्थ-परिश्चिकीर्षयाऽशेषविशेषातीतो भगवाञ्छेष एकस्यचित्तपोनिष्ठब्राह्मणस्य सन्ध्यार्थं गतस्य

---

[३०] यद्येक एवाऽत्मा स्यात्तत एकस्य जन्मनि सर्व एव जायेरन्नेकस्य मरणे सर्वेऽपि म्रियेरन् (सा०का० गौ०भा० १८)।

[३१] मूलं मृग्यम्।

[३२] मयूरव्यंसकादयश्च (पा०सू० २.१.७२) इत्यनेन।

[३३] पतन्तः अञ्जलयोऽस्मिन् नमस्कार्यत्वादिति पतञ्जलिः (त०बो० ७९)। पतञ्जलिरिति। पतन् अञ्जलिर्यस्मिन् नमस्कार्यत्वादिति विग्रहः। अत्र 'अत्' इति टेरकारस्य च स्थाने पररूपमकारः। केचित्तु गोर्नदाख्यदेशे कस्यचिदृषेस्सन्ध्योपासनसमयेऽञ्जलेर्निर्गत इत्यैतिह्यात् 'अञ्जलेः पतन्' इति विगृह्णन्ति। मयूरव्यंसकादित्वात्समासः (बा०म० ७९)।

सरोवराभ्यासमञ्जलिं प्रसार्य सहस्त्ररश्मिमालिनं परमप्रकाशशालिनं कमलिनीकुलवल्लभं भगवत्साकाररूपं दिव्यरोचिषा विभासितभुवनमण्डलं दीप्तिमयमण्डलं जगदाखण्डलं भास्वन्तं विवस्वन्तं निखिलजगदुपादानभूतं शास्त्रस्वस्यन्दनं कश्यपनन्दनमदिति-कीर्तिकेतुं वैदिकधर्मसेतुमलौकिकतेजसं प्रशान्तं भगवन्तं भास्करं समुपतिष्ठमानस्य समपतत्सर्पशावकीभूयाञ्जलिपुटे। आकस्मिककरपुटभोगितोकपतनसञ्जातप्रबलकुतूहलतया द्विजन्मना कोर्भवान् इति पृष्टः सन् सप्पोऽहम् इति समुदतीतरत्परिकलितसकल-विद्याविशेषो भगवाञ्छेषः। सर्पघटकरेफः कुत्रेति प्रतिपृष्टः सन् को भवान् कोर्भवान् इति निरर्थकं मध्येरेफं व्यवहरता भवता पूर्वमेवोक्त इति वयञ्चकटाक्षं समार्पिपत्। स एव सर्पशावकः शाब्दिकसम्प्रदायनभोमण्डलसमागतपाणिनिसूत्रार्थज्ञानतरुणतल-तिमिरपटलपाटनप्रबलप्रभञ्जनोपमो निखिलपण्डितमनोरमापरिणतपरिश्रमो विगतभ्रमः प्रस्तुताष्टाध्यायीमौलिकपाठक्रमः पण्डितजगदुद्धारचिकीर्षया विप्रपुत्रतामङ्गीचकार। स एव भगवान् पतञ्जलिः पश्चाद्योगिजनसेवितं दुराराध्यं सकलकामकल्याणकल्पद्रुमं स्वर्गापवर्ग-चतुर्वर्गसोपानं साधनाजाटिल्यकटुकण्टकविषमं सुदुर्गमं योगिवर्त्म योगदर्शनदीपकेन परिश्चकार। इदं दर्शनमपि द्वैतवादपरमीश्वरवादप्रतिपादकमास्तिकं वेदमूलकञ्च।

वैशेषिकं दर्शनं तावत्सप्तपदार्थात्मकम्। अत्र द्रव्यगुणकर्मसामान्यविशेष-समवायाभावनामधेयसप्तपदार्थानां ज्ञानान्मोक्षः। एतस्याऽचार्यः काणादः। इदं सकल-शास्त्रोपकारकम्। तथा च गुरुचरणाः प्राहुर्यत् काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम् इति।[३४] इदमपि वेदमूलकमास्तिकदर्शनमीश्वरवादपरम्। न्यायदर्शनं तावत्प्रमाणप्रमेयादि-षोडशवस्तुमीमांसापरम्। अत्र षोडशतत्त्वज्ञानादेव मोक्षः। न्यायदर्शनस्याऽचार्यो भगवान् गौतमः। इदमपीश्वरं कर्तृत्वेन स्वीकरोति। तद्यथा यद्यत्कार्यं तत्तत्सकर्तृकमिति व्याप्तिं स्मरन्तो नैयायिका इत्थमनुमान्ति यत्क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वाद्घटादिवत्। इदं तु परमास्तिकदर्शनम्। एतस्य प्राचीनाचार्या मिथिलाभुवः शेखरीभूताः श्रीमदुदयनाचार्या ईश्वरसिद्धावेव न्यायसिद्धान्तकुसुमाञ्जलिनामकग्रन्थं प्रतुष्टुवुः। न्यायशास्त्रं परमनास्तिक-विद्यामदमत्तगजेन्द्रगण्डस्थलभेदनशीलं तरलतर्कतीक्ष्णनखयुक्तसिंहोपमम्। बौद्धादीनां खण्डनायेदमेव धारितव्यसनम्। आकर्ण्यते प्राचीनेभ्यो गुरुचरणेभ्यो यत्कदाचित्तीर्थयात्रा-व्यपदेशेन चरणसरोजरजःसनाथितोत्कलप्रदेशाः स्वीकृतशास्त्रार्थव्यसनरतपण्डितेन्द्रवेशाः श्रीमदुदयनाचार्यचरणाः शरीरसन्निहितनास्तिककृतेश्वरखण्डनसन्तापगम्भीरव्रणाः निम्नगावल्लभतरस्वितरलतरङ्गसङ्क्षालितपादकमलाममलां जगन्नाथपुरीं समलञ्चक्रुः। तत्र श्रीमज्जगन्नाथभुवनपावनपादारविन्दनिस्स्यन्दप्रेममकरन्दरोलम्बायमानमानसतया भगवन्मुखमृगाङ्कसौन्दर्यसुधामाधुरीं पिपासवो जिज्ञासवश्च तत्पिहितद्वारोद्घाटन-

[३४] मूलं मृग्यम्।

कालमर्चकाद्विलम्बश्रवणसञ्जातरोषज्वालाजालं नाल्पं धैर्यं धरन्तो व्याहार्षुर्व्यङ्ग्यमिश्रं श्लोकमिमम्। यत् –

ऐश्वर्यमदमत्तोऽसि मामनादृत्य तिष्ठसि।
उपस्थितेषु बौद्धेषु मदधीना तव स्थितिः॥

– मुक्तकम्

आकर्ण्य तत्प्रेमविह्वलां वाणीं पण्डितमचर्चिकाया भक्तवत्सलो भगवानकालमुद्घाट्य द्वारमुदयनमुदयगिरिरविमिवाऽत्मानं दर्शयामास। अस्मिन्न्याये सम्प्रदायद्वयं प्रावर्तत। प्राचीनन्यायस्य नव्यन्यायस्य च। प्राचीनन्यायप्रवर्तका उदयनाचार्यप्रमुखमैथिलाः। नव्यन्यायाचार्या गङ्गेशोपाध्यायगोकुलचन्द्ररघुनाथशिरोमणिविश्वनाथतर्कपञ्चाननगदाधर-भट्टाचार्यप्रभृतयो मैथिलबङ्गीयाः।

तत्र पूर्वमीमांसादर्शनं कर्मकाण्डप्रतिपादकम्। इदं वेदस्य प्रयोगपद्धतिपरिष्कारं मीमांसते। एतस्याऽचार्या जैमिनिमहाभागाः। मीमांसासूत्रं द्वादशाध्यायपरम्। अस्मिन् धर्मजिज्ञासैव मीमांसिता। यथा अथातो धर्मजिज्ञासा (मी०सू० १.१.१)। इदं तु सर्वभावेन वेदमाश्रयति। अत्रापि द्वौ सम्प्रदायौ भाट्टः प्राभाकरश्च। एतन्मतेऽपौरुषेयवेद एव निखिल-लोकनियन्ता। तत्र कर्मैव ब्रह्मत्वेन प्रतिपादितम्।[३५]

वेदान्तदर्शनं षष्ठम्। इदं वेदस्य ज्ञानकाण्डं सुस्पष्टयति। एतस्य प्रवर्तका नारायण-कलावतारा हृदयसन्निहितसकलश्रुतिसारा वेदसिद्धान्तानुशीलनभागवतधर्मपरिशीलन-परिष्कृतविचारा विहितपरमधर्मरसतरङ्गिणीप्रचारा निखिलकोविदकविकुलालङ्कारा निरहङ्काराः सन्दर्शितसमाजोचितमुनिमनोदुर्लभदुरासददुस्सहदुरन्तदुर्गमदुष्प्रेक्ष्यदुष्प्राप्य-सामग्रीसम्भारा निखिलयोगीन्द्रमुनीन्द्रयतीन्द्रसुरेन्द्रासुरेन्द्रनरेन्द्रसाधकवृन्दवन्दित-चरणकमलकल्हाराः परमोदारा बादरायणापरनामधेया महर्षिवेदव्यासवर्याः। इदं ब्रह्मसूत्रमध्यायचतुष्टयात्मकम्। एतदवलम्ब्यैव विभिन्नवेदान्तमतप्रवर्तकाः स्वस्व-सम्प्रदायानुसारं भाष्याणि बभाषिरे। अत्र ब्रह्मैव निरूपितम्। अथातो ब्रह्मजिज्ञासा (ब्र०सू० १.१.१) इति। इदं वेदस्य शिरोभागव्याख्यानभूतम्। अत्र ब्रह्मणो निर्गुणसगुणपक्षौ निरूपितौ।

एवमेव वेदखण्डनपराणि त्रीणि नास्तिकदर्शनानि। बोद्धं जैनं चार्वाकमिति। प्रकारान्तरेण सर्वस्यापि वाङ्मयस्य वेद एवाऽश्रयः। सर्वत्र च भगवान् स्तुत्या क्वचिन्निन्दया च प्रस्तुतः। यथा बुद्धो महावीरस्वामी च वेदं शिष्टतया निन्दतः किं च चार्वाकोऽशिष्टतया

[३५] यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः। अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः सोऽयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः॥ (ह०ना० १.३)।

निन्दति।

वेदमाश्रित्य त्रय आगमाः। आगमो नाम प्राचीनविचारसङ्ग्रहः। स च त्रिविधः। शैवो वैष्णवः शाक्तश्च। तत्राऽगमविषयक एकः पारम्परिकः श्लोकः श्रुतो गुरुभ्यः –

आगतं शिववक्त्रेभ्यो गतं च गिरिजाश्रुतौ।
मतञ्च वासुदेवस्य तस्मादागम उच्यते॥

– इति साम्प्रदायिकाः

इदमेव तन्त्रशास्त्रमिति कथ्यते। अत्र द्वौ मार्गौ दक्षिणो वामश्च। दक्षिणमार्गे आत्मशुद्धि-पूर्वकसिद्धिः स्वीकृता। वाममार्गे चाऽडम्बरपूर्णा चमत्कारमयी सिद्धिः साध्यते। मार्गोऽयं पञ्चमकारसेवनपरतया हेयप्रायः।

इममेव वेदमधिगन्तुं षडङ्गानि शिक्षा कल्पो निरुक्तं ज्यौतिषं छन्दो व्याकरणं च। षडङ्गवेदाध्ययनं पुराऽस्माकं विधेयमासीत्। वाल्मीकिरपि सुन्दरकाण्डे षडङ्गानां प्रशंसां सोत्साहमकार्षीत्। यथा –

षडङ्गवेदविदुषां क्रतुप्रवरयाजिनाम्।
शुश्राव ब्रह्मघोषान् स विरात्रे ब्रह्मरक्षसाम्॥

– वा०रा० ५.१८.२

शिक्षायां वेदस्वरपाठप्रक्रिया। बहव आचार्याः पृथक्पृथक्शिक्षाग्रन्थान् विलिलिखुः। पाणिनीयशिक्षाऽपि महत्त्वपूर्णा। कल्पेषु वैदिकमन्त्रप्रयोगाणां नियमाः। निरुक्ते वेदस्य गहनशब्दानां वैदुष्यपूर्णा व्युत्पत्तिः। एतदाचार्यो भगवान् यास्कः। छन्दःशास्त्रं वेद-च्छन्दसां व्यवस्था निर्विशति। गायत्र्युष्णिगनुष्टुब्बृहती पङ्क्तिस्त्रिष्टुब्जगतीति सप्त च्छन्दांसि। शेषेषु यद्यपि वैदिकी रचना मिलति तथाऽपि प्रधानतया लोके तेषामेव प्रयोगः। इदमेव पिङ्गलशास्त्रं कथ्यते। एतत्प्रवर्तकः पिङ्गलनामधेयः सर्पः। श्रूयते महात्ममुखेभ्यो यत्कदाचिद्भगवाञ्छ्रीलक्ष्मीरमणरमणीयचरणकमलसमलङ्कृतपृष्ठभागभोगिवरूथशत्रु-महापराक्रमसमूहत्रिविक्रमहिरण्मयपक्षव्याघातविमदीकृतदैत्यदानवारातिपक्षलक्षो वैनतेयो भगवान् गरुडो बुभुक्षापरः सर्पमाजिहीर्षुरभ्यधावत्। स च दुद्राव। अनिवर्तमान-हरियानमालोक्य प्रार्थयाञ्चक्रे सर्पो यद्देव मा जहि विद्यामेकां गोपितपूर्वां मत्तः प्राप्नुहीति निगद्य भगवान् सर्पभूतः पिङ्गलः पलायमानो गरुडं विद्यामुवाच। तदेव पिङ्गलशास्त्रं कथ्यते। अन्तिमं छन्दो भुजङ्गप्रयातं शिक्षयन् शीघ्रमेव दुरापं स्वकीयं विलमाविवेश। तदेव पिङ्गलशास्त्रम्।

व्याकरणमेव वेदस्य मुख्याङ्गम्। यद्यपि षडङ्गवेदोऽध्येय इति स्मृतिश्रुतिर्यथा पतञ्जलिः प्रमाणयन् प्रोवाच ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयः (भा०प०)। निष्कारणः इत्यत्र निर्गतं कारणमर्थधर्मकाममोक्षप्रभृतिप्रवृत्तिप्रयोजकं यस्मात्तथाभूतः। इत्थं

सर्वतोभावेन वेदज्ञानाय षडङ्गानां सत्यामुपयोगितायामपि सर्वप्राथम्येन व्याकरणाध्ययनं नितान्तोपयोगि। विद्वद्भिर्व्याकरणं भगवतो वेदस्य मुखमित्यभ्यधायि। मुखं व्याकरणं प्रोक्तम् इति प्राचीनोक्तेः। प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः (वा०प० १.११) इति भर्तृहरिसूक्तेश्च। व्याकरणमन्तरा व्यवस्थितभाषाज्ञानमसम्भवम्। ऋते भाषाज्ञानं वेदार्थ-ज्ञानमपि सर्वतोभावेनासम्भवम्। व्याकरणं भाषाया अलङ्कारः। यथा प्राचीनैरुक्तम् –

यद्यपि बहु नाधीषे तथाऽपि पठ पुत्र व्याकरणम्।
स्वजनः श्वजनो माऽभूत्सकलः शकलः सकृच्छकृत्॥

– प्राचीनोक्तिः

अर्थाद्बहुशास्त्राध्ययनेऽलभ्यरुचेऽपि पुत्र व्याकरणमधिगच्छ। व्याकरणं विना सन्धिसमास-ज्ञानकोषज्ञानशून्यतया सकारशकारयोरुच्चारणभ्रमेण त्वं स्वजनम् स्वकुटुम्बं श्वजनम् इति शुनः कुक्कुरस्य जनं मा मंस्थाः। दन्त्यसकारघटितः स्वशब्द आत्मीयवाची तालव्यशकार-घटितः श्वशब्दः कुक्कुरवाची। व्याकरणज्ञानं विनाऽयं विवेकः कथं सम्भवेत्। इत्थमेव दन्त्य-सकारघटितसकलशब्दस्य समुदायोऽर्थस्तालव्यशकारघटितशकलशब्दः खण्डवाचक इति कथं निर्णीयेत। तथैकवारवाचिदन्त्यसकारघटितसकृत् शब्दस्य[३६] पुरीषवाचितालव्यशकार-घटितशकृत् शब्दात्[३७] का भिन्नतेति ज्ञानं कथं स्यात्। व्याकरणं विना विधवाललाटचर्चित-सिन्दूरमिव मुखारविन्दनिहितशास्त्रमपि नैव शोभामाटीकते। तथा वृद्धाः प्राहुः –

अङ्गीकृतं कोटिमितं च शास्त्रं नाङ्गीकृतं व्याकरणं च येन।
न शोभते तस्य मुखारविन्दे सिन्दूरबिन्दुर्विधवाललाटे॥

– वृद्धोक्तिः

किं बहुना सत्यपि पुण्यजनकतावच्छेदकतावती निखिलनिगमागमशास्त्रदर्शनपुराणेतिहास-नाटकचम्पूगद्यपद्यप्रहेलिकादिचित्रबन्धमणिबन्धबहुविधस्वच्छन्दच्छन्दःप्रवाहकमनकाव्य-ज्योतिष्मती निखिलसंस्कारशोधनशीला भगवती देवभारती व्याकरणज्ञानमन्तरेणापुण्यकला कल्पलतिकेव भाति। यतो हि प्रयोगविधिज्ञानपूर्वकशब्द एव ददाति समीप्सितं फलम्। यथा श्रुतिः एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति (भा०पा०सू० ६.१.८४)। तस्माज्ज्ञानपूर्वकप्रयोग एव पुण्यजनकतावच्छेदकः। तस्मादितर-भाषेव व्याकरणज्ञानशून्यजनोच्चरितसंस्कृतभाषाऽपि वन्ध्या गौरिव निष्प्रयोजना। तथा च –

---

[३६] एकस्य सकृच्च (पा०सू० ५.४.१९)।

[३७] शकेर्ऋतिन् (प०उ० ४.५८)। उच्चारावस्करौ शमलं शकृत् (अ०को० २.६.६७)।

यथा शशाङ्केन विना विभावरी जलं विना भाति न निम्नगा यथा।
सुबोधभाषा सरला रसान्विता न शोभते व्याकरणं विना तथा॥

– इति मम

संस्कृता वाण्येव पुरुषमलङ्करोति। उक्तं नीतिशतके –

केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्॥

– भ०नी० १९

इत्थं निरस्तदूषणं भूषणभूषणं वाग्भूषणं भूषणत्वसम्पत्तये संस्कारमपेक्षते। स च संस्कारो व्याकरणमन्तरेणाऽकाशपुष्पमिव काल्पनिकः। तस्मात्पुण्यजनकतापुरःसरयथेष्टभाषाज्ञान-सम्पत्त्यै व्याकरणं रत्नदीपमालिकेव। ममायं प्रत्ययः साधुशब्दानां प्रयोगेणैव धर्मः।

व्याकरणाध्ययने मुख्यतया पञ्च प्रयोजनानि प्रतिपादितान्यशेषविद्याविशेषेण भगवता शेषेण प्राञ्जलिना पतञ्जलिना। यथा तद्वार्तिकं रक्षोहागमलघ्वसन्देहाः प्रयोजनम् (भा०प०)। इमानि पञ्च प्रयोजनानि। अत्रोद्देश्यदलानुरोधेन विधेयदले कथं न बहु-वचनतेति चेदेकशेषमहिम्नेत्यवधेयम्। तत्र रक्षाशब्दः स्त्रीलिङ्ग ऊहागमासन्देहा उभये लघु नपुंसकलिङ्गे। एवं च रक्षा प्रयोजन्यूहः प्रयोजन आगमः प्रयोजनो लघु प्रयोजनमसन्देहः प्रयोजन इति प्रयोजनी च प्रयोजनश्च प्रयोजनश्च प्रयोजनं च प्रयोजनश्चेति विग्रहे नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् (पा०सू० १.२.६९) इति सूत्रेणानपुंसकानां चतुर्णामपि लोपे सति वैकल्पिकमेकवचनम्। यद्वा वेदाः प्रमाणम् इतिवद्विशेष्यवाचकपदोत्तरसुविभक्तितात्पर्यसङ्ख्याया बहुत्वाख्यायाः प्रयोजनपदोत्तर-सुविभक्तितात्पर्यग्राहकैकत्वसङ्ख्यया सत्यपि विरोधे तस्या एकस्यैव प्रयोजनत्वस्य सकलेष्वन्वयाद्विवक्षितत्वमेव।

वेदानां रक्षार्थं व्याकरणमध्येयम्। व्याकरणज्ञानं विनाऽर्थाभावे कथं वेदेषु श्रद्धा कथं वाऽवगमनम्। सर्वेऽपि मन्त्रा नैव विभक्तिषु निर्दिष्टाः। व्याकरणज्ञानं विना यथायथं परिणमयितुं कथं शक्ष्यत्यवैयाकरणः। यथा अग्नये स्वाहा इति निर्दिष्टमिन्द्रप्रसङ्गे चतुर्थीज्ञानं विनाऽवैयाकरण इन्द्राय कथं कथयिष्यति।

जीवनावधिरल्पः शास्त्रञ्च विशालम्। श्रूयते यत् बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम। बृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम। किं पुनरद्यत्वे। यः सर्वथा चिरं जीवति सोऽपि शतं जीवति। चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति। आगमकालेन स्वाध्यायकालेन प्रवचन-

कालेन व्यवहारकालेनेति (भा०प०)। एकस्मिन्नेव काले यदि समस्तस्याऽयुषः क्षयस्तर्ह्यन्य-प्रकाराणां का गतिः। एवमेव बृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम (भा०प०) तर्ह्यस्माकं का कथा। अतोऽल्पेन कालेन विपुलस्य शब्दसागरस्य यथा पारं व्रजेम लघुनोपायेनेत्यध्येयं व्याकरणम्। व्याकरणे च वृत्तयो व्यक्तं सामासिक-सिद्धान्तपर्यवसायिन्य इति विपश्चितां मनीषितम्।

समस्तवाङ्मयस्य यथार्थावगमनं कथं स्यादित्यध्येयं व्याकरणम्। असन्देहार्थं चाध्येयं व्याकरणम् (भा०प०)। यतो हि वेदे स्वरविचारः प्रधानः। श्रुतिरस्ति –

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥

– भा०प०

अर्थात्स्वरतो वर्णतश्चाशुद्धो मन्त्र इष्टमर्थं न प्रयच्छत्यपि तु वज्रमिव यजमानं हन्ति। वेद आख्यानमिदं प्रसिद्धम्। कूट्यात्स्वार्थसाधननिपुणेन पुरन्दरेण हते पुरोधसि विश्वरूपे स्वसुतनिधनदीप्तक्रोधानलस्त्वष्टेन्द्रनाशनपरं यज्ञं समीजे। तत्र इन्द्रशत्रो विवर्धस्व[३८] अस्मिन्मन्त्रखण्डे स्वरव्यतिक्रमादिन्द्रस्य विजयो वृत्रस्य च पराजयो जातः। व्याकरणं विना कथं समाससन्देहनिवारणं स्यात्। वैयाकरणस्तु प्रकृतिस्वरं दृष्ट्वा बहुव्रीहिं समासान्तोदात्तं दृष्ट्वा तत्पुरुषं सारल्येनावगन्तुं पारयिष्यति। अतोऽसन्देहार्थं व्याकरणं पठितव्यम्।

इत्थं समस्तशास्त्रोपकारकतया पण्डितमचर्चिकाचर्चिते समभ्यर्चिते च विद्वत्तल्लजैर्विबुधभारतीसंस्करणे शब्दब्रह्मविहरणे सकलविद्यालङ्करणे व्याकरणेऽस्माभिः श्रद्धेयता निरापदं धारणीया विचारणीया च तस्य शब्दसागरसमुन्मथनमनोरममञ्जुतर-म्रदिमगाम्भीर्यसरणिः। इदमेव सकलविद्यानां सोपानभूतं परमपूतं पाटवमयं निरामयं रसमयं ध्वस्तसंसारामयं विगतभवभयं दत्ताभयं परमप्रकाशरूपं शब्दब्रह्मप्रापकं मोक्षद्वारं सकलसौष्ठवमयम्। एवं राद्धान्तिते व्याकरणमहिमनि सकलविद्वन्मनोरमतया प्रतिपादिते परमरमणीयशास्त्रविलोचनेऽस्मिञ्छब्दशास्त्रे समभवन् बहवः प्रवर्तकाः।

तत्र पुरा नव व्याकरणानि प्रसिद्धान्यासन्। पुरा यथा वाल्मीकीयरामायणस्योत्तरकाण्डे भगवन्तमेव सम्बोधयन्नगस्त्यो हनुमद्विषये प्राह यत् –

सोऽयं नवव्याकरणार्थवेत्ता ब्रह्मा भविष्यत्यपि ते प्रसादात्॥

– वा०रा० ७.३६.४७

अथ कालक्रमेण लुप्तप्रायेषु नवसु व्याकरणेष्वनवस्था जाता। अलोकलोकलोचननिभ-शास्त्रविषयेषु जटिलतापन्नेषु च शास्त्रीयविचारेषु शिथिलीभूतेषु च धर्मसिद्धान्तप्रचारेषु

[३८] हतपुत्रस्ततस्त्वष्टा जुहावेन्द्राय शत्रवे। इन्द्रशत्रो विवर्धस्व मा चिरं जहि विद्विषम्॥ (भा०पु० ६.९.११)। इन्द्रस्याभिचारो वृत्रेणारब्धस्तत्र 'इन्द्रशत्रुर्वर्धस्व' इति मन्त्र ऊहितः (भा०प्र०) इति पस्पशायां कैयटः।

सकलकलाकलापकलनो निखिलजगदुद्धरणशीलताण्डवप्रथितलीलो लीलावतीहैमवती-ललितलोचनविलासललितमकरकेतनवदनतामरसरसलुब्धशैलसुतामनोमिलिन्दो मुररिपुपादपयोजनखमणिचन्द्रकान्तद्रवीभूतपरमपूतनिखिलनिगमसारसर्वस्ववस्तुभिक्षण-समादृतयोगीन्द्रमुनीन्द्रवृन्दवेदपुराणपुरस्कृतभगीरथजटिलसाधनधृतशरीरफलभुवनपावन-नीरनीरजनयननयनवल्लभानीराजितजितमुनिमनोमलयसमीरणसमीरितभक्तभयसङ्गभङ्ग-निरङ्गरिपुजटाजूटजटिलजाम्बूनदप्रख्यतरलतमतरङ्गभग्नान्तरङ्गामङ्गलस्फटिकनिर्मल-मृदितकश्मलशमितसंसारानलक्षपितसगरसूनुशापतापपापप्रचण्डदावानलदमितषड्विकार-गरलधारापङ्क्तिविजितसरलपरमविमलपरमतरलमौक्तिकमहोज्ज्वलसुधासम्मितजलजीर्ण-जगज्जराजन्मजालमालतीमालोपमदिव्यनव्यभव्यधृतभूरिमानभागीरथीभावितसुविशाल-भालदेशो वलयीकृतशेषः शशाङ्कमौलिर्व्याकरणमन्तरा जगतः कल्याणमसम्भवमिति कृत्वा परमसन्तं प्रतिभया विलसन्तं पाणिनिमेव प्रादुर्भावयामास।

स च शिवलब्धवेदप्रसादो विगतविषादो दर्भपवित्रपाणिरुदङ्मुखः सकलव्याकरण-समन्वयभूतं लघुकायं सकलशास्त्राध्ययनसहायं निहिताष्टाध्यायं विशालविशदसरलीकृत-सङ्क्षिप्तशब्दशास्त्रस्वाध्यायमष्टाध्यायीसूत्रपाठं सुपठं पपाठ। इदं शिवचतुर्दशसूत्राणि समाश्रित्य प्रावर्तत। तानि च (१) अइउण् (२) ऋऌक् (३) एओङ् (४) ऐऔच् (५) हयवरट् (६) लण् (७) ञमङणनम् (८) झभञ् (९) घढधष् (१०) जबगडदश् (११) खफछठथचटतव् (१२) कपय् (१३) शषसर् (१४) हल्। इति माहेश्वराणि सूत्राण्यणादिसञ्ज्ञार्थानि। एषामन्त्या इतः। लण्सूत्रेऽकारश्च। हकारादिष्वकार उच्चारणार्थः (वै०सि०कौ० सञ्ज्ञाप्रकरणे)।

तत्र माहेश्वराणि इत्यत्र महेश्वरादागतानि। शङ्करवरप्रसादात्पाणिनिना लब्धानीति भावः। पञ्चम्यन्तमहेश्वरशब्दात् तत आगतः (पा०सू० ४.३.७४) इति सूत्रेण अण् प्रत्ययः। भत्वान्महेश्वरघटकाकारलोपो वृद्धिर्विभक्तिकार्यञ्च।[३९] इत्थं श्रूयते भगवान् पाणिनिः शालातुरीयः कदाचिद्गुरुकुलेऽधीयानः प्रकृतिमन्दबुद्धिरासीत्। होनहार बिरवान के होत चीकने पात इति ग्रामीणसूक्त्यनुसारं भविष्णुजनानां जीवनमपि प्रायशो विषमतामयं नूनमेव। महापुरुषो भीषणपरिस्थितिप्रचण्डझञ्झावातेन सहैवावतरति। आघातं विना

[३९] महेश्वर → तत आगतः (पा०सू० ४.३.७४) → महेश्वर अण् → महेश्वर अ → अचो ञ्णिति (पा०सू० ७.२.११५) → माहेश्वर अ → यचि भम् (पा०सू० १.४.१८) → भसञ्ज्ञा → यस्येति च (पा०सू० ६.४.१४८) → माहेश्वर् अ → माहेश्वर → विभक्तिकार्यम् → माहेश्वर जस् → जश्शसोः शिः (पा०सू० ७.१.२०) → माहेश्वर शि → माहेश्वर इ → शि सर्वनामस्थानम् (पा०सू० १.१.४२) → सर्वनामस्थानसञ्ज्ञा → नपुंसकस्य झलचः (पा०सू० ७.१.७२) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → माहेश्वर नुँम् इ → माहेश्वर न् इ → सर्वनामस्थाने चासम्बुद्धौ (पा०सू० ६.४.८) → माहेश्वरा न् इ → अट्कुप्वाङ्नुम्व्यवायेऽपि (पा०सू० ८.४.२) → माहेश्वरा ण् इ → माहेश्वराणि।

व्यक्तित्वपरिष्कारो न भवति। को जानीयाद्गुरुकुलस्थः पाणिनिर्विद्यार्थिजीवने मूर्खचक्र-चूडामणिः पश्चान्निखिलविद्वज्जनसमर्चितचरणकमलो भवितेति। तदा कस्य हृदीत्थमनुमानं भूतं स्यादधुना यः परीक्षार्थिविद्यार्थिनां परिहासभाजनतामुपेतः स एव पाणिनिः कदाचिद्वाचस्पतेरपि सम्मानपात्रतां पात्रयिष्यतीति। अतो नीतिश्लोकः पठ्यते –

नृपस्य चित्तं कृपणस्य वित्तं मनोरथं दुर्जनमानवानाम्।
स्त्रीणां चरित्रं पुरुषस्य भाग्यं देवो न जानाति कुतो मनुष्यः॥

– नीतिश्लोकः

सम्भवतोऽनयैव धारणयैतस्य नाम पाणिनिरिति। पाणिभ्यां गृहीत्वा नीयते गुरुसन्निधिं यः स पाणिनिः। अर्थात्स्वयमध्ययनदुर्बलतया गुरुसन्निधिं न गच्छति स्म तदा गुरु-प्रेषितैर्विद्यार्थिभिः पाणिभ्यां गृहीत्वा केशेषु सावज्ञोऽयं नीयते स्म। साम्प्रतं तु पाणिं गृहीत्वाऽन्यानप्यूर्ध्वं नयति स्वरचितव्याकरणज्ञानद्वारा मोक्षं प्रापयति यः स पाणिनिः। पूर्व-व्युत्पत्तौ तृतीयान्तपाणिशब्दोपपदपूर्वकात् नीधातोः (णीञ् प्रापणे धा०पा० ९०१) कर्मणि क्विप्। ततः सर्वापहारिलोपे विभक्तिकार्ये पाणिनिः।[४०] द्वितीयस्मिन् कल्पे द्वितीयान्त-पाणिशब्दोपपदात् नीधातोः कर्तरि क्विप्। सर्वापहारिलोपे सुप्कार्ये पाणिनिः।[४१] स एव कदाचिच्छास्त्रार्थे सतीर्थ्यैः पराजितो ग्लानिझञ्झावातविलुलितकोमलहृदयतः स्वीकृतमुनि-व्रतः सुरधुनीतरलतरङ्गसङ्क्षालितश्रृङ्गमालं गौरीतपश्चीरसंश्रयपवित्रीकृतविटपजालं शशाङ्क-मौलिमञ्जुलविलाससमुल्लासभग्नभक्तभवभयज्वालं सकलशैलशिरोमणिं हिमाचलं समाश्रित्य निखिलविद्यानिकेतं गिरिजासमेतं रोषरुक्षनिटिलाक्षसमुद्भूतभीषणपावकस्फुलिङ्गभस्मीकृत-मीनकेतं शिशुशशिमधुरमयूखसुधायूषसम्पोषितपदपाथोजप्रपन्नवर्गं स्वसङ्कल्पसृष्टसकल-सर्गमुमावन्तं भगवन्तं परिमहितमहसा प्रबलतरतपसा सन्तोषयामास शिवमाशुतोषम्। स वै चन्द्रावतंसः श्रुतिविहितप्रशंसो ढक्कानिनादच्छलेन चतुर्दश सूत्ररत्नानि समुन्मथ्य स्वकीयव्याकरणमहासागरात्समर्प्य पाणिनये सकलविश्वोपकारकं स्वकरुणाविग्रहं परिष्कर्तुं व्याकरणशास्त्रं प्रणेतुं चाष्टाध्यायीं सम्प्रेरयाम्बभूव। अतः श्लोको गीयते –

नृत्तावसाने नटराजराजो ननाद ढक्कां नव पञ्च वारम्।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्॥

– न०का० १

स एव पाणिनिः शिववरप्रभावपरिष्कृतविमलमनीषो मनीषीशश्चतुःसहस्र-सूत्रात्मकमभूतपूर्वं ग्रन्थरत्नं लौकिकवैदिकसकलशब्दसाधुत्वपरं परायणञ्च विदुषां

[४०] पृषोदरादीनि यथोपदिष्टम् (पा०सू० ६.३.१०९) इत्यनेन पृषोदरादित्वाद्ध्रस्व इति शेषः।
[४१] पृषोदरादीनि यथोपदिष्टम् (पा०सू० ६.३.१०९) इत्यनेन पृषोदरादित्वाद्ध्रस्व इति शेषः।

पारावारमिव प्रणिनाय।[४२] यद्यप्येतस्मात्पूर्वमप्यैन्द्रचान्द्रादीनि व्याकरणान्यासन्नेवञ्च काश्यपशाकटायनस्फोटायनापिशलिभारद्वाजप्रभृतीनामाचार्याणां नामानि चर्चितानि यथा त्रिप्रभृतिषु शाकटायनस्य (पा०सू० ८.४.५०) अवङ् स्फोटायनस्य (पा०सू० ६.१.१२३) सर्वत्र शाकल्यस्य (पा०सू० ८.४.५१) ऋतो भारद्वाजस्य (पा०सू० ७.२.६३) दीर्घादाचार्याणाम् (पा०सू० ८.४.५२) वा सुप्यापिशलेः (पा०सू० ६.१.९२) हलि सर्वेषाम् (पा०सू० ८.३.२२) इत्यादिषु तथाऽप्येषां विशालत्वादसमन्वयाच्च लौकिकवैदिकशब्दानां भगवान् पाणिनिः परमसरलं परमलघुव्याकरणं व्याचकार। यथोदाहरणमेकं द्रष्टव्यम्। इकारोकारऋकार-ऌकाराणां[४३] स्थाने स्वरे परतः क्रमाद्यकारवकाररकारलकारव्यवस्थापनार्थमाचार्याश्चत्वारि सूत्राणि पेठुः। तानि यथा – (१) इ यं स्वरे (२) उ वं स्वरे (३) ऋ रं स्वरे (४) ऌ लं स्वरे इति।[४४] किन्तु भगवान् पाणिनिश्चतुर्णां सूत्राणां स्थाने प्रत्याहार-सरण्या लाघवार्थमेकमेव सूत्रमसूत्रयत्कार्यमपि सम्पूर्णं चकार। यथा इको यणचि (पा०सू० ६.१.७७)। इक् शब्देन चतुर्णां स्थानिनां चर्चा यण् शब्देन च चतुर्णामादेशानाम्। तत्रापि सवर्णयोरिगचोर्यण्निवृत्तये बाध्यबाधको भावः प्रास्तावि। यथा मुनीशः अत्रेश-घटक ईकारेऽचि परतः मुनिघटकस्येकारस्य स्थाने यण् प्राप्तः स च अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) इत्यनेन बाधितः। अर्थादसवर्णयोरेवेगचोर्यण्संहिता।

विस्तारभीत्याऽनुवृत्तिरपि पाणिनेः पटुतायाः पण्डितविस्मापनं प्रमाणम्। यथा अतो भिस ऐस् (पा०सू० ७.१.९) इति सूत्रम्। अदन्तादङ्गात्परस्य भिस ऐसिति सूत्रार्थः। किन्तु तपरस्तत्कालस्य (पा०सू० १.१.७०) इति सूत्रेण तपरस्तकारात्परस्तकार-पूर्ववर्ती वा समकालस्य बोधकः समानोच्चारणसदृशोच्चारणकालस्य प्रत्यायक इत्यर्थ इति निर्दिश्यते। अत्र अतो भिस ऐस् (पा०सू० ७.१.९) इति सूत्रेऽप्यकारस्तकारपूर्व-वर्त्यपि स्वसमानह्रस्वोच्चारणस्येकारस्यापि बोधकः स्यात्। तथा च हरिभिरित्यत्र भिस ऐस्स्यात्। अस्मिन्नसामञ्जस्ये अणुदित्सवर्णस्य चाप्रत्ययः (पा०सू० १.१.६९) इति पूर्व-वर्तिसूत्रात् सवर्णस्य इतिपदमनुवृत्तम्। अर्थात्तपरः सवर्णस्य समकालस्य सञ्ज्ञेत्यर्थे जात इकाराकारयोः सावर्ण्याभावाद्बोधकत्वावच्छिन्नप्रतियोगिकत्वाभावेन नैव दोषः। अतो लघुसिद्धान्तकौमुद्यां वरदराजाचार्याः प्राहुः सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र (ल०सि०कौ० १)।

एवमेव बहुत्र। एतद्दृश्यते सङ्क्षेपप्रक्रियाव्यवस्थार्थमेव महामुनिना सपादसप्ताध्याय्यां

[४२] अथ कालेन बहवः शिष्या वर्षमुपाययुः। एकोऽपि पाणिनिर्नाम जडबुद्धिरुपाययौ॥ शिष्यान्तरोपहासेन सावमानः स पाणिनिः। शुश्रूषाक्लेशतो यातः कदाचित्तुहिनाचलम्॥ आराध्य तपसा तत्र विद्याकामः स शङ्करम्। प्राप व्याकरणं दिव्यं स च विद्यामुखं शुभम्॥ (ह०च०चि० २७.७२-७४)।

[४३] अत्र ऋत्यकः (पा०सू० ६.१.१२८) इत्यनेन प्रकृतिभावः।

[४४] मूलं मृगयम्।

त्रिपाद्यामप्युत्तरोत्तरसम्बन्धव्यवस्था कृता। अतो लक्ष्यानुरोधेन पृथक्सूत्रनिर्माणमन्तराऽपि पूर्वत्रासिद्धम् (पा०सू० ८.२.१) इति सूत्रबलेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धम् (ल०सि०कौ० ३१)। पूर्वत्र इत्यत्र सप्तम्यन्तत्रल्-प्रत्ययः। तथा पूर्वस्मिन् इति विग्रहे सप्तम्यन्तपूर्वशब्दात् सप्तम्यास्त्रल् (पा०सू० ५.३.१०) इति सूत्रेण त्रल् प्रत्यये विभक्तिकार्ये तद्धितश्चासर्वविभक्तिः (पा०सू० १.१.३८) इत्यनेनाव्यय-सञ्ज्ञायाम् अव्ययादाप्सुपः (पा०सू० २.४.८२) इत्यनेन विभक्तिलोपे पूर्वत्र इति सिद्धम्। तथा च पूर्वत्र परमसिद्धमिति फलितार्थः। पूर्वस्मिन् परमसिद्धमित्यर्थे कृतेऽत्र सप्तमी विषयतारूपा। विषयता च कर्तव्यतारूपा। एवं पूर्वस्मिन् कर्तव्ये शास्त्रे परमसिद्धमिति जातम्। कस्मात्परमिति जिज्ञासायां प्रकरणमवलोक्य निश्चीयते। सूत्रमिदमष्टाध्याय्या अष्टमाध्यायस्य द्वितीयस्य पादस्य प्रथमम्। पूर्वपरशब्दयोस्तस्मात्पूर्वस्मिन्निति फलितमेतस्माच्च परम्। इत्थं निर्दिष्टसूत्रात्पूर्वा सपादसप्ताध्यायी परा च त्रिपादी। अतः सपादसप्ताध्याय्यां कर्तव्यायां पूर्वशब्दसङ्केत्यायां परा त्रिपाद्यसिद्धा। अस्मिन्नंशे सूत्रस्यास्य विधित्वं प्रतिभाति। त्रिपाद्यामपि पूर्वं प्रति परशास्त्रमसिद्धम्। अयमर्थोऽधिकारगम्यः। यथा कश्चिन्निर्देशकः प्रतिजनसमुदायं गच्छन् दण्डेन निर्दिशति यत्त्वं स्वपूर्वं दृष्ट्वाऽसिद्धकार्यो भव तथैव सूत्रमिदं त्रिपाद्यां प्रतिसूत्रं गत्वा निर्दिशति त्वं सपादसप्ताध्यायीं प्रति स्वपूर्वत्रिपादीं प्रति चासिद्धं भवेति। त्रिपाद्यंश एतस्य अधिकारसूत्रता। इयं मे मनीषा। यद्यप्यन्य आचार्या भट्टोजिदीक्षितहरिदीक्षितनागेशभट्टपादप्रमुखा इदं सामग्र्येणाधिकारमेव स्वीकुर्वन्ति। यथा प्रयत्ननिर्देशप्रसङ्गे श्रीभट्टोजिदीक्षितश्चतुर एव प्रयत्नानाभ्यन्तरान् स्वीकुर्वन् प्रतिपादयति – ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्। प्रक्रियादशायां तु विवृतमेव (वै०सि०कौ० १०)। तथा च सूत्रं अ अ (पा०सू० ८.४.६८) इत्यनुसारेण विवृतमनूद्य संवृतोऽनेन विधीयते। अस्य चाष्टाध्यायीं सम्पूर्णां प्रत्यसिद्धात्वाच्छास्त्रदृष्ट्या विवृतत्वमस्त्येव (वै०सि०कौ० ११)। तथा हि सूत्रं "पूर्वत्रासिद्धम्" (पा०सू० ८.२.१)। अधिकारोऽयम् (वै०सि०कौ० १२) इति। अर्थादकारं वर्जयित्वा सर्वेषामपि स्वराणां विवृत आभ्यन्तरः प्रयत्नः। केवलमकारस्य संवृत इति। स च अ अ (पा०सू० ८.४.६८) इति सूत्रेण विधीयते। तत्र प्रथमः अ इति लुप्तषष्ठीकः। अस्य अ इति तात्पर्यं सामान्यम्। विवृतस्याकारस्य स्थाने संवृतो भवत्वकार इति भावः। तदा रामागमनम् इत्यत्र रामघटकस्याकारस्य संवृतत्वादागमनघटकाऽऽकारस्य विवृतत्वाच्चोभयोर्विषमाभ्यन्तरप्रयत्नतया सावर्ण्यप्रतियोगिकाभावेन अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) इत्यनेन दीर्घानुपपत्तौ पूर्वत्रासिद्धम् (पा०सू० ८.२.१) इत्यनेनाष्टाध्याय्या अन्तिमसूत्रत्वात्सम्पूर्णं प्रत्येतस्यासिद्धौ सिद्धायां दीर्घविधायकसूत्रकर्तव्यतायामेतस्य चासिद्धौ द्वयोर्विवृतप्रयत्नतयाऽकाराकारयोः सावर्ण्ये सति दीर्घे रामागमनम् इत्यपि प्रयोगः सुसिद्धः। इयं तत्रत्या परिस्थितिः। किन्त्वत्र पूर्वशब्दस्यावधिसापेक्षत्वेनोक्त-

सूत्रस्याष्टमाध्यायद्वितीयपादप्रथमत्वात्ततः पूर्वस्मिन् कर्तव्य इतः परमसिद्धमित्यर्थः सुस्पष्ट एव। ततः सपादसप्ताध्यायीं प्रति विधित्वेनैव कार्यसिद्धौ तदंशेऽलमधिकार-कल्पनया। अधिकारत्वं नाम स्वदेशे वाक्यार्थज्ञानशून्यत्वे सति परदेशे वाक्यार्थज्ञान-बोधकत्वमुत्तरोत्तरसम्बन्धकत्वं वा। त्रिपाद्यामधिकारत्वं भवतूत्तरोत्तरसम्बन्धत्वात्सपाद-सप्ताध्याय्यामन्योऽन्यं प्रत्यन्योऽन्यमसिद्धमित्यस्यापेक्षैव नास्ति। अतस्तत्रोत्तरोत्तर-सम्बन्धत्वमूलकाधिकारत्वसूचकासिद्धिविधायकस्य पूर्वत्रासिद्धम् (पा०सू० ८.२.१) इत्यस्य प्रसरपरिसर एव नास्ति। तत्र हि विप्रतिषेधे परं कार्यम् (पा०सू० १.४.२) इति सूत्रस्य जागरूकत्वात्। विप्रतिषेधो नामान्यत्रान्यत्रलब्धावकाशयोरेकत्र युगपत्प्रवृत्तिः। यथा इको यणचि (पा०सू० ६.१.७७) इति सुध्युपास्यः इत्यादौ चरितार्थम्। अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) इति च दैत्यारिः इत्यादौ चरितार्थम्। उभयोरपि श्री ईशः इत्यादौ युगपत्प्राप्तिः। परत्वाद्दीर्घः। तस्मात्सपादसप्ताध्याय्यां पूर्वत्रासिद्धमित्यस्य प्रसरणाभावेन तत्राधिकारस्यानुपयोगात्सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धत्वस्य शब्द-महिम्नैव सिद्धतया केवलं त्रिपाद्यामेवैतस्याधिकारता। सोपयोगा प्रतिभाति मे बाल-मनीषया। स्वं प्रत्यप्येतस्याधिकारता नास्ति। इदमस्त्यस्यासिद्धिसूचकम्। स्वयं नासिद्धिमाटीकते। यथा कश्चित्प्राणदण्डदाता नैव स्वयं दण्ड्यो भवति। एकस्मिन्नेव दण्डदातृत्वदण्ड्यत्वधर्मयोरसम्भवमिव। एकस्मिन् सूत्रेऽसिद्धिसूचकत्वासिद्धत्वधर्मौ न घटेताम्। नह्यत्र चतुरोऽपि नटः स्वेनैव स्वस्य स्कन्धमारोढुं शक्नोति। यद्यप्येतस्याधिकार-सूत्रत्वचर्चा सिद्धान्तकौमुदीप्रौढमनोरमाशब्दरत्नशब्देन्दुशेखरेषु साटोपं प्रतिपादिता। इत्यलमतिपल्लवितेन।

विविधलक्ष्याणामल्पैरेव सूत्रैर्यादृश्या चातुर्यपूर्णतूर्णप्रतिभया व्यवस्था दत्ता भगवता पाणिनिना सा नूनं स्वस्यामलौकिक्यनुपमा मनीषिमनोरमा च। अन्येभ्यो व्याकरणेभ्योऽमुष्मिन् पाणिनीयव्याकरण एकं वैलक्षण्यं यत्केषुचिदपि वैदिक-शब्दानामनुशासनं न वर्तते। किन्त्वस्मिन् लौकिकवैदिकानामुभयेषामप्यनुशासनं वैदिक-शब्दप्रक्रियासङ्कुलनम्। सिद्धान्तकौमुद्या वैदिकप्रकरणं स्वरप्रकरणं च सर्वेषामज्ञानावरणं निस्स्पृणोति। सूत्रेषु त्रिशतप्रायसूत्राणि लौकिकशब्दतोविलक्षणवैदिकशब्दसाधुत्वप्रक्रिया-प्रकारप्रतिपादकानि।[४५] यथा प्रथमाध्यायस्य द्वितीयपादे –

फल्गुनीप्रोष्ठपदानां च नक्षत्रे।
छन्दसि पुनर्वस्वोरेकवचनम्।

[४५] लौकिकशब्दतोविलक्षण इत्यत्र सुप्सुपासमासः।

विशाखयोश्च।
तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्।
– पा०सू० १.२.६०–१.२.६३

पातञ्जलमहाभाष्येऽपि अथ शब्दानुशासनम्। अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते। शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्। केषां शब्दानाम्। लौकिकानां वैदिकानां च इति (भा०प०)। शासुँ अनुशिष्टौ (धा०पा० १०७५) इत्यस्माद्धातोः ल्युट् च (पा०सू० ३.३.११५) इति सूत्रेण नपुंसके भावे ल्युट्। अनुबन्धकार्येऽनादेशे[४६] विभक्तिकार्ये अनुउपसर्गजुष्टतया अनुशासनम् इति सिद्धम्। यद्यपि शासनशब्द एवाऽनुपूर्वीपूर्ण-शास्त्ररूपोऽर्थो निर्गलति तदाऽनूपसर्गस्योपयोगिताऽऽनुकूल्यप्रतिपादनार्था। एवं च पाणिनिः शब्दाननुशास्ति इत्यत्र पाणिन्यभिन्नैककर्तृकवर्तमानकालतावच्छेदकतावच्छिन्न-शब्दकर्मानुकूल्यपुरःसरानुपूर्वीसमन्वितशब्दानुशिष्ट्यनुकूलो व्यापार इति शाब्दबोधप्रकारः। धन्यो भगवान् पाणिनिर्यः खलु निखिलपण्डितभयावहं भग्नविपश्चिद्धैर्यराशिमगाधं सागरमिव साक्षात्परब्रह्म दुरासदं दुर्धर्षं दुर्ज्ञेयं दुरवगमं सर्वतन्त्रस्वतन्त्रमनन्तं शब्द-कण्ठीरवमपि सर्वमनुशशास। आनुकूल्यञ्च साधुत्वम्। तच्च शिष्टप्रयुक्तत्वे सति पुण्य-जनकतावच्छेदकत्वम्। लक्षणेनानेन तुलसीकृतादौ नाव्याप्तिः। तुलसीकृतमानसमपि शिष्टप्रयुक्तं पुण्यजनकतावच्छेदकमपि। यद्यपि सामान्यभाषाभणितत्वादिदं न पुण्यजनकं ये स्वीकुर्वन्ति विभ्रान्तास्ते। अत्राद्याप्येतत्पाठेन लौकिकपारलौकिकसिद्धयो दृश्यन्ते।

समानाधिकरणयोरेवावच्छेद्यावच्छेदकभावनियमः। यथा गोत्वावच्छेदकं सास्नादिमत्त्वमेकस्मिन्नेव गवि गोत्वसास्नादिमत्त्वधर्मौ तिष्ठतः। अतो गोत्वावच्छिन्नो गौः इति प्रयोगो गोत्वयुक्तपरः। किन्त्वयं नियमोऽपि प्रायिक एव। अवच्छेद्यावच्छेदक-भावव्यवस्थाया विशेषं दर्शनमवच्छेदकत्वनिरुक्तौ निरूपितम्। शिष्टत्वं नामाप्तत्वम्। तच्च सकलदुर्गुणशून्यत्वे सति दिव्यविज्ञानविध्वस्तकल्मषत्वे सति त्रिकालदर्शित्वे सति यथार्थवक्तृत्वम्। अत एव न्यायप्रवर्तकाः श्रीगौतमपादा आप्तवाक्यमेव शब्दप्रमाणं मन्यन्ते। यथा आप्तोपदेशः शब्दः (न्या०सू० १.१.७)। आपॢँ व्याप्तौ (धा०पा० १२६०) इत्यस्माद्धातोः आप्नोति त्रिकालज्ञतया सर्वमपि चराचरं व्याप्नोति इति विग्रहे कर्तरि क्तः।[४७] अयमेवाऽप्तशब्दो भाषायामपभ्रंशतया आप इति कथ्यते। आप्तो नाम यथार्थवक्ता। रागादिवशादपि नानन्यथा-वादी यः स इति चरके पतञ्जलिः (ल०म०, प०ल०म०) इति वैयाकरणसिद्धान्तलघुमञ्जूषायां वैयाकरणसिद्धान्तपरमलघुमञ्जूषायां च नागेशभट्टपादाः। अपि च –

[४६] युवोरनाकौ (पा०सू० ७.१.१) इत्यनेन।

[४७] गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च (पा०सू० ३.४.७२) इत्यनेन। कर्मणोऽविवक्षाया अकर्मकत्वम्। धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसङ्ग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥ (वा०प० ३.७.८८)।

रजस्तमोभ्यां निर्मुक्ता नित्यज्ञानबलेन ये।
येषां त्रिकालममलं ज्ञानमव्याहतं सदा॥
आप्ताः शिष्टा विबुधास्ते तेषां वाक्यमसंशयम्।
सत्यं वक्ष्यन्ति ते कस्मादसत्यं नीरजस्तमाः॥

– च०सं० सू०स्था० ११.१८,१९

इति। भ्रमप्रमादविप्रलिप्साकरणापाटवादिदोषदूषितान्तःकरणस्वार्थनाशितचक्षुषोऽप्रमाणं वक्तुं पारयन्ति। किन्तु ये दिव्यविज्ञानसम्पन्नाः प्रपन्नाश्च हरेः पदमुपपन्नास्ते कथं ब्रूयुर्विपन्ना इव दूषितम्। तुलसीदासोऽपि मानस आप्तवाक्यस्यैव प्रामाण्यं बाभाष्यते –

ते श्रोता बक्ता सम शीला। समदरशी जानहिं हरि लीला॥
जानहिं तीनि काल निज ग्याना। करतल गत आमलक समाना॥[४८]

– रा०च०मा० १.३०.६,७

ऋषय एवाऽऽप्ताः। ते खल्वितरराजकवय इव राज्ञो न किमपि गृह्णन्ति स्म। रामायण इदमाख्यानं प्रसिद्धं यत् –

निर्माय रामायणमादिकाव्यं श्रीमैथिलीरामरसायनञ्च।
अध्याप्य सैतेयकुशीलवौ तौ वाल्मीकिवर्यः किल निर्दिदेश॥
गत्वा रामायणं काव्यं गायतां रामसन्निधौ।
युवाभ्यां कर्हिचिद्राज्ञो ग्रहीतव्यं न किञ्चन॥
गृहीते द्रविणे राज्ञो बुद्धिमालिन्यकारणात्।
व्याहन्येताप्तता वत्सौ निर्लोभं गायतामतः॥[४९]

एतादृशवीतरागमाहात्म्यसमानाधिकरणमेवाप्तत्वम्। एषामेव वाक्यं प्रामाणिकम्। अत एव –

इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः।
नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी॥
बुद्धिमान्नीतिमान् वाग्मी श्रीमाञ्छत्रुनिबर्हणः।
विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः॥

– वा०रा० १.१.८–९

इत्यादि वाल्मीकीयं प्रमाणम्। अन्यथा रामो राजा बभूवेति को मन्येत। वेदव्यासोऽपि निर्लोभस्यैवाऽऽप्ततां समामनति –

[४८] एतद्रूपान्तरम्–तावुभौ श्रोतृवक्तारौ समशीलौ समेक्षणौ। जानीतश्च हरेर्लीलां सकलां सर्वभावतः॥ निजज्ञानप्रभावेण तौ कालत्रितयं पुनः। करामलकवत्साक्षात्सर्वदैवावगच्छतः॥ (मा०भा० १.३०.६,७)।

[४९] मूलं रामायणेषु मृग्यम्।

चीराणि किं पथि न सन्ति दिशन्ति भिक्षां
नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन्।
रुद्धा गुहाः किमजितोऽवति नोपसन्नान्
कस्माद्भजन्ति कवयो धनदुर्मदान्धान्॥

– भा०पु० २.२.५

ईदृशाप्तोच्चरितत्वमेव साधुत्वावच्छेदकम्। साधुत्वञ्च जातिः। जातित्वं नामैकत्वे सति नित्यत्वे सत्यनेकसमवेतत्वम्। यथा घटत्वम्। तच्चैकं नित्यमनेकघटसमवेतञ्च। मञ्जूषायामेतस्य चर्चा।[५०] साधुष्वसाधुषु च वाचकत्वाविशेषः पुण्यपापयोरेव तत्र नियमः।[५१] साधूनां शब्दानामुच्चारणे पुण्यं जायते। यथा भाष्यकारोऽपि भ॒द्रैषां॑ ल॒क्ष्मीर्निहि॑ताधि॑ वा॒चि (ऋ०वे०सं० १०.७१.२, भा०प०) इति कथयति। नैयायिकानां नये साधुशब्देषु वर्तमानमर्थमसाधुशब्देषु स्मृत्वैवार्थं प्रतिपद्यते।[५२] यथा कश्चित् गगरीशब्दमुच्चारयति। तत्र घटे वर्तमानं कम्बुग्रीवादिमानित्यर्थं स्मृत्वा भावं प्रतिपद्यते। किन्तु वैयाकरणानां नय इयं मान्यता नहि। यतो हि वर्षकल्पो बालः शुद्धं घटशब्दं न जानन्नपि गगली इत्युच्चारणेनैव तमर्थं प्रतिपद्यते। अतो वाचकत्वमुभयत्र किन्तु पुण्यजनकता साधुष्वेव। साधूनामन्वाख्यानं व्याकरणं ह्यसाधून् साधुशब्देभ्यो व्याकरोति। एवं व्याकरणाभिन्नैक-कर्तृकवर्तमानकालावच्छिन्नासाधुशब्दकर्मकसाधुशब्दावधिकपृथक्करणानुकूलव्यापारः। व्याक्रियन्ते साधुशब्दा येन तद्व्याकरणम् इति व्युत्पत्तौ वि आङ् पूर्वक डुकृञ् करणे (धा०पा० १४७२) इति धातोः करणाधिकरणयोश्च (पा०सू० ३.३.११७) इत्यनेन ल्युटि लटोश्चेतोर्लोपे योरनादेशे[५३] णत्वे[५४] यणि[५५] विभक्तिकार्ये च व्याकरणम् इति सिद्धम्। व्युत्पत्तिर्हि शब्दार्थफलप्रयोजनज्ञानम्। तत्र कृधातुना साकं वि आङ् इत्युपसर्गद्वयस्य समभिव्याहारोऽपूर्वमर्थं व्यनक्ति। तत्र वि इत्यस्यार्थो विवेचनम्। आ इत्यस्याऽसमन्तात्। अर्थाद्व्याकरणेन विविच्याऽसमन्तात्क्रियते साधुशब्दः प्रकट्यत[५६] इति तात्पर्यम्। तदेव लक्ष्यलक्षणे व्याकरणमिति कथयति। व्याकरणत्वं नाम पाणिनिप्रभृतित्रिमुन्युच्चरितत्वे सत्यसाधुशब्दपृथक्कर्तृत्वे सति साधुशब्दानुख्यातृत्वम् इति मे मतम्।

---

[५०] साधुत्वं च व्याकरणव्यङ्ग्योऽर्थविशिष्टशब्दनिष्ठपुण्यजनकतावच्छेदको जातिविशेषः (ल०म०)।

[५१] वाचकत्वाविशेषे वा नियमः पुण्यपापयोः (वा०प० ३.३.३०)।

[५२] असाधुरनुमानेन वाचकः कैश्चिदिष्यते (वा०प० ३.३.३०)।

[५३] युवोरनाकौ (पा०सू० ७.१.१) इत्यनेन।

[५४] अट्कुप्वाङ्नुम्व्यवायेऽपि (पा०सू० ८.४.२) इत्यनेन।

[५५] इको यणचि (पा०सू० ६.१.७७) इत्यनेन।

[५६] सम्प्रोदश्च कटच् (पा०सू० ५.२.२९) इत्यनेन निष्पन्नात् प्रकटशब्दात् तत्करोति तदाचष्टे (धा०पा० ग०सू० १८७) इत्यनेन णिचि धातुसञ्ज्ञायां कर्मणि लटि यकि णेरनिटि (पा०सू० ६.४.५१) इति णिलोपे तिपि टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) इत्यनेनैत्वे प्रकट्यते इति सिद्धम्। प्रकटीक्रियते इत्यर्थः।

एवं शिष्टोच्चरितत्वे सति पुण्यजनकतावच्छेदकत्वरूपं साधुत्वं सार्वभौमम्। अत्र व्याकरणसम्मतत्वे नाग्रहः। तेन वाल्मीकिरामायणे पुराणेषु त बहुत्र सत्यपि पाणिनि-सिद्धान्तविरुद्धप्रयोगे नैव साधुत्वोच्छित्तिः। शिष्टप्रयुक्तत्वात्। यथा सीतायाः पतये नमः (रा०र०स्तो० २७) अत्रासमस्तपतिशब्दाद्धिसञ्ज्ञाफलरूपो घेर्ङिति (पा०सू० ७.३.१११) इति गुण अपाणिनीय एव। पाणिनिस्तु समास एव यत्र पतिशब्दं घिसञ्ज्ञं वाञ्छति। यथा तत्सूत्रं पतिः समास एव (पा०सू० १.४.८)। किन्त्वपाणिनीयत्वेऽपि शिष्ट-प्रयुक्तत्वादत्र साधुत्वम्। एवमेव साधवो हृदयं मह्यम् (भा०पु० ९.४.६८)। अत्र व्यासो ममेत्यस्य स्थाने मह्यमिति लिखति। किन्तु शिष्टप्रयुक्तत्वेनात्र साधुता। ईदृशेषु स्थलेष्वार्षत्वादित्येव समाधानं समादधति सुधियः। अत्र दृष्टादौ ह्यृषयः परमात्म-चिन्तका नैवमुपगच्छन्ति व्याकरणम्। अपि तु स्वसफलतार्थं व्याकरणमेवताननुगच्छेत्। अतः शिष्टप्रयुक्तानेव शब्दान् साधुत्वप्रतिपादनरूपसुमनोभिः सम्पूज्य कृतकृत्यतां व्रजति व्याकरणम्। अत इदानीं पाणिनीयप्रक्रियोपयोगिसाधुत्वं मीमांसामहे। पूर्वोक्तसाधुत्वं तु सार्वत्रिकम्। इदानीं पाणिनीयप्रक्रियायां साधुत्वमनुसन्दधे। साधुत्वं नामाप्रवृत्त-नित्यविध्युद्देश्यतावच्छेदकतानाक्रान्तत्वम्। यथा सुध्युपास्यः इत्यत्राप्रवृत्तो यो नित्य-विधिर्दीर्घगुणादिस्तदुद्देश्यतावच्छेदकता याऽत्त्वाच्त्वरूपा तदनाक्रान्तत्वं सुध्युपास्यः इत्यत्र साधुत्वमस्त्येव। अप्रवृत्तेति पदं बाभवति इत्याद्यसाधुत्वनिरासार्थम्। अन्यथा प्रवृत्तस्य विघातरूपस्य विधेरित्त्वरूपोद्देश्यतावच्छेदकतया भवतीति पदमाक्रान्तमेव। अतोऽप्रवृत्तेति। नित्यविधिशब्दोपादानं विकल्पस्थलेऽपि साधुत्वप्रतिपादनार्थं यथा चक्री अत्र इति स्थले इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च (पा०सू० ६.१.१२७) इत्यनेनासवर्णाजुपश्लिष्टाः पदान्ता इकः शाकल्यमते ह्रस्वसमुचितं प्रकृतिभावं भजन्त इत्यर्थानुसारमत्र घटकेऽकारेऽसवर्णेऽच्परे पदान्तश्चक्रीघटक ईकारः सह्रस्वं प्रकृतिभावमभजद्विकल्पेन चक्रि अत्र इति पक्षे। चक्री अत्र इत्यवस्थायां यणि चक्र्यत्र। अत्रापि विकल्पविध्युद्देश्यतावच्छेदकताक्रान्तत्वेऽपि साधुत्वे न क्षतिः। इदमेव साधुत्वं पाणिनीयप्रक्रियार्थमुपयोगि। अतः शब्दनित्यत्वपक्षेऽयमर्थः क्रियते इको यणचि (पा०सू० ६.१.७७) इत्यादेः। अजुपश्लिष्टेग्घटितस्य स्थाने यण्घटितः प्रयोक्तव्यः स च साधुः। अतो भाष्यकारः कथयति –

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः।
एकदेशविकारे हि नित्यत्वं नोपपद्यते॥

– भा०पा०सू० १.१.२०, ७.१.२७

अतः प्रक्रियार्थं शब्देषु काल्पनिको विकारः। प्रकृतिप्रत्ययकल्पना तत्तदर्थविकारकल्पना सर्वाऽप्यौपचारिकी। यथाऽऽह श्रीहरिः –

उपायाः शिक्षमाणानां बालानामुपलालनाः।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते॥

– वा०प० २.२३८

अतः सत्यस्य शब्दब्रह्मणः परिचयार्थमसत्याऽपि व्याकरणप्रक्रिया नितरामुपयोगिनी। यथा सोपानमन्तरा कोऽपि प्रासादमारोढुं न शक्नोति तथैव शब्दब्रह्मज्ञानमन्तरेण कश्चनापि परब्रह्म न साक्षात्कर्तुमीष्टे। अतो गुरवः पठन्ति –

शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥

– ब्र०उ० १७

वस्तुतस्तु स्फोट एव मुख्यः। स चाष्टविधः।[५७] यथा स्वच्छं स्फटिकं जपाकुसुमसंयोगे तद्गतरक्तिम्ना रक्ततामुपैति तथा निर्मलं चैतन्यमात्मा कत्वगत्वादिध्वनिरूपरूषितान्तः-करणावच्छिन्नः सन् स्फोटसञ्ज्ञां लभते। अयमेव मुख्यः। अत्र व्युत्पत्तिद्वयं स्फुटँ विकसने (धा०पा० २६०, १३७३) इत्यस्माद्धातोः स्फुट्यते प्रकाश्यते इति कर्मव्युत्पत्तौ कर्मणि घञ्।[५८] अनुबन्धकार्ये गुणे[५९] विभक्तिकार्ये च स्फोटः। द्वितीये च स्फुटत्यर्थो येन इति विग्रहे बाहुलकाल्ल्युटं प्रबाध्य पुनः करणे घञ्।[६०] इत्थं ध्वनिव्यङ्ग्यत्वे सत्यर्थविषयक-बोधजनकतावच्छेदकत्वं स्फोटत्वम् इति लक्षणम्। इमे द्वे व्युत्पत्ती भाष्यप्रदीपसम्मते। अथ गौरित्यत्र कः शब्दः इति जिज्ञासायां येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति (भा०प०) इति सिद्धान्तितं भगवता भाष्यकृता। अत्रोच्चारितेनेत्यस्य व्याख्यानं व्याचक्षते कैयटोपाध्याया – उच्चारितेन प्रकाशितेनेत्यर्थः।[६१] यथा तत्रत्यभाष्य-प्रदीपौ। एतस्य वाक्यपदीयवैयाकरणभूषणसारवैयाकरणसिद्धान्तमञ्जूषावैयाकरणसिद्धान्त-परमलघुमञ्जूषादौ सविस्तरं चर्चा।

अस्याश्चाष्टाध्याय्यां प्रत्यध्यायं चत्वारः पादाः। प्रायश्चतुःसहस्रशो विचित्राणि सूत्राणि। अहो आश्चर्यमेतत्। कोटिकोटिप्रयोगाणां किं बहुना निखिलस्यापि वाङ्मय-वारिधेश्चतुःसहस्रसूत्रैरेवानुशासनमित्येवास्य व्याकरणस्य मुख्यं वैशिष्ट्यम्। अत एव सर्व-मान्यम्। एकैकसूत्रे विविधविषयाणां समन्वयः। स च शास्त्रविशेषः शब्दानुशासनं कुर्वन्नपि मानवमनोवृत्तिमपि व्याचष्टे। यथा सूत्रं स्पष्टं श्वयुवमघोनामतद्धिते (पा०सू० ६.४.१३३)।

---

[५७] वर्णस्फोटः पदस्फोटो वाक्यस्फोटोऽखण्डपदवाक्यस्फोटौ वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इत्यष्टौ पक्षाः सिद्धान्तसिद्धाः (वै०भू०सा० १४.६१)।

[५८] अकर्तरि च कारके सञ्ज्ञायाम् (पा०सू० ३.३.१९) इत्यनेन।

[५९] पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) इत्यनेन।

[६०] सोऽपि अकर्तरि च कारके सञ्ज्ञायाम् (पा०सू० ३.३.१९) इत्यनेन।

[६१] अत्र नागेशभट्टपादाश्च – प्रकाशितेनेत्यभिव्यञ्जकैरीति शेषः।

तद्धितं विहाय यजादिप्रत्यये परे[६२] श्वन् युवन् मघवन् शब्दाः सम्प्रसारणं लभन्ते। यद्यप्यनेन शुनः यूनः मघोनः इत्यादयः प्रयोगाः सिध्यन्ति तथाऽपि सहोक्त्या त्रयाणां प्रवृत्ति-साम्यमपि प्रतीयते। तद्यथा श्वा कुक्कुरो युवा युवको मघवेन्द्र इमे त्रयः समानमेव विषय-लोलुपाः कामुकाः स्वार्थान्धाश्च। अतस्तुलसीदासो रामचरितमानसेऽपि –

लखि हिय हँसि कह कृपानिधानू। सरिस श्वान मघवान जुबानू॥[६३]

– रा०च०मा० २.३०२.८

इममेवार्थं प्रतिपादयन् कविरेकोऽकथयद्यत् –

काचं मणिं काञ्चनमेकसूत्रे ग्रश्नासि बाले किमु चित्रमेतत्।
अशेषवित्पाणिनिरेकसूत्रे श्वानं युवानं मघवानमाह॥

– मौक्तिकम्

एवमेव बहुत्र व्यवहारपक्षस्याप्रत्यक्षरूपेण चर्चा कृता वर्तते। यथा सावर्ण्यं व्याचक्षाणः पाणिनिः तुल्यास्यप्रयत्नं सवर्णम् (पा०सू० १.१.९)। सत्यपि सवर्णसञ्ज्ञा-विधायकेऽस्मिन्नन्योऽप्यर्थो निर्गलति यत्तयोरेव वर्णसाम्यं ययोरास्यप्रयत्नावर्थादाकारप्रकारौ सदृशौ भवेताम्।

इत्थमेव प्रातिपदिकसञ्ज्ञाविधायकसूत्रविषयेऽप्येका किंवदन्ती प्रहेलिका यत् –

धीरः कीदृग्वचो ब्रूते को रोगी कश्च नास्तिकः।
कीदृक्चन्द्रं न पश्यन्ति तत्सूत्रं पाणिनेर्वद॥

– मौक्तिकम्

इति प्रश्ने। अर्थाद्धीरोऽर्थवद्वचो ब्रूते। अधातू रोगी भवति। अप्रत्ययो नास्तिकः कथ्यते। प्रातिपदिकं चन्द्रं न पश्यन्ति। सम्पूर्णं सूत्रं चतुर्णामपि प्रश्नानामुत्तररूपं यत् अर्थवदधातुरप्रत्ययः प्रातिपदिकम् (पा०सू० १.२.४५)।

सङ्केतेनाव्युत्पन्नस्य चापि व्याख्या कृता। अव्युत्पन्नः प्रायशोऽर्थवान् धातुरहित ईश्वरे प्रत्ययरहितो भवति। शास्त्रे यद्यपि डित्थडवित्थसाम्प्रतिकनामशब्दानामेवाव्युत्पन्नत्वम्। तदर्थमेव सूत्रमिदम्। किन्तु व्यवहारेऽप्यनेनैवाव्युत्पन्नलक्षणं सङ्गमयितुं शक्यते। व्युत्पन्न-प्रातिपदिकसञ्ज्ञाविधायकं सूत्रं कृत्तद्धितसमासाश्च (पा०सू० १.२.४६)। अनेन कर्ता वाराणसेयः रामदासः इत्यादौ कृत्तद्धितसमासानां प्रातिपदिकसञ्ज्ञा। तत्रापि व्यवहार-व्युत्पन्नलक्षणं द्रष्टव्यम्। कृदर्थाद्यः सक्रियः। तद्धितोऽर्थात्तस्मै हितः परोपकारी। समासा अर्थात्समन्वयवादिनः। त एव व्युत्पन्नाः। यद्यपि शाकटायनमते सर्वमपि प्रातिपदिकं

[६२] भसञ्ज्ञायामिति भावः। यचि भम् (पा०सू० १.४.१८) इत्यनेन यजादिप्रत्यये परे पूर्वस्य भसञ्ज्ञा भवति।

[६३] एतद्रूपान्तरम्–दृशां वीक्ष्य विहस्यापि हृद्यवोचत्कृपानिधिः। मघवा श्वा युवा चैव वर्तन्ते समतान्विताः॥ (मा०भा० २.३०२.८)।

व्युत्पन्नमर्थाद्धातुजं प्रकृतिप्रत्ययविभागपूर्वकम्। यथोक्तम् –

नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्।
यन्न विशेषपदार्थसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम्॥

– भा०पा०सू० ३.३.१

किन्तु भगवान् पाणिनिर्महासञ्ज्ञामन्वर्थां मन्यते। अतोऽर्थमविचार्यार्वाचीनविहितनामसु भाषान्तरीयशब्देषु च व्युत्पत्तिमस्वीकुर्वन् तेषां साधुत्वार्थविभक्तिप्रतिपत्तयेऽव्युत्पन्न-प्रातिपदिकं स्वीकृत्योक्त्वा चान्वर्थं नाम रामादीनां साधुत्वाय व्युत्पन्नप्रातिपदिकसञ्ज्ञार्थं कृत्तद्धितेति सूत्रं सूत्रयामास। अव्युत्पन्नप्रातिपदिकत्वं नाम धातुप्रत्ययप्रत्ययान्तरहितत्वे सति लोकेऽर्थबोधकत्वे सति प्रातिपदिकसञ्ज्ञावत्त्वम् । यथा डित्थादौ। व्युत्पन्नप्रातिपदिकत्वं नाम प्रकृतिप्रत्ययजन्यलौकिकार्थबोधकत्वे सति कृत्तद्धितसमासान्यतमत्वे सति प्रातिपदिक-सञ्ज्ञाभाक्त्वम् । यथा कस्यचित्कुरूपस्य नाम मदनमोहन इति। व्युत्पत्तिः क्रियते मदनं कामं मोहयति। तर्हि कुरूप इयं व्युत्पत्तिर्घटिष्यते। अत एतादृशेषु स्थलेषु सम्भवायां व्युत्पत्तौ व्युत्पत्त्यनुसारमर्थाभावे प्रकृतिप्रत्ययार्थकल्पनात्याग एव स्वीकार्य इति। रूढानां पूर्वं कथितस्थलानां कृते चाव्युत्पन्नप्रातिपदिकतैवेति पाणिनिमनीषितं मे प्रतिभाति। व्युत्पन्न-प्रातिपदिकता च रामादीनामन्वर्थानां कृते। यथा रामः। रमन्ते योगिनो यस्मिन् स रामः अथवा रमयति सर्वाणि भूतानि यः स रामः अथवा रमते सर्वेषु भूतेषु यः स रामः इत्यादयः सहस्रशोऽपि व्युत्पत्तयः सार्था अर्थापयितुं शक्यन्ते। रामशब्दस्य वाच्यतावच्छेदकत्वं लक्ष्यतावच्छेदकत्वञ्च परमात्मनि सच्चिदानन्दघने परब्रह्मणि दशरथात्मजे। अतोऽस्य कृते व्युत्पन्नप्रातिपदिकता। यथा कस्यचिद्भोजनार्थं म्रियमाणस्य परमदरिद्रस्य पुत्रस्य नाम राज-कुमारः इति। सत्यपि सुलभतया तत्पुरुषसमाससम्भवे राज्ञः कुमारः इति दरिद्रकुमारे जन्यजनकभावसम्बन्धावच्छिन्नराजप्रतियोगिकुमारता नान्वर्था। अत एतत्कृते अर्थवत् (पा०सू० १.२.४५) इति सूत्रमेव। रामस्तु धातूनां धातुः प्रत्ययानाञ्च प्रत्ययस्तस्य कृतेऽधातु-घटितसूत्रं सञ्ज्ञार्थं न मे रोचते।

अर्थवदिति सूत्रं चतुष्पदम्। एतत्सूत्रेण चतुष्पदेन चतुष्पदतुल्यानामव्युत्पन्नानामेव सञ्ज्ञा करणीया। तथा च कृत्तद्धितेऽति सूत्रञ्च श्रूयते चतुष्पदम्। पूर्व-सूत्रतोऽर्थवत्प्रातिपदिकञ्चेति द्वे पदे अनुवर्त्येते। एवं श्रुतानुवृत्तसम्मेलनेन षड्पदम् –

(१) कृत्
(२) तद्धित
(३) समासाः
(४) च
(५) अर्थवत्

(६) प्रातिपदिकम्

षडैश्वर्यञ्च –

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा॥

– वि०पु० ६.५.७४

अतः षडैश्वर्यसम्पन्नस्य रामस्य भगवतो वाचकस्य रामः इति शब्दस्य द्वितीय-सूत्रेण प्रातिपदिकसञ्ज्ञा करणीया। यद्वा समासमहिम्ना कृत्तद्धितसमासाः इत्येकं पदं च इति द्वितीयम्। अतो द्विपदसूत्रेण द्विपदं मनुष्यमनुकुर्वतो रामभद्रस्य वाचकस्य रामः इति शब्दस्य द्वितीयसूत्रेणैव प्रातिपदिकसञ्ज्ञा मेऽतिरुचिकरा लगति। द्विपद-सूत्रेण सीतासमेतरामचन्द्रवाचकस्य रामः इति शब्दस्य द्वितीयसूत्रेण प्रातिपदिकसञ्ज्ञा युक्तियुक्ता भक्तिसहकृता हृदयरमणीया च। तस्मात्प्रथमसूत्रेणार्वाचीननाम्नां भाषान्तरीय-शब्दानां डित्थादीनां रूढतावच्छेदकवतां प्रातिपदिकसञ्ज्ञा राममुख्यानां च द्वितीय-सूत्रेण। एवं लघुसिद्धान्तकौमुदीवैयाकरणसिद्धान्तकौमुद्यादावर्थवत्सूत्रोदाहरणं रामकृष्ण-मुकुन्दादि किमपि चेतस्तुदति। कदाचिदिमान्यर्वाचीनजनसाधारणवाचकानि तदा सुष्ठु। किं बहुना। दशरथापत्यब्रह्मवाचकरामशब्दमव्युत्पन्नप्रातिपदिकमित्यङ्गीकर्तुमहमाशिरसि च्छेदमपि नोत्सह इति विद्वांसो बालचापलं क्षमन्ताम्। एवंविधानि बहूनि स्थलानि सन्ति येषु पदे पदे व्यवहारिकता सामाजिकता वैज्ञानिकताऽऽध्यात्मिकता च। किं बहुना। अष्टाध्याय्या रामकथया समन्वयः। यथा रामकथाया वृद्धौ तात्पर्यं रामायणस्यान्ते कविकोकिलो भगवान् वाल्मीकिः कथयति –

बलं विष्णोः प्रवर्धताम्॥

– वा०रा० ६.१२८.१२१

एवमेव भगवान् पाणिनिरप्यष्टाध्याय्याः प्रथमं सूत्रं लिखन् वृद्धिशब्दं रामायणस्य साररूपं महामन्त्रं स्मरति। वृद्धिरादैच् (पा०सू० १.१.१) इति। भूवादयो धातवः (पा०सू० १.३.१) इत्यत्र भाष्यं भाषमाणाः पतञ्जलयः प्राहुर्यत् मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति (भा०पा०सू० १.३.१)। माङ्गलिक आचार्यो मङ्गलार्थं वृद्धिशब्दं प्रयुङ्क्ते। तत्रेत्थं विचारश्चलितो यद्वृद्धिः सञ्ज्ञाऽऽदैच्च सञ्ज्ञी। नियमोऽयमुद्देश्यं पूर्वमतः कथयन्त्याचार्याः उद्देश्यशब्दः पूर्वं विधेयश्च ततः परम् । किन्त्वत्र कथं विधेयं पूर्वमुद्देश्यं परमिति। तदेत्थं समाधानं कर्तुं शक्यते यदुद्देश्यस्य पूर्वं प्रयोगः प्रायिकः। यथा अदेङ्गुणः (पा०सू० १.१.२) अत्रोद्देश्यः पूर्वं विधेयश्च परम्।

पुनः विप्रतिपत्तिर्यथा घु टि भ घि इत्यादयो लघवः सञ्ज्ञाः। तथैव कथं

नात्र लघुसञ्ज्ञा किं महासञ्ज्ञया। तदाऽऽचार्यो मङ्गलार्थमिति समुच्चारयामास। तच्च वृद्धिरूपं मङ्गलं रामकथायाः सिद्धान्तभूतम्। अष्टाध्यायी रामचरितमानसञ्चोभावपि ग्रन्थौ वकारतः प्रारब्धौ।[६४] वकारश्चामृतबीजम्।[६५] सम्पूर्णेऽस्मिन् पाणिनीये शब्दब्रह्मामृतस्य चर्चा। न म्रियत इत्यमृतम्। मृङ् प्राणत्यागे (धा०पा० १४०३) इत्यस्माद्धातोः कर्तरि क्तो नञ्समासश्च। शब्दब्रह्म जन्ममरणरहितं यथा –

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥

– वा०प० १.१

एवमादौ वृद्धिरूपं मङ्गलाचरणं कृत्वा अन्ते अ अ (पा०सू० ८.४.६८) इति विलिख्य अकारो वासुदेवः इति श्रुत्यनुसारं पुनरकारवाच्यं वासुदेवं श्रीरामचन्द्रं एव स्मरन् विरमति रामे। अस्यां प्रत्यध्यायं चत्वारः पादाः समग्रस्य वाङ्मयस्य सङ्क्षिप्तपरिचयो भौगोलिकपरिस्थितेः परिशीलनमार्षचक्षुषा शब्दानां परिलोकनम्। यथा उदक्च विपाशः (पा०सू० ४.२.७४) इत्यादि।

किं नाम सूत्रत्वमित्यपेक्षायाम् अल्पाक्षरत्वे सति बह्वर्थबोधकत्वम् इति।[६६] अस्मिल्लँक्षणे स्वीकृते हरिशब्देऽतिव्याप्तिः। तत्राऽप्यल्पाक्षरत्वादिन्द्रसूर्यसर्पसिंहविष्णु-प्रभृतिबह्वर्थबोधकत्वाच्च।[६७] हरिशब्दस्यानेकार्थतामाशङ्क्य कविकुलगुरुः कविताकामिनी-विलासो महाकविकालिदासः स्वकीयरघुवंशमहाकाव्यस्य त्रयोदशे सर्गे प्रथमे श्लोके पुष्पकारूढरामं सीतायायाशंसन्तं समुद्रं हरिशब्दस्य रामाभिधानः इति विशेषणं प्रयुञ्जानस्तं दशरथापत्यश्रीरामरूपब्रह्मवाचकं व्यवस्थापयन्नितरार्थेभ्यो व्यावर्तयति –

अथात्मनः शब्दगुणं गुणज्ञः पदं विमानेन विगाहमानः।
रत्नाकरं वीक्ष्य मिथः स जायां रामाभिधानो हरिरित्युवाच॥

– र०वं० १३.१

रामाभिधानः इति विशेषणमेव हरिशब्दस्यानेकार्थत्वं प्रमाणयति। तस्मादुक्तं

---

६४ वृद्धिरादैच् (पा०सू० १.१.१) इत्यनेन सूत्रेणाष्टाध्यायी प्रारब्धा। वर्णानामर्थसङ्घानां रसानां छन्दसामपि (रा०च०मा० १/म०श्लो०१) इत्यनेनानुष्टुपा रामचरितमानसं प्रारब्धम्। अयं ग्रन्थोऽपि वकारतः प्रारब्धः।

६५ यथा शिवपुराणे – शं नित्यं सुखमानन्दमिकारः पुरुषः स्मृतः॥ वकारः शक्तिरमृतं मेलनं शिव उच्यते। तस्मादेवं स्वमात्मानं शिवं कृत्वाऽर्चयेच्छिवम्॥ (शि०पु० १८.७६–७७)। तन्त्रशास्त्रेऽपि – "ब्रह्मरन्ध्रे यवादूर्ध्वं कुलपद्मं महेश्वरि। श्वेतं सुकेसरोपेतं सहस्रारमधोमुखम्॥" इत्यादिना "व्यापिनी केवला शक्तिरमृतौघप्रवर्षिणी।" इत्यन्तेन स्वच्छन्दसङ्ग्रहोक्तरीत्याऽमृतमयो वकारः (यो०हृ० दी०टी० ३.१३७)।

६६ पूर्वपक्षोऽयम्।

६७ यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु॥ शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु। (अ०को० ३.३.१७४-१७५) इत्यमरः। अपि च – हरिर्विष्णावहाविन्द्रे भेके सिंहे हये रवौ। चन्द्रे कोले प्लवङ्गे च यमे वाते च कीर्तितः। वारि वारिदके वाऽपि नवपञ्चार्थकः स्मृतः॥ (मूलं मृग्यम्)।

लक्षणमत्रातिव्याप्तम्। तदेव हि लक्षणं यदव्याप्त्यतिव्याप्त्यसम्भवरूपदोषत्रयशून्यम्। तथा च अव्याप्त्यतिव्याप्त्यसम्भवरूपदोषत्रयशून्यत्वे सत्यसाधारणधर्मत्वं लक्षणत्वम्। अस्यैकदेशावृत्तित्वमव्याप्तित्वम्। यथा कपिलत्वं गोत्वम्। कपिलत्वं हि लक्ष्यस्य गोः सकलदेशे न वर्तत इत्यव्याप्तिः। लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वमतिव्याप्तित्वम्। यथा शृङ्गित्वं गोत्वम्। शृङ्गित्वं हि गवि च लक्ष्येऽलक्ष्यभूते गवेतरे महिषादौ चातितिष्ठतीत्यतिव्याप्तम्। असम्भवत्वं लक्ष्यमात्रावृत्तित्वम्। यथा पुष्पवत्त्वमाकाशत्वम्। लक्ष्यभूत आकाशे पुष्पाभावादसम्भवमत्र। इत्थमल्पाक्षरत्वे सति बह्वर्थबोधकत्वं सूत्रत्वमिति सूत्रलक्षणस्य हरिशब्दोऽतिव्याप्तत्वे स्वरूपं लक्षयामः –

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥

– परा०उ० १८.१३,१४

इत्थम् असन्दिग्धबह्वर्थबोधकाल्पाक्षरत्वे सति सिद्धान्तप्रतिपादकत्वं सूत्रत्वम् इति मे शिशुमतिः। इमानि सूत्राणि षड्विधानि। सञ्ज्ञासूत्रं परिभाषासूत्रं विधिसूत्रं नियमसूत्रमतिदेशसूत्रमधिकारसूत्रञ्च। सञ्ज्ञासूत्रत्वं नाम साक्षाच्छक्तिग्राहकत्वे सति पाणिन्युच्चरितत्वम्। यथा वृद्धिरादैच् (पा०सू० १.१.१) अदेङ्गुणः (पा०सू० १.१.२) इत्यादि। अत्रादैचि वृद्धिरूपा साक्षाच्छक्तिर्ग्राहिता। आदैज्वृद्धिनिष्ठशक्तिमान् भवत्विति। परिभाषासूत्रत्वं नामानियमे नियमकारित्वम्। यथा सुधी उपास्य इति स्थिते इको यणचि (पा०सू० ६.१.७७) इत्यनेन यणि विधीयमानेऽनियमः। अचि इकः यण् स्यात् इत्येव सूत्रार्थः। अत्र षष्ठ्याः कोऽर्थः कोऽनुयोगी कः प्रतियोगी यतो हीकशब्दस्य व्यवहारजडस्य केन सम्बन्ध इत्यनियमे षष्ठी स्थानेयोगा (पा०सू० १.१.४९) इति परिभाषासूत्रमागतम्। स्थानेयोगा इत्यत्र स्थानेन प्रसङ्गेन योगो यस्याः सा। एकार आर्षः। अथवा कण्ठेकालः इतिवत् स्थाने योगो यस्याः सा इति सप्तम्या अलुक्। अनिर्धारितसम्बन्धविशेषा षष्ठी स्थानानुयोगिकसम्बन्धार्थवती भवेदिति तात्पर्यम्। सम्बन्धश्च विषयविषयिभावः। इत्थं स्थाने इति पदेन इकः स्थाने यण् इत्यर्थः। अचि इत्यत्र पुनरनियमः। अचि इत्यत्र सप्तमी। सा च सप्तम्यधिकरणे च (पा०सू० २.३.३६) इति सूत्रेणाधिकरणे। अधिकरणं नाम आधारोऽधिकरणम् (पा०सू० १.४.४५) इति सूत्रेणाधारनामकम्। आधारश्च यथाऽभिव्यापक औपश्लेषिको वैषयिकश्च। यत्र सम्पूर्णमाधेयमाधारो व्याप्नोति तत्रैवाभिव्यापकः। यथा दध्नि घृतम्। सर्वस्मिन् आत्मा। वैषयिको यदाऽऽधार आधेयं विषयतया गृह्णाति। यथा मोक्ष इच्छा। रामे प्रेम। गुरौ श्रद्धा। चरित्रे निष्ठा। सिद्धान्ते दृढता। भक्तौ हठः। संसारे नीरसतेत्यादि। औपश्लेषिको यदाऽऽधार आधेयमुपश्लिष्यति तेन सह सम्बद्धो भवति। उपश्लेषश्च संयोगेन समवायेन सामीप्येन। संयोगेन यथा कटे शेते। समवायेन

यथा शरीरे चेष्टा। सामीप्येन यथा गुरौ वसति।[६८] अतः अचि इत्यत्रौपश्लेषिकी। सा च संयोगात्मिका। इत्थम् अजुपश्लिष्टस्येकः स्थाने यण् स्यात् इत्यर्थः। पुनरनियमः सम्बन्धस्तु संयोगात्मकः पूर्वेण परेण च भवति तदा कुत्र यण् यथा सुधी उपास्य इत्यत्र सुघटक उकार इत्यच्पुनर्धीघटक ईकारोऽच्पुनर्धीघटक ईकार इगुपास्यघटक उकारोऽच्पुनरुपास्यघटक उकार इक्पाकारघटक आकारोऽजित्थं व्यवहितेऽव्यवहिते पूर्वत्र परत्र च यणि प्रसक्ते नियमः कृतः परिभाषया। अच्यव्यवहित उच्चरिते पूर्वस्याव्यवहितस्यैव। यथा सूत्रं तस्मिन्निति निर्दिष्टे पूर्वस्य (पा०सू० १.१.६६)। अस्यार्थः सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम्। पुनरनियमश्चतुर्षु यण्सु को भवेत्तदा परिभाषासूत्रं न्ययमयत्। स्थानेऽन्तरतमः (पा०सू० १.१.५०)। स्थानञ्च प्रसङ्गः। तस्मिन् सत्यन्तरतम आदेशः स्यात्। यद्यप्यान्तरतम्यं साधयितुं शक्यम्। तत्र हि स्थानकृतमान्तर्यं यथा कृष्णैकत्वम् । अत्राकारैकारयोः स्थानिनोः सदृशतमः कण्ठतालु-स्थानी ऐ इति। द्वितीयमर्थकृतमान्तर्यम्। क्रोष्टुशब्दोऽर्थद्वये प्रसिद्धो राजर्षौ[६९] वृके[७०] च। तत्र तृज्वत्क्रोष्टुः (पा०सू० ७.१.९५) इत्यत्रार्थकृतान्तर्यानुरोधेन शृगालवाचकक्रोष्टुशब्द एवाऽदेशत्वेन जातः। गुणकृतमान्तर्यं यथा वाग्घरिः इत्यत्र वाग् हरिः इत्यवस्थायां झयो होऽन्यतरस्याम् (पा०सू० ८.४.६२) इत्यनेन हकारस्य पूर्वसवर्णे प्राप्ते पूर्वत्र गकारस्तस्य सन्ति चत्वारः सवर्णाः स्वयं च मिलित्वा पञ्च हकारस्य स्थाने पञ्चसु को भवेत्तदा गुणकृतान्तर्यानुरोधेन नादघोषसंवारमहाप्राणवतो हकारस्य स्थाने पूर्वत्र पञ्चसु तादृङ्नादघोषसंवारमहाप्राणवाञ्चतुर्थो घकारः। प्रमाणकृतमान्तर्यं यथा अदसोऽसेर्दादु दो मः (पा०सू० ८.२.८०)। अत्र क्रमशो ह्रस्वस्य स्थाने ह्रस्व उकारो दीर्घस्य स्थाने दीर्घः अमू इति सिद्धमिदं प्रमाणकृतमान्तर्यम्। एषु दर्शितेषु चतुर्विधेष्वान्तर्येषु सुधी उपास्य इत्यत्र किं स्यादित्यपेक्षायां यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः (वै०सि०कौ० ३९) इति परिभाषयेतरेषु व्यावर्तितेषु स्थानकृतमान्तर्यमालम्ब्य चतुर्षु यण्स्विकारसदृशतालु-स्थानवान् यकारः। इत्थं परिभाषात्रययोगदानेन इको यणचि (पा०सू० ६.१.७७) इत्यस्य निष्कृष्टोऽर्थः अजुपश्लिष्टपूर्वत्वविशिष्टस्येकः स्थानेऽन्तरतमो यण् स्यात्स च प्रयोक्तव्यः स्यात्स च साधु स्यात् । एवमिग्घटितस्थाने यण्घटितः स्यात्स च प्रयोक्तव्यः स च साधु इति शब्दनित्यत्वपक्षीयोऽर्थः। विधिसूत्रं नाम मुख्यलक्ष्यसंस्कारकमर्थाल्लक्ष्य-संस्कारे मुख्यतया सहायकतावच्छेदकम् । यथा इको यणचि (पा०सू० ६.१.७७) आद्गुणः (पा०सू० ६.१.८७) वृद्धिरेचि (पा०सू० ६.१.८८) अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१)

[६८] गुरोः समीपे वसतीत्यर्थः।

[६९] क्रोष्टोः शृणुत राजर्षेर्वंशमुत्तमपूरुषम्॥ यस्यान्ववाये संभूतो वृष्णिर्वृष्णिकुलोद्वहः। (ब्रह्मा०पु० ३.७०.१४-१५)।

[७०] स्त्रियां शिवा भूरिमायगोमायुमृगधूर्तकाः। शृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः॥ (अ०को० २.५.५)।

मोऽनुस्वारः (पा०सू० ८.३.२३) इति। एवमेव नियमो विधौ संशोधनरूपः। यथा कृत्तद्धित-समासाश्च (पा०सू० १.२.४६) धातोस्तन्निमित्तस्यैव (पा०सू० ६.१.८०) इत्यादि। अयं प्रायशो लक्ष्यं नियमयति। यथा एचोऽयवायावः (पा०सू० ६.१.७८) इत्यनेन सर्वत्रैचोऽच्ययादौ प्राप्ते नियमो जातो धातुघटकैचो यद्यवावादेशस्तर्हि धातुनिमित्तस्यैव। तेन लव्यमित्यत्र लूञ् छेदने (धा०पा० १४८३) इति धातोः अचो यत् (पा०सू० ३.१.९७) इत्यनेन यति सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) इत्यनेन गुणे धातुनिमित्तकस्यौकारस्यैवावादेश एवमन्यत्रापि। अतिदेशत्वं नाम वतिघटितत्वम्। अर्थात् वतिघटितत्वे सति समारोपित-धर्मप्रतिपादकतावच्छेदकतावत्त्वम्। यथा स्थानिवदादेशोऽनल्विधौ (पा०सू० १.१.५६) अचः परस्मिन् पूर्वविधौ (पा०सू० १.१.५७) आद्यन्तवदेकस्मिन् (पा०सू० १.१.२१) इत्यादि। स्थानिवदादेशोऽनल्विधौ (पा०सू० १.१.५६) इदं सूत्रमादेशे स्थानिधर्ममारोपयति। अधिकारत्वं नाम स्वदेशे वाक्यार्थजनकताशून्यत्वे सति परदेशे बोधकत्वमुत्तरोत्तरसम्बन्धत्वं वा। यथा संहितायाम् (पा०सू० ६.१.७२, ६.३.११४) धातोः (पा०सू० ३.१.९१) प्रत्ययः (पा०सू० ३.१.१) परश्च (पा०सू० ३.१.२) इत्यादि। सङ्ग्रहश्चामीषां सूत्रप्रकाराणामित्थम् –

सञ्ज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥[७१]

इमामेवाष्टाध्यायीमाश्रित्य पाणिनीयं व्याकरणं प्रावर्तत। लोकेऽस्मिन्नपराणि गौरव-प्रधानानीदं च लाघवप्रधानम्। अतः परिभाषामिमां भाषन्ते भाष्यकाराः – अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः।[७२] अतो यावत्सम्भवमासीत्तावल्लघुता वर्तिता पाणिनिना। अल्पान्येव सन्ति सूत्राणि। कानिचिद्विशालानि यथा न पदान्तद्विर्वचनवरेयलोपस्वर-सवर्णानुस्वारदीर्घजश्चर्विधिषु (पा०सू० १.१.५८)। बहूनि च सूत्राणि पञ्चाक्षराणि चतुरक्षराणि त्र्यक्षराणि द्व्यक्षराण्येकाक्षराणि च सन्ति। यथा इको यणचि (पा०सू० ६.१.७७) अनचि च (पा०सू० ८.४.४७) नाज्झलौ (पा०सू० १.१.१०) चोः कुः (पा०सू० ८.२.३०) अचः (पा०सू० ६.४.१३८) हलः (पा०सू० ६.४.२) चौ (पा०सू० ६.१.२२२, ६.३.१३८) टेः (पा०सू० ६.४.१४३, ६.४.१४५) इत्यादीनि। इत्थमेव महता प्रयासेन लघुतममिदं व्याकरणं निर्माय लोकमिममुपचकार शालातुरीयः। भाष्यकाराणां प्रमाणेन महापुरुषस्यास्य जन्म शलातुरनामके स्थाने सूच्यते।[७३] सूत्रेऽपि शलातुरशब्दस्य चर्चा कृता (तूदीशलातुरवर्मती-कूचवाराड्ढक्छण्ढञ्यकः पा०सू० ४.३.९४)।

एतस्य पितुर्नाम पणिनः। अत एव पणिनस्यापत्यं पुमान् पाणिनिः इति कथ्यते।

---

[७१] मूलं मृग्यम्। श्लोकमिमुद्धृत्य मुग्धबोधटीकायां दुर्गादासः इति वाचस्पत्यकाराः।

[७२] 'एओङ्-ऐऔच्'सूत्रयोर्ध्वनितैषा भाष्ये (प०शे० १३३)।

[७३] मूलं भाष्यसंस्करणेषु मृग्यम्।

एतस्य मातुर्नामासीत् दाक्षी इति भाष्यवचनादवगम्यते। भाष्यकारो भगवन्तं पाणिनिं दाक्षीपुत्र इति सम्बोधयति यथा –

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः।
एकदेशविकारे हि नित्यत्वं नोपपद्यते॥

– भा०पा०सू० १.१.२०, ७.१.२७

अयं च दाक्षीपुत्रो भगवान् पाणिनिः पाटलिपुत्रेऽधीतवानिति कथासरित्सागरे लिखितं[७४] किन्तु दृढतमं प्रमाणं किमपि न लभ्यते। वररुचिरेतस्य मित्रं सहाध्यायी च तत्परिस्पर्धी। अनेनाष्टाध्यायी लिखिता वररुचिना कात्यायनापरनामधेयेन सूत्रेषु त्रुटीरन्विष्य वार्त्तिकानि लिखितानि। यथा सूत्रं न पदान्ताट्टोरनाम् (पा०सू० ८.४.४२) तदुपरि वार्त्तिकम् अनाम्नवति-नगरीणामिति वाच्यम्। सूत्रम् आलजाटचौ बहुभाषिणि (पा०सू० ५.२.१२५) वार्त्तिकं कुत्सितग्रहणं कर्तव्यम्। एवमन्यत्रापि। यद्यपि परवर्ती भाष्यकारः सूत्रमेव प्रमाणं मत्वा वार्त्तिकानि प्रायो निरर्थकानि स्वीचक्रे। इत्थमपि श्रूयते यद्द्वयोरप्याचार्ययोरीर्ष्या पराकाष्ठामाञ्चत्। बहुत्र सूत्राणि निराधारमाक्षेप्य वार्त्तिकरचनेन पाणिनिं प्रति कात्यायनो द्वेषं प्रमाणयति। अन्ते चोभौ मृत्यवे परस्परं शप्तवन्तौ। प्रातः कात्यायनो दिवं गतः पश्चात्पाणिनिः स्वर्गमाससाद त्रयोदश्याम्। अतोऽस्मत्सम्प्रदाये त्रयोदश्यां व्याकरणं न पाठ्यते। अतः पठन्ति गुरवः –

काणादं पाणिनीयं च त्रयोदश्यां न पाठयेत्।

– इत्यस्मद्गुरवः

कुत्रचिदित्थं मिलति यद्वने वसन्तं तमारण्यको व्याघ्रोऽकालयत्। विशेषेणासमन्ताज्जिघ्रतीति व्युत्पत्त्यनुसारं व्याघ्रस्य हिंसाकर्म न प्रामाणिकं किन्त्वन्ते तदेव जातम्। अतः पठ्यते – व्याघ्रो व्याकरणस्य शीघ्रमहरत्प्राणान् प्रियान् पाणिनेः।[७५] इदमपि स्पष्टप्रमाणाभावे निःसारमेव प्रतिभाति मे। अस्तु महापुरुषाणां जन्म यत्र कुत्रापि स्यात्किन्तु तेषां कलितधर्मवर्मसंवर्धितनम्रमनीषिनर्मसमुद्घाटितवेदान्तनिगूढ-मर्मसकललोकालङ्कारपरमोदारलोकोत्तरकर्म शर्मणे कल्पते निखिलभुवनानाम्। इदमेव व्याकरणं समभवद्विबुधभारतीवल्लभालङ्करणं तरुणतरमनीषासमुल्लसितविकसितकञ्जमाला-लसल्ललामभुवनाभिरामनवनवोन्मेषशालिप्रतिभासम्भासुरसकलसद्गुणप्रचुरनिखिलकलापुर-विद्यानववनितानूपुरमुखरमधुरभावविलसदुरःस्थलललितकम्रकल्पनाकलेवरवरेण्यवन्दित-पाणिविलाससमुल्लसच्चित्तानां विदुषां विहरणम्।

पाणिनेरनन्तरं कात्यायननामधेय आचार्यः पाणिनीयव्याकरणश्रियं समर्चयामास

[७४] क०स०सा० १.२.४५–४६, १.४.२०–२५।

[७५] मूलं मृग्यम्। सिंहो व्याकरणस्य कर्तुरहरत्प्राणान् प्रियान् पाणिनेः (प०त० २.३६) इति पञ्चतन्त्रकाराः।

स्वकीयबुद्धिकौशलकुसुमावलीभिः। अनेन द्विसहस्त्रप्रायवार्त्तिकानि समावर्तितानि। बहुशः प्रयोगाश्च वार्त्तिकद्वारा साधिताः। यथा अभिवादिदृशोरात्मनेपदे वेति वाच्यम् (वा० १.४.५३) संपुंकानां सो वक्तव्यः (वा० ८.३.५) इत्यादि। पश्चात्पाणिनीयव्याकरणस्यान्तिम आचार्याः शेषावताराः पाणिनीयव्याकरणालङ्काराः पाणिनिचरणकमलबद्धाञ्जलयः शब्दसागरसम्पूर्ण-सलिलसलीलमण्डिताञ्जलयः पतञ्जलयः प्रादुर्बभूवुर्येषां जीवनकृतं योगदर्शनाचार्यप्रसङ्गे सङ्क्षेपतो वर्णितम्। यः पाणिनीयव्याकरणपरिश्चिकीर्षया पितृचरणस्य सन्ध्यातर्पणार्थं बद्धाञ्जलेरञ्जलौ पतन् पतञ्जलिरिति विश्रुतः। पतन्तो नमस्कार्यत्वेन जनानामञ्जलयो यस्मिन् विषये स पतञ्जलिः[७६] इति वा बहुव्रीहौ शकन्ध्वादिगणस्याकृतिगणत्वात्पररूपम्। इमे शेषावतारा आसन्नित्यास्तिकवैयाकरणानां हृदयम्। यथा –

अशेषफलदातारं भवाब्धितरणे तरिम्।
शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम्॥

– वै०भू०सा० मङ्गलाचरणे २

इति वैयाकरणभूषणसारे कौण्डभट्टः। भट्टोजिदीक्षितश्च स्वकीयवैयाकरणसिद्धान्त-कारिकावल्यामिमं फणिशब्देन सम्बोधयति। यथा –

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः।
तत्र निर्णीत एवार्थः सङ्क्षेपेणेह कथ्यते॥

– वै०सि०का० १

एवमेव हरिदीक्षित एनं शब्दरत्ने शेषमेव स्वीकरोति –

शेषविभूषणमीडे शेषाशेषार्थलाभाय।
दातुं सकलमभीष्टं फलमीष्टे यत्कृपादृष्टिः॥

– श०र० मङ्गलाचरणे १

नागोजिभट्टस्त्वात्मनो नाम नागेश इति लिखति परिभाषेन्दुशेखरे शब्देन्दुशेखरे च। यथा परिभाषेन्दुशेखरे मङ्गलाचरणं कुर्वन्नागोजिभट्टो लिखति –

नत्वा साम्बं शिवं ब्रह्म नागेशः कुरुते सुधीः।
बालानां सुखबोधाय परिभाषेन्दुशेखरम्॥

– प०शे० मङ्गलाचरणम्

तत्र नागेशशब्दे बहुव्रीहिसमासः। नागो नागावतारः पतञ्जलिरीशो यस्य स नागेशः इति। नागोजिभट्ट आत्मन ईश्वरं पतञ्जलिमेव मन्यते। एवमेव लघुशब्देन्दुशेखरस्य मङ्गलाचरणे

[७६] "पतञ्जलिरिति" पतन्नञ्जलिर्यस्मिन् नमस्कार्यत्वादिति विग्रहः (बा०म० ७९)। पतन्तोऽञ्जलयोऽस्मिन् नमस्कार्यत्वादिति पतञ्जलिः (त०बो० ७९)। नमस्कार्यत्वेन नमस्कार्यत्वात् इत्यनयोः विभाषा गुणेऽस्त्रियाम् (पा०सू० २.३.२५) इत्यनेन तृतीयापञ्चम्यौ। पूर्वत्रापि ६२तमे पृष्ठे व्युत्पत्तिर्विमृष्टा।

पतञ्जलिं फणीशशब्देन स्तौति। यथा –

नत्वा फणीशं नागेशस्तनुतेऽर्थप्रकाशकम्।
मनोरमोमार्द्धदेहं लघुशब्देन्दुशेखरम्॥

– ल०शे० म० ३

तस्य वाल्मीकिरामयणे टीकाऽपि नागेश्वरी नाम्ना प्रसिद्धिं गता। लघुत्रयीबृहत्त्रय्योः प्रबुद्ध-टीकाकारो मल्लिनाथोऽपि पातञ्जलमहाभाष्यं पन्नगगवीशब्देन तुष्टाव।[७७] एवमेव कवितार्किक-चूडामणिः कल्पनाकाननकण्ठीरवः शब्दरचनाविन्यासप्रगल्भः सर्वतन्त्रस्वतन्त्रः कविता-कामिनीहर्षः श्रीहर्षो भगवन्तं भाष्यकारं शेषमेव मन्यते। कथयति फणिभाषितभाष्यफक्किका-विषमा कुण्डलनामवापिता (नै०च० २.९५) इति। यः खलु भगवान् श्रीहर्ष एतावदात्मनो वैदुष्यं प्रकटयन् सगर्वं कथयति यत् –

ग्रन्थग्रन्थिरिह क्वचित्क्वचिदपि न्यासि प्रयत्नान्मया
प्राज्ञंमन्यमना हठेन पठिती माऽस्मिन् खलः खेलतु।
श्रद्धाराद्धगुरुश्लथीकृतदृढग्रन्थिः समासादय-
त्वेतत्काव्यरसोर्मिमज्जनसुखव्यासज्जनं सज्जनः॥

– नै०च० २२.१५४

एतादृग्वैदुष्यसम्पन्नोऽपि श्रीहर्षो भाष्यकारं शेषं मत्वा प्रपद्यत एतदधिकं किं ब्रूमहे। अधुनाऽपि वाराणस्यां प्रसिद्धो नागकूपो यस्य परिसरे भगवान् भाष्यकारः स्थित्वा सम्पूर्णमहाभाष्यं बभाषे। साम्प्रतं भाषायां स नागकुआँ इति कथ्यते। प्रतिवर्षं सर्वेऽपि वाराणसेया विद्वांसो मादृशा विद्यार्थिनश्च श्रावणशुक्लपञ्चम्यामाशीर्वादलिप्सया शास्त्रार्थ-चिकीर्षया च सोत्साहं गुरुभिः सह गच्छन्ति। तत्र च सानन्दं शास्त्रार्थमाध्यमेन शास्त्रं गुरुभ्यः शिक्षन्ते शिक्षयन्ति च शिष्यान्। श्रूयते गुरुभ्यो यदस्य नागकूपस्य परिसरे भगवान् पतञ्जलिः प्रायशो भाष्यपारायणं प्रोवाच। स च यवनिकापटखण्डेन मुखमाच्छाद्य पाठयति स्म। महाभाष्यकाराः प्रतिदिवसं यावद्विषयं स्पष्टयन्ति स्म तदेव आह्निकम् इति कथ्यते। अह्ना निर्वृत्तं जातमाह्निकम्।[७८] एवं पञ्चाशीति दिवसान् यावत्पाणिनिसूत्राणामुपरि भाष्यप्रवचनं चक्रुः। तानि पञ्चाशीत्याह्निकानि जातानि। तानि च भूर्जपत्रेषु कदल्यादिपत्रेषु च लिख्यन्ते स्म। कुत्रत्यानिचित्स्थलानि पत्रेषु लिखितानि विद्यार्थिभिस्तान्यजाभिर्भक्षितानि। अद्याप्यजाभक्षितस्थलानि चर्चन्तेऽस्मद्गुरुपरम्परायाम्। गुरवः श्रावितवन्तो यत्कदाचिदेको विद्यार्थी महाभाष्यकाराणां भाष्यप्रवचनवेलायां

[७७] कि० घ०व्या०म० ४, र०वं० स०व्या०म० ४, शि०व० स०व्या०म० ४।

[७८] तेन निर्वृत्तम् (पा०सू० ५.१.७९) इत्यनेन अहन् प्रातिपदिकात् ठञ् प्रत्ययः। ठस्येकः (पा०सू० ७.३.५०) इत्यनेनेकादेशे अल्लोपोऽनः (पा०सू० ६.४.१३४) इत्यनेनालोपे तद्धितेष्वचामादेः (पा०सू० ७.२.११७) इत्यनेनादिवृद्धौ विभक्तिकार्ये सिद्धम्।

किञ्चित्कार्यगौरवात्तानपृष्ट्वा पाठं त्यक्त्वा बहिर्गतः। आगते च तस्मिन् क्रोधवशेन भगवता वास्तवं रूपं सहस्रशिरोयुक्तं सहस्रफणासमुल्लसितदिव्यकोटिकोटिसहस्रमरीचिमालिनिन्दकसहस्रमणिफणप्रकाशनिरस्तनिखिलभुवनतिमिरपटलं फूत्कारसमुच्छलितसहस्रवदनज्वालाजालमात्रतिरस्कृतप्रलयकालानलमनलं भयानकं नारायणांशशिरोलसितरजःकणायितशैलसरित्समुद्रकाननवृक्षजडजङ्गमसचराचरधरधरणिगौरवं शेषाख्यं प्रकटयाम्बभूवे। विद्यार्थी च सर्वैश्छात्त्रैः सहानुनिनाय। अनन्तरमुपसंहृत्य रूपमलौकिकं विससर्ज तान् भगवान् विरराम च पाठात्। भगवतः पतञ्जलेर्भाषा सुवासा योषेव कलितभाषा विचक्षणपोषा विहितविपश्चित्सत्तोषा निरस्तनिखिलदोषा दोषाकरकौमुदीव मोदयति सज्जनचकोरनिकुरम्बकम्। सरलभाषायां गम्भीरतमविषयाणां तात्पर्यं यादृक्चतुरतया स्पष्टीकृतं भगवता नूनं तदभूतपूर्वम्। विविधदृष्टान्तदार्ष्टान्तिकव्याजभङ्गिम्ना प्रतिपादनं काञ्चने मणिरिव सम्यक्स्थिरतां याति। भाषाभावशैलीप्राञ्जल्यं दृष्ट्वा लगति यद्भगवाननायासं शब्दसमुद्रमवगाहमानोऽमन्दमन्दरतामुपेतः। प्रश्नभाष्यमाक्षेपभाष्यं सिद्धान्तभाष्यं विषये स्वर्णसौरभयोगमापादयन्ति। कुत्रचिदैश्वर्यमुद्रायां निभ्रान्तं पाणिनिं प्रशंसतो भगवतो वाक्यं विदुषां मनो हरति। यथा सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात् (भा०पा०सू० ६.१.७७)। एवमेव वृद्धिरादैच् (पा०सू० १.१.१) सूत्रे भगवान् साटोपं घोषयति यत् – प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता यत्नेन सूत्रं प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्। किं पुनरियता सूत्रेण (भा०पा०सू० १.१.१) इति। स्वकीयया प्रतिभया बहुत्र सूत्राणि प्रत्याख्यातानि भगवता। तत्र भगवत इत्थं तात्पर्यं फलं द्विविधं दृष्टमदृष्टञ्च। सूत्राणां लक्ष्यसिद्धौ सहायकत्वं दृष्टं फलम्। पुण्यजनकता चादृष्टं फलम्। अप्रत्याख्यातसूत्राणां द्विविधम्। प्रत्याख्यातसूत्राणामदृष्टमात्रं फलम्। अतो यानि प्रत्याख्यातानि तेषां दृष्टं फलं नहि। तदभावेऽपि लक्ष्याणां सिद्धेः। यथा नाज्झलौ (पा०सू० १.१.१०) इति सूत्रमचां हलाञ्च मिथः सावर्ण्यं निषेधयति। विश्वपाभिः इत्यत्राऽकारेण हकारस्य सावर्ण्यात्प्राप्तढत्वनिषेधाय[७९] हे यियासो इत्यत्र प्लुताकारेण च हकारसावर्ण्यवारणाय। दीर्घाकारप्लुताकारयोः प्रश्लेषं विधाय दीर्घाकारप्लुताकारसहितानामचां हलां च न मिथः सावर्ण्यमिति व्यवस्थायामेव दधि हरति दधि शीतलम् दधि षष्ठम् दधि सान्द्रम् इत्यादौ सावर्ण्याद्यण्दीर्घो न। अन्यथोष्मसञ्ज्ञकहकारशकारषकारसकाराणां स्वरसञ्ज्ञकेकारेण समानविवृतप्रयत्नत्वात्स्थानसाम्याच्च सावर्ण्येन दोषो दुर्वार एव। तथा च दीक्षितः तेन दधीत्यस्य हरति शीतलं षष्ठं सान्द्रमित्येतेषु परेषु यणादिकं न। अन्यथा दीर्घादीनामिव हकारादीनामपि ग्रहणकशास्त्रबलादच्त्वं स्यात् (वै०सि०कौ० १३)। दीक्षितादयः प्राचीनाश्चतुर एवाभ्यन्तरप्रयत्नान् प्रतियन्ति। अत

[७९] हो ढः (पा०सू० ८.२.३१) इत्यनेन हकारस्य झलि ढत्वं प्राप्तम्।

ऊष्मणां स्वराणाञ्च विवृतमेव प्रयत्नं मानयन्ति। यथा आद्यश्चतुर्धा। स्पृष्टेषत्स्पृष्टविवृतसंवृत-भेदात्। तत्र स्पृष्टं प्रयत्नं स्पर्शानाम्। ईषत्स्पृष्टमन्तःस्थानाम्। विवृतमूष्मणां स्वराणां च। ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्। प्रक्रियादशायां तु विवृतमेव (वै०सि०कौ० १०) इति। एवं यदा चत्वारः प्रयत्नाः स्वीक्रियन्ते तदा नाज्झलौ (पा०सू० १.१.१०) इत्यस्याऽवश्यकता। यदा चेषद्विवृतमूष्मणां विवृतञ्च स्वराणामिति प्रयत्नभेदः क्रियते तदा हकारादीनामिकारादिभिः प्रयत्नवैषम्यात्सावर्ण्याभावेन दीर्घादीनामप्रसक्त्या तन्निषेधार्थं नाज्झलावित्यलब्धलौकिक-फलतया प्रत्याख्यायि भगवता भाष्यकृता। अदृष्टं तु फलमस्त्येवेति कृत्वा प्रत्याख्यातं किन्तु निष्कासितं न सूत्रपाठात्। अत एव कस्यचिदपि वर्णस्य व्यर्थता नहि स्वीकृता भगवता। इममेव पन्थानमनुसरद्भिः श्रीवरदराजाचार्यैर्लघुसिद्धान्तकौमुद्यां पञ्चप्रयत्नता स्वीकृता। यथा आद्यः पञ्चधा स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात्। ईषद्विवृतमूष्मणाम्। विवृतं स्वराणाम् (ल०सि०कौ० १०) इति।

अस्मिन् प्रक्रियालाघवं कार्यसिद्धिश्च बहुत्रान्यप्रकारैरपि दर्शयन्तः साधनोपायानपाणिनीयभीत्या श्रद्धावनतमस्तकाः पुनः प्राञ्चः प्राञ्जलयः प्रार्थयन्ते पतञ्जलयो यच्छक्यमेवमपि वक्तुं किन्तु अपाणिनीयं तु भवति (भा०प०, भा०पा०सू० १.१.३)। वीक्ष्यतां कीदृशी श्रद्धा भगवति पाणिनौ भगवतां भाष्यकाराणाम्। कात्यायनस्य बहुत्र त्रुटि-संशोधनात्मकवार्त्तिकप्रयासो द्वेषग्रस्तधियैवेति भाष्यकाराणां मनीषितम्। पस्पशाह्निके यथा लौकिकवैदिकेषु इति वार्त्तिकं भाषयन्तो भाषन्ते भाष्यकृतो यत् प्रियतद्धिता दाक्षिणात्याः। "यथा लोके वेदे च" इति प्रयोक्तव्ये "यथा लौकिकवैदिकेषु" इति प्रयुञ्जते (भा०प०) इति। संयोगान्तस्य लोपः (पा०सू० ८.२.२३) इति सूत्रेण सुद्ध्य् उपास्य इत्यादौ संयोगान्तस्य यणो लोपो मा भूदिति यणः प्रतिषेधो वाच्यः वचनमिदमुपन्यस्तं वार्त्तिककृता। एतस्य भाष्यकारः प्रत्याख्यानं करोति यत् झलो झलि (पा०सू० ८.२.२६) इति सूत्रात् झलः इति पञ्चम्यन्तं पदं षष्ठ्या विपरिणम्यात्रापकर्षणीयम्।[८०] एवं च झलः संयोगान्तस्य लोप इत्यर्थे यणो लोपः सुतरामसम्भवस्तदर्थं वचनारम्भो व्यर्थः। स्वकीयदृष्टान्तप्रवाहप्रसङ्गे मननशीलेनानेन महामुनिना समग्रा भारतीयसंस्कृतिवाङ्मयी दर्शिता। धर्मशास्त्रराजशास्त्रनीतिशास्त्रार्थशास्त्र-वेदान्तलोकव्यवहारादिमानवजीवनोपयोगिनिगूढविषयाणां मञ्जुलं चित्रणं दृश्यते कृतम्। दृष्टान्तेषु शास्त्रप्रतिपादनव्याजेन शिक्षाऽप्यतिचतुरतया प्रत्ता। यथा पस्पशाह्निके समानश्च खेदविगमो गम्यायां चागम्यायां च। तत्र नियमः क्रियते। इयं गम्येयमगम्येति (भा०प०)। एवं यथा यो ह्यजानन् वै ब्राह्मणं हन्यात्सुरां वा पिबेत्सोऽपि मन्ये पतितः स्यात् (भा०प०) इति।

---

[८०] न वा वक्तव्यम्। किं कारणम्। झलो लोपात्। झलो लोपः संयोगान्तलोपो वक्तव्यः (भा०पा०सू० ८.२.२३)। न वेति। "झलो झली"त्यतः सिंहावलोकितन्यायेन झल्ग्रहणमिहानुवर्तते। तत्षष्ठ्या विपरिणम्यत इति यणो लोपाभावः (भा०प्र० पा०सू० ८.२.२३)।

भगवतां भाष्यकृतां भगवती भागीरथीव भास्वती भासुरा भाषा विषयाणां सुस्पष्टप्रतिपादनं भावव्यक्तीकरणसामर्थ्यं निसर्गसिद्धप्रवाहो वाचस्पतिमतिरञ्जने गहनतमा विचारसरणिः कुशाग्रतीव्रप्रतिभैकैकस्य प्रश्नस्यानेकान्युत्तराणि स्वस्थो भावबोधप्रकारः सिंहवद्विक्रान्तियुक्तिप्रदर्शनमिदं सर्वमलौकिकमेव।

अन्यानि सन्ति भाष्याणि आचार्यैर्विहितानि वै।
महाभाष्यमिदं प्रोक्तं दिव्यं शेषेण धीमता॥

– इति मम

अन्यान्यभाष्याणामपेक्षयाऽस्य वैशिष्ट्यं यदन्यानि सूत्रव्याख्यानानि भूतानीदं परिष्कृत-सूत्रव्याख्यानं सदपीष्ट्यादिना महत्त्वपूर्णम्। क्वचित्क्वचिद्भगवता स्वतन्त्राऽपीष्टिर्दत्ता। यथा त्यदादीनामः (पा०सू० ७.२.१०२) इदं सूत्रं विभक्तौ परतस्त्यदादीनामकारान्तादेश-विधायकमिति पाणिनिमतं त्यदमारभ्य। किमन्ताः सन्ति त्यदादयः किं पर्यन्तं चेदकारान्तादेशस्तदा युष्मत् अस्मत् भवत् इत्यादावकारान्तादेशे कृते युवाम् आवाम् भवन्तौ इत्यादिरूपाणि न सिद्धानि स्युः। अतो भगवतेष्टिर्दत्ता – द्विपर्यन्तानामेवेष्टिः इति।[८१] बहुत्र कल्पनाबलेन संसाध्य सूत्रप्रयोग आर्षदृष्ट्या तेषां लोकेऽनभिधानं पश्यन् स्वत एव व्यरंसीन्निरर्थकबुद्धिविलासात्। अत एव महत्त्वञ्चेष्ट्यादिना भाष्यप्रदीपटीकायां कैयटेन लिखितम्। कैयटः स्वयं कथयति –

भाष्याब्धिः क्वातिगम्भीरः क्वाहं मन्दमतिस्ततः।
छात्त्राणामुपहास्यत्वं यास्यामि पिशुनात्मनाम्॥

– भा०प्र० मङ्गलाचरणे ६

काशिकायां पूर्ववर्तिनां पाणिनिकात्यायानपतञ्जलीनां कृते मुनिसञ्ज्ञा कथिता लोकान्धकार-निनाशयिषया।[८२] यथोत्तरं मुनीनां प्रामाण्यम्। तस्मात् त्रिमुनि व्याकरणं कथ्यते। अन्तिमं प्रामाण्यं महाभाष्यकृतामेव। इत्थं शिवप्रेरणतया पाणिनिभाषितस्य कात्यायन-पतञ्जलिपरिष्कृतस्यैतस्य लौकिकवैदिकशब्दसाधुत्वपरायणस्य पाणिनीयव्याकरणस्य द्वे नेत्रे प्रक्रिया दर्शनञ्च। प्रक्रियायां त्रयाणां मुनीनामनन्तरं मुख्या आचार्याः काशिकाकाराः कैयटोपाध्याया वृत्तिकारा भट्टोजिदीक्षितमहाभागा वरदराजाचार्या नागोजिभट्टमहाभागाश्च येषु भट्टोजिदीक्षितप्रक्रियाप्रकारः सरलः सुष्ठुर्लोके चलितश्च। अनेन प्रक्रियाप्रकरणमनुसृत्य सूत्राणि सङ्कलितानि। यथा प्रथमं सन्धिः शब्दानां पश्चात् षड्लिङ्गविभक्तिरूपाणि स्त्रीप्रत्यया एतत्पर्यन्तं शब्दविवेचनम्। पुनर्वाक्यार्थं कारकनिर्देशः समासवर्णनं तद्धितीयप्रयोगदिग्दर्शनं

[८१] तस्माद्द्विपर्यन्तानामत्त्वं वक्तव्यम् (भा०पा०सू० ७.२.१०२)। भैमीकारा अपि – इसकी अवधि भाष्यकार ने 'द्वि' शब्द पर्यन्त नियत की है (ल०सि०कौ० भै०टी० १९३)। केषुचित्संस्करणेषु द्विपर्यन्तानामेवेष्टिः इति वार्त्तिकम्।

[८२] का०वृ० २.१.१९।

धातुप्रक्रियानिर्देशः कृदन्तनिर्देशश्चेति। प्रक्रियायां टीकाग्रन्थ एतस्य प्रौढमनोरमा। कुत्रचिन्नागेश एतन्मतं विरुणद्धि। अनुबन्धविषयेऽयमित्सञ्ज्ञकत्वमनुबन्धत्वं मन्यते नागेशश्चेत्सञ्ज्ञायोगत्वमनुबन्धत्वं स्वीकरोति। अन्तिम आचार्यो भगवान्नागेशः। प्रधानतया परिभाषेन्दुशेखरलघुशब्देन्दुशेखरौ प्रक्रियाप्रकारपरिष्कारकौ। श्रूयते यन्नागेशभट्टः पुरा कुब्ज आसीत्कदाचिद्बालस्वभावतयोच्चासनमधिश्रितश्चरणताडनपुरःसरं तिरस्कृतः। ग्लानिखिन्नचेतास्त्रिरात्रेण वागीश्वरीमाराध्य वर्षत्रयेण सकलशास्त्रं समधिगम्य पण्डितचक्रचूडामणिर्जातो नागेशः। विवाहे सति शास्त्रचिन्तनतन्मयतया भोगवासनातो विरतः सन्तानार्थं समभ्यर्थितो भार्यया सरलभावेनोत्तरयन्नाह नागेशो यत् पुत्र्यश्चैता हि मञ्जूषाः पुत्रौ चैतौ हि शेखरौ।[८३] गुरुचरणा वदन्ति यत्कुड्ये गर्तं कृत्वा तस्मिन्निवेश्य कुब्जभागं लिखन्ति स्म ग्रन्थानाचार्या नागेशा अहो। स्वशरीरचर्मनिर्मितपदत्राणसमर्पणेनाऽपि वयं किममीषां महामहिमत्यागशीलानां प्रत्युपकारं कर्तुं क्षमेमहि। कदाचिद्रामसिंहेन श्रृङ्गपुराधीशेन पृष्टो न्यूनतार्थं बहुशो ग्रन्थसमागता अनुपपत्तीरेव दर्शयति। ईदृशं शास्त्रव्यसनम्। तेभ्यः परं परिष्कारप्रक्रियाशास्त्रार्थे व्याकरणस्य न्यायवासनया वैशिष्ट्यादिधारामयी भ्रामकजटिलविशालशब्दजालयुक्ता पण्डितमनोरमा परम्परा प्रावर्तत यस्यां गण्यन्ते श्रीशिवकुमारशास्त्रिदामोदरशास्त्रिबालशास्त्रितात्यशास्त्रिजयदेवमिश्रास्मद्गुरुचरणप्रभृतयः।

पाणिन्यादि मुनीन्नत्वा आचार्यान् स्वगुरूंस्तथा।
साञ्जलिर्याचते दिव्यां मतिं गिरिधरः शिशुः॥

– इति मम

अथ व्याकरणस्य दर्शनरूपनेत्रविषये सङ्क्षेपतश्च चर्चयामः। समस्तवैयाकरणसिद्धान्तानां मूलभूतं तु पाणिनिव्याकरणमेव। अष्टाध्याय्येको महान् रत्नाकरो यस्मिन्ननेकान्युपयोगीनि रत्नान्यनायासं समुपलब्धुं शक्यन्तेऽहो। विधीयमाने विचारेऽष्टाध्यायीरूपो महासागरः क्षीरसागरमप्यतिशेते। क्षीरसागरे चतुर्दश रत्नान्यत्रापि माहेश्वरसूत्ररूपचतुर्दशरत्नानि। तत्र सुन्दराण्यमृतादीन्यभद्राणि विषवारुणीप्रभृतीनि रत्नानि राजन्ते। अत्र तु सर्वाण्यपि प्रकृतिरमणीयानि। अत्र महासागरे जलस्थानीयं शब्दब्रह्म विचकास्ति। गम्भीरतमानामस्ति दर्शनसिद्धान्तानां समुपबृंहणम्। सम्पूर्णान्यपि दर्शनानि रत्नानीव विराजमानानि दिव्यां सुषमामञ्चन्ति। वेदान्तिनां यथाऽद्वैतवादस्तथैव वैयाकरणानां शब्दविशिष्टाद्वैतवादः। वैयाकरणाः शब्दमेव ब्रह्म मन्यन्ते। तत्र शब्देऽद्वैतम्। द्वाभ्यां भेदप्रतिपादकाभ्यामितं प्राप्तं ज्ञानं द्वीतं तस्य भावो द्वैतम्। न द्वैतमित्यद्वैतम्। शब्दविशिष्टमद्वैतं शब्दविशिष्टाद्वैतम्। शब्दविशिष्टाद्वैतं ब्रह्म वैयाकरणानां प्रबला मान्यता। यद्यपि नैयायिकाः

[८३] शब्देन्दुशेखरः पुत्रो मञ्जूषा चैव कन्यका। स्वमतौ सम्यगुत्पाद्य शिवयोरर्पितौ मया॥ इत्यपि तेनोक्तं शब्देन्दुशेखरे।

शब्दमनित्यं मन्यन्ते किन्तु वैयाकरणा नित्यमेव शब्दमुद्घोषयन्ति। किं बहुना शब्दतो निखिलप्रपञ्चस्योद्भवं मन्यन्ते यथा –

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥

– वा०प० १.१

आदिनिधनरहितं यदक्षरं शब्दब्रह्म यतो जगतः प्रक्रिया तदेवार्थभावेन विवर्तते। अनादि-निधनम् इति कथयित्वाऽपि अक्षरम् इति कथयन् ब्रह्मणोऽक्षरशीलतां प्रतिपादयन् ब्रह्मणो व्यापकतां संस्तौति। न क्षरतीति अक्षरम्।[८४] अथवा अश्नुते सम्पूर्णं जगदिदं व्याप्नोति इत्यर्थे अशेः सरन् (प०उ० ३.७०) इत्युणादिसूत्रेण अश् धातोः (अशँ भोजने धा०पा० १५२३) सरन् प्रत्यये षत्वे कत्वे षत्वे चाक्षरमिति।[८५] प्रक्रिया इति प्रकृष्टा क्रिया। प्रकृष्टत्वञ्च सर्गस्थिति-विनाशरूपम्। यतः इत्यत्र सार्वविभक्तिकस्तसिः।[८६] अर्थात् यतः इति पञ्चमीतृतीयासप्तमी-विभक्तिषु व्याख्यातुं शक्यते। यतो जगतो जन्म यस्मादिति तात्पर्यं यस्मादुत्पत्तिर्येन पालनं यस्मिल्लँयः। यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति (तै०उ० ३.१.१) यस्मिल्लीँयन्ते वेति श्रुतेः। तदेव जन्ममरणरहितमतिशयवर्धनशीलं सर्व-व्यापकं शब्दब्रह्म अर्थभावेन अर्थानां पदार्थानां शक्त्या घटपटादिरूपेण विवर्तते विवृतं भवति परिणमतीति तात्पर्यम्। श्लोकेऽस्मिन् गुरुचरणा विवर्तत इति पदानुसारं व्याकरणसिद्धान्ते विवर्तवादं निश्चिन्वन्ति। ब्रह्मणो जगद्रूपपरिवर्तने दार्शनिकजगति धाराद्वयी। नैयायिका जगद्ब्रह्मपरिणामभूतं स्वीकुर्वन्ति। अद्वैतवादिनो वेदान्तिनश्च ब्रह्मणो विवर्तं जगन्मन्यन्ते। परिणामवादः प्रकृतेर्विकृतिरूपेण सतात्त्विकपरिवर्तनं यथा दुग्धस्य परिणामो दधि। विवर्त-वादो वस्तुनोऽतात्त्विकपरिवर्तनं यथा रज्जौ सर्पः। अद्वैतवादिनां मते जगदसदिति हेतोस्ते

[८४] क्षरतीति क्षरम्। क्षरँ सञ्चलने (धा०पा० ८८१) → क्षर् →नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) → क्षर् अच् → क्षर् अ → क्षर → विभक्तिकार्यम् → क्षरम्। न क्षरमित्यक्षरम्। नञ् (पा०सू० २.२.६) इत्यनेन तत्पुरुषसमासे नलोपो नञः (पा०सू० ६.३.७३) इत्यनेन नलोपे अक्षर इति प्रातिपदिके जाते विभक्तिकार्ये सौ अतोऽम् (पा०सू० ७.१.२४) इत्यनेनामि अमि पूर्वः (पा०सू० ६.१.१०७) इत्यनेन पूर्वरूपे अक्षरम् इति सिद्धम्।

[८५] अशँ भोजने (धा०पा० १५२३) → अश् → उणादयो बहुलम् (पा०सू० ३.३.१) → अशेः सरन् (प०उ० ३.७०) → अश् सरन् → अश् सर → व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः (पा०सू० ८.२.३६) → अष् सर → षढोः कः सि (पा०सू० ८.२.४१) → अक् सर → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → अक् षर → अक्षर → विभक्तिकार्यम् → अक्षरम्।

[८६] इतराभ्योऽपि दृश्यन्ते (पा०सू० ५.३.१४) इत्यनेन। यद्वा तसिप्रकरण आद्यादिभ्य उपसङ्ख्यानम् (वा० ५.४.४४) इत्यनेन। तसिप्रत्ययान्तानामाकृतिगणत्वम्। यथा आकृतिगणश्चायम् (का०वृ० ५.४.४४) आकृतिगणोऽयम् (वै०सि०कौ० २११२)। न चास्मिन् वार्तिके प्रतियोगे पञ्चम्यास्तसिः (का०वृ० ५.४.४४) इत्यतः पञ्चम्याः इत्यनुवृत्तम्। अयं सार्वविभक्तिकस्तसिः (बा०म० २११२) इति बालमनोरमायां वासुदेव-दीक्षिताः। यथा आदौ आदितः। मध्यतः। पार्श्वतः। पृष्ठतः (का०वृ० ५.४.४४) इत्यादौ सप्तम्यां तसिः। स्वरेण स्वरतः। वर्णतः (वै०सि०कौ० २११२) इत्यादौ तृतीयायां तसिः।

ब्रह्मणोऽन्यथाभावरूपं जगत्स्वीकुर्वन्ति। ते कथयन्ति ब्रह्म सत्यं जगन्मिथ्या। द्वैतवाद-प्रतिपादकश्रुतीस्तेऽर्थवादरूपेण स्वीकुर्वन्ति। तर्कतः सिद्धान्तितोऽपि सिद्धान्तोऽयं हृदय-वीणातन्त्रीं न स्पृशति। प्रत्यक्षजगतोऽसत्त्वेन लापनं कर्तुं न शक्यते। वेदे तस्थिवच्छब्देन जगद्व्यवह्रियते। यथा सूर्यं आत्मा जगतस्तस्थुषश्च (शु०य०वा०मा० ७.४२)। एवमेव जीव-ब्रह्मणोरैक्यं प्रतिपादयन्ति तदप्यसमीचीनं लगति। ब्रह्मविद्ब्रह्मैव भवतीति यदि तेषां मनीषा तर्हि कथं घटज्ञो न घटो भवति। यदि चेदात्मा परमात्मैव तर्हि कथं नित्यचेतनघने सर्वतन्त्रस्वतन्त्रेऽपरिच्छिन्ने परमप्रकाशे विशुद्धज्योतिषि निर्विकल्पे ब्रह्मण्यसत्यमायाप्रसरः। कथं तस्मिन्नज्ञानं किमनेकयोजनमण्डलं नक्षत्राखण्डलं भुवनभास्करं तिमिरता वृणुयात्। आत्मैव परमात्मा चेत्स्वयमेव गुरूणां गुरुस्तर्हि कः शिष्यः कं गुरुं गच्छेत्पठितुम्। कथं वा कोऽपि कामी लोभी क्रोधी किं निष्कलुषं विमलबोधमखण्डं ब्रह्म कामादयो मलिनयितुं क्षमन्ते। व्यावहारिकं तदिति चेदलं निरर्थकव्यवहारप्रपञ्चेन। नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् (श्वे०उ० ६.१३) इति श्रुतेः ममैवांशो जीव-लोके जीवभूतः सनातनः (भ०गी० १५.७) इति स्मृतेश्च का गतिः। तस्माद्विषयान्तरीय-चर्चां समाप्य प्रकृत इदमेव कथनं पर्याप्तं यज्जीवो ब्रह्मणोंऽशभूतः स च सनातनः। अत एव गीतायाम् –

ममैवांशो जीवलोके जीवभूतः सनातनः।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति॥

– भ०गी० १५.७

एकता च तयोः सम्बन्धनिबन्धनात्मिका यथा वाल्मीकीये रामसुग्रीवयोरैक्यं देव्येवं समजायत (वा०रा० ५.३५.५२)। उभावपि नित्यौ। इदमेव व्याकरणमतमपि प्रतिभाति मे। परिणाम-वादविवर्तवादपरिभाषानुसारं विवर्तत इति नास्ति। विवर्तत इत्यस्यार्थो निर्विशेषमपि नाम-रूपात्मकतया विशिष्टं सद्वर्तते परव्यूहविभवान्तर्याम्यर्चारूपेणेति तात्पर्यम्। परिभाषा च परिणामविवर्तवादयोरित्थम् –

सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः।
अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः॥

– वे०सा० १३८

तेषामद्वैतवादिनां ब्रह्म तु निर्विशेषः। किन्त्वस्मद्ब्रह्म शब्दत्वविशिष्टम्। अतस्तेषां ब्रह्म-तत्त्वमस्माकं शब्दतत्त्वम्। तद्ब्रह्मणि निर्धर्मिताऽस्मद्ब्रह्मणि च शब्दधर्मिता। तत्रैकमेव नित्यमत्र शब्दार्थसम्बन्धास्त्रयोऽपि नित्याः। अतो वाक्यपदीये नित्याः शब्दार्थसम्बन्धाः (वा०प० १.२३) इति। जगदपि सम्बन्धकल्पनादृष्ट्याऽसत्यं तेषां क्षणभङ्गुरत्वादर्वाचीन-स्वीकृतत्वाच्च। किन्त्वस्माकं जगदीश्वरसम्बन्धदृष्ट्या सत्यम्। अतः ममैवांशो जीवलोके

(भ०गी० १५.७) इत्यत्रांशशब्दो न विभागपरः। अन्यथाऽखण्डे ब्रह्मणि सखण्डतापत्तिः। महाकाशे घटाकाशमिवोपाध्यवच्छिन्नतयांऽशः कल्पित इति चेन्न। जीवभूतः सनातनः (भ०गी० १५.७) इति सनातनशब्दस्य जीवनित्यताप्रतिपादकत्वात्कल्पने मानाभावाच्च। नित्यो नित्यानां (श्वे०उ० ६.१३) इति श्रुतेश्च स्वारस्याज्जीवस्य नित्यताऽनेकता च निर्विवादा। तस्मादंशशब्दोऽत्र पुत्रपरः। अमृतस्य पुत्राः (श्वे०उ० २.५) इति श्रुतेः। एवं शब्दोऽर्थः सम्बन्धश्चास्माकं मते नित्यः। अतो नित्यब्रह्मणो परिणामोऽपि नित्यमेव तस्माज्जगत्। शब्दब्रह्मणः परिणामभूतं जगदिदं वाक्यपदीयकारा अपि समर्थयन्ति –

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः।
छन्दोभ्य एव प्रथममेतद्विश्वं प्रवर्तते ॥

– वा०प० १.१२४

शब्दो नित्यः। सिद्धे शब्दार्थसम्बन्धे (भा०प०) इति वार्त्तिकेऽपि सिद्धशब्दो नित्यपर्यायः। नित्यशब्दञ्च त्यब्नेर्ध्रुव इति वक्तव्यम् (वा० ४.२.१०४) इति वार्त्तिकमपि[८७] ध्रुव इत्यर्थे नि-अव्ययात् त्यप् प्रत्ययतया ध्रुवार्थं साधयति। शब्दो निरन्तरं ध्रुवो वेदोद्भवत्वात्। शब्द-नित्यतायां त्रयाणामपि मुनीनां सम्मतिः। नित्यत्वञ्च ध्वंसभिन्नत्वे सति ध्वंसाप्रतियोगित्वम् (त०स० प०व्या० १०)। यथा ध्वंसस्य प्रतियोगिनो घटादयोऽनित्या अप्रतियोगि ब्रह्म नित्यम्। नैयायिकानां मते शब्दो गुणः।[८८] अस्मन्मतेऽगुणोऽद्रव्यं शब्दः।[८९] द्रव्यञ्च सत्त्वम् इति कथ्यते।[९०] यथा चादयोऽसत्त्वे (पा०सू० १.४.५७)।[९१] सीदतस्तिष्ठतो लिङ्गसङ्ख्ये यस्मिन् तल्लिङ्गसङ्ख्यान्वयि द्रव्यम्।[९२] शब्दनित्यत्वपक्षे धातुप्रातिपदिकप्रकृतिप्रत्ययविभागतत्तदर्थ-विभागकल्पनाऽपि सर्वा निर्मूला बालबोधनाय कल्पिता। परमार्थतस्तु वाक्यस्फोट एव। तस्मात् वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति व्यवस्थितिः (वै०सि०का० ५९)।[९३] अत एव भगवान् भाष्यकार इकः स्थाने यणित्याद्येकदेशविकारेषु सत्सु शब्दनित्यतानुपपत्तिमाशङ्क्य स्थानिनि सर्वपदादेशं प्रतिजानीते। लिखति च –

[८७] सिद्धान्तकौमुदीसंस्करणेषु लघुसिद्धान्तकौमुदीसंस्करणेषु वार्त्तिकमिदम्। केषुचिन्महाभाष्य-संस्करणेषु अमेहक्वतसित्रेभ्यः इति परिगणनानन्तरं भाष्यवचनमिदम्।

[८८] श्रोत्रग्राह्यो गुणः शब्दः (त०स० ३३)।

[८९] अथ गौरित्यत्र कः शब्दः। किं यत्तत्सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्दः। नेत्याह। द्रव्यं नाम तत्। ... यत्तर्हि तच्छुक्लो नीलः कपिलः कपोत इति स शब्दः। नेत्याह। गुणो नाम सः (भा०प०)।

[९०] द्रव्यासुव्यवसायेषु सत्त्वम् (अ०को० ३.३.२१३)।

[९१] सत्त्वमिति द्रव्यमुच्यते (का०वृ० १.४.५७)। अद्रव्यार्थाश्चादयो निपातसञ्ज्ञाः स्युः (वै०सि०कौ० २०)। 'सत्त्व'शब्देन द्रव्यमुच्यते (बा०म० २०)। अद्रव्यार्थाश्चादयो निपाताः स्युः (ल०सि०कौ० ५३)।

[९२] लिङ्गसङ्ख्याकारकान्वितं द्रव्यम् (बा०म० २०)। लिङ्गसङ्ख्यान्वितं द्रव्यम् (त०बो० २०)।

[९३] व्यवस्थितिः इति मतस्थितिः इत्यस्य पाठभेदः। वैयाकरणसिद्धान्तकारिकाः (ख्रिस्ताब्दः १९०१), आनन्दाश्रममुद्रणालयः, पुण्याख्यपत्तनम्, ५६तमे पृष्ठे।

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः।
एकदेशविकारे हि नित्यत्वं नोपपद्यते॥

– भा०पा०सू० १.१.२०, ७.१.२७

अत इग्घटितस्थाने यण्घटितो बोध्यः स च प्रयोक्तव्यः स च साधुरित्येव तात्पर्यं निर्दिशन्ति। शब्दं परमप्रमाणतया वयं मन्यामहे निराकारमपि ब्रह्म शब्दाकारतया वयं समर्थयामहे।

अद्वैतास्तु निराकारं नराकारञ्च द्वैतिनः।
वैयाकरणा वयं ब्रह्म शब्दाकारमुपास्महे॥

– इति मम

निराकारवादिनां ब्रह्म मनसा दृश्यते साकारवादिनां नयनचरतामाटीकते शब्दाकार-वादिनामस्माकं वैयाकरणानां ब्रह्म तु श्रवणगोचरतामापन्नं द्वाभ्यां श्रवणाभ्यां शब्दतनु तनोति हृदयम्। लिखितं श्रीरामचरितमानसे यथा त्रयोविंशतिसहस्रवर्षाणि यावद्भगवद्दर्शनार्थमुग्रं तपस्तप्यमानयोर्मनुशतरूपयोः श्रीरामभद्रस्य भगवतः प्राकट्यं प्रथमं शब्दपुरःसरमेव समभवत्। यथा –

प्रभु सर्बग्य दास निज जानी। गति अनन्य तापस नृप रानी॥
माँगु माँगु बर भइ नभ बानी। परम गँभीर कृपामृत सानी॥[९४]

– रा०च०मा० १.१४५.५,६

स एव ब्रह्मभूतः शब्दः पुनरर्थभावेन सीतारामरूपेण प्रकटयाम्बभूव। वाग्वै ब्रह्म (श०ब्रा० २.१.४.१०, बृ०उ० १.३.२१) इति श्रुतिरपि शब्दमेव ब्रह्मतया श्रावयति। अस्यैव शब्दब्रह्मणो भगवतो देवस्य वृषभरूपता श्रुतौ प्रतिपादिता।[९५] इदमेव शब्दं ब्रह्म ज्ञातुं व्याकरणं प्रवृत्तं पाणिनीयम्। त्रिमुनिव्याख्यानेषु बहुत्र दार्शनिकविषयचर्चा। तत्र शब्द-ब्रह्मणः प्रतिपादनम्। तस्यैव शृङ्गभूतानां नामाख्यातोपसर्गनिपातानां पादभूतानाञ्च भूत-भविष्यद्वर्तमानकालानां हस्तभूतानां सप्तविभक्तीनां शिरसोर्व्युत्पन्नाव्युत्पन्नप्रातिपदिकयोः[९६]

---

[९४] एतद्रूपान्तरम्–अजानान्निजदासौ तौ सर्वज्ञः परमेश्वरः। अनन्यगतिकौ चापि नृपं राज्ञीञ्च तापसौ॥ याचतं याचतं चेति नभोवागभवत्ततः। अत्यन्तमेव गम्भीरा कृपामृतसुमेलिता॥ (मा०भा० १.१४५.५,६)।

[९५] च॒त्वारि॒ शृङ्गा॒ त्रयो॑ अस्य॒ पादा॒ द्वे शी॒र्षे स॒प्त हस्ता॑सो अस्य। त्रिधा॑ ब॒द्धो वृ॑ष॒भो रो॑रवीति म॒हो दे॒वो मर्त्याँ॑ आ वि॑वेश॥ (ऋ०वे०सं० ४.५८.३)। अत्र पतञ्जलयः – 'चत्वारि शृङ्गाणि' पदजातानि नामाख्यातोप-सर्गनिपाताश्च। 'त्रयो अस्य पादाः' त्रयः काला भूतभविष्यद्वर्तमानाः। 'द्वे शीर्षे द्वौ' शब्दात्मानौ नित्यः कार्यश्च। 'सप्त हस्तासो अस्य' सप्त विभक्तयः। 'त्रिधा बद्धः' त्रिषु स्थानेषु बद्ध उरसि कण्ठे शिरसीति। 'वृषभः' वर्षणात्। 'रोरवीति' शब्दं करोति। कुत एतत्। रौतिः शब्दकर्मा। 'महो देवो मर्त्याँ आविवेश' इति। महान् देवः शब्दः। मर्त्या मरणधर्माणो मनुष्याः। तानाविवेश। महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम् (भा०प०)।

[९६] यद्वा नित्यकार्यशब्दात्मनोर्व्यङ्ग्यव्यञ्जकध्वन्योः।

बन्धनभूतानां कण्ठतालुशिरसां[९७] विशदवर्णनेनैव समृद्धमिदं शब्दशास्त्रम्। स्वीकृते शब्द-विशिष्टाद्वैतराद्धान्ते ब्रह्मणो निराकारसाकाररूपे मन्यमाना वैयाकरणाः साधुत्वमेव शब्दानां ब्रह्मप्राप्तिकरं निर्णयन्ति। तत्र तत्तद्धातूनां कोऽर्थो लकारार्थनिर्णये समासे च स्वतन्त्रपरतन्त्र-शक्तिपर्यालोचनं नञर्थविचारो निपातानां द्योतकत्वं वाचकत्वं वा शक्तेः स्वरूपविमर्शः स्फोटस्य व्यवस्थापनमित्यादयः सन्ति परमगभीरा दार्शनिका विषयाः।

त्रिमुनिव्याख्यानानन्तरं व्याकरणदर्शनस्य परमप्राचीना आचार्याः श्रीभर्तृहरयः। तेषां मुख्यो ग्रन्थो वाक्यपदीयम् इति। तत्र वाक्यञ्च पदञ्चेति वाक्यपदे। लघ्वक्षरत्वाद्यद्यपि पदशब्दस्य पूर्वं प्रयोगः कर्तव्य आसीत्[९८] तथाऽपि वाक्यस्याभ्यर्हितत्वात्पूर्वं प्रयोगः।[९९] इत्थं वाक्यञ्च पदञ्चेति वाक्यपदे ते अधिकृत्य कृतमिति वाक्यपदीयम् इति विग्रहे द्वन्द्व-वाक्यपदशब्दात् शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः (पा०सू० ४.३.८८) इत्यनेन छ-प्रत्यय ईयादेशे[१००] विभक्तिकार्ये च सिद्धम्। अत्र शब्दब्रह्मणः प्रतिपादनमस्यैव जगतश्च कारणता सूचिता। अस्य शब्दब्रह्माण्डनिखिलकलावतीं कारणशक्तिमुपाश्रित्य जन्मादयो विकारा भावभेदं भावयन्तीति प्रतिपादितम्। यथा –

अध्याहितकला यस्य कालशक्तिमुपाश्रिताः।
जन्मादयो विकाराः षड्भावभेदस्य योनयः॥

– वा०प० १.३

सर्वबीजरूपमिदमेव शब्दब्रह्म भोक्तृभोक्तव्यरूपेण भोगरूपेण च विपरिणमति। एवमनेके दार्शनिका विषयाः प्रतिपादिताः। वाक्यपदीये काण्डत्रयं ब्रह्मकाण्डं वाक्यकाण्डं पदकाण्डं चेति।

एतदेवोपजीव्य पुनः श्रीकौण्डभट्टो वैयाकरणभूषणसारं लिखित्वा विचारैर्व्याकरणं समभूषयत्। तेन धात्वर्थनिर्णयेऽतिचातुरी प्रदर्शिता। व्यापारमुख्यविशेष्यक-शाब्दबोधस्तेषामतीव पाण्डित्यपूर्णोऽन्वेषणविशेषः। यथा कारिका –

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्॥

– वै०सि०का० २

---

[९७] उरःकण्ठशिरसां वा।

[९८] लघ्वक्षरम् (वा० २.२.३४)। लघ्वक्षरं पूर्वं निपततीति वक्तव्यम्। कुशकाशम्। शरशीर्यम् (भा०पा०सू० २.२.३४)।

[९९] अभ्यर्हितम् (वा० २.२.३४)। अभ्यर्हितं च पूर्वं निपततीति वक्तव्यम्। मातापितरौ। श्रद्धामेधे ... अपर आह – सर्वत्र एवाभ्यर्हितं पूर्वं निपततीति वक्तव्यम्। लघ्वक्षरादपीति। दीक्षातपसी। श्रद्धातपसी (भा०पा०सू० २.२.३४)।

[१००] आयनेयीनीयियः फढखच्छघां प्रत्ययादीनाम् (पा०सू० ७.१.२) इत्यनेन।

धातुः फलव्यापारवाचक आश्रयभूतकर्मकर्तृवाचकस्तिङ्। फलापेक्षया व्यापारः प्रधानम्। तिङर्थाः कर्तृकर्मसंख्याकारका विशेषणमिति। रामो हरिं भजति इत्यत्र रामाभिन्नैककर्तृक-हरिकर्मकवर्तमानकालावच्छिन्नो भजनानुकूलव्यापार इति शाब्दबोधः। नैयायिकसम्मत-प्रथमान्तमुख्यविशेष्यकशाब्दबोधस्य पश्य मृगो धावति इत्यत्र भाष्यसम्मतशाब्दबोध-महास्त्रेण खण्डनं मीमांसकनिर्णीतशाब्दबोधखण्डनञ्चामीषां पाण्डित्यपरिचायकम्।[१०१] अकर्मकसकर्मकधातुलक्षणे निर्णयोऽपि महत्त्वपूर्णः। तत्र स्वार्थव्यापारसमानाधिकरणफल-वाचकत्वमकर्मकत्वं स्वार्थव्यापारव्यधिकरणफलवाचकत्वञ्च सकर्मकत्वम् इति।

समासे विशिष्टशक्तिनिर्णयो यथा रामस्य इत्यस्य पुत्रः इत्यनेन च व्यस्तदशायां कोऽपि सम्बन्धो नास्ति। रामस्येति षष्ठ्यन्तस्य पृथगर्थः पुत्र इति प्रथमान्तस्य पृथक्। समासे सति जात एकार्थीभावेऽन्योऽर्थो द्वयोः स्वतन्त्रः कोऽप्यर्थो न पङ्कजशब्दवत्। एकार्थीभावो नाम पृथगर्थानामेकोपस्थित्योपस्थापनम्। अतः समासे खलु भिन्नैव शक्तिः पङ्कज-शब्दवत् (वै०सि०का० ३१)। अयं च समासोऽव्ययीभावतत्पुरुषद्विगुकर्मधारयबहुव्रीहिद्वन्द्व-भेदैः षड्विधः। अयं च सुपां सुपा तिङा प्रातिपदिकेन कदाचिद्धातुना च तिङन्तस्य तिङन्तेन सुबन्तेन च षड्विधो भवति। तथा च सिद्धान्तकौमुद्याम् –

सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा।
सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः॥

– वै०सि०कौ० सर्वसमासशेषप्रकरणे

एवं शक्तिनिर्णये कौण्डभट्टो बोधजनकतारूपां शक्तिं मन्यते।[१०२] बोधजनकता च नैयायिक-परम्परातः किमपि प्रभाविता प्रतीयते।

एतस्मादनन्तरं व्याकरणदर्शनविचारे क्रान्तिपूर्णपरिवर्तनकर्तारः श्रीनागेशभट्टाः। अमी लघुशब्देन्दौ परिभाषेन्दौ च बहुत्र दर्शनविचारान् कृत्वाऽपि स्वतन्त्रान् वैयाकरणसिद्धान्तमञ्जूषावैयाकरणलघुसिद्धान्तमञ्जूषावैयाकरणपरमलघुसिद्धान्तमञ्जूषा-नामकांस्त्रीन्दर्शनग्रन्थान् व्यरचयन्। तत्र शब्दार्थयोः कार्यकारणभावं भावयन् नागेशो

[१०१] अपि चाख्यातार्थप्राधान्ये तस्य देवदत्तादिभिः सममभेदान्वयात्प्रथमान्तार्थस्य प्राधान्यापत्तिः। तथा च "पश्य मृगो धावति" इत्यत्र भाष्यसिद्धैकवाक्यता न स्यात्। प्रथमान्तमृगस्य धावनक्रियाविशेष्यस्य दृशिक्रियायां कर्मत्वापत्तौ द्वितीयापत्तेः। न चैवमप्रथमासामानाधिकरण्याच्छतृप्रसङ्गः। एवमपि द्वितीयाया दुर्वारत्वेन "पश्य मृगः" इत्यादिवाक्यस्यैवाऽसम्भवापत्तेः (वै०भू०सा० १.२)। भाष्ये च क्रियाऽपि क्रियेप्सिततमा भवति। कया क्रियया। सन्दर्शनक्रियया वा प्रार्थयतिक्रियया वाऽध्यवस्यतिक्रियया वा। इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति स बुद्ध्या तावत्कञ्चिदर्थं सम्पश्यति सन्दृष्टे प्रार्थना प्रार्थनायामध्यवसायोऽध्यवसाय आरम्भ आरम्भे निर्वृत्तिर्निर्वृत्तौ फलावाप्तिः। एवं क्रियाऽपि कृत्रिमं कर्म (भा०पा०सू० १.४.३२)।

[१०२] इन्द्रियाणां चक्षुरादीनां स्वविषयेषु चाक्षुषेषु घटादिषु यथाऽनादिर्योग्यता तदीयचाक्षुषादिकारणता तथा शब्दानामप्यर्थैः सह तद्बोधकारणतैव योग्यता सैव शक्तिरित्यर्थः (वै०भू०सा० ६.३७)।

लिखति तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्ति-विशिष्टज्ञानं हेतुः (प०ल०म० ६) इति। पुरातनैः स्वीकृतां खण्डयन् तस्या एकस्थतया सम्बन्धत्वाभावात्सम्बन्धस्य द्विष्ठत्वाद्वाच्यवाचकभावरूपां शक्तिं मन्यते।[१०३] इयं नवीना गवेषणा। धात्वर्थनिर्णयेऽपि प्राचीनाः[१०४] फले व्यापारे च पृथक्शक्तिं कल्पयन्ति किन्त्विमे फलविशिष्टव्यापार[१०५] एकामेव शक्तिं मन्यन्ते।[१०६] यद्यपि पदार्थः पदार्थेनैवान्वेति न तु तदेकदेशेन[१०७] इति व्युत्पत्त्या फलस्य स्वतन्त्रं पदार्थत्वं नास्ति तर्हि कथं व्यापारेऽन्वयः। अत्रैकदेशान्वयस्यापि कल्पना क्रियतेऽत उभयोरपि दोषः। तस्मादस्मद्गुरुचरणा एक-वृन्तावलम्बिफलद्वयवद्द्वयोरेव शक्तिं स्वीकुर्वन्ति।[१०८] शाब्दबोधविषयेऽपि प्राचीनाः सर्वत्र व्यापारमुख्यविशेष्यकं शाब्दबोधं स्वीकुर्वन्ति परन्तु नागेशास्ततः पृथग्विचारयन्ति। कर्तृवाच्यस्थले भाववाच्ये चेमे व्यापारमुख्यविशेष्यकशाब्दबोधं मन्यन्ते कर्मवाच्ये च फलमुख्यविशेष्यकं शाब्दबोधमङ्गीकुर्वन्ति।[१०९] एवं बहुत्रामी भाष्यं पर्यालोच्य नवीन-दृष्ट्यैव विचारयन्तो विलोक्यन्ते। लिखति च स्वयं पातञ्जले महाभाष्ये कृतभूरिपरिश्रमः (ल०शे० म० १) इति। तादात्म्यविषयेऽपि व्याकरणदर्शने नागेशसम्मतो द्वैतवादः। अद्वैत-वेदान्तिनस्तादात्म्यस्य लक्षणं कुर्वन्तः तदभिन्नत्वे सति तद्भेदेन प्रतीयमानत्वम् इति भेदं पारमार्थिकं न मन्यन्त इमे चाभेदमेव व्यवहारिकतया स्वीकुर्वन्ति – तादात्म्यञ्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम् (ल०म०, प०ल०म० १६)। एवमेवान्यैः शक्तिलक्षणा-व्यञ्जनासु स्वीकृतास्विमे शक्तिव्यञ्जने एव स्वीकृत्य लक्षणां शक्यतावच्छेदकारोपरूपामेव मत्वा लक्षणां शक्तावन्तर्भावयन्ति। यथा गङ्गायां घोषः इत्यत्र भगीरथरथखातावच्छिन्न-जलप्रवाहे शक्ये घोषस्यासम्भवात्तात्पर्यानुपपत्त्या शक्यसम्बन्धतया गङ्गापदस्य गङ्गातीरे लक्षणेत्यन्यदार्शनिकानां धीः। किन्तु नागेशो विप्रतिपद्यते यत् गङ्गायां मकरघोषौ

---

[१०३] तस्मात्पदपदार्थयोः सम्बन्धान्तरमेव शक्तिर्वाच्यवाचकभावापरपर्याया (प०ल०म० १०)।

[१०४] भट्टोजिदीक्षितकौण्डभट्टादयः।

[१०५] व्यापारविशिष्टफले च।

[१०६] धातोरर्थद्वये शक्तिद्वयकल्पनं ... चातिगौरवम्। तस्मात्फलावच्छिन्ने व्यापारे व्यापारावच्छिन्ने फले च धातूनां शक्तिः कर्तृकर्मार्थकतत्तत्प्रत्ययसमभिव्याहारश्च तत्तद्बोधे नियामक इत्याहुः (प०ल०म० ४७)।

[१०७] मूलं मृग्यम्। उद्योते तु सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणयोगो न। अगुरुपुत्रादीनाम् (वा० २.१.१) इति वार्त्तिके समाधानभाष्ये स्थिते महत्कष्टश्रितः (भा०पा०सू० २.१.१) इत्युदाहरणे प्रदीपे स्थितं न तु कष्टविशेषणम् (भा०प्र० पा०सू० २.१.१) इत्युक्तिं व्याचक्षाणा नागेशभट्टपादाः – इदमेव "पदार्थः पदार्थेने"ति व्युत्पत्तेर्मूलमिति दिक् (भा०उ० पा०सू० २.१.१)।

[१०८] मम त्वेकवृन्तावलम्बिफलद्वयवदुभयांश एका खण्डशश्शक्तिरिति न शक्तिद्वयकल्पनं न वा बोध-जनकत्वसम्बन्धद्वयकल्पनम् (प०ल०म० ज्यो०टी० ४७) इति प्रणेतृणां गुरुचरणाः कालिकाप्रसादशुक्लवर्याः परमलघुमञ्जूषाया ज्योत्स्नाटीकायाम्।

[१०९] "कर्तृकर्मार्थेति" – कर्तृभावप्रत्ययसमभिव्याहारः फलविशिष्टव्यापारबोधे नियामकः। कर्मप्रत्यय-समभिव्याहारो व्यापारविशिष्टफलबोधनियामकः (प०ल०म० ज्यो०टी० ४७)।

इत्यत्र शक्यार्थे गङ्गाजले मकरस्यान्वयः सम्भवति तत्तीरे घोषस्य तर्हि गङ्गापदस्य धर्मद्वयावच्छिन्नत्वादेकधर्मावच्छिन्नत्वाभाव एकधर्मावच्छिन्न एकत्रावच्छिन्नस्यैकस्यार्थभावावच्छिन्नसंसर्गेण साहित्ये सह विवक्षा तदा च द्वन्द्व इति कथं द्वन्द्वसमासः मकरघोषपदयोर्विरुद्धधर्मावच्छिन्नेऽन्वयात्। अतः शक्यतावच्छेदकस्य गङ्गारूपार्थस्य गङ्गातीर आरोप एवं द्वयोरप्येकधर्मावच्छिन्ने गङ्गाप्रवाह एवार्थेऽन्वयः। इयं नवीना क्रान्तिः। इत्थमेव बौद्धार्थः स्वीकृतः नागेशेन। असम्भवार्थशब्दानामपि वन्ध्यासुतादीनां साधुत्वम्। एवमिमे व्याकरणदर्शनं चरमशिखरे प्रतिष्ठापयामासुरिति।

व्याकरणस्य द्वे नेत्रे प्रक्रिया दर्शनं तथा।
सङ्क्षेपतो निर्दिष्टोऽत्रोभयोः परिचयो मया॥

एवं भुवनविदितमहिम्नो शब्दलघिम्नो विद्वद्गणितगरिम्नो पाणिनीयव्याकरणस्य रामकथया सह पूर्णसम्बन्धो वर्तते। यतो हि पाणिनीयं व्याकरणं श्रीरामकथा चेति द्वे अपि वेदमूलके। पाणिनीयव्याकरणस्य वेदमूलकत्वमुपपादितम्। इदानीं रामायणस्य वेदमूलकत्वं मीमांस्यते। जगदुद्धारचिकीर्षया भुवनविदितलीलो दिव्यशीलो जगदात्मा स्वयं परमात्मा भक्तरक्षणपरायणो नारायणः सकलमङ्गलायने दशरथायने राजीवनयनो नयनगोचरतां समागमद्भुवो भारजिहीर्षया। वेदवेद्यं परं तत्त्वं लोकाभिरामः श्रीरामः। तदा स्वप्रतिपाद्यं परं ब्रह्म सगुणं साकारं कोशलेन्द्रकुमारं तनुविजितकोटिमारं परमोदारं श्रीरामं दृष्ट्वा प्राचेतसं वाल्मीकिं माध्यमं कृत्वा रामायणरूपेण स्वयमेव वेदः प्रादुर्बभूव। अतोऽभियुक्ता वर्णयन्ति –

वेदवेद्ये परे पुंसि जाते दशरथात्मजे।
वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना॥
तस्माद्रामायणं देवि वेद एव न संशयः॥

– अग०सं०

इति। यदि चेद्वेदस्य रक्षार्थं व्याकरणमध्येयं तदा वेदावतारस्य रामायणस्यापि रक्षार्थं व्याकरणमध्येयम्। किं बहुना वेदस्य षड्वङ्गेषु व्याकरणं मुख्यतयोपादेयम्। तथैव वेदसम्मितस्य[११०] रामायणस्यापि सम्यग्ज्ञानार्थं पाणिनीयं व्याकरणमुपादेयम्। व्याकरणं विना गूढा भावाः कथं ज्ञातुं शक्यन्ते। यथा वाल्मीकीये हनुमान् श्रीरामं पृच्छति यत् –

आयताश्च सुवृत्ताश्च बाहवः परिघोपमाः॥
सर्वभूषणभूषार्हाः किमर्थम् न विभूषिताः।

– वा०रा० ४.३.१५–१६

११० इदं पवित्रं पापघ्नं पुण्यं वेदैश्च सम्मितम्। यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते॥ (वा०रा० १.१.९८)।

अत्र सर्वभूषणानि भूषयितुमर्हन्ति[१११] इति व्याख्यानं किमवैयाकरणेन सम्भवम्। एवं श्रीरामो हनुमन्तं प्रशंसन् कथयति यत् –

नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।
बहु व्याहरताऽनेन न किञ्चिदपशब्दितम्॥

– वा०रा० ४.३.२९

अपरञ्च –

अनया चित्रया वाचा त्रिस्थानव्यञ्जनस्थया।
कस्य नाराध्यते चित्तमुद्यतासेररेरपि॥

– वा०रा० ४.३.३३

अत्र त्रिस्थानव्यञ्जनस्थया इति शब्दस्य कथमवैयाकरणो भावमवगन्तुं पारयिष्यति। वैयाकरणस्तूच्चारणस्य कण्ठतालुमूर्धान इति त्रिस्थानं[११२] ज्ञात्वा ततो वाचः समुद्भवं ज्ञास्यति। अगस्त्यो रामायणमहामालारत्नं श्रीमन्तं हनुमन्तं नवव्याकरणस्य वेत्तारं कथयति। सोऽयं नवव्याकरणार्थवेत्ता (वा०रा० ७.३६.४७) इत्यादि। वाल्मीकिरपि तदुपगत-समाससन्धियोगम् (वा०रा० १.२.४३) इति कथयति। एवमेव विबुधवाण्यां गीतानि कोटिशो रामायणानि व्याकरणं विना कथमपि ज्ञातुं न शक्यन्ते। मम त्वियं मान्यता संस्कृतवत्पुण्यजनकतावच्छेदिष्ठायां महादेवभाषायां भाषायां सङ्गीतं भक्तिशिरोमणिसकल-कविकुलशेखरहस्तामलकीकृतवेदशास्त्रपुराणेतिहासकाव्यनाटकनिखिलनिगमागमसुदुर्गम-विचारचतुर्दिक्कारुचातुरीविलोकिततुरीयमहनीयकवितावनिताजीवनसीतारमणपदपद्मपराग-सुरागरसमिलिन्दमाहात्म्यश्रीमत्तुलसीदासकृतश्रीमद्रामचरितमानसमप्यवैयाकरणेन ज्ञातुं न शक्यते। यथा –

सरिस श्वान मघवान जुबानू[११३]

– रा०च०मा० २.३०२.८

इत्युपमा। तात्पर्यं येन श्वयुवमघोनामतद्धिते (पा०सू० ६.४.१३३) इति सूत्रं न पठितं स किं बोद्धुं प्रभविष्यति। बहुत्र तुलसीदासेनापि व्याकरणस्य वेदान्तादिदर्शनानां स्वाभाविकतया रहस्यमुपन्यासि। तत्र व्याकरणमन्तरेणेतरदर्शनज्ञानाभावे मानसस्योत्तरकाण्डस्योत्तरार्धं कथमपि स्पष्टयितुं न शक्यते। तत्परम्परायां वर्तमानं श्रीमदध्यात्मरामायणमपि पाणिनीय-व्याकरणेन पूर्णतः सम्बद्धम्। पाणिनीयव्याकरणं चतुर्दशसूत्राचार्यतया शिवोक्तम्।

[१११] "सर्वभूषणभूषार्हाः" आभरणस्याभरणमित्युक्तरीत्या भूषणान्यपि भूषयितुमर्हाः किमर्थं न विभूषिताः। इमान् भूषणैरलङ्कृत्याऽभरणाभरणत्वं किमिति न प्रकाशितमित्यर्थः (वा०रा० भू०टी० ४.३.१५–१६) इति गोविन्दराजाः।

[११२] यद्वाऽभिव्यक्तेरुरःकण्ठशिरांसीति त्रिस्थानम्।

[११३] एतद्रूपान्तरम्–मघवा श्वा युवा चैव वर्तन्ते समतान्विताः (मा०भा० २.३०२.८)।

तस्मात्पाणिनिर्बहुश उकारानुबन्धानि सूत्राणि पपाठ। यथा डः सि धुट् (पा०सू० ८.३.२९) ङ्णोः कुक् टुक् शरि (पा०सू० ८.३.२८) शि तुक् (पा०सू० ८.३.३१) आने मुक् (पा०सू० ७.२.८२) ह्रस्वनद्यापो नुट् (पा०सू० ७.१.५४) इत्यादि। अन्याननुबन्धानुपेक्ष्योकारानुबन्धबाहुल्यादुकारवाच्यस्य शम्भोः स्मरणं पाणिनिकृतं प्रतीयते।

एवमध्यात्मरामायणमपि शिवभाषितं यथा –

पुरारिगिरिसम्भूता श्रीरामार्णवसङ्गता।
अध्यात्मरामगङ्गेयं पुनाति भुवनत्रयम्॥

– अ०रा० १.१.५

तर्हि शम्भुभाषितस्यास्याध्यात्मरामायणस्य शैवेन पाणिनिव्याकरणेनैकवाक्यतापुरःसरसम्बन्धो भवेदेवेति वच्मि। अहं तूत्प्रेक्षे यत्स्वयमेव शिवो लोकवत्सलतया भगवतीं पार्वतीं भवानीं श्रोत्रीं मत्वा सम्भाष्य च भुवनपावनीं रामकथां तदर्थबुबोधयिषया पाणिनिहृदयस्थो व्याकरणमूलभूतायां माहेश्वर्यां चतुर्दशसूत्र्यां समासतो रामकथां कथयति। तत्र द्विचत्वारिंशदक्षराणां सङ्ग्रहो यश्च भगवतः श्रीरामस्य द्विचत्वारिंशद्वर्षीयचरित्रं ध्वनयति। जन्मतो विवाहं यावद्द्वादशाब्दावधिस्ततो द्वादशवर्षं यावदयोध्यायां वास एवं पञ्चविंशे वर्षे सीतालक्ष्मणाभ्यां सह वनगमनं चतुर्दशाब्दं यावदरण्यचरित्रं मैथिलीहरणरावणसंहरणादिकमन्तिमवर्षे राज्यलीलेति मिलित्वोनचत्वारिंशद्वर्षाणि। वर्षत्रयं राज्यव्यवस्थायाम्। एषु मुख्यं रामायणम्। अक्षरस्य ब्रह्मणः श्रीरामस्य दिव्या चर्चा सूत्रबद्धाक्षरैः सङ्केतिता। चतुर्दशसूत्र्यां विभागद्वयं स्वरवर्गो व्यञ्जनवर्गश्च। स्वराणां चर्चा चतुर्भिः सूत्रैर्व्यञ्जनानाञ्च चर्चा दशभिः सूत्रैर्व्यधायि। अत्रापि रामकथायां विभागद्वयं निर्गुणलीलायाः सगुणलीलायाश्च। ऐश्वर्यस्य माधुर्यस्य वा। ऐश्वर्यं चत्वारि फलानि ददात्यतश्चतुर्भिः सूत्रैस्तत्सङ्केतः सङ्गच्छते। ऐश्वर्यञ्च स्वरस्थानापन्नमतः स्वरैः कथ्यते। स्वेन राजते स्वेन रमते वेति स्वरः।[114] स्वरा ये खलूच्चारणे किमपि वर्णान्तरं नापेक्षन्ते। तथैवेश्वरोऽनपेक्षकोऽपि स्वस्मिन्महीयते। स्वराणां सङ्ख्या नव। राघवस्य च प्रादुर्भावो नवम्यां यथा वाल्मीकीये –

[114] स्व उपपदे राज् धातोः (राजृँ दीप्तौ धा०पा० ८२२) रम् धातोर्वा (रमुँ क्रीडायाम् धा०पा० ८५३) अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) इत्यनेन डप्रत्ययः। अनुबन्धलोपे डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) इत्यनेन टिलोपे सुपो धातुप्रातिपदिकयोः (पा०सू० २.४.७१) इत्यनेन सुब्लुकि विभक्तिकार्ये स्वरः। महाभाष्ये च – अन्तरेणापि व्यञ्जनमच एवैते गुणा लक्ष्यन्ते। न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणमपि भवति। अन्वर्थं खल्वपि निर्वचनम् – स्वयं राजन्त इति स्वराः। अन्वग्भवति व्यञ्जनमिति (भा०पा०सू० १.१.२९–३०)। तथा च सङ्गीतरत्नाकरस्थस्य योऽयं स्वयं राजते (स०र० १.१) इत्यस्य व्याख्यानावसरे सङ्गीतसुधाकरटीकायां सिंहभूपालः – "योऽयं स्वयं राजते" अन्यानपेक्षतयाऽऽनन्दयितृत्वात्। स्वरपदस्य निरुक्तिरप्यनेन कथ्यते (स०र० सु०टी० १.१)। वाचस्पत्याभिधाने अचः स्वयं विराजन्ते हलस्तु परगामिनः इत्युद्धृतः।

ततो यज्ञे समाप्ते तु ऋतूनां षट् समत्ययुः।
ततस्तु द्वादशे मासे चैत्रे नावमिके तिथौ॥

– वा०रा० १.१८.८

अध्यात्मरामायणे च –

मधुमासे सिते पक्षे नवम्यां कर्कटे शुभे।
पुनर्वस्वृक्षसहिते उच्चस्थे ग्रहपञ्चके॥

– अ०रा० १.३.१४

नवमी सङ्ख्या श्रेष्ठा पूर्णा। एतस्या वरीयसी काऽपि सङ्ख्या नास्ति। आद्यन्तनिर्वाहिका सर्वथा गुणिताऽपि पूर्वपरसम्मेलनेन नवैव। यथा द्विगुणिता नव सङ्ख्याऽष्टादशतामुपैति। सा च दक्षिण एकं वामेऽष्टाविति लिखित्वा भवति।[115] सम्मेलनेन द्वयोः पुनर्नव। एवं त्रिगुणिता सप्तविंशतिः। सा च दक्षिणे द्वौ वामे सप्तेति लिखित्वा भवति।[116] सम्मेलनेन द्वयोः पुनर्नव। एवमन्यत्रापि। यथा सर्वथा गुणिताऽपि नवमी सङ्ख्या द्वयोर्योगेन नवत्वं न जहाति तथैव नवभिः स्वरैः सङ्केत्यो भगवान् गुणितोऽप्यर्थाद्भक्तेच्छया जनवत्सलत्वकारुणिकत्व-कृपालुत्वप्रणतानुरागित्वभक्तेच्छापालकत्वदीनबन्धुत्वसरलत्वसफलत्वस्वामित्वरघुनाथत्व-प्रभृतिभिर्दशभिर्गुणैर्गुणितोऽपि नवमी सङ्ख्येवैश्वर्यं न त्यजति। नवमीतोऽधिका काऽपि सङ्ख्या नहि। तथैव रामतोऽधिकः कोऽपि देवो नास्ति। नवमी सङ्ख्या पूर्णा श्रीरामोऽपि पूर्णः। ऐश्वर्यलीलायां चतुष्पाद्विभूतिदर्शनम्। विभूतेश्चत्वारः पादा यथा –

ए॒तावा॑नस्य महि॒माऽतो॒ ज्याया॑ँश्च॒ पूरु॑षः।
पादो॑ऽस्य॒ विश्वा॑ भू॒तानि॑ त्रि॒पाद॑स्या॒मृतं॑ दि॒वि॥
त्रि॒पादू॒र्ध्व उदै॒त्पुरु॑षः॒ पादो॑ऽस्ये॒हाभ॑व॒त्पुनः॑।
ततो॒ विष्व॒ङ्व्य॑क्रामत्साशनानश॒ने अ॒भि॥

– शु०य०वा०मा० ३१.३-४[117]

चतुष्पाद्विभूतेर्भगवतश्चतुर्भिः सूत्रैर्विभूतिभूषणेन ढक्कामाध्यमेन गानमतिन्यायसङ्गतं युक्ति-युक्तञ्च। ऐश्वर्यलीलायां श्रीरामस्य मिलन्ति चत्वारि सूत्राणि। विकारैः सह विग्रहः फलानां निग्रहः कारुण्यादीनां सङ्ग्रहो निजपदपद्मप्रपन्नभक्तेष्वनुग्रहश्च। इदमपि चतुर्भिः सूत्रैः स्वररूपश्रीरामस्यैश्वर्यलीलाप्रतिपादने तात्पर्यमूह्यम्। चतुर्णामार्तजिज्ञास्वर्थार्थि-ज्ञानिभक्तेष्वनुग्रहश्चास्मिन् तथ्ये दृढीकरणमापादयति। चत्वारो हि भगवतो भक्ता आर्तो जिज्ञासुरर्थार्थी ज्ञानी चेति।

---

११५ अङ्कानां वामतो गतिः इति न्यायेन।

११६ अङ्कानां वामतो गतिः इति न्यायेन।

११७ ऋग्वेदसंहितायां (ऋ०वे०सं० १०.९०.३-४) तैत्तिरीयारण्यके (कृ०य० तै०आ० ३.१२.२) अप्येतौ मन्त्रौ।

(१) आर्तः आर्तिग्रस्तश्चतुर्णामपि पुरुषार्थानां लिप्सया परमात्मानं प्रपद्यते यथा विभीषणः।

(२) जिज्ञासुः ज्ञातुमिच्छुरर्थाद्धर्ममोक्षलिप्सया श्रीरामं शुश्रूषते यथा लक्ष्मणः।

(३) अर्थार्थी भगवन्तं राघवमर्थकामौ प्रार्थयते यथा सुग्रीवः।

(४) ज्ञानी ज्ञानं प्राप्य पूर्वं तु मोक्षमिच्छति। विशेषो विज्ञानिरूपो निष्कामो हृदि रामं रमयितुमेव सदा चेष्टते यथा जटायुर्हनुमांश्च। गीतायां मानसे चापि चर्चा यथा –

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरथार्थी ज्ञानी च भरतर्षभ॥

– भ०गी० ७.१६

राम भगत जग चारि प्रकारा। सुकृती चारिउ अनघ उदारा॥ [११८]

– रा०च०मा० १.२२.६

ऐश्वर्यलीलायाममीषु चतुर्षु कृपाऽतोऽपि चतुर्भिः सूत्रैः प्रतिपादनं सङ्गच्छते। ऐश्वर्यलीलायां चतस्रः मुख्या घटनाः कौसल्यासमक्षं विराड्रूपप्रदर्शनं यथा –

देखरावा मातहि निज अद्भुतरूप अखंड।
रोम रोम प्रति लागे कोटि कोटि ब्रह्मांड॥ [११९]

– रा०च०मा० १.२०१

अहल्योद्धारः परशुरामसमक्षं वैष्णवधनुःकर्षणं रावणवधश्च। अतोऽपि चतुर्भिः सूत्रैः स्वरच्छलेनैश्वर्यांशवर्णनं रमणीयं प्रतिभाति मे। नव स्वरास्तथैवैश्वर्यलीलाऽपि श्रवण-कीर्तनस्मरणपादसेवनपूजनवन्दनदास्यसख्यात्मनिवेदनेतिनवलक्षणां भक्तिं ददाति। नवधा भक्तिर्भागवतानुसारेणेत्थम् –

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥
इति पुंसाऽर्पिता विष्णौ भक्तिश्चेन्नवलक्षणा।
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम्॥

– भा०पु० ७.५.२३–२४

रामायणेऽमीषां सङ्ग्रहश्च भक्तानाम् –

---

[११८] एतद्रूपान्तरम्–इत्थं चतुर्विधास्सन्ति भक्ता रामस्य निश्चितम्। एते सर्वेऽप्युदाराश्च धन्याः कलुष-वर्जिताः॥ (मा०भा० १.२२.६)।

[११९] एतद्रूपान्तरम्–स मातरं दर्शयति स्म नैजमखण्डमाश्चर्यमयञ्च रूपम्। यद्रोमरोमश्रितसतामुपेता ब्रह्माण्ड-कोट्यो गुणिता अनेकाः॥ (मा०भा० १.२०१)।

श्रीरामश्रवणे मता गिरिसुता काकः शिवः कीर्तने
कौसल्या स्मरणे पदाब्जभजने सीता सुतीक्ष्णोऽर्चने।
सौमित्रिः पदवन्दने च हनुमान्दास्ये च सख्येऽर्कजो
लङ्केशो भरतः समर्पणविधौ रामाप्तिरेषां फलम्॥

– इति मम

एवं भागवतेऽपि –

श्रीकृष्णश्रवणे परीक्षिदभवद्वैयासकिः कीर्तने
प्रह्लादः स्मरणे तदङ्घ्रिभजने लक्ष्मीः पृथुः पूजने।
अक्रूरस्त्वथ वन्दने च हनुमान्दास्येऽथ सख्येऽर्जुनः
सर्वस्वात्मनिवेदने बलिरभूत्कृष्णाप्तिरेषां फलम्॥ [१२०]

एवं ऐश्वर्यलीलाऽपि नवविधा। तत्रैश्वर्यं धर्मो यशः श्रीर्ज्ञानं वैराग्यं निग्रहो विग्रहोऽनुग्रहश्चेति। अत एव नवस्वरात्मकनवैश्वर्यलीलानां चतुर्भिः सूत्रैः प्रतिपादनं सुस्पष्टमेव रामायणस्यैश्वर्यवर्णनम्। तत्र –

(१) अइउण् – अकारो वासुदेवः। यथा –

अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च।
अहमेवाक्षयः कालो धाताऽहं विश्वतोमुखः॥

– भ०गी० १०.३३

इत्थम् अ श्रीरामो वासुदेवः।[१२१] इ महालक्ष्मी सीता।[१२२] उ जीवाचार्यो लक्ष्मणः।[१२३] ण् निर्वृतिवाचकः। णश्च निर्वृतिवाचकः (गो०पू०ता०उ० १) इति गोपालतापनीयश्रुतेः। अर्थाद्रामसीतालक्ष्मणध्यानेन जीवो भवबन्धनान्निवर्तते[१२४] इति सूत्रार्थः।[१२५] अकारेकारोकारवाचकान् रामसीतालक्ष्मणान्नयति प्रापयतीति णीञ् धातोः (णीञ् प्रापणे धा०पा० ९०१)

---

[१२०] मूलं गौडीयवैष्णवग्रन्थेषु मृग्यम्।

[१२१] अकारो वासुदेवः स्यात् (ए०को० १)।

[१२२] लक्ष्मीरीकार उच्यते (ए०को० २)। ईः। स्त्री। अस्य विष्णोः पत्नी। ङीप्। लक्ष्मीः। इति विश्वमेदिन्यौ इति शब्दकल्पद्रुमः। ईः। स्त्री। अस्य विष्णोः पत्नी। ङीष्। लक्ष्म्याम् इति वाचस्पत्यम्। ततः ङ्यापोः सञ्ज्ञाछन्दसोर्बहुलम् (पा०सू० ६.३.६३) इत्यनेन छान्दसह्रस्वः। छन्दोवत्सूत्राणि भवन्ति (भा०पा०सू० १.१.१, १.४.३) इत्यनेन सूत्राणां छान्दसत्वं माहेश्वरसूत्रार्थप्रकरणेऽस्मिन् सर्वेषु छान्दसकार्येषु बोध्यम्।

[१२३] उपलक्षणत्वात्।

[१२४] जीवस्य भवबन्धनान्निवृतिर्वा।

[१२५] अइउ इत्यत्र समासेऽप्यसन्धिश्छान्दसः। अइउना ण् इति विग्रहे कर्तृकरणे कृता बहुलम् (पा०सू० २.१.३२) इत्यनेन तृतीयातत्पुरुषसमासः। विभक्तिकार्ये हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन सुलोपे सिद्धम्।

अइउण् इत्यपि।[१२६]

एवमेव –

(२) ऋऌक् – ऋ ऋषिः।[१२७] ऌ ऌकारवज्जटिलसाधनारतो मुनिः।[१२८] तावेव कथयत्यात्मसम्मुखं करोतीति ऋऌक्।[१२९]

(३) एओङ् – एवम् ए षडैश्वर्यवाचको रामः।[१३०] ओ सप्तावरणनाशिनी सीता।[१३१] तावञ्चति पूजयति इति एओङ्।[१३२] सीतारामपूजकमिति तात्पर्यम्।

(४) ऐऔच् – ऐ अष्टप्रकृत्यात्मिका सीता।[१३३] औ नवमसङ्ख्यावाच्यो रामः।[१३४] तौ चिनोत्यन्तर्भावितण्यर्थतया निश्चाययतीति ऐऔच्।[१३५] सीतारामनिश्चायकमित्यर्थः।

---

[१२६] अइउ इत्यत्र समासेऽप्यसन्धिश्छान्दसः। अइउ इत्युपपदे नीधातोरौणादिको ड्विन् प्रत्ययः। कार्याद्विद्यादनूबन्धम् (भा०पा०सू० ३.३.१) केचिदविहिता अप्यूह्याः (वै०सि०कौ० ३१६९) इत्यनुसारमूह्योऽयमविहितप्रत्ययः। सर्वापहारिलोपे डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) इत्यनेन टिलोपे सौत्रत्वान्नकारस्य णकार उपपदसमासे विभक्तिकार्ये हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन सुलोपे सिद्धम्।

[१२७] नामैकदेशग्रहणे नाममात्रग्रहणम् इत्यनेन न्यायेन।

[१२८] नामैकदेशग्रहणे नाममात्रग्रहणम् इत्यनेन न्यायेन।

[१२९] ऋऌ इत्यत्र समासेऽप्यसन्धिश्छान्दसः। ऋऌ इत्युपपदे कथ् धातोः (कथँ वाक्यप्रबन्धने धा०पा० १८५१) पूर्ववदौणादिको ड्विन् प्रत्ययः। पूर्ववत्सर्वापहारिलोपे टिलोप उपपदसमासे विभक्तिकार्ये हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन सुलोपे सिद्धम्।

[१३०] माहेश्वरसूत्रेषु एकारस्य क्रमसङ्ख्यानुसारम्। ऐश्वर्यं धर्मो यशः श्रीर्ज्ञानं वैराग्यञ्चेति षडैश्वर्याणि। ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा॥ (वि०पु० ६.५.७४)।

[१३१] माहेश्वरसूत्रेषु ओकारस्य क्रमसङ्ख्यानुसारम्। क्षितिजलपावकगगनसमीरमहत्प्रकृतयः सप्तावरणानि। यथा रामचरितमानस उत्तरकाण्डे काकभुशुण्डिगीतायां मानसकाराः सप्तावरन भेद करि जहँ लगि रहि गति मोरि। गयउँ तहाँ प्रभु भुज निरखि ब्याकुल भयउँ बहोरि॥ (रा०च०मा० ७.७९ख)। एतद्रूपान्तरम्–प्रभेद्य सप्तावरणानि यावद्गतिर्ममासीदगमञ्च तावत्। तत्रापि वीक्ष्येशभुजौ स्वपृष्ठे तीव्राकुलत्वेन युतोऽहमासम्॥ (मा०भा० ७.७९ख)।

[१३२] एओ इत्यत्र समासेऽप्यसन्धिश्छान्दसः। एओ इत्युपपदे अञ्च् धातोः (अञ्चुँ गतिपूजनयोः धा०पा० १८८) क्विप् च (पा०सू० ३.२.७६) इत्यनेन क्विप् प्रत्ययः। सर्वापहारिलोपे उपपदसमासे संयोगान्तस्य लोपः (पा०सू० ८.२.२३) इत्यनेन चकारलोपे चोः कुः (पा०सू० ८.२.३०) इत्यनेन ञकारस्य ङत्वे एङः पदान्तादति (पा०सू० ६.१.१०९) इत्यनेन पूर्वरूपैकादेशे विभक्तिकार्ये हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन सुलोपे सिद्धम्।

[१३३] माहेश्वरसूत्रेषु ऐकारस्य क्रमसङ्ख्यानुसारम्। भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥ (भ०गी० ७.४) इत्यष्टधा प्रकृतिः।

[१३४] माहेश्वरसूत्रेषु औकारस्य क्रमसङ्ख्यानुसारम्। रामनवमसङ्ख्ययोः साम्यं पूर्वमेव कथितं प्रणेतृभिः।

[१३५] ऐऔ इत्यत्र समासेऽप्यसन्धिश्छान्दसः। ऐऔ इत्युपपदे चिधातोः (चिञ् चयने धा०पा० १२५१) पूर्ववदौणादिको ड्विन् प्रत्ययः। पूर्ववत्सर्वापहारिलोपे टिलोप उपपदसमासे विभक्तिकार्ये हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन सुलोपे सिद्धम्। अयस्मयादीनि च्छन्दसि (पा०सू० १.४.२०) इत्यनेन छान्दसभसञ्ज्ञायां पदत्वाभावे चोः कुः (पा०सू० ८.२.३०) इत्यस्य प्रवृत्तिर्न। यद्वा प्रत्याहारेष्वसन्देहार्थं कुत्वाभावः।

इत्थं सूत्रचतुष्टयेनैश्वर्यलीलात्मकं रामायणं प्रतिपादितम्। इदानीं माधुर्यलीलापरं रामायणं बालबुद्ध्या विविच्यते दशभिः सूत्रैः। तत्र माधुर्ये पूर्वनिर्दिष्टदशगुणप्रतिपादकानि दश सूत्राणि दशमस्त्वमसि[१३६] इति श्रुतेर्वाच्यतावच्छेदकस्य लक्ष्यतावच्छेदकस्य भगवतः श्रीरामस्य माधुर्यगुणबृंहितं सौन्दर्यसारसर्वस्वं दिव्यं चरित्रं शिवेन लोकोत्तरकौशल-पुरःसरं सङ्केतितम्। अत्र वर्णानां द्वौ विभागौ स्वरो व्यञ्जनञ्च। एवमेव ब्रह्मणो द्वे स्वरूपे निर्गुणं सगुणञ्च। तत्र निर्गुणलीला प्रतिपादिता। साम्प्रतं सगुणलीलाऽपि प्रतिपाद्यते। पञ्चमात्सूत्राद्व्यञ्जनानां वर्णनं प्रारब्धम्। तत्र व्यञ्जनं सीताया रामेण मिश्रणम्। सगुण-लीलायां सीतया रामोऽभिन्नः। यथा –

अनन्या राघवेणाहं भास्करेण यथा प्रभा॥

– वा०रा० ५.२१.१५

अनन्या हि मया सीता भास्करेण यथा प्रभा ॥

– वा०रा० ६.११८.१९

इति वाल्मीकीये रामायणे श्रीसीतारामाभ्यामुक्तत्वात्। उभयत्र तृतीया प्रकृत्यादित्वात्।[१३७] व्यञ्जनानां षड्वर्गा यवर्गः कवर्गश्चवर्गष्टवर्गस्तवर्गः पवर्गश्चेति। एषां कीर्तनेन जीवानां विकारषड्वर्गनाशनं सूचितम्। किं बहुना स्वरवर्गं मिलित्वा चतुर्दशसूत्रेषु सप्तवर्गाः। एवं सप्तभिर्वर्गैरक्षराणां सप्तकाण्डात्मकं रामायणं सुस्पष्टं कीर्तितम्। सूत्राणि सार्वभौमानि विश्वतोमुखानि छन्दःस्वरूपाणि भवन्ति। तत्र स्थूलानामक्षराणां निर्देशत्वेऽप्यक्षराणामक्षरस्य भगवतो रामचन्द्रस्य रामायणी गाथा कथं न निर्दिष्टा स्यात्। भगवत्सङ्कीर्तनं विनैषु पुण्यजनकतावच्छेदकता कथं स्यात्। यतो रामायणकीर्तनं चतुर्दशभुवनव्यापकं चतुर्दश-सूत्रेष्वतो लोकोत्तरपुण्यजनकता। तस्माद्भाष्यकारश्चतुर्दशसूत्राणां सानन्दं प्रशंसां कुर्वन्नाह सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितश्चन्द्रतारकवत्प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः। सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति (भा०शि०सू०)। तर्हि ब्रह्मणो रामस्य चर्चां विना पूर्वोक्तपुण्यजनकताऽन्येषु सन्दिग्धा स्यात्। यतो भाष्यप्रमाणम्। यया पुण्यजनकता यतश्च पुण्यजनकता। पूर्वं चतुर्भिः सूत्रैर्बालकाण्डं चर्चितमिदानीमयोध्याकाण्डमुपक्रमते।

(५) हयवरट् – एवं वर्णसंयोजनेन हयेषु घोटकेषु वरा हयवराः श्रेष्ठघोटकास्तैरटति वनमिति हयवरट्। शकन्ध्वादित्वात्पररूपं सौत्रत्वाद्वा।[१३८] अथवा हयवरसंयोजितरथेन

---

[१३६] मूलं वेदशाखासु मृग्यम्।

[१३७] प्रकृत्यादिभ्य उपसङ्ख्यानम् (वा० २.३.१८) इत्यनेन।

[१३८] हयवर उपपदे अटँ गतौ (धा०पा० ३३२) इति धातोः क्विप् च (पा०सू० ३.२.७६) इत्यनेन कर्तरि क्विप्। सर्वापहारिलोप उपपदसमासे शकन्ध्वादिषु पररूपं वाच्यम् (वा० ६.१.९४) इत्यनेन पूर्वरूपे विभक्तिकार्ये हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन सुलोपे सिद्धम्।

पित्रादिष्टः सीतालक्ष्मणसहायः श्रीरामो वनमटतीति हयवरट्।[१३९]

(६) लण् – लसतीति लः। सौत्रत्वाट्टिलोपः सलोपश्च।[१४०] तस्मिन् ले प्रकृति-सौन्दर्यलसिते चित्रकूटे भक्तानानन्दं नयतीति कष्टान्निवर्तयति वेति लण् चित्रकूटस्थो रामः। सौत्रत्वाण्णत्वम्।[१४१] यद्वा लाति भक्तिं यः स लः चित्रकूटः।[१४२] तस्मिन्नाशयति भक्तकष्टं जयन्तदर्पञ्च यः स लण् चित्रकूटस्थः श्रीरामः। सौत्रत्वाट्टिलोपो णत्वञ्च।[१४३]

(७) ञमङणनम् – प्रतिवर्गान्तिमभूतान् खरदूषणत्रिशीर्षमारीचकबन्धान्मीनातीति ञमङणनम् श्रीरामः।[१४४]

(८) झभञ् – झॄष् वयोहानौ (धा०पा० ११३१)। झीर्यतीति झः। सुग्रीवः। वालित्रासाज्जीर्णो भवतीति भावः।[१४५] भातीति भः। हनुमान्।[१४६] तौ झभौ सुग्रीवहनुमन्तौ

---

१३९ प्रक्रिया पूर्ववत्।

१४० लसँ श्लेषणक्रीडनयोः (धा०पा० ७१४) → लस् → नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) → लस् अच् → लस् अ → लस → सौत्रटिलोपः → लस् → सौत्रसलोपः → ल → विभक्तिकार्यम् → लः। यद्वा लस् धातोः अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) इत्यनेनोपपदाभावेऽपि डप्रत्ययः। लस् ड → लस् अ → डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) → ल् अ → ल → विभक्तिकार्यम् → लः।

१४१ ल इत्युपपदे नीधातोः (णीञ् प्रापणे धा०पा० ९०१) पूर्ववदौणादिको ड्विन् प्रत्ययः। पूर्ववत्सर्वापहारि-लोपे टिलोपे सौत्रणत्व उपपदसमासे विभक्तिकार्ये हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन सुलोपे सिद्धम्।

१४२ ला आदाने। द्वावपि (रा ला) दाने इति चन्द्रः (धा०पा० १०५८)। ला → आतश्चोपसर्गे (पा०सू० ३.१.१३६) → बाहुलकादनुपसर्गे कः → ला क → ला अ → आतो लोप इटि च (पा०सू० ६.४.६४) → ल् अ → ल → विभक्तिकार्यम् → लः। यद्वा ला → अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) → ला ड → ला अ → डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) → ल् अ → ल → विभक्तिकार्यम् → लः। ददातीति दः (पुमांस्तु दातरि स्मृतः मे०को० १८.१) इतिवल्लातीति लः।

१४३ ल उपपदे णशँ अदर्शने (धा०पा० ११९४) इत्यतो णिजन्तात् नाशि धातोः क्विप् च (पा०सू० ३.२.७६) इत्यनेन कर्तरि क्विप्। सर्वापहारिलोपे णेरनिटि (पा०सू० ६.४.५१) इत्यनेन णिलोपे नाश् इति जाते सौत्रटिलोपे सौत्रणत्वे चोपपदसमासे विभक्तिकार्ये हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन सुलोपे सिद्धम्।

१४४ ञमङणन इत्युपपदे मीधातोः (मीञ् हिंसायाम् धा०पा० १४७६) पूर्ववदौणादिको ड्विन्-प्रत्ययः। पूर्ववत्सर्वापहारिलोपे टिलोप उपपदसमासे विभक्तिकार्ये हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन सुलोपे सिद्धम्।

१४५ झॄष् वयोहानौ (धा०पा० ११३१) → झॄ → अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) → झॄ ड → झॄ अ → डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) → झ् अ → झ → विभक्तिकार्यम् → झः।

१४६ भा दीप्तौ (धा०पा० १०५१) → भा → अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) → भा ड → भा अ → डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) → भ् अ → भ → विभक्तिकार्यम् → भः।

यन्त्रयत्यानन्देनेति झभञ् श्रीरामः। सौत्रत्वाद्यकारस्य ञकारः।[१४७] सुग्रीववायुपुत्रतोषकर्तेति तात्पर्यम्।

(९) घढघष् – घढमभिमानं[१४८] दधातीति घढधः वाली।[१४९] तमेव स्यति खण्डयतीति घढघष् ।[१५०] वालिनाशको राम इति तात्पर्यम्।

(१०) जबगडदश् – जयतीति जः। बालयतीति बः। गर्जतीति गः। डम्बयतीति डः। दमयति निशाचरानिति दः।[१५१] एतत्पञ्चगुणसम्पन्नजबगडदस्य हृदये शेत इति जबगडदश् । वायुपुत्रहृदयस्थो रामः।[१५२]

---

[१४७] झभ उपपदे यत्रिँ सङ्कोचे (धा०पा० १५३६) इति धातोः पूर्ववदौणादिको ड्विन् प्रत्ययः। पूर्ववत्सर्वापहारिलोपे टिलोप उपपदसमासे सौत्रत्वाद्यकारस्य ञकारे विभक्तिकार्ये हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन सुलोपे सिद्धम्। अयस्मयादीनि च्छन्दसि (पा०सू० १.४.२०) इत्यनेन छान्दसभसञ्ज्ञायां पदत्वाभावे चोः कुः (पा०सू० ८.२.३०) इत्यस्य प्रवृत्तिर्न।

[१४८] व्युत्पत्तिः साध्या।

[१४९] घढ उपपदे डुधाञ् धारणपोषणयोः (धा०पा० १०९२) इति धातोः अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) इत्यनेन डप्रत्ययः। अनुबन्धलोपे डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) इत्यनेन टिलोप उपपदसमासे विभक्तिकार्ये सिद्धम्।

[१५०] घढध उपपदे षो अन्तकर्मणि (धा०पा० ११४७) इति धातोः पूर्ववदौणादिको ड्विन् प्रत्ययः। पूर्ववत्सर्वापहारिलोपे टिलोप उपपदसमासे सौत्रत्वात्सकारस्य षकारे विभक्तिकार्ये हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन सुलोपे सिद्धम्। अयस्मयादीनि च्छन्दसि (पा०सू० १.४.२०) इत्यनेन छान्दसभसञ्ज्ञायां पदत्वाभावे व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः (पा०सू० ८.२.३६) झलां जशोऽन्ते (पा०सू० ८.२.३९) इत्यनयोः प्रवृत्तिर्न।

[१५१] नानाधातुभ्यः अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) इत्यनेन डप्रत्यये डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) इत्यनेन टिलोप उपपदसमासे विभक्तिकार्ये सिद्धानि पञ्चैतानि। जि जये (धा०पा० ५६१) इति धातोः जः। बलँ प्राणने धान्यावरोधने च (धा०पा० ८४०) इत्यतो णिचि बालि धातुः। ततः डप्रत्यये बः। णेरनिटि (पा०सू० ६.४.५१) इत्यनेन णिलोपः शेषा प्रक्रिया पूर्ववत्। न च बलँ प्राणने (धा०पा० १६२८) इति धातोर्णिचि डे णिलोपे टिलोपे विभक्तिकार्येऽपि सिद्धिः। बलँ प्राणने (धा०पा० १६२८) इत्यस्य ज्ञपादित्वान्मित्त्वम्। ततो णिच्युपधावृद्धौ मितां ह्रस्वः (पा०सू० ६.४.९२) इत्यनेन ह्रस्वे बलयति इति रूपं प्रणेतारस्तु बालयति इत्याहुः। गर्जँ शब्दे (धा०पा० २२६) इति धातोः गृजँ शब्दे (धा०पा० २४८) इत्यतो वा गः। डिपँ सङ्घाते डबिँ डिबिँ इति चान्द्रः (धा०पा० १६७७) इत्यत्र डम्ब् (डबिँ)धातोः डः। दमुँ उपशमे (धा०पा० १२०३) इत्यतो णिचि दमि धातुः। जनीजृष्क्नसुरञ्जोऽमन्ताश्च (धा०पा० ग०सू०) इत्यनेन मित्त्वादुपधावृद्धौ मितां ह्रस्वः (पा०सू० ६.४.९२) इत्यनेन ह्रस्वः। दमि धातोः दः। णेरनिटि (पा०सू० ६.४.५१) इत्यनेन णिलोपः शेषा प्रक्रिया पूर्ववत्।

[१५२] जबगडद उपपदे शीङ् स्वप्ने (धा०पा० १०३२) इति धातोः पूर्ववदौणादिको ड्विन् प्रत्ययः। पूर्ववत्सर्वापहारिलोपे टिलोप उपपदसमासे विभक्तिकार्ये हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन सुलोपे सिद्धम्। अयस्मयादीनि च्छन्दसि (पा०सू० १.४.२०) इत्यनेन छान्दसभसञ्ज्ञायां पदत्वाभावे झलां जशोऽन्ते (पा०सू० ८.२.३९) इत्यस्य प्रवृत्तिर्न।

(११) खफछठथचटतव् – खनतीति खः। फलतीति फः। छ्यतीति छः।[१५३] लोठतीति ठः। लुकारलोपश्छान्दसः।[१५४] थूर्वतीति थः। चिनोति दुर्गुणानिति चः। टङ्कयत्यसद्विचारानिति टः। ताम्यतीति तः।[१५५] एवं खफछठथचटतं रावणमपि वधतीति खफछठथचटतव्।[१५६] अथवा खफछठथचटतध्वनिकुर्वाणं युद्धाय स्वकीयं चापविशेषं वर्धयतीति खफछठथचटतव्।[१५७] अथवैतद्ध्वनियुक्तं वानरदलमवतीति खफछठथचटतव्। शकन्ध्वादित्वात्पूर्वरूपम्।[१५८]

(१२) कपय् – कायति विभीषणं राज्यदानाय शब्दापयति[१५९] पाति वानरसेनां

---

[१५३] नानाधातुभ्यः अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) इत्यनेन डप्रत्यये डित्यभस्याप्यनुबन्धकरण-सामर्थ्यात् (वा० ६.४.१४३) इत्यनेन टिलोपे विभक्तिकार्ये सिद्धानि त्रीण्येतानि। खनुँ अवदारणे (धा०पा० ८७८) इति धातोः खः। ञिफलाँ विशरणे (धा०पा० ५१६) इति धातोः फः। छो छेदने (धा०पा० ११४६) इति धातोः छः।

[१५४] लुठँ उपघाते (धा०पा० ३३७) इति धातोः नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन कर्तरि पचाद्यचि छान्दसलुकारलोपे विभक्तिकार्ये सिद्धम्।

[१५५] नानाधातुभ्यः अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) इत्यनेन डप्रत्यये डित्यभस्याप्यनुबन्धकरण-सामर्थ्यात् (वा० ६.४.१४३) इत्यनेन टिलोपे विभक्तिकार्ये सिद्धानि चत्वार्येतानि। थुर्वीँ हिंसायाम् (धा०पा० ५७१) इति धातोः थः। चिञ् चयने (धा०पा० १२५१) इति धातोः चः। टकिँ बन्धने (धा०पा० १६३८) इति धातोः टः। णेरनिटि (पा०सू० ६.४.५१) इत्यनेन णिलोपः शेषा प्रक्रिया पूर्ववत्। तमुँ काङ्क्षायाम् (धा०पा० १२०२) इति धातोः तः।

[१५६] वधति इत्यत्र वधँ हिंसायाम् भौवादिकः सौत्रो धातुः। स च जनिवध्योश्च (पा०सू० ७.३.३५) इति सूत्रेण ज्ञापितः। 'जनिवध्योश्च'। जनकः। 'वधँ हिंसायाम्'। वधकः (वै०सि०कौ० २८९५)। 'वधँ हिंसायामिति'। धात्वन्तरं भौवादिकम्। भ्वादेराकृतिगणत्वात् (बा०म० २८९५)। एवं तर्हि खफछठथचटत उपपदे वधँ हिंसायाम् इति धातोः पूर्ववदौणादिको क्विन् प्रत्ययः। पूर्ववत्सर्वापहारिलोपे टिलोप उपपदसमासे विभक्ति-कार्ये हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन सुलोपे सिद्धम्।

[१५७] वृधुँ वृद्धौ (धा०पा० ७५९) इति धातोर्णिचि वर्धि इति धातुः। खफछठथचटत उपपदे वर्धिधातोः पूर्ववदौणादिको क्विन् प्रत्ययः। पूर्ववत्सर्वापहारिलोपे णेरनिटि (पा०सू० ६.४.५१) इत्यनेन णिलोपे टिलोप उपपदसमासे विभक्तिकार्ये हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन सुलोपे सिद्धम्।

[१५८] खफछठथचटत उपपदे अवँ रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छा-दीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु (धा०पा० ६००) इति धातोः क्विप् च (पा०सू० ३.२.७६) इत्यनेन क्विप् प्रत्यये सर्वापहारिलोप उपपदसमासे शकन्ध्वादिषु पररूपं वाच्यम् इत्यनेन पररूपे विभक्तिकार्ये हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन सुलोपे सिद्धम्।

[१५९] कायतीति कः इत्यर्थः। कै शब्दे (धा०पा० ९१६) → कै → अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) → कै ड → कै अ → डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) → क् अ → क → विभक्तिकार्यम् → कः।

पुष्पकारोहेण[१६०] यात्ययोध्याम्[१६१] इति कपय्।[१६२] दत्तविभीषणराज्यलक्ष्मीः पुष्पकारूढः सीताभिरामो रामोऽयोध्यां प्रति प्रतिष्ठत इति भावः।

(१३) शषसर् – तथा श्यति तनूकरोति सीतातापं[१६३] स्यति रावणं[१६४] सरत्ययोध्यां[१६५] रमयति सीतां रमते च स्वयं राजते वा राजसिंहासने[१६६] यः स शषसर्।[१६७] रावणवधं विधाय राजसिंहासनासीनो राम इति तात्पर्यम्। सौत्रत्वात्सकारस्य षकारः।

(१४) हल् – हरति भक्ततापं[१६८] लिङ्गति यः सीतां लिङ्ग्यते वा सीतया लीयते वा

---

[१६०] पातीति पः इत्यर्थः। पा रक्षणे (धा०पा० १०५६) → पा → अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) → पा ड → पा अ → डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) → प् अ → प → विभक्तिकार्यम् → पः। पः स्यात्पाने च पातरि (ए०को० २४) इति कोशादपि।

[१६१] यातीति य् इत्यर्थः। या प्रापणे (धा०पा० १०४९) इति धातोः पूर्ववदौणादिको ड्विन् प्रत्ययः। पूर्ववत्सर्वापहारिलोपे टिलोपे विभक्तिकार्ये हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन सुलोपे य्। याने यातरि यस्त्यागे (ए०को० २९) इति कोशादकारान्तोऽपि यातरि।

[१६२] कश्च पश्च य् चेति कपय्।

[१६३] श्यतीति शः इत्यर्थः। शो तनूकरणे (धा०पा० ११४५) → शो → अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) → शो ड → शो अ → डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) → श् अ → श → विभक्तिकार्यम् → शः।

[१६४] स्यतीति षः इत्यर्थः। षो अन्तकर्मणि (धा०पा० ११४७) → षो → धात्वादेः षः सः (पा०सू० ६.१.६४) → सो → अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) → सो ड → सो अ → डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) → स् अ → स → सौत्रषकारः → ष → विभक्तिकार्यम् → षः।

[१६५] सरतीति सः इत्यर्थः। सृ गतौ (धा०पा० ९३५) → सृ → अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) → सृ ड → सृ अ → डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) → स् अ → स → विभक्तिकार्यम् → सः।

[१६६] रमयति रमते राजते वेति र् इत्यर्थः। प्रथमपक्षे रमुँ क्रीडायाम् (धा०पा० ८५३) इत्यतो णिचि रमि धातुः। जनीजृष्क्नसुरञ्जोऽमन्ताश्च (धा०पा० ग०सू०) इत्यनेन मित्त्वादुपधावृद्धौ मितां ह्रस्वः (पा०सू० ६.४.९२) इत्यनेन ह्रस्वः। द्वितीयपक्षे रमुँ क्रीडायाम् (धा०पा० ८५३) इति शुद्धो धातुः। तृतीयपक्षे राजृँ दीप्तौ (धा०पा० ८२२) इति धातुः। एतेभ्यः पूर्ववदौणादिको ड्विन् प्रत्ययः। प्रथमपक्षे णेरनिटि (पा०सू० ६.४.५१) इत्यनेन णिलोपः। पूर्ववत्सर्वापहारिलोपे टिलोपे विभक्तिकार्ये हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन सुलोपे र्। अयस्मयादीनि च्छन्दसि (पा०सू० १.४.२०) इत्यनेन छान्दसभसञ्ज्ञायां पदत्वाभावे झलां जशोऽन्ते (पा०सू० ८.२.३९) इत्यस्य प्रवृत्तिर्न।

[१६७] शश्च षश्च सश्च र् चेति शषसर्।

[१६८] हरतीति हः इत्यर्थः। हृञ् हरणे (धा०पा० ८९९) → हृ → अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) → हृ ड → हृ अ → डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) → ह् अ → ह → विभक्तिकार्यम् → हः।

भक्तानां हृदि[१६९] यः स हल्।[१७०]

इति बालबुद्धिप्रतिपादितव्युत्पत्तिपरकचतुर्दशसूत्री रामायणकथा।

हकारेण प्रारभ्य हकारेणैवोपसंहारः। अपवर्गस्योभयत्र चर्चया चतुर्दशसूत्र-रामायणमपवर्गायेति ध्वन्यते। एवमेव नवस्वरैर्नवसङ्ख्यावाच्यपूर्णब्रह्मश्रीरामस्य चर्चां विधाय पुनरेकत्रिंशद्वर्णै रावणवधकाले भगवता धनुषि संहितानां रामस्यैकत्रिंशद्बाणानां[१७१] स्मरणेनैकत्रिंशद्विकारनाशोऽपि सूचितः। पुनर्द्वाभ्यां वर्णाभ्यां श्रीसीतारामस्मरणेन ज्ञानिनां मोक्षो भक्तानां भक्तिश्च सूचिता। व्यञ्जनेषु हकारेण प्रारभ्य हकारेणोपसंहारस्य तात्पर्यं यत् हकारः हरिवाचको हरिश्च पापानि हरत्यतः पूर्वम् अइउण् इत्यत्राकारेण वासुदेवस्य रामस्य स्मरणं[१७२] मध्ये हकारेण हरिस्मरणमन्ते च हकारेण हरिस्मरणमित्यादौ[१७३] मध्येऽन्ते च मङ्गलाचरणं सङ्केत्य रामायणी मर्यादाऽपि सुरक्षिता। तथा चोक्तम् –

वेदे रामायणे चैव पुराणे भारते तथा।
आदावन्ते च मध्ये च हरिः सर्वत्र गीयते॥

– क०पु० २१.३७

अकारमुद्दिश्य श्रीरामस्मरणतः प्रारभ्यान्ते हल् इति लकारेण लक्ष्मणः स्मृतः।[१७४]

यद्यपि चतुर्दशसूत्राणां द्विरुच्चारितहकारस्य सन्ति विविधेषु प्रयोगेषु प्रयोजनानि यथा हयवरट् इत्यत्र हकारः अट्हश्अशइण् ग्रहणेषु सूत्रेषु हकारग्रहणार्थः। तथा च हयवरट् इत्यत्र हकारग्रहणाभावे तस्य च अट् प्रत्याहारे श्रवणाभावे महाँ हि सः इत्यत्र रुत्वानु-

[१६९] लिङ्गति लिङ्ग्यते लीयते वेति ल् इत्यर्थः। प्रथमद्वितीयपक्षयोः लिगिँ गतौ (धा०पा० १५५) इति धातुः। तृतीयपक्षे लीङ् श्लेषणे (धा०पा० ११३९) इति धातुः। प्रथमतृतीयपक्षयोः कर्तरि द्वितीय-पक्षे च कर्मण्यौणादिको ड्विन् प्रत्ययः। कार्याद्विद्यादनूबन्धम् (भा०पा०सू० ३.३.१) केचिदविहिता अप्यूह्याः (वै०सि०कौ० ३१६९) इत्यनुसारमूह्योऽयमविहितप्रत्ययः। सर्वापहारिलोपे डित्यभस्याप्यनु-बन्धकरणसामर्थ्यात् (वा० ६.४.१४३) इत्यनेन टिलोपे विभक्तिकार्ये हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन सुलोपे ल्।

[१७०] हश्च ल् चेति हल्।

[१७१] आकरषेउ धनु श्रवण लगि छाँड़े शर एकतीस। रघुनायक सायक चले मानहुँ काल फनीस॥ (रा०च०मा० ६.१०२)। एतद्रूपान्तरम्–कर्णान्तमाकृष्य धनुः शरान् स त्रिंशन्मितानेकयुतान् व्यमुञ्चत्। शराश्चलन्ति स्म रघुप्रभोस्ते भुजङ्गमेशा ननु कालरूपाः॥ (मा०भा० ६.१०२)।

[१७२] अक्षराणामकारोऽस्मि (भ०गी० १०.३३)। अकारो वासुदेवः स्यात् (ए०को० १)।

[१७३] नामैकदेशग्रहणे नाममात्रग्रहणम् इत्यनेन न्यायेन हकारो हरिवाचकः।

[१७४] नामैकदेशग्रहणे नाममात्रग्रहणम् इत्यनेन न्यायेन लकारो लक्ष्मणवाचकः।

नासिकत्वे न स्यातााम्।[१७५] अर्हेण इत्यत्र च णत्वं न स्यात्।[१७६] हयवरड्सूत्रे हकारो न स्यात्तदा हश् प्रत्याहार एव न स्यात्। रामो हसति इत्यत्र हकारस्य हश्परकत्वाभावे हशि च (पा०सू० ६.१.११४) इत्यनेनात उत्वं न स्यात्।[१७७] एवमेव भोभगोअघोअपूर्वस्य योऽशि (पा०सू० ८.३.१७) इति सूत्रेण रोर्यत्वं न स्यात्।[१७८] एवमेव हयवरट् इति सूत्रे हकारग्रहणं विना लिलिहिढ्वे इत्यत्र विभाषेटः (पा०सू० ८.३.७९) इत्यनेनेण्लक्षणो ढकारो वैकल्पिको न स्यात्।[१७९] तस्माद्धयवरड्ढकारः सप्रयोजनकः। एवं हल् इत्यत्र हकारग्रहणाभावे रुदिहि[१८०]

---

[१७५] महान् हि सः → दीर्घादटि समानपदे (पा०सू० ८.३.९) → महाँरुँ हि सः → आतोऽटि नित्यम् (पा०सू० ८.३.३) → महाँरुँ हि सः → भोभगोअघोअपूर्वस्य योऽशि (पा०सू० ८.३.१७) → महाँय् हि सः → लोपः शाकल्यस्य (पा०सू० ८.३.१९) → महाँ हि सः।

[१७६] अर्ह टा → टाङसिङसामिनात्स्याः (पा०सू० ७.१.१२) → अर्ह इन → आद्गुणः (पा०सू० ६.१.८७) → अर्हेन → अट्कुप्वाङ्नुम्व्यवायेऽपि (पा०सू० ८.४.२) → अर्हेण।

[१७७] रामस् हसति → ससजुषो रुः (पा०सू० ८.२.६६) → रामरुँ हसति → हशि च (पा०सू० ६.१.११४) → राम उ हसति → आद्गुणः (पा०सू० ६.१.८७) → रामो हसति।

[१७८] अस्योदाहरणम् – भोस् हरे → ससजुषो रुः (पा०सू० ८.२.६६) → भोरुँ हरे → भोभगोअघोअपूर्वस्य योऽशि (पा०सू० ८.३.१७) → भोय् हरे → हलि सर्वेषाम् (पा०सू० ८.३.२२) → भो हरे।

[१७९] लिहँ आस्वादने (धा०पा० १०१६) → लिह् → स्वरितञितः कर्त्रभिप्राये क्रियाफले (पा०सू० १.३.७२) → परोक्षे लिट् (पा०सू० ३.२.११५) → लिह् लिट् → लिह् ध्वम् → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → लिह् लिह् ध्वम् → हलादिः शेषः (पा०सू० ७.४.६०) → लि लिह् ध्वम् → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → इड्प्राप्तिः → एकाच उपदेशेऽनुदात्तात् (पा०सू० ७.२.१०) → इण्निषेधः → कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि (पा०सू० ७.२.१३) → क्रादि-नियमादिड्प्राप्तिः → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → लि लिह् इट् ध्वम् → लि लिह् इ ध्वम् → विभाषेटः (पा०सू० ८.३.७९) → वैकल्पिकढत्वम् → लि लिह् इ ढ्वम् → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → लि लिह् इ ढ्वे → लिलिहिढ्वे। ढत्वाभावे – लि लिह् इ ध्वम् → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → लि लिह् इ ध्वे → लिलिहिध्वे।

[१८०] रुदिँर् अश्रुविमोचने (धा०पा० १०६७) → रुद् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → रुद् सिप् → कर्तरि शप् (पा०सू० ३.१.६८) → रुद् शप् सिप् → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → रुद् सिप् → सेर्ह्यपिच्च (पा०सू० ३.४.८७) → रुद् हि → सार्वधातुकमपित् (पा०सू० १.२.४) → ङित्त्वम् → क्ङिति च (पा०सू० १.१.५) → लघूपधगुणनिषेधः → रुदादिभ्यः सार्वधातुके (पा०सू० ७.२.७६) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → रुद् इट् हि → रुद् इ हि → रुदिहि।

स्वपिहि[१८१] श्वसिहि[१८२] इत्यादौ रुदादिभ्यः सार्वधातुके (पा०सू० ७.२.७६) इत्यनेन हकारस्य वल्त्वाभावेन वलादिलक्षण इण्न स्यात्। एवं हल्सूत्रे हकारपाठं विना स्नेहित्वा स्निहित्वा इत्यत्र रलो व्युपधाद्धलादेः संश्च (पा०सू० १.२.२६) इत्यनेन वैकल्पिकं कित्त्वं न स्यात्।[१८३] एवं हल्सूत्रीयहकारमन्तरेण शलित्यस्य पाठाभावात् अलिक्षत् इत्यत्र शल इगुपधादनिटः क्सः (पा०सू० ३.१.४५) इत्यनेन क्सो न स्यात्।[१८४] एवमेव हल्सूत्रस्थहकारमन्तरा झल्प्रत्याहारे तस्य ग्रहणाभावे अदाग्धाम् इत्यत्र अ दाह् स ताम् इति स्थिते झलो झलि (पा०सू० ८.२.२६)

[१८१] ञिष्वपँ शये (धा०पा० १०६८) → ष्वप् → धात्वादेः षः सः (पा०सू० ६.१.६४) → स्वप् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → स्वप् सिप् → कर्तरि शप् (पा०सू० ३.१.६८) → स्वप् शप् सिप् → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → स्वप् सिप् → सेर्ह्यपिच्च (पा०सू० ३.४.८७) → स्वप् हि → रुदादिभ्यः सार्वधातुके (पा०सू० ७.२.७६) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → स्वप् इट् हि → स्वप् इ हि → स्वपिहि।

[१८२] श्वसँ प्राणने (धा०पा० १०६९) → श्वस् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → श्वस् सिप् → कर्तरि शप् (पा०सू० ३.१.६८) → श्वस् शप् सिप् → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → श्वस् सिप् → सेर्ह्यपिच्च (पा०सू० ३.४.८७) → श्वस् हि → रुदादिभ्यः सार्वधातुके (पा०सू० ७.२.७६) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → श्वस् इट् हि → श्वस् इ हि → श्वसिहि।

[१८३] ष्णिहँ प्रीतौ (धा०पा० १२००) → ष्णिह् → धात्वादेः षः सः (पा०सू० ६.१.६४) → निमित्तापाये नैमित्तिकस्याप्यपायः → स्निह् → समानकर्तृकयोः पूर्वकाले (पा०सू० ३.४.२१) → स्निह् क्त्वा → स्निह् त्वा → रधादिभ्यश्च (पा०सू० ७.२.४५) → वैकल्पिक इट् → स्निह् इट् त्वा → स्निह् इ त्वा → रलो व्युपधाद्धलादेः संश्च (पा०सू० १.२.२६) → वैकल्पिकं कित्त्वम्। कित्त्वपक्षे – स्निह् इ त्वा → ग्क्ङिति च (पा०सू० १.१.५) → लघूपधगुणनिषेधः → स्निहित्वा। अकित्त्वपक्षे – स्निह् इ त्वा → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → स्नेह् इ त्वा → स्नेहित्वा। इडभावपक्षे च – स्निह् त्वा → वा द्रुहमुहष्णुहष्णिहाम् (पा०सू० ८.२.३३) → वैकल्पिकं घत्वम्। घत्वपक्षे – स्निघ् त्वा → झषस्तथोर्धोऽधः (पा०सू० ८.२.४०) → स्निघ् ध्वा → झलां जश् झशि (पा०सू० ८.४.५३) → स्निग् ध्वा → स्निग्ध्वा। घत्वाभावे – स्निह् त्वा → हो ढः (पा०सू० ८.२.३१) → स्निढ् त्वा → झषस्तथोर्धोऽधः (पा०सू० ८.२.४०) → स्निढ् ध्वा → ष्टुना ष्टुः (पा०सू० ८.४.४१) → स्निढ् ढ्वा → ढो ढे लोपः (पा०सू० ८.३.१३) → स्नि ढ्वा → ढ्रलोपे पूर्वस्य दीर्घोऽणः (पा०सू० ६.३.१११) → स्नी ढ्वा → स्नीढ्वा।

[१८४] लिहँ आस्वादने (धा०पा० १०१६) → लिह् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लुङ् (पा०सू० ३.२.११०) → लिह् लङ् → लिह् तिप् → लिह् ति → लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा०सू० ६.४.७१) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → अट् लिह् ति → अ लिह् ति → च्लि लुङि (पा०सू० ३.१.४३) → अ लिह् च्लि ति → शल इगुपधादनिटः क्सः (पा०सू० ३.१.४५) → अ लिह् क्स ति → अ लिह् स ति → हो ढः (पा०सू० ८.२.३१) → अ लिढ् क्स ति → षढोः कः सि (पा०सू० ८.२.४१) → अ लिक् स ति → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → अ लिक् ष ति → इतश्च (पा०सू० ३.४.१००) → अ लिक् ष त् → अलिक्षत्।

इत्यनेन सकारलोपो न स्यात्।[१८५] तस्माद्धल्सूत्रेऽपि हकारः सार्थक एवेति प्रौढमनोरमादौ प्रपञ्चितम्। एवं सम्भवति हकारोच्चारणद्वयप्रयोजनेऽपि लौकिके मम दृष्टौ हकारं द्विरुच्चार्य तस्य हरिशब्दाद्यक्षरतया चतुर्दशसूत्री हरिस्मरणेन सम्पुटिता। इदमलौकिकं प्रयोजनमिति मे प्रतिभाति।

एवं राघवेण चतुर्दशवर्षीयवनवासकाल एव सम्पूर्णा लीला कृता। यद्यपि चतुर्दश-सूत्र्यां सञ्ज्ञाग्रहे प्रयोजनं सम्भवति शम्भोः। अन्यथा त्रयोदशैव सूत्राणि क्रियेरन् किं जातं चतुर्दशेन सूत्रेण हलादिप्रत्याहारा रान्ताः करणीया अन्योऽन्याश्रयदोषवारणाय रन्त्यं हर् इति न्यासः करणीयः। तत्रत्येयं परिस्थितिः हलन्त्यम् (पा०सू० १.३.३) इति सूत्रे। वाक्यार्थबोधे पदार्थज्ञानं कारणम्। यथा रामो गच्छति इत्यत्र वाक्यार्थज्ञाने पदयोर्द्वयोः पृथग्बोधः करणीयोऽनन्तरं वाक्यार्थबोधो भविष्यति। तथैवात्रापि। उपदेशेऽजनुनासिक इत् (पा०सू० १.३.२) इत्यस्मात् उपदेशे इत् इदं पदद्वयमनुवर्तते। तथा उपदेशे अन्त्यं हल् इत् स्यात् इत्यर्थे सम्पन्ने हल्पदस्यार्थज्ञाने कर्तव्ये हल्सञ्ज्ञाविधायक-सूत्रवाक्यार्थबोधः कर्तव्यः। तत्र च पदार्थज्ञानमावश्यकम्। हल्सञ्ज्ञासूत्रं आदिरन्त्येन सहेता (पा०सू० १.१.७१) इत्येवम्। अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च सञ्ज्ञा स्यात् (ल०सि०कौ० ४)। एवमत्रापीत्पदार्थज्ञानं जिज्ञासितम्। तच्चेत्सञ्ज्ञाविधायकसूत्रे हलन्त्यम् (पा०सू० १.३.३) इत्यस्मिन्नधीनम्। तत्रापि वाक्यार्थज्ञानाय पदार्थज्ञानम्। इत्थम् इत् पदार्थज्ञानं हल् पदार्थज्ञानाधीनं हल् पदार्थज्ञानञ्च इत् पदार्थज्ञानाधीनम्। अयमेवान्योऽन्याश्रयः। अन्योऽन्याश्रयत्वं नाम परस्परापेक्षित्वम्। तद्ग्रहसापेक्षग्रहसापेक्ष-ग्रहविषयत्वमन्योऽन्याश्रयत्वम्। तद्यथा तद्ग्रह इद्ग्रहस्तत्सापेक्षग्रहो हल्ग्रहस्तत्सापेक्षग्रह इद्ग्रहस्तद्विषयत्वमन्योऽन्याश्रयत्वम्। अन्योऽन्याश्रयाणि कार्याणि न प्रकल्पन्ते। यथा नावि बद्धा नौर्न प्रचलति।[१८६] इमं दोषमाशङ्क्य भट्टोजिदीक्षितो हलन्त्यमिति सूत्रस्याऽवृत्तिं कृतवान्। ध्यातव्यमष्टाध्यायीस्थम् हलन्त्यम् इति सूत्रमसमस्तं किन्त्वावृत्तम् हलन्त्यम् इति सूत्रं समस्तम्। सप्तमीसमासे शौण्डादिगण एतस्याभावाद्योगविभागस्य

---

[१८५] दहँ भस्मीकरणे (धा०पा० ९९१) → दह् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लुङ् (पा०सू० ३.२.११०) → दह् लङ् → दह् तस् → लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा०सू० ६.४.७१) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → अट् दह् तस् → अ दह् तस् → च्लि लुङि (पा०सू० ३.१.४३) → अ दह् च्लि तस् → च्लेः सिच् (पा०सू० ३.१.४४) → अ दह् सिच् तस् → अ दह् स् तस् → सिचि वृद्धिः परस्मैपदेषु (पा०सू० ७.२.१) → अ दाह् स् तस् → तस्थस्थमिपां तान्तन्तामः (पा०सू० ३.४.१०१) → अ दाह् स् ताम् → झलो झलि (पा०सू० ८.२.२६) → अ दाह् ताम् → दादेर्धातोर्घः (पा०सू० ८.२.३२) → अ दाघ् ताम् → झषस्तथोर्धोऽधः (पा०सू० ८.२.४०) → अदाघ् धाम् → झलां जश् झशि (पा०सू० ८.४.५३) → अदाग् धाम् → अदाग्धाम्।

[१८६] इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते। तद्यथा नौर्नावि बद्धा नेतरत्राणाय भवति (भा०पा०सू० १.१.१)।

चाप्रमाणिकत्वात्सुप्सुपा समासस्यागतिकगतित्वादत्र षष्ठीतत्पुरुषोऽवयवावयविभावरूपः सम्बन्धः। हलो हल्सूत्रस्यावयविभूतमन्त्यमिति। इत्थमेकत्रेत्पदार्थज्ञाने आदिरन्त्येन सहेता (पा०सू० १.१.७१) इत्यनेन हल्पदार्थोऽपि विज्ञाप्यते हल्सूत्रेण चेत्पदार्थः। तत्रैव रन्त्यं हर् इति न्यासः करणीयो हरन्त्यम् इति वाऽऽवर्तनीयम्। हकारस्य च प्रयोजनान्युक्तानि। अतो ल् शब्दस्य दृष्टप्रयोजनाभावेऽदृष्टार्थं प्रयोजनं रामायण-कथाछलेन लक्ष्मणस्मरणार्थं च। यद्यपि हकारः शषसहर् इति पठनीयो हरिर्हसति इत्यत्र विसर्गापत्तिः।[१८७] प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने (पा०सू० २.३.६१) इति ज्ञापनेन यद्यपि दोषो दूरीकर्तुं शक्यते। अतो निरर्थकं हल्। नासूया कर्तव्या यत्रानुगमः क्रियते सूत्रकारैः (भा०पा०सू० ५.१.५९) इति वचनेनालमसूयया। चतुर्दशसूत्र्यां रामायणी चर्चा। रामायणे चानसूयाया वर्णनम्। असूया नहि सूत्रे। दृष्टभाजनमेव न फलमदृष्टमपि। हकारोच्चारणेन हरिस्मरणं सीतासहितस्य श्रीरामस्य प्रतिपाद्यत्वात्। तत्र व्यञ्जनरूपेण सीताऽकाररूपेण च रामो लकारस्यार्धत्वाल्लकारेणापूर्णजीवाचार्यस्य लक्ष्मणस्य स्मरणम्। अतो बाह्यान्तरकरणानां चतुर्दशानां[१८८] पावन्याः चतुर्दशभुवनख्यातरामकथायाः सूत्रतः सङ्केतितत्वाच्चतुर्दशत्वेऽतिविशेष आग्रहो महादेवस्येति प्रतीयते। इत्थं सम्पूर्णमपि व्याकरणं पाणिनीयं रामकथापरम्। अध्यात्मरामायणञ्च शिवप्रोक्तम्। अतः पाणिनि-व्याकरणाध्यात्मरामायणयोरेकस्य शिवस्य वक्तृत्वाद्द्वयोः समीक्षायां प्रेरिता स्वयमेव भगवता रामचन्द्रेणाज्ञानविक्लवाऽनधीतशास्त्रा क्षपितचक्षुषो मे बालमनीषा। यद्यप्येका सूक्तिर्यत् –

यान्युज्जहार माहेशाद्व्यासो व्याकरणार्णवात्।
तानि किं पदरत्नानि मान्ति पाणिनिगोष्पदे॥[१८९]

अर्थाच्छाङ्करव्याकरणसमुद्रस्य सम्पूर्णोऽपि विषयः पाणिनीये व्याकरणे कथं समाहर्तुं शक्यः। किन्त्वेतत्कथनं केवलं बौद्धिकविचारतः पलायनवादमात्रम्। शिव एव पाणिनि-हृदयस्थ इदं व्याकरणमस्मदर्थं व्याचकार। अतः सर्वमपि वाल्मीकिव्यासतुलसीदासप्रमुख-शिष्टप्रयुक्तं पाणिनिव्याकरणसम्मतं कर्तुं शक्यमिति गुरुसेवालब्धबुद्धिबलो गिरिधरः साटोपं घोषयति।

---

[१८७] शषसहर् इति पाठे कृते हकारस्य खर् इत्यत्र ग्रहणात् हरिस् हसति इति स्थिते ससजुषो रुः (पा०सू० ८.२.६६) इत्यनेन रुत्वे हरिरुँ हसति इति जातेऽनुबन्धलोपे हरिर् हसति इति जाते खरवसानयोर्विसर्जनीयः (पा०सू० ८.३.१५) इत्यनेन हरिः हसति इत्यनिष्टरूपं स्यादिति भावः। शषसर् पाठे खरवसानयोर्विसर्जनीयः (पा०सू० ८.३.१५) इत्यस्याप्रवृत्तौ हरिर् हसति इत्यतो वर्णसम्मेलने हरिर्हसति इति।

[१८८] चक्षुःश्रोत्ररसनाघ्राणत्वगाख्यानां पञ्चज्ञानेन्द्रियाणां पाणिपादपायूपस्थवागाख्यानां पञ्चकर्मेन्द्रियाणां मनोबुद्धिचिताहङ्काराख्यानां चतुरन्तःकरणानां च।

[१८९] मूलं मृग्यम्। शब्दकल्पद्रुमकाराः माहेशम् इति शब्दे श्लोकमिमुद्धृत्य इत्युद्भटः इत्यूचुः।

अथ वेदनातान्तक्रौञ्चद्वन्द्ववियोगोत्थशोको श्लोकत्वमागतो वाल्मीकेः।[१९०] तद्वै ब्रह्मणाऽऽदिष्टः श्रीमद्रामायणं प्रोवाच। तच्च विपुलं चतुर्विंशतिसहस्रश्लोकात्मकम्। सा च चतुर्विंशत्साहस्री चतुर्विंशतिसाहस्री संहितेति कथ्यते चतुर्विंशत्यक्षरात्मकगायत्रीभाष्यभूता। गायत्री च सीता। वाल्मीकीयं रामायणं सीताचरितप्रधानं स्वयमेव वाल्मीकिः प्रतिजानीते यथा –

काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्।
पौलस्त्यवधमित्येवं चकार चरितव्रतः॥

– वा०रा० १.४.७

ततः शतकोटिपर्यन्तानि रामायणानि भाषितानि वाल्मीकिना। तत्र प्रथमस्याऽदिकाव्यस्य वक्ता स्वयं शेषाणाञ्च वक्तारं शशाङ्कशेखरं शिवं श्रोत्रीं च भगवतीं भवानीं समकल्पयत्। अस्य रामायणे माधुर्यं प्रधानमैश्वर्यमत्यल्पम्। यद्यप्ययमेव श्रीरामस्य भगवत्त्वं सर्वप्रथमं प्रतिजानीते यथा –

प्रोद्यमाने जगन्नाथं सर्वलोकनमस्कृतम्।
कौसल्याऽजनयद्रामं दिव्यलक्षणसंयुतम्॥

– वा०रा० १.१८.१०

इति। एवमयोध्याकाण्डेऽपि –

स हि देवैरुदीर्णस्य रावणस्य वधार्थिभिः।
अर्थितो मानुषे लोके जज्ञे विष्णुः सनातनः॥

– वा०रा० २.१.७

एवं क्वचित्क्वचित्प्रतिकाण्डम्। इमे वैदिका ऋषयः। अतो वेदप्रतिपाद्यब्रह्मरामस्यैव चर्चामकार्षुः। वेदे रामकथायाः कुत्र चर्चा कथं वा रामकथाया वेदमूलकता इति चेत्। मन्त्रब्राह्मणयोर्वेदनामधेयम् (आ०श्रौ०सू० २४.१.३१) इत्यापस्तम्बसूत्रानुसारं मन्त्रब्राह्मणात्मको वेदः। मन्त्रभागे रामकथा नीलकण्ठाचार्यसङ्कलितमन्त्रात्मिका। तत् मन्त्ररामायणम् इति कथ्यते। ब्राह्मणभागे च प्रायश उपनिषदो यासु रामोत्तरतापनीयोपनिषत्सीतोपनिषदित्यादयः। इत्थं माधुर्यगुणबृंहितवाल्मीकिरामायणे बहुत्र स्थलेषु नरमनुकुर्वतो भगवतो रामस्य चरित्रं दृष्ट्वा श्रुत्वा वा सामान्यजनानां सन्देहः। यथा स्वयमेव दाक्षायणी भवानी सीताविरहविधुरहृदयं पामरमिव पृच्छन्तं लताकाननानि श्रीरघुनन्दनं दृष्ट्वा मुमोहेति। जगतीतलसमुद्धारचिकीर्षया रामोपासनासुधया सुधारयितुं वसुधातलं कैलासवटवृक्षतले निषण्णो भवानीविहितविविधश्रीरामविषयकप्रश्नसमाकर्णनप्रसन्नोऽपि शम्भुर्निज-

[१९०] काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा। क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥ (ध्व० १.५)।

हृदयपुण्यवसुमतीतले प्रवहन्तीं भक्तिवेदान्तसिद्धान्तपावनपूरपूर्णां कृतकलिपापपाषाण-चूर्णां श्रीरामसागरसङ्गमां निखिललोकमनोरमां निहितसिद्धान्ततरलतरङ्गां समलङ्कृत-वैष्णवहृदयरङ्गां विहितभगवल्लीलासमागतसन्देहकश्मलभङ्गामुपनिषत्सिद्धान्तश्रुतिप्रामाण्य-सङ्गामध्यात्मरामायणगङ्गां पञ्चभ्योऽपि वक्त्रेभ्यः प्रवाहयामास। भगवान् शिवोऽनादिरत एतद्रचनाऽप्यनादिरेव। शङ्करो भगवान् देशकालपरिस्थितिपरिच्छेदरहितोऽतस्तत्कृतिरपि तथैव। श्रीरामकथावर्णनप्रसङ्गेन भगवता शिवेन निगूढवेदान्तरहस्यानां यादृक्सरलतया लालित्यपूर्णं प्रतिपादनमकार्येतत्कर्म तस्मिन्नेव सङ्घटते सच्चिदानन्दशान्तिनिलये शिवे। अस्मिन् परमप्रत्ने विहितरामोपासनाभावनामण्डनयत्ने ग्रन्थरत्ने नवानां रसानामनुपमा छटा समालोक्यते। साहित्यशास्त्रानुसारं प्रत्येकमहाकाव्ये सप्ताधिकसर्गा अपेक्षन्ते। अत्र च चतुःषष्टिसर्गाः सन्ति। प्रतिसर्गं छन्दःपरिवर्तनं भवति यथा वाल्मीकीयरामायणे रघुवंशादौ च। वाल्मीकिरामायणस्य बालकाण्डस्य प्रथमसर्गे नवनवतिं यावच्छ्लोका अनुष्टुप एवं शततमः श्लोक उपजातिः। यथा –

पठन्द्विजो वागृषभत्वमीयात्स्यात्क्षत्रियो भूमिपतित्वमीयात्।
वणिग्जनः पण्यफलत्वमीयाज्जनश्च शूद्रोऽपि महत्त्वमीयात्॥

– वा०रा० १.१.१००

एवमेव रघुवंशे –

अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः
सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम्।
नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी
गुरुभिरभिनिविष्टं लोकपालानुभावैः॥

– र०वं० २.७५[१९१]

तथैवात्रापि प्रायः सर्गान्ते छन्दसः परिवर्तनम्। यथा –

देवाश्च सर्वे हरिरूपधारिणः स्थिताः सहायार्थमितस्ततो हरेः।
महाबलाः पर्वतवृक्षयोधिनः प्रतीक्षमाणा भगवन्तमीश्वरम्॥

– अ०रा० १.२.३२

एवं परात्मा मनुजावतारो मनुष्यलोकाननुसृत्य सर्वम्।
चक्रेऽविकारी परिणामहीनो विचार्यमाणे न करोति किञ्चित्॥

– अ०रा० १.३.६६

एवमन्यत्रापि। महाकाव्यस्य नियमानुसारेण प्रत्येकस्मिन्महाकाव्ये शृङ्गारशान्तवीर-

[१९१] रघुवंशस्य द्वितीयसर्गे चतुःसप्ततिं यावत्पद्यानीन्द्रवज्रोपजातिच्छन्दोबद्धानि पञ्चसप्ततितमं पद्यं च मालिनीवृत्तबद्धम्।

करुणेष्वन्यतमो रसः प्रधानोऽङ्गी वा शेषा अष्टौ रसा गौणा अङ्गभूताश्च। एवमस्मिन्नपि महाकाव्ये शान्तो रसः प्रधानः। ज्ञातव्यमत्र वाल्मीकीयरामायणं करुणरसप्रधानं क्रौञ्चद्वन्द्व-वियोगसंवीक्षणसञ्जातकरुणस्य महर्षेः काव्यसृष्टौ प्रवृत्तत्वात्। रघुवंशमहाकाव्यस्य चतुर्दशे सर्गे कविताकामिनीविलासः कविकुलगुरुः कालिदासः सीतानिर्वासनकरुणां तरुणयन् गायति यथा –

तामभ्यगच्छद्रुदितानुसारी मुनिः कुशेध्माहरणाय यातः।
निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः॥

– र०वं० १४.७०

एवं श्रीतुलसीदासकृतं श्रीरामचरितमानसं वीररसप्रधानं रघुवंशमहाकाव्यं शृङ्गाररसप्रधानं तथैवाध्यात्मरामायणमिदं शान्तरसप्रधानम्। अस्य वक्ता स्वयं प्रशान्तिनिलयः शिवः। स च कामशत्रुः। अत एव तुलसीदासोऽपि श्रीमानस इमं धृतशरीरं शान्तरसमिव प्रस्तौति। यथा –

बैठे सोह कामरिपु कैसे। धरे शरीर शांत रस जैसे॥[१९२]

– रा०च०मा० १.१०७.१

फलभोक्ता तु नायकः इति सिद्धान्तानुसारं काव्यस्य फलं नायक एव भुङ्क्ते। अतो नायक-वृत्तानुसारमपि रसप्राधान्यं निर्णेतुं शक्यते। नायकः श्रीरामस्तथाऽत्राध्यात्मतत्त्वात्परम-शान्तिनिलयः शान्तस्तस्माच्छान्तरसप्रधानमिदम्। आद्यन्तघटनाभ्यामपि रसो निर्णीयते। एतस्याऽद्या घटना शिवपार्वतीसम्बद्धाऽन्तिमाऽपि घटना भगवदन्तर्धानरूपोभे च शान्त-प्रधाने तस्माच्छान्तरसः प्रधानः। अत्र स्थले स्थले सहस्रश उपनिषदां वेदान्तगूढ-तत्त्वानां वैराग्यप्रतिपादकवाक्यानां प्रतिपादनं प्राचुर्येण मिलति तथाऽप्यध्यात्मचर्चा-विषयत्वात्सुतरामिदमाध्यात्मिकीं पिपासां शमयितुं क्षमम्।

चत्वारो हि नायका धीरोदात्तो धीरोद्धत्तो धीरललितो धीरप्रशान्तश्चेति।[१९३] तत्र धीरोदात्तः कुलीनः शान्तो दान्तश्चरित्रसद्गुणसम्पन्नस्तेजस्वी। स च पराक्रममेधादीनां यष्टा।[१९४] मर्यादापुरुषोत्तमः परब्रह्म श्रीरामो यथा वाल्मीकीयरामायणे तुलसीकृते च प्रायश आत्मश्लाघारहितः। स एवात्र धीरोदात्तः। भीमसेनादिर्धीरोद्धत्तः।[१९५] धीरललितः

[१९२] एतद्रूपान्तरम्–तत्रोपविष्टः शुशुभे कामारिः कीदृशस्तदा। शरीरधारी प्रत्यक्षं नूनं शान्तरसो यथा॥ (मा०भा० १.१०७.१)।

[१९३] त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही। दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान् नेता॥ धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च। धीरप्रशान्त इत्ययमुक्तः प्रथमश्चतुर्भेदः॥ (सा०द० ३.३०-३१)।

[१९४] अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः। स्थेयान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः॥ (सा०द० ३.३२)।

[१९५] मायापरः प्रचण्डश्चपलोऽहङ्कारदर्पभूयिष्ठः। आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः॥ (सा०द० ३.३३)।

कृष्णो जयदेवस्य।[१९६] महाभारते युधिष्ठिरादयो धीरप्रशान्ताः।[१९७] चतुर्षु नायकेषु श्रीरामो धीरोदात्तोऽध्यात्मरामायणानुसारम्। अत्र नायिका भगवती सीता मुग्धा।[१९८] अत एव सा श्यामेति कथ्यते। श्यामा मुग्धा हि नायिका[१९९] इति वचनात्। अत्र शान्त एव रसः प्रारम्भतः समाप्तिं यावत्। भक्तिज्ञानवैराग्याणां मनोहारिणी चर्चा। अत्रत्यः श्रीरामः सुन्दरो मधुरः शिवश्च। इत्यध्यात्मरामायणी गङ्गा वाराणस्या गङ्गेव धारात्रयीमिश्रिता। यथा वाराणस्या गङ्गायां हरिद्वारस्थशुद्धगङ्गायाः प्रयागस्थयोः यमुनासरस्वत्योर्मिलितः प्रवाहस्तथैवात्र राम-भक्तिगङ्गायाः कर्मकथारविनन्दन्या ज्ञानसरसस्वत्याश्च प्रवाहा मिश्रिताः।[२००] वारणस्यां गङ्गा विष्णुप्रिया विश्वनाथप्रिया तथैवेयमपि। धन्यैषा या स्वयं शशाङ्कशेखरहिमाद्रितः समुद्भवा श्रीरामसागरगामिनी च।[२०१]

वाल्मीकीयरामायणं माधुर्यप्रधानश्रीराघवभगवत्त्ववर्णनपरम्। तस्मात्सामान्यानां दृष्टौ बहुत्र माधुर्यधारायां तिरोहितत्वेन भाष्यमाणे श्रीराघवस्यैश्वर्ये सन्देहो जायते श्रीरामस्य ब्रह्मत्वे। यथा जगच्छरण्यो रामः सुग्रीवं शरणं गत इति कथयति।[२०२] अयमेव समुद्रं शरणं गत इति प्रतिजानीते।[२०३] अपहृतां सीतां स्त्रैण इव शरण्यो वरदो राघवेन्द्रो नदीनिर्झर-गिरिजनगुल्मतरुलताः पृच्छति।[२०४] इन्द्रजिता मेघनादेन ब्रह्मास्त्रमोहितो भवबन्धनहर्ताऽपि निबद्धो नागपाशेन स्वयं मोक्षरूपो मुमुक्ष्वभिमृग्यपदाब्जपद्धतिर्मोक्षदायको रघुनायको मुकुन्दो निजकृपापात्रभूतेन निजचरणकमलकुन्तकेतुकञ्जललितलक्ष्मसनाथितपृष्ठभागेन सततकेतनसंलिप्तयोगिमुनिवृन्दपरमहंसमहात्मशिवविरिञ्चीन्दिरावन्दितनिखिलगुणगण-सद्मशीर्णसज्जनछद्मनिश्छद्मपदपद्मपरागाङ्गरागेण समूढपुण्डरीकाक्षेण ताक्ष्र्येण मुच्यते।[२०५]

---

[१९६] निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात् (सा०द० ३.३४)।

[१९७] सामान्यगुणैर्भूयान्द्विजादिको धीरप्रशान्तः स्यात् (सा०द० ३.३४)।

[१९८] विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया। साऽपि कथिता त्रिभेदा मुग्धा मध्या प्रगल्भेति॥ प्रथमावतीर्णयौवनमदनविकारा रतौ वामा। कथिता मृदुश्च माने समधिकलज्जावती मुग्धा॥ (सा०द० ३.५७-५८)

[१९९] मूलं मृग्यम्।

[२००] रामभगति जहँ सुरसरि धारा। सरसइ ब्रह्मबिचार प्रचारा॥ बिधिनिषेधमय कलिमलहरनी। करमकथा रबिनन्दिनि बरनी॥ (रा०च०मा० १.२.८,९)। एतद्रूपान्तरम्–रामभक्तिर्यत्र धारा सुरनद्याः प्रकीर्तिता। ब्रह्मतत्त्वविचारस्य प्रचारश्च सरस्वती॥ कलिजानां कल्मषाणां हन्त्री विधिनिषेधयुक्। श्रौती कर्मकथा यत्र यमुना परिकीर्तिता॥ (मा०भा० १.२.८,९)।

[२०१] पुरारिगिरिसम्भूता श्रीरामार्णवसङ्गता। अध्यात्मरामगङ्गेयं पुनाति भुवनत्रयम्॥ (अ०रा० १.१.५)।

[२०२] किष्किन्धाकाण्डे चतुर्थे सर्गे। यथा अहं चैव हि रामश्च सुग्रीवं शरणं गतौ (वा०रा० ४.४.१७)।

[२०३] युद्धकाण्ड एकोनविंश एकविंशे च सर्गे। यथा समुद्रं राघवो राजा शरणं गन्तुमर्हति (वा०रा० ६.१९.३०), ततः सागरवेलायां दर्भानास्तीर्य राघवः। अञ्जलिं प्राङ्मुखः कृत्वा प्रतिशिश्ये महोदधेः॥ (वा०रा० ६.२१.१)।

[२०४] अरण्यकाण्डे षष्टितमे चतुःषष्टितमे च सर्गे।

[२०५] युद्धकाण्डे पञ्चचत्वारिंशे पञ्चाशे च सर्गे। यथा निरन्तरशरीरौ तौ भ्रातरौ रामलक्ष्मणौ। क्रुद्धेनेन्द्रजिता वीरौ पन्नगैः शरतां गतैः॥ (वा०रा० ६.४५.८), तमागतमभिप्रेक्ष्य नागास्ते विप्रदुद्रुवुः (वा०रा० ६.५०.३७)।

रावणाहतं लक्ष्मणं क्रोडीकृत्य विलपति।[२०६] सर्वज्ञोऽपि सर्वेश्वरः सर्वाधिष्ठानरूपः सर्वशरण्यः सर्वशक्तिमान् सर्वश्रुतिसिद्धान्तभूतसकलविद्यानिकेतनं श्रीनिकेतनमीश्वरो भगवान् रामचन्द्रो ब्रह्मणा बोध्यमानः सन् विस्मृतमेवात्मनो भगवत्त्वं प्रतिपद्यमान इव विलोक्यते कथयति च आत्मानं मानुषं मन्ये रामं दशरथात्मजम् (वा०रा० ६.११७.११)। सत्त्वानन्दविमलबोधमयस्य निरामयस्य परात्परमेश्वरपरमात्मनो जगदात्मनो रामचन्द्रस्य माधुर्यलीलाविलासदर्शनमदूरदर्शिनां हृदये सन्देहदाहदर्शनमातनुते। इत्थमनादिकालपापवासनादूषितशेमुषीकाणां वासनाभुजङ्गिनीविषयदंष्ट्रादष्टमानसानां कामिनीकटाक्षसम्पातपातितब्रह्मचर्यादिसद्गुणानां भोगान्धचक्षुषां मलिनं हृदयनभःस्थलं भासयितुं कश्यप इव कश्यपपितृव्यो गङ्गातरलतरङ्गभङ्गिमभक्तभवभयभीतिसमुल्लसितजटाकाननप्रान्तरो भगवान् भवानीभवो भवः शशाङ्कशेखरः शिवः सङ्कलितरमणीयरामरहस्यरश्मिराशिं मनीषिमनीषाकमलिनीवल्लभं बोधितसज्जनसुमनःसरोरुहं प्रमोदितभावुकभावभृङ्गं क्षपितत्रिभुवनतमिस्रपटलं रामभक्तिभावान्वितं विज्ञानज्योतिर्मयमध्यात्मरामायणनामधेयमनस्तं प्रगुणं प्रभाकरं प्रादुर्भावयामास। श्रीरामस्य माधुर्यलीलास्थलसमागतसन्देहानेव निवारयितुमेवेदं प्रवृत्तम्। अतः सन्दिग्धविषयान् विस्पष्टयितुं भवानीकृतपूर्वपक्षमिषेण प्रस्तौति संस्तौति च स्वयमेव तदुत्तरमिषेणाध्यात्मरामगाथामनाथनाथो विश्वनाथोऽविनाशी कैलासवासी भगवान् शङ्करः। यथा पार्वती परमेश्वरं पूर्वपक्षपुरःसरमभिमुखयति यद्यदि रामः सर्वज्ञस्तर्हि प्राकृतनर इव कथं सीताकृते विललाप यदि च सामान्यजीव इतरस्तर्हि कथमस्माभिः सेव्यताम्। नहि भिक्षुको भिक्षुकान्तरं याचतेऽभिक्षुक इति न्यायात्। तथा च गिरिजा स्वयमेव स्पष्टयति –

यदि स्म जानाति कुतो विलापः सीताकृतेऽनेन कृतः परेण।
जानाति नैवं यदि केन सेव्यः समो हि सर्वैरपि जीवजातैः॥

– अ०रा० १.१.१४

इदं ग्रन्थरत्नं नूनमेव कलिकालग्रस्तानामस्मादृशां भवायैव परमकारुणिको भवो भावयाम्बभूव। अतः कालातीतत्वान्निटिललोचनस्य त्रिलोचनस्याध्यात्मरामायणरचनाकालस्तु न वक्तुं शक्यते किन्तु भूतनाथस्य सर्वभूतहृदयस्थत्वेऽपि सगुणोपासनादृष्ट्या व्याप्त्यवच्छेदकतया कैलासे सततनिवासस्य वेदरामायणपुराणादौ विश्रुतत्वादध्यात्मरामायणरचना कैलास एव। यथाऽत्रैव ग्रन्थे –

---

२०६ युद्धकाण्डे द्व्युत्तरशततमे सर्गे। यथा परं विषादमापन्नो विललापाकुलेन्द्रियः (वा०रा० ६.१०२.१०)।

कैलासाग्रे कदाचिद्रविशतविमले मन्दिरे रत्नपीठे
संविष्टं ध्याननिष्ठं त्रिनयनमभयं सेवितं सिद्धसङ्घैः।
देवी वामाङ्कसंस्था गिरिवरतनया पार्वती भक्तिनम्रा
प्राहेदं देवमीशं सकलमलहरं वाक्यमानन्दकन्दम्॥

– अ०रा० १.१.६

अत्र शताधिकोपनिषच्छ्रुतीनां प्रामाण्यं समुपबृंहितम्। रामकथया सह जीवव्यथाया रमणीयः संयोगः। सर्वत्र ब्रह्मरूपस्य रामस्य सम्पन्नं प्रतिपादनम्। रामहृदयं रामगीता चेति द्वयमपि निखिलदर्शनसिद्धान्तनवनीतम्। भक्तिभागीरथी समुल्लसिता सोल्लासं प्रवहति। इदं चतुःषष्टिसर्गात्मकमध्यात्मरामायणं वेदव्यासप्रणीतब्रह्माण्डपुराणोत्तरखण्डे मन्यते जनैः। वयं तु शब्दनित्यत्ववादिनो वैयाकरणा नित्यमिमं सद्ग्रन्थभास्करं शम्भुमुखप्रादुर्भूतं शिवप्रेरितेन व्यासेन पुराणे व्यवस्थापितमिति मन्यामहे। पाणिनीयव्याकरणस्य च महेश्वर एव आचार्यः। अध्यात्मरामायणञ्च महेश्वरोक्तम्। अतो द्वयोः साम्प्रदायिकीमेकवाक्यतामपि विभाव्याध्यात्मरामायणे समागतानामपाणिनीयानां प्रयोगाणां विमर्शं चिकीर्षन् कमपि बालप्रयासमातनोमि। यद्यपि माहेश्वरव्याकरणसिन्धोरपेक्षया पाणिनीयं गोष्पदमिति पुराणविदो विदाङ्कुर्वन्तु तथाऽपि वयं तु पाणिनीयमपि माहेश्वरव्याकरणसिन्धुसारसर्वस्व-सुधामिव मन्यामहे। पाणिनीयव्याकरणघटे शम्भुशब्दसागरः समाहित इति मे द्रढीयसी प्रतीतिः। अतः शिवोक्तेऽस्मिन्नध्यात्मरामायणे प्रायशः सप्तशतशब्दा अपाणिनीयाः प्रतीयन्ते। ते च सन्धिसमासकारककृदन्ततद्धितधातुप्रक्रियालिङ्गसम्बन्धिनः। त एव मया विमृश्यन्ते।[२०७] श्रीरामकृपया निर्देशकपरमवन्दनीयगुरुचरणपण्डितभूपेन्द्रपतित्रिपाठि-महाभागैरेवमाधुनिकशब्दविद्याचुञ्चुपरमश्रद्धेयवैयाकरणशिरोमणिपूज्यगुरुदेवडॉ०राम-प्रसादत्रिपाठिचरणैर्दत्तबुद्धिवैभव एवं च परमसुशीलशब्दसागरमन्दरमतिकाव्यकला-कलाधरसरसहृदयसदयपण्डितप्रकाण्डपरमभावुकगुरुचरणडॉ०कालिकाप्रसादशुक्लवर्यैः सम्प्रति सम्पूर्णानन्दविश्वविद्यालयव्याकरणविभागाध्यक्षपदमलङ्कुर्वद्भिः संवर्धितबुद्धि-गाम्भीर्यगवेषणागौरवो विश्वनाथप्रसादतो वीणावादिनीपरमेश्वरीसंस्मरणलब्धोत्साहो विगलितसकामसाधनोऽपि स्वकीयश्रीगुरुचरणकृपाधनः अध्यात्मरामायणेऽपाणिनीय-प्रयोगाणां विमर्शः इति नामधेयस्य शोधप्रबन्धस्य भूमिकां प्रस्तौमि।

[२०७] तेषु सप्तशतप्रयोगेषु सार्धत्रिशतप्रयोगा ग्रन्थेऽस्मिन् विमृष्टाः।

# अथ प्रथमोऽध्यायः

## सन्धिकारकसमासप्रकरणम्

अथ नत्वा घनश्यामं रामं सीतासमन्वितम्।
अपाणिनीयानध्यात्मरामायणगतान् किल॥
शब्दान् श्रीगुरुपादाब्जरजसा बुद्ध्या धिया।
विमर्शये[1] यथाबुद्धि सुधियो मर्षयन्त्वघम्॥

अथ प्रकृतमनुसरामि। तत्र पूर्वं रामायणशब्द एव साधनाप्रकारं प्रदर्शये। रामा सीता रामो रामचन्द्रो रामा च रामश्चेति विग्रहे पुमान् स्त्रिया (पा०सू० १.२.६७) स्त्रिया सहोक्तौ पुमाञ्छिष्यते (वै०सि०कौ० ९३३) इतिवृत्तिकेन सूत्रेणानेन स्त्रीवाचकस्य लोपे यः शिष्यते स लुप्यमानार्थाभिधायी[2] इति नियमाद्रामशब्दस्यैव द्वित्वबोधकतया रामौ इति शब्दः सीताराम-बोधको हंसी च हंसश्च हंसौ इतिवत्ततो रामयोः सीतारामयोः अयनम् इति विग्रहे इण् गतौ (धा०पा० १.१०४५) इत्यस्माद्धातोरीयते गम्यत इति कर्मव्युत्पत्त्या बाहुलकात्कर्मणि ल्युट्।[3]

[1] विमर्शये इत्यत्र स्वार्थे णिच्। निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजुच्यते (वा०प० ३.७.६०)। स्वान्तःसुखाय विमृशामीति कर्त्रभिप्रायं ध्वनयितुमात्मनेपदप्रयोगः। णिचश्च (पा०सू० १.३.७४) इत्यनेन। वि मृशँ आमर्शने (धा०पा० १४२५) → वि मृश् → स्वार्थे णिच् → वि मृश् णिच् → वि मृश् इ → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → उरण् रपरः (पा०सू० १.१.५१) → वि मर्श् इ → विमर्शि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → णिचश्च (पा०सू० १.३.७४) → वर्तमाने लट् (पा०सू० ३.२.१२३) → विमर्शि इट् → विमर्शि इ → कर्तरि शप् (पा०सू० ३.१.६८) → विमर्शि शप् इ → विमर्शि अ इ → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → विमर्शे अ इ → एचोऽयवायावः (पा०सू० ६.१.७८) → विमर्शय् अ इ → आद्गुणः (पा०सू० ६.१.८७) → विमर्शय् ए → विमर्शये। यद्वा विमर्शं कुर्वे इति विग्रहे विमर्शये। अत्रापि कर्त्रभिप्राये णिचश्च (पा०सू० १.३.७४) इत्यनेनाऽत्मनेपदम्। विमर्श → तत्करोति तदाचष्टे (धा०पा० ग०सू०) → विमर्श णिच् → विमर्श इ → णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरार्थम् (वा० ६.४.४८) → विमर्श् इ → विमर्शि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → णिचश्च (पा०सू० १.३.७४) → वर्तमाने लट् (पा०सू० ३.२.१२३) → विमर्शि इट् → शेषं पूर्ववत्।

[2] मूलं मृग्यम्।

[3] कृत्यल्युटो बहुलम् (पा०सू० ३.३.११३) इत्यनेन।

सम्प्रति अध्यात्मरामायणशब्दस्य सिद्धिं प्रदर्शये। अधिगतोऽन्तर्यामित्वेनाधिश्रित आत्मा मनो बुद्धिरहङ्कारश्चित्तं प्रत्यगात्मा वा याभ्यां तौ अध्यात्मानौ इत्यत्र प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपश्च (वा० २.२.२२) इति वार्त्तिकबलेन अनेकमन्यपदार्थे (पा०सू० २.२.२४) इति सूत्रेण बहुव्रीहिसमासेऽथवाऽऽत्मानमधिगताविति अध्यात्मानौ एवं अत्यादयः क्रान्ताद्यर्थे द्वितीयया (वा० २.२.१८) इति वार्त्तिकेन तत्पुरुषसमासे पुनरध्यात्मशब्दस्य द्विवचनान्तरामशब्देन सहाध्यात्मानौ च तौ रामौ चेति विग्रहे सति विशेषणं विशेष्येण बहुलम् (पा०सू० २.१.५७) इति सूत्रेण कर्मधारयसमासे पश्चादध्यात्म-रामशब्दस्यायनशब्देन सह षष्ठीतत्पुरुषः। यद्वाऽध्यात्मरामाभ्यामयनमिति विग्रहे चतुर्थी-तत्पुरुषः। चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः (पा०सू० २.१.३६) इति सूत्रेण। उक्तसूत्रे वर्णितसमस्यमानलक्षणतावच्छेदकत्वावच्छिन्नप्रतियोगितावच्छेदकताभावविरहात्कथमयन-शब्देन सह समास इति न शङ्क्यम्। पूर्वं चतुर्थी इति योगेन विभज्यताम्। अर्थश्च भवेत्। चतुर्थ्यन्तं सुबन्तेन समर्थेन समस्यते। इत्यर्थे समासः। पश्चात् पूर्वपदात्सञ्ज्ञायामगः (पा०सू० ८.४.३) इत्यनेन णत्वे अध्यात्मरामायणम्। तस्मिन् अध्यात्मरामायणे। पाणिनिना प्रोक्ताः पाणिनीयाः। तेन प्रोक्तम् (पा०सू० ४.३.१०१) इत्यनेन तृतीयान्त-पाणिनिशब्दाच्छप्रत्यये[४] आयनेयीनीयियः फढखच्छघां प्रत्ययादीनाम् (पा०सू० ७.१.२) इत्यनेन ईय् आदेशे भत्वात्पाणिनिघटकेकारलोपे[५] जस् विभक्तौ पाणिनीयाः। न पाणिनीया इत्यपाणिनीया इति नञ्समासः।[६] प्रकर्षेण युज्यन्त इति प्रयोगाः इति प्रपूर्वो युज् धातोः (युजिँर् योगे धा०पा० १४४४) कर्मणि घञ्।[७] प्रकर्षेण युज्यतेऽर्थो यैः वेति करणे घञ्।[८] ततः लशक्वतद्धिते (पा०सू० १.३.८) इति सूत्रेणेत्सञ्ज्ञायां लोपे ञकारस्य चानुबन्धकार्ये च पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) इत्यनेन गुणे चजोः कु घिण्ण्यतोः (पा०सू० ७.३.५२) इत्यनेन कुत्वे जस्विभक्तौ प्रयोगाः। ततः अपाणिनीयाश्चामी प्रयोगा इत्यपाणिनीयप्रयोगाः इति कर्मधारयसमासः। पुनः विशेषेण मृश्यत इति विमर्शः। विपूर्वकमृश् धातोः (मृशँ

[४] पाणिनिशब्दस्य वृद्धिर्यस्याचामादिस्तद्वृद्धम् (पा०सू० १.१.७३) इत्यनेन वृद्धत्वात् वृद्धाच्छः (पा०सू० ४.२.११४) इत्यनुसारं तेन प्रोक्तम् (पा०सू० ४.३.१०१) इत्यनेन छप्रत्ययः। अवृद्धात्तु तेन प्रोक्तम् (पा०सू० ४.३.१०१) इत्यनेन अण् प्रत्ययः। यथा चन्द्रेण प्रोक्तं चान्द्रम्।

[५] यचि भम् (पा०सू० १.४.१८) इत्यनेन भत्वम्। यस्येति च (पा०सू० ६.४.१४८) इत्यनेनेकारलोपः। सुपो धातुप्रातिपदिकयोः (पा०सू० २.४.७१) इत्यनेन तृतीयाविभक्तिलोपः।

[६] नञ् (पा०सू० २.२.६) इत्यनेन समासो नलोपो नञः (पा०सू० ६.३.७३) इत्यनेन नकारलोपश्च।

[७] अकर्तरि च कारके सञ्ज्ञायाम् (पा०सू० ३.३.१९) इत्यनेन।

[८] सोऽपि अकर्तरि च कारके सञ्ज्ञायाम् (पा०सू० ३.३.१९) इत्यनेन। प्रयोग। पु०। प्र + युज् भावकर्मकरणेषु यथायथं घञ् इति वाचस्पत्यम्।

आमर्शने धा०पा० १४२५) भावे घञि[९] पुनरनुबन्धकार्ये गुणे[१०] रपरत्वे[११] विभक्तिकार्ये विमर्शः।[१२] पुनः कृदतिङ् (पा०सू० ३.१.९३) इत्यनेन घञ्प्रत्ययत्वे कृत्सञ्ज्ञायां ततः कर्तृकर्मणोः कृति (पा०सू० २.३.६५) इत्यनेन कर्मणि षष्ठी। अपाणिनीयप्रयोगपदादामि नुडागमे दीर्घे णत्वे अपाणिनीयप्रयोगाणाम्।[१३] एवम् अपाणिनीयप्रयोगाणां विमर्शः इति। एवमध्यात्मरामायणोत्तरसप्तम्या वैषयिकतयाऽनुयोगितारूपेऽर्थे स्वीकृते निष्ठारूपे वाऽर्थे स्वीकृते प्रयोगपदोत्तरषष्ठ्याः कर्मतारूपेऽर्थेऽङ्गीकृते प्रयोगशब्दस्य निरूपितत्व-सम्बन्धेनान्वयेऽध्यात्मरामायणानुयोगितावच्छेदकपाणिनीयप्रयोगभिन्नप्रयोगनिष्ठनिरूपित-कर्मतावच्छेदकविमर्शोऽथवाऽध्यात्मरामायणनिष्ठतावच्छेदकपाणिनीयप्रयोगभिन्नप्रयोग-निष्ठनिरूपितकर्मतावच्छेदकविमर्श इत्यर्थं प्रयच्छति अध्यात्मरामायणेऽपाणिनीयप्रयोगाणां विमर्शः। शोधप्रबन्धेऽस्मिन्नध्यात्मरामायणे बालबुद्ध्याऽपाणिनीयताप्रतीतानां शब्दानां प्रायः सन्धिकारकसमासलिङ्गकृत्तद्धितान्तधातुसम्बन्धिनां विमर्शं कर्तुमहं निर्दिष्टः। अत्र त्रयोऽध्यायाः। प्रत्येकमध्याये द्वौ द्वौ परिच्छेदौ कल्पितौ। साम्प्रतं प्रकृते प्रथमाध्याये सन्धिकारकसमाससम्बन्धिनोऽध्यात्मरामायणीया अपाणिनीयाः प्रयोगा विमृश्यन्ते।

॥ अथ प्रथमाध्याये प्रथमः परिच्छेदः ॥

॥ अथ बालकाण्डीयप्रयोगाणां विमर्शः ॥

## १.१ जगताम्

यः पृथिवीभरवारणाय दिविजैः सम्प्रार्थितश्चिन्मयः
सञ्जातः पृथिवीतले रविकुले मायामनुष्योऽव्ययः।
निश्चक्रं हतराक्षसः पुनरगाद्ब्रह्मत्वमाद्यं स्थिरां
कीर्तिं पापहरां विधाय जगतां तं जानकीशं भजे॥

– अ०रा० १.१.१

[९] भावे (पा०सू० ३.३.१८) इत्यनेन।

[१०] पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) इत्यनेन।

[११] उरण् रपरः (पा०सू० १.१.५१) इत्यनेन।

[१२] वि मृशँ आमर्शने (धा०पा० १४२५) → वि मृश् → भावे (पा०सू० ३.३.१८) → वि मृश् घञ् → वि मृश् अ → पुगन्तलघूपधस्य (पा०सू० ७.३.८६) → उरण् रपरः (पा०सू० १.१.५१) → वि मर्श् अ → विमर्श → विभक्तिकार्यम् → विमर्शः।

[१३] अपाणिनीयप्रयोग आम् → ह्रस्वनद्यापो नुट् (पा०सू० ७.१.५४) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → अपाणिनीयप्रयोग नुँट् आम् → अपाणिनीयप्रयोग न् आम् → अपाणिनीय-प्रयोग नाम् → नामि (पा०सू० ६.४.३) → अपाणिनीयप्रयोगा नाम् → अट्कुप्वाङ्नुम्व्यवायेऽपि (पा०सू० ८.४.२) → अपाणिनीयप्रयोगा णाम् → अपाणिनीयप्रयोगाणाम्।

अयं प्रयोगोऽध्यात्मरामायणस्य बालकाण्डस्य प्रथमसर्गस्य प्रथमे मङ्गलाचरणात्मके श्लोके कीर्तिं पापहरां विधाय जगताम् इति चतुर्थचरणांश उद्धृतः। निर्विघ्नग्रन्थ-समाप्तये शिवो नमस्कारात्मकं मङ्गलमाचरन् श्रीरामं स्तौति यद्भूभारहरणाय देवैः प्रार्थितो यः श्रीरामो भूतले रघुकुलेऽवतीर्य राक्षसान्निहत्य जगत्सु पापहरां कीर्तिं व्यवस्थाप्य पुनो ब्रह्मत्वमगमत्तमेव जानकीशमहं वन्दे। अत्र कीर्तिं पापहरां विधाय इत्यत्र प्रयुक्तो ल्यप् प्रत्ययान्तो विपूर्वकडुधाञ् धातुर्धारणार्थः। यद्यपि उपसर्गेण धात्वर्थो बलादन्यत्र नीयते। प्रहाराहारसंहारविहारपरिहारवत्॥[१४] इति कारिकानुरोधेन विउपसर्गात् विधाय इत्यस्य कृत्वा इत्यनेनार्थेन भवितव्यं किन्तु प्रकृते करणरूपस्यार्थस्योपयोगो नास्त्यतोऽयं धातुरन्तर्भावितण्यर्थो विधाप्य इत्यर्थसूचकः स्वीकरणीयः। एवं विधाय इत्यस्य व्यवस्थाप्येत्यस्मिन्नर्थे व्यवस्थापनस्याधारे सम्भवात् जगताम् इत्यत्राधिकरण-बोधिका सप्तम्युचिता। करणार्थेऽपि स्वीकृते करोतेश्चोत्पत्त्यर्थतयाऽत्र सप्तम्येवोचिता। अतो जगताम् इति षष्ठ्यन्तप्रयोगोऽपाणिनीय इति। किन्तु विमर्शे कृत इदमपि पाणिनीय-सिद्धान्तानुरूपम्। विवक्षाधीनानि कारकाणि भवन्ति इति हि भाष्यवचनम्।[१५] विवक्षा नाम श्रोताऽर्थं बुध्येतेति वक्तुर्वक्तुमिच्छा। अत्र सम्बन्धविवक्षया षष्ठी। यतो हि भगवतो रामस्य कीर्तिः शाश्वत्यतस्तस्याः संसारेण सह शाश्वतः सम्बन्धः। अतः सप्तम्यपेक्षया सम्बन्ध-विवक्षायां षष्ठी शेषे (पा०सू० २.३.५०) इति षष्ठी विभक्तिर्वरीयसी। बहुवचनं च चतुर्दशानां भुवनानामित्यभिप्रायेण। इत्थं जगताम् इति प्रयोगः पाणिनिसिद्धान्तानुकूलः।

## १.२ अध्यात्मरामगङ्गा

पुरारिगिरिसम्भूता श्रीरामार्णवसङ्गता।
अध्यात्मरामगङ्गेयं पुनाति भुवनत्रयम्॥

– अ०रा० १.१.५

अयं प्रयोगोऽध्यात्मरामायणस्य बालकाण्डस्य प्रथमे सर्गे ग्रन्थप्रशंसायां कृतो वर्तते। रूपकविधयाऽध्यात्मरामायणं गङ्गात्वेन संस्मृतम्। अध्यात्मरामायणगङ्गा शङ्कर-हिमालयात्प्रादुर्भूय श्रीरामरूपेण सागरेण सङ्गम्य सकलभुवनानि पुनातीति तात्पर्यम्। अध्यात्मरामायणगङ्गा इति वक्तव्ये अध्यात्मरामगङ्गा इत्युक्तम्। अध्यात्मरामायण-गङ्गेत्यस्याध्यात्मरामगङ्गेति नैवार्थबोधे समर्थः शब्दः। पाणिनिमते शब्दार्थयोर्वाच्य-वाचकभावः।[१६] रामशब्दस्तद्वाच्यं दाशरथिनियतमर्थं बोधयिष्यति किन्त्वेकाक्षरकोषं विना

---

[१४] मूलं मृग्यम्।

[१५] मूलं विविधभाष्यसंस्करणेषु मृग्यम्। यद्वा कर्मादीनामविवक्षा शेषः (भा०पा०सू० २.३.५०, २.३.५२, २.३.६७) इत्यस्य तात्पर्यमिदम्।

[१६] तस्मात्पदपदार्थयोः सम्बन्धान्तरमेव शक्तिर्वाच्यवाचकभावापरपर्याया (प०ल०म० १०)।

मकारोऽकारो रकारो वा न तद्बोधयितुं समर्थः। अस्मन्मते वर्णस्फोटस्य गतेवोपयोगिता। वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः (वै०सि०का० ५९) इति प्राचीनोक्तेः। किं बहुना उच्चारित एव शब्दः प्रत्यायको भवति नानुच्चारितः[१७] इति भाष्यवचनादप्यध्यात्म-रामगङ्गाशब्दोऽध्यात्मरामायणगङ्गार्थं कथं बोधयिष्यतीति चेत्। उच्यते। अत्राध्यात्म-रामायणशब्देऽध्यात्मरामशब्दस्य लक्षणा। यदि चेत्सा नैव वैयाकरणैरङ्गीकृता लक्षणा-खण्डनं विस्तरशो नागोजिभट्टविरचितवैयाकरणसिद्धान्तलघुमञ्जूषायां विलसितं तदा शक्यतावच्छेदकता स्वीक्रियताम्। अथवा विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३)। यथा सत्या भामा सत्यभामा भामा सत्या इत्यादि।[१८] अनेन नियमेनायन-शब्दस्य लोपः। तस्मादध्यात्मरामगङ्गाशब्दोऽध्यात्मरामायणगङ्गार्थपरो लुप्तेऽप्ययनशब्दे तदर्थबोधकत्वात्।[१९]

## १.३ भक्तेषु

गोप्यं यदत्यन्तमनन्यवाच्यं वदन्ति भक्तेषु महानुभावाः।
तदप्यहोऽहं तव देव भक्ता प्रियोऽसि मे त्वं वद यत्तु पृष्टम्॥

– अ०रा० १.१.८

एष प्रयोगोऽपि बालकाण्डस्य प्रथमसर्ग एव। पार्वती शिवं प्रत्यकथयद्यन्महा-नुभावा अत्यन्तगोप्यमपि भक्तेषु वदन्ति। अत्र भक्तेषु इति सप्तमी चिन्त्या। यतो हि सप्तम्यधिकरणे भवति सप्तम्यधिकरणे च (पा०सू० २.३.३६) इति सूत्रेण। अधिकरणं ह्याधारस्य सञ्ज्ञा आधारोऽधिकरणम् (पा०सू० १.४.४५) इति सूत्रात्। अत्राऽधारस्य सम्भावनैव नास्ति।[२०] तथा चात्र अकथितं च (पा०सू० १.४.५१) इत्यनेन कर्म-सञ्ज्ञैवोचिता। एवं भक्तेषु इति सप्तम्या आधारः पाणिनिविरुद्ध इव भाति। परं विचारे

[१७] मूलं विविधभाष्यसंस्करणेषु मृग्यम्। शब्दरत्ने च इको यणचि सूत्रे – ननु व्यक्तिपक्ष इक्पदोप-स्थाप्योकारादिभिर्दीर्घादिग्रहणं न स्यात् ‘उच्चारित एव शब्दः प्रत्यायको नानुच्चारितः’ इति ‘अणुदित्’ सूत्रे भाष्योक्तेः (श०र० ४७)। यद्वा उच्चार्यमाणः शब्दः सम्प्रत्यायको भवति न सम्प्रतीयमानः (भा०पा०सू० १.१.६९) इत्यस्य तात्पर्यमिदम्।

[१८] अथवा पूर्वपदलोपोऽत्र द्रष्टव्यः – अत्यन्तसिद्धः सिद्ध इति। तद्यथा देवदत्तो दत्तः सत्यभामा भामेति॥ (भा०प०)। अथवा दृश्यन्ते हि वाक्येषु वाक्यैकदेशान् प्रयुञ्जानाः पदेषु च पदैकदेशान्। वाक्येषु तावद्वाक्यैकदेशान् – प्रविश पिण्डीं प्रविश तर्पणम्। पदेषु पदैकदेशान् – देवदत्तः दत्तः सत्यभामा भामेति (भा०पा०सू० १.१.४५)। तत्रत्या श्रीभार्गवशास्त्रिणष्टिप्पणी – अत्र वाक्यैकदेशाश्चत्वार उदाहृता इति बहुवचनमुपपद्यते। पदैकदेशाश्च द्वावेव प्रदर्शितौ। ‘देवः सत्या’ इति नोदाहृतावपि ज्ञेयाविति बहुवचनोपपत्तिः (पाणिनीयव्याकरणमहाभाष्यम्, प्रथमः खण्डः, चौखम्भा संस्कृत प्रतिष्ठान, दिल्ली, १९८७, ३९४तमे पृष्ठे)।

[१९] यः शिष्यते स लुप्यमानार्थाभिधायी इति नियमात्।

[२०] पूर्वपक्षोऽयम्।

कृतेऽविरुद्धमेतत्। अकथितं च (पा०सू० १.४.५१) इत्यस्यार्थौ हि सिद्धान्तकौमुद्यां कारक-प्रकरणे लिखितो भट्टोजिदिक्षितमहाभागैर्यत् अपादानादिविशेषैरविवक्षितं कारकं कर्मसञ्ज्ञं स्यात् (वै०सि०कौ० ५३९)। तत्र षोडशधातूनां परिगणनं कारिकायामकारि –

दुह्याच्पच्दण्डुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम्।
कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम्॥

– वै०सि०कौ० ५३९

इति। अर्थनिबन्धनेयं सञ्ज्ञा (वै०सि०कौ० ५३९) इति नियमेनापि परिगणित-धातुसमानार्थकानामपि सङ्ग्रहो यथा बलिं भिक्षते वसुधाम्। अत्र हि भिक्ष् धातुः (भिक्षँ भिक्षायामलाभे लाभे च धा०पा० ६०६) कारिकापरिगणितयाच्समानार्थकः। तेनापादानेनाविवक्षितस्य बलिरित्यस्य कर्मसञ्ज्ञा। तथैवात्रापि धातुर्ब्रूसमानार्थः। तस्मात् वदन्ति इत्यस्य योगेन भक्तेषु इत्यत्र द्वितीयया भवितव्यमासीत्। किन्तु यदाऽपादानादिभिरविवक्षा तदाऽयं नियम इत्येव अकथितशब्दाज्ज्ञायते। अत्र तु वैषयिकस्याधारस्य सम्भावनयाऽधिकरणकारकस्य विवक्षैव। अर्थाद्भक्तविषये वदन्ति। विषयता चात्रोपस्थितिरूपा। यद्वा संस्थेषु विद्यमानेषु वेत्यध्याहार्यम्। एवं च भक्तेषु विद्यमानेषु वदन्तीति निर्गलितम्। पश्चात् गम्यमानाऽपि क्रिया कारकविभक्तौ प्रयोजिका (वै०सि०कौ० ५६८) इति नियमेन गोषु दुह्यमानासु गतः इतिवदत्रापि यस्य च भावेन भावलक्षणम् (पा०सू० २.३.३७) इति सूत्रेण सप्तमी। इति पाणिन्यनुकूलम्।

## १.४ मे

अत्रोत्तरं किं विदितं भवद्भिस्तद्ब्रूत मे संशयभेदि वाक्यम्॥

– अ०रा० १.१.१५

अयं प्रयोगोऽपि बालकाण्डस्य प्रथमसर्गीय एव। अत्र पार्वती भगवती श्रीशिवं प्रार्थयमाना कथयति यद्यदुत्तरं ज्ञातं संशयभेदि वाक्यं तन्मे ब्रूतेति। मे इति मह्यं मम वेत्यस्याऽऽदेशः। अत्र द्वितीयास्थाने चतुर्थीप्रयोगः षष्ठीप्रयोगो वा पाणिनीयं विरुणद्धीव परं विचारे कृतेऽविरोधः। मह्यमित्यत्र क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन चतुर्थी। नमस्कुर्मो नृसिंहाय इतिवत्। मामनुकूलयितुं मां बोधयितुं वा ब्रुवन्तु। तत्राप्रयुज्यमानधातुकर्मभूते माम् इत्यर्थे चतुर्थी तस्य च मे इत्यादेशः। यद्वा कर्मणोऽपि सम्बन्धविवक्षायां षष्ठी मातुः स्मरति इतिवत्। अत्रापि माम् इति कर्मणः सम्बन्धविवक्षा तस्मात्षष्ठी मम इति तस्य च मे इत्यादेश[२१] इति द्वितीयः कल्पः। अथवा मे इत्यस्य संशयशब्देनान्वयः। अर्थान्मत्प्रतियोगिकसंशयस्य भेदकं वाक्यं मत्सम्बन्धिसंशयस्येति

[२१] तेमयावेकवचनस्य (पा०सू० ८.१.२२) इत्यनेन।

तात्पर्यम्। सम्बन्धे षष्ठी। तत्र पार्वती प्रतियोगी संशयश्चानुयोगी विषयिविषयभावसम्बन्धः। यदि चेदाशङ्का स्यात् संशयशब्दः समस्तः स च मेशब्देन सापेक्षः स च सापेक्षः असमर्थवत् इति न्यायेनासमर्थः सन् कथं समस्येदिति चेन्नित्यसापेक्षास्थले नैवास्य नियमस्य प्रसरः देवदत्तस्य गुरुकुलम् इतिवत्। अतोऽत्र सुतरां षष्ठी।

## १.५ ते कथयिष्यामि

अत्र ते कथयिष्यामि रहस्यमपि दुर्लभम्।
सीतामरुत्सूनुसंवादं मोक्षसाधनम्॥

– अ०रा० १.१.२५

अत्र त्वां कथयिष्यामि इत्युचितम्। कथ् धातोः (कथँ वाक्यप्रबन्धने धा०पा० १८५१) अकथितकर्मकपरिगणितब्रूधातोः (ब्रूञ् व्यक्तायां वाचि धा०पा० १०४४) समानार्थकत्वात्। अतश्चतुर्थी वा षष्ठी वोभे अपि पाणिनीयविरुद्धे इव। ते इति तुभ्यम् इत्यस्य तव इत्यस्य वा विकरणम्।[२२] परमत्रोभे अपि साध्व्यौ। चतुर्थी तु क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन साध्वी। अर्थात् त्वां पार्वतीं प्रतिबोधयितुं कथयिष्यामि अतश्चतुर्थी गम्यमानक्रियायाः प्रयोजकत्वात्। यद्वाऽत्र हितशब्दोऽध्याहार्यस्तथाऽत्र ते हिताय हितं वेति कथयिष्यामि एवं हितयोगे च (वा० २.३.१३) इति वार्त्तिकेन चतुर्थी। यद्वा क्रियया यमभिप्रैति सोऽपि सम्प्रदानम् (वा० १.४.३२) इति वार्त्तिकेनात्र चतुर्थी पत्ये शेते इतिवत्। अत्र शङ्करः कथनक्रियया पार्वतीमभिप्रैत्यतोऽत्र चतुर्थी। यद्वा तादर्थ्ये चतुर्थी वाच्या (वा० २.३.१३) इत्यनेन मुक्तये हरिं भजति इतिवदत्र चतुर्थी। अथवा मातुः स्मरति इतिवत्कर्मणि सम्बन्धविवक्षायां षष्ठी। अथवा सम्प्रदानेन सम्बन्धेन च विवक्षितत्वाद्द्वितीयाया अवसर एव न।[२३]

## १.६ ब्रूहि तत्त्वं हनूमते

रामः सीतामुवाचेदं ब्रूहि तत्त्वं हनूमते।
निष्कल्मषोऽयं ज्ञानस्य पात्रं नौ नित्यभक्तिमान्॥

– अ०रा० १.१.३०

अत्रापि स्पष्टं ब्रूधातुः (ब्रूञ् व्यक्तायां वाचि धा०पा० १०४४)। स चाकथित-कर्मकधातुगणनासूचककारिकायां प्रामुख्येन गणितः। अतोऽत्र तु द्वितीया दुर्वारैव। ब्रूहि तत्त्वं हनूमन्तम् इत्युचितम्। चतुर्थ्यपाणिनीयेव। अत्र विमृश्यते।

[२२] तेमयावेकवचनस्य (पा०सू० ८.१.२२) इत्यनेन।
[२३] अपादानादिविशेषैरविवक्षितं कारकं कर्मसञ्ज्ञं स्यात् (वै०सि०कौ० ५३९)।

यदाऽपादानादिभिरभिधेयैरविवक्षितं सत्कारकं परिगणितधातुभिः सह युज्येत तदा कर्मसञ्ज्ञम्।[२४] इदं तु सम्प्रदानेन विवक्षितम्। सम्प्रदानादयश्च बुद्धिकृताः। अत एव ध्रुवमपायेऽपादानम् (पा०सू० १.४.२४) इत्येव सूत्रं व्यवस्थाप्येतः परमपादानसञ्ज्ञासूत्राणि सर्वाण्यपि बुद्धिकृतमपादानं कल्पयित्वा भाष्यकृता प्रत्याख्यातानि।[२५] तस्मादत्रापि सम्प्रदानं विवक्षितमेव कल्प्यताम्। महासञ्ज्ञानां प्रायो लक्ष्यानुरूपोऽर्थो भवत्येवान्यथा लाघवप्रियः पाणिनिः घु टि घि इत्यादि सञ्ज्ञा इवापादानाधिकरणसम्प्रदानसञ्ज्ञा अपि लघ्वीः कुर्यात्। तस्मान्महासञ्ज्ञाकरणादासां व्यवस्थितोऽर्थः। स च लक्ष्योपयोगी। प्रकृते सम्यक्प्रकर्षेण दीयते यस्मै स सम्प्रदानम् इति विग्रहे सम्प्रपूर्वकदाधातोः (डुदाञ् दाने धा०पा० १०९१) कृत्यल्युटो बहुलम् (पा०सू० ३.३.११३) इत्यनेन दानीयो विप्रः (ल०सि०कौ० ७७२) इतिवत्सम्प्रदाने ल्युट्। अनुबन्धकार्येऽनादेशे सम्प्रदानमिति सिद्ध्यति।[२६] हनूमांश्चात्र तत्त्वजिज्ञासुतया कृतप्रश्नः प्रबोधयितुं सीतयोपक्रम्यते। श्रीरामेण च हनूमन्तमुपदेष्टुं सीता प्रेर्यतेऽत उपदेशदानक्रियाया उद्देश्यं श्रीहनुमान्। अत्रैव दाधातोर्वाच्यदानस्य सम्यक्त्वं प्रकृष्टत्वञ्च सङ्घाघट्यते श्रीमहावीरे। यथाऽग्रिमचरणे श्रीरामः समर्थयते निष्कल्मषोऽयं ज्ञानस्य पात्रं नौ नित्यभक्तिमान् । तस्माच्चतुर्थी। अथवा श्रीरामो हनूमते हितं चिकीर्षति चिकारयिषति च। हितं च रामरहस्यतत्त्वज्ञानोपदेशादेव। अतो हिताय इति योजनीयं ततः हितयोगे च (वा० २.३.१३) इति वार्त्तिकेन चतुर्थी। इति नापाणिनीयता। अथवा धातूनामनेकार्थत्वात् ब्रूधातोर्दानार्थता। अतः ब्रूहि तत्त्वं हनूमते इत्यस्य देहि तत्त्वं हनूमते इत्यर्थः। ततः कर्मणा यमभिप्रैति स सम्प्रदानम् (पा०सू० १.४.३२) इत्यनेन हनूमतः सम्प्रदानसञ्ज्ञा। चतुर्थी सम्प्रदाने (पा०सू० २.३.१३) इत्यनेन हनूमते इत्यत्र चतुर्थी।

---

२४ अपादानादिविशेषैरविवक्षितं कारकं कर्मसञ्ज्ञं स्यात् (वै०सि०कौ० ५३९)।

२५ अयं योगः शक्योऽवक्तुम्। ... स बुद्ध्या सम्प्राप्य निवर्तयति। तत्र "ध्रुवमपायेऽपादानम्" इत्येव सिद्धम् (भा०पा०सू० १.४.२५)। अयमपि योगः शक्योऽवक्तुम्। ... स बुद्ध्या सम्प्राप्य निवर्तते। तत्र "ध्रुवमपायेऽपादानम्" इत्येव सिद्धम् (भा०पा०सू० १.४.२६)। अयमपि योगः शक्योऽवक्तुम्। ... स बुद्ध्या सम्प्राप्य निवर्तयति। तत्र "ध्रुवमपायेऽपादानम्" इत्येव सिद्धम् (भा०पा०सू० १.४.२७)। अयमपि योगः शक्योऽवक्तुम्। ... स बुद्ध्या सम्प्राप्य निवर्तते। तत्र "ध्रुवमपायेऽपादानम्" इत्येव सिद्धम् (भा०पा०सू० १.४.२८)। अयमपि योगः शक्योऽवक्तुम् (भा०पा०सू० १.४.२९)। अयमपि योगः शक्योऽवक्तुम् (भा०पा०सू० १.४.३०)। अयमपि योगः शक्योऽवक्तुम् (भा०पा०सू० १.४.३१)।

२६ सम् प्र दा → कृत्यल्युटो बहुलम् (पा०सू० ३.३.११३) → सम् प्र दा ल्युँट् → सम् प्र दा युँ → युवोरनाकौ (पा०सू० ७.१.१) → सम् प्र दा अन → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → सम् प्र दान → सम्प्रदान → विभक्तिकार्यम् → सम्प्रदानम्।

## १.७ मया

मत्पाणिग्रहणं पश्चाद्भार्गवस्य मदक्षयः।
अयोध्यानगरे वासो मया द्वादशवार्षिकः॥

– अ०रा० १.१.३७

अत्र मया इति प्रयोगो विभाव्यते। वासशब्दो भावघञन्तः।[२७] घञ् प्रत्ययश्च कृदन्तीयः।[२८] तथा कर्तृकर्मणोः कृति (पा०सू० २.३.६५) इति सूत्रेण मम इति प्रसक्तम्। उच्यते। अत्र पूर्वप्रसङ्गे रामस्य लीलामञ्चे दृश्यमानं कर्तृत्वमौपचारिकमिति भगवती सीतोपक्रम्य निर्गुणे ब्रह्मणि रामचन्द्रे कर्तृत्वासम्भवं प्रदर्शयन्ती तत्तद्राम-कर्तृकघटनासु रामकर्तृत्वाभासं मूलप्रकृतित्वात्स्वस्याः कर्तृत्वं व्यवस्थापयन्ती श्रीरघु-नाथकर्तृत्वं चाध्यारोपापवादन्यायेन निराकरोति। अतोऽत्र सर्वासु घटनासु श्रीरामस्य कर्तृत्वारोपस्तस्माद्द्वादशवार्षिकस्यायोध्यावासस्य कर्ता श्रीराम एव। सीता च वासरूपक्रिया-सिद्धौ प्रकृष्टोपकारकतया साधकतमं करणम् (पा०सू० १.४.४२) इत्यनेन करणसञ्ज्ञा-भाग्। अतः सीताबोधक उत्तमपुरुषैकवचनबोधकोऽस्मच्छब्दोऽपि कर्तृकरणयोस्तृतीया (पा०सू० २.३.१८) इति सूत्रेण तृतीयामलभत। यद्वा विनाऽपि तद्योगं तृतीया। वृद्धो यूनेत्यादिनिर्देशात् (वै०सि०कौ० ५६४) इति नियमेन सहशब्दाभावेऽपि तृतीया। यथा वृद्धो यूना तल्लक्षणश्चेदेव विशेषः (पा०सू० १.२.६५) इति सूत्रे भगवान् पाणिनिः सहशब्दाभावेऽपि यूना इति निर्दिशति। तथैवात्रापि सहशब्दविरहेऽपि तृतीया। मया सीतया सह रामस्य द्वादश-वार्षिकोऽयोध्यायां वासः इति न पाणिनिविरोधः।

## १.८ विभीषणे राज्यदानम्

रावणस्य वधो युद्धे सपुत्रस्य दुरात्मनः।
विभीषणे राज्यदानं पुष्पकेण मया सह॥

– अ०रा० १.१.४१

प्रयोगोऽयं बालकाण्डस्य प्रथमसर्गीय एव। अत्रापि विभीषणाय राज्यदानम् इत्यनेन भवितव्यमासीत्। यतो हि दानक्रियाया उद्देश्यता विभीषण एव। अस्माद्दानक्रियोद्देश्यस्य विभीषणस्य सम्प्रदानता निर्बाधैव। किन्त्वत्राधिकरणकारकम्। एवमपाणिनीयं प्रतीयते। परं विभीषण आधारत्वं परिकल्प्याधिकरणकारकमुचितम्। विभीषणो रामभक्तस्तस्य च भगवते

[२७] वसँ निवासे (धा०पा० १००४) इति धातोः भावे (पा०सू० ३.३.१८) इत्यनेन घञ्। अत उपधायाः (पा०सू० ७.२.११६) इत्यनेनोपधावृद्धिः।

[२८] कृदतिङ् (पा०सू० ३.१.९३) इत्यनेन। कृदन्तीयः इत्यत्र तस्मै हितम् (पा०सू० ५.१.५) इत्यनेन छप्रत्ययः। कृदन्तेभ्यो हितः इति भावः।

सर्वस्वसमर्पणम्। सम्प्रदानं हि स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनम् (त०बो० ५६९)। इदमत्र सम्भविष्यति नहि रामभक्तस्य सर्वथा स्वत्वहीनत्वात्। अतोऽत्र वैषयिक आधारो विभीषणः। आधारे चाधिकरणसञ्ज्ञा। अधिकरणे च सप्तमी निर्बाधा। सप्तम्यधिकरणे च (पा०सू० २.३.३६) इत्यनेन। अतो विभीषणे राज्यदानम् सङ्गतम्। यद्वा विवक्षाधीनानि कारकाणि भवन्ति[२९] इति सिद्धान्तेनात्राधिकरणे विवक्षा। अथवाऽऽर्षसिद्धान्तनिरूपण-क्रमे सूत्रवर्णनपराङ्गत्वादत्र दर्शनसूत्राणि वर्तन्ते। अतो यथा सूत्रे विभक्तीनां स्वातन्त्र्येण प्रयोगस्तथाऽत्रापि सीता सूत्रहेतुं सिद्धान्तं हनुमते कथयत्यतोऽत्र सौत्री सप्तमी। यथा पाणिनीयमधिकारसूत्रं कारके (पा०सू० १.४.२३) इति। अत्र सप्तम्या उपयोगः। प्रथमार्थे सप्तमीति भाष्यकारा अपि स्वीकुर्वन्ति।[३०] तथैवात्रापि।

## १.९ पूर्णेन एकत्वम्

अविच्छिन्नस्य पूर्णेन एकत्वं प्रतिपाद्यते।
तत्त्वमस्यादिवाक्यैश्च साभासस्याहमस्तथा॥

– अ०रा० १.१.४९

अत्र तृतीया चिन्त्या। करणेऽपि तस्या असम्भवात्। यतो हि कारकाणि प्रायशः क्रियामेवाभ्यन्त्यनुयन्त्यत एव प्राचीनानां मते क्रियान्वयित्वं कारकत्वम् इत्येव सिद्धान्तः। यद्यपि मातुः स्मरति इत्यादावतिव्याप्तिवारणाय साक्षात्क्रियान्वयित्वं कारकत्वम् इति प्राचीना आमनन्ति नवीनास्तु लक्षणेऽस्मिन् साक्षात्पदनिवेशमसहमानाः क्रियाजनकत्वं कारकत्वम् इत्येव व्यवस्थापयन्ति। तथा च कृधातुं (डुकृञ् करणे धा०पा० १४७२) जन्यर्थकं मत्वा करोति क्रियां निर्वर्तयतीति कारकम् अस्मिन् विग्रहे कृधातोः ण्वुल्तृचौ (पा०सू० ३.१.१३३) इति सूत्रेण ण्वुल् प्रत्ययः। लशक्वतद्धिते (पा०सू० १.३.८) इत्यनेन लस्येत्सञ्ज्ञायां लोपे चुटू (पा०सू० १.३.७) इत्यनेन णकारस्येत्सञ्ज्ञायां लोपे च अचो ञ्णिति (पा०सू० ७.२.११५) इत्यनेन वृद्धौ उरण् रपरः (पा०सू० १.१.५१) इत्यनेन रपरत्वे युवोरनाकौ (पा०सू० ७.१.१) इत्यनेनाकादेशे विभक्तिकार्ये कारकमिति सिद्धम्। अतः पूर्वस्मिन् लक्षणे स्वीकृते क्रियान्वयित्वं कारकत्वमिति लक्षणस्य जागरूकतया माणवकस्य पितरं पन्थानं पृच्छति अत्र परम्परासम्बन्धेन माणवकेनाऽपि क्रियान्वयः। तेनात्रापि षष्ठ्यन्ते कारकत्वप्रसङ्गः स्यात्। यद्यपि साक्षात्पदनिवेशने न दोषस्तथाऽपि मातुः स्मरति इत्यादावपि स्थितिः सामान्या। अतो व्युत्पत्त्यनुरोधेन गौरवं चानुमाय क्रियाजनकत्वं कारकत्वं लक्षणं नवीनानां मते

[२९] मूलं मृग्यम्। यद्वा कर्मादीनामविवक्षा शेषः (भा०पा०सू० २.३.५०, २.३.५२, २.३.६७) इत्यस्य तात्पर्यमिदम्।

[३०] किमिदं 'कारके' इति। सञ्ज्ञानिर्देशः (भा०पा०सू० १.४.२३)। तत्र सञ्ज्ञानिर्देश इति। सुपां सुपो भवन्तीति प्रथमायाः स्थाने सप्तमी कृतेति भावः इति कैयटः।

सार्वभौमतया सुस्थिरं परन्तु लक्षणेऽस्मिन् व्यवस्थितेऽपि सर्वेषां कारकाणां साक्षात्क्रिया-जनकत्वाभावात्परम्परापदनिवेशोऽत्रापि प्राचीनलक्षणसम एव। क्रियां साक्षाद्रूपेण तु केवलं कारकद्वयं जनयति कर्ता कर्म च। तत्र व्यापाररूपां क्रियां कर्ता स्वाश्रयतयैवं फलरूपां क्रियां कर्म स्वानुकूलतया जनयति। शेषाणि कारकाणि यद्यप्यानुकूल्यमञ्चन्ति किन्त्वधिकरण-कारकन्तु परम्परयैव व्यापारांशे कर्तारं सहायकं कृत्वा फलांशे च कर्म सहायकं मत्वा क्रियामुत्पादयति। अतः पक्षद्वयेऽपि समानगौरवलाघवतया पूर्वलक्षणमेव स्फुटार्थतया श्रेयो लगति। अत एव प्रौढमनोरमायामन्योऽन्याश्रयदोषपरिहाराय दीक्षितेनायमेव सिद्धान्तो ध्वनितः। तत्र हीयं परिस्थितिः। अष्टाध्याय्यां प्रथमाध्याय इत्सञ्ज्ञाविधायकसूत्रसूत्रणप्रसङ्गे भगवान् पाणिनिः पपाठ हलन्त्यम् (पा०सू० १.३.३) इति सूत्रम्। वाक्यार्थबोधे पदार्थज्ञानं कारणम्[३१] अयं हि नियमः। हलन्त्यम् इति सूत्रस्य वाक्यार्थो ह्युपदेशेऽन्त्यं हलित्स्यात्। अत्र पदार्थबोधोऽपि विचार्यताम्। उपदेशे इत् इति पदद्वितयम् उपदेशेऽजनुनासिक इत् (पा०सू० १.३.२) अस्मात्सूत्रादनुवृत्तम्। सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र (ल०सि०कौ० १) इति वरदराजोक्तेः। एवं हल् अन्त्यम् इति मुख्ये सूत्रस्थे पदे। तत्र हल्शब्दस्य कोऽर्थ इति जिज्ञासायां हल्सञ्ज्ञाविधायकस्य आदिरन्त्येन सहेता (पा०सू० १.१.७१) इति सूत्रस्य वाक्यार्थे विचारयिष्यमाणे तत्र हेतुत्वात्पदार्थबोधस्य पूर्वं पदार्थचिन्तनमनिवार्यतां गतम्। तत्र आदिः अन्त्येन सह इता इमानि चत्वारि पदानि। सूत्रेऽस्मिन्नेवं समुदाये सञ्ज्ञाया अनुपयोगादवयवेषु विश्रामः। तथा च अन्त्येन इत्यप्रधान-तृतीयानिर्देशान्मध्यवर्तिभिः सहाऽदिवाच्यस्यापि सङ्ग्रहः। तथा च अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च सञ्ज्ञा स्यात् (ल०सि०कौ० ४)। अत्र अन्त्यपदस्य त्वर्थः सुस्पष्टः किन्तु इत् शब्दस्यार्थोऽनवगतः। स चेत्सञ्ज्ञाविधायकात् हलन्त्यम् (पा०सू० १.३.३) इति सूत्रादवगन्तुं शक्यते। तदपि तदैवेत्पदार्थं बोधयिष्यति यदा तस्य हल्पदार्थो बोधितो भविष्यति। हल्पदार्थबोधश्च तत्सञ्ज्ञाविधायक आदिरन्त्येन सहेता (पा०सू० १.१.७१) इति सूत्राधीनः। स चेत्पदार्थज्ञानमन्तरेण हल्पदार्थं बोधयितुं शक्नोत्येव नहि। इत्थं हल्पदार्थ-ज्ञानमित्पदार्थाधीनम्। इत्पदार्थज्ञानञ्च हल्पदार्थाधीनम्। अत एकैकमेकैकाधीनमित्येव परस्परापेक्षत्वरूपोऽन्योऽन्याश्रयः। अन्योऽन्याश्रयाणि कार्याणि न प्रकल्पन्ते। यथा नावि बद्धा नौर्नैव गतिशीला भवतीति भाष्ये[३२] सिद्धान्तितत्वान्महान् विप्लवः समुपस्थितः। अन्योऽन्याश्रयत्वं हि तद्ग्रहसापेक्षग्रहसापेक्षग्रहविषयत्वम्। तद्ग्रहो हल्पदार्थग्रहस्तत्सापेक्ष-ग्रह इद्ग्रहस्तत्सापेक्षग्रहो हल्ग्रहस्तद्विषयत्वमित्सञ्ज्ञासूत्र एवमेव तद्ग्रह इद्ग्रहस्तद्विषयत्वं

[३१] मूलं मृग्यम्।

[३२] इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते। तद्यथा नौर्नावि बद्धा नेतरत्राणाय भवति (भा०पा०सू० १.१.१)।

हल्सञ्ज्ञासूत्र इत्युभयतस्पाशा रज्जुः। इत्थमन्योऽन्याश्रयमाशङ्क्य श्रीदीक्षितेन हलन्त्यम् इति सूत्रमेवावर्तितम्। विवेकोऽयं यन्मूलसूत्रमसमस्तम्। समासे कृते सति अन्त्यशब्दस्य विशेषणतया पूर्वनिपातापत्तेः। किन्त्वावृत्तसूत्रं हलन्त्यम् इति समस्तम्। हल्शब्दस्यान्त्य-शब्देन सह कः समासो भवेदित्येव विचारयितुमुपक्रान्तं वैयाकरणसिद्धान्तकौमुदीटीका-प्रौढमनोरमासञ्ज्ञाप्रकरणे। यथा प्रौढमनोरमायाम् –

"हलि अन्त्यम्" इति विग्रहे "सप्तमी" (पा०सू० २.१.४०) इति योगविभागात् "सुप्सुपा" (पा०सू० २.१.४) इति वा समासः। यद्वा षष्ठीतत्पुरुषोऽयम्॥

– प्रौ०म० १

इति। तत्र सप्तमी इति प्रतीकमादाय शब्दरत्ने व्याचक्षते श्रीहरिदीक्षितमहाभागाः अधिकरण-कारकस्य कर्त्राद्यन्वयद्वारा क्रियान्वयादस्ति सामर्थ्यमिति भावः (श०र० १)। सप्तमी शौण्डैः (पा०सू० २.१.४०) इति सूत्रे योगविभागं मत्वा सप्तमीसमासो दर्शितः। तत्रायं पूर्वपक्षस्याक्षेपो यदधिकरणकारकं क्रियया नान्वेति। असति क्रियान्वये क्रियान्वयलक्षण-कारकत्वस्याभावात्तस्मिन् कथं सामर्थ्यं सामर्थ्याभावे च कथं समास इति चेत्। हरिदीक्षितः कथयति यत्कर्तारं कर्म च द्वारीकृत्याधिकरणकारकं क्रियायामन्वेति क्रिया च ते एव माध्यमं कृत्वाऽधिकरणकारकेणान्वेति। यदाऽकर्मका क्रिया तदा कर्ता माध्यमो यदा च सकर्मिका तदा कर्म माध्यममित्यपि क्रियते। तद्यथा रामः शय्यायां शेते इत्यत्र स्ववृत्तिवृत्तित्वसम्बन्धेन क्रियाऽन्वेति। स्वं शय्या तद्वृत्ती रामस्तद्वृत्तिः शयनानुकूलो व्यापारः। एवमेव स्थाल्यां तण्डुलं पचति इत्यादौ स्वं स्थाली तत्र तद्वृत्तिस्तण्डुलस्तद्वृत्तिः पाकः। एवमेव क्रियाऽधिकरण-कारकेन स्वाश्रयाश्रयत्वसम्बन्धेनान्वेति। यथा सीता वाटिकायां वर्तते इत्यत्र स्वं वर्तनानुकूला क्रिया तदाश्रयः सीता तदाश्रयश्च वाटिकेति।

इत्थं क्रियान्वयित्वरूपकारकत्वसार्वजनीनत्वात् पूर्णेन एकत्वम् इत्येव साधयितुं नैव किमपि कारकं सङ्घटते। अस्मादत्रोपपदविभक्तिः। तस्मादुपपदं विना तृतीयाऽपाणिनीयेति चेत्। विभक्तिर्द्विधा कारकविभक्तिरुपपदविभक्तिश्च। क्रियामाश्रित्य जायमाना विभक्तिः कारकविभक्तिः। एवं पदमाश्रित्य जायमाना विभक्तिरुपपदविभक्तिः। कारकविभक्तिर्यथा रामं नमति अत्र हि नमनक्रियामाश्रित्यैव द्वितीयाविभक्तिरुत्पन्ना। द्वितीया च याऽपरा सा पदमाश्रित्यैव। यथा नमः शिवाय अत्र क्रियान्वयाभावात्कारकविभक्तिर्नास्ति। एवं पदप्रयोगाभावादतोऽत्र तृतीया किमाधारा इति वृद्धो यूना तल्लक्षणश्चेदेव विशेषः (पा०सू० १.२.६५) इत्यत्र सहप्रयोगं विनाऽपि सहोक्त्या तृतीया दरीदृश्यते।[३३] तस्मादत्र गम्यमानपदस्य कारकविभक्तीनां प्रयोजकत्वात् पूर्णेन एकत्वम् इत्यत्र पाणिनीयताऽक्षतैव।

[३३] विनाऽपि तद्योगं तृतीया। वृद्धो यूनेत्यादिनिर्देशात् (वै०सि०कौ० ५६४)।

## १.१० साक्षात्कथितं तव

इदं रहस्यं हृदयं ममात्मनो मयैव साक्षात्कथितं तवानघ।
मद्भक्तिहीनाय शठाय न त्वया दातव्यमैन्द्रादपि राज्यतोऽधिकम्॥

– अ०रा० १.१.५२

अत्रापि अकथितं च (पा०सू० १.४.५१) इत्यनेन कर्मसञ्ज्ञा तथा च द्वितीयोचितैव। किन्तु विवक्षाधीनानि कारकाणि भवन्ति[३४] इति न्यायाङ्गीकारेण कर्मणि सम्बन्धविवक्षया षष्ठी। यद्वा समक्षम् इत्यध्याहार्यम्। तव समक्षं कथितम् इति तात्पर्यम्। एवमत्र तु सुतरां सम्बन्धो निर्बाध एव। तेनात्र निसर्गतः षष्ठी। अथवाऽत्र पृष्टशब्दस्याध्याहारः। तव पृष्टस्य कथितम्। ततो यस्य च भावेन भावलक्षणम् (पा०सू० २.३.३७) इत्यनेन पृष्टशब्देन कथन-रूपक्रियान्तरस्य द्योतनात्षष्ठी कारकीया।[३५]

## १.११ तेऽभिहितम्

एतत्तेऽभिहितं देवि श्रीरामहृदयं मया।
अतिगुह्यतमं हृद्यं पवित्रं पापशोधनम्॥

– अ०रा० १.१.५३

अत्रापि ब्रूधातुसमानार्थकअभिधाप्रकृतिकस्य[३६] अभिहितशब्दस्य प्रयोगेण अकथितं च (पा०सू० १.४.५१) इति कर्मसञ्ज्ञया द्वितीया दुर्वारा किन्त्वत्र सम्प्रदानविवक्षया चतुर्थी। किं वा त्वां सन्तोषयितुमभिहितम् क्रियार्थोपपदस्याप्रयुज्यमानस्य कर्मणि चतुर्थी क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन। यद्वा ते हिताय इति हितशब्दमध्याहार्यम्। ततः हितयोगे च (वा० २.३.१३) इति वार्त्तिकेन चतुर्थी। यद्वा सुखपदमध्याहार्यम्। ते तुभ्यं हनुमते सुखायाभिहितम्। ततः चतुर्थी तदर्थार्थबलिहित-सुखरक्षितैः (पा०सू० २.१.३६) इत्यत्र पठितसुखशब्दस्य चतुर्थीपरत्वसूचनादत्र चतुर्थी।[३७] यद्वा ते इति षष्ठ्यन्त्यम्। एवमत्र सम्बन्धे षष्ठी। यद्वा प्रश्नोत्तरशब्दोऽध्याहार्यः। तव

---

[३४] मूलं मृग्यम्। यद्वा कर्मादीनामविवक्षा शेषः (भा०पा०सू० २.३.५०, २.३.५२, २.३.६७) इत्यस्य तात्पर्यमिदम्।

[३५] दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् (पा०सू० २.३.३४) इत्यतः षष्ठी इत्यनुवर्त्य षष्ठी चानादरे (पा०सू० २.३.३८) इत्यतः षष्ठी इत्यपकृष्य वाऽऽदरेऽपि भावलक्षणा षष्ठीति भावः।

[३६] ब्रूञ् व्यक्तायां वाचि (धा०पा० १०४४)। अभिपूर्वको धाधातुः (डुधाञ् धारणपोषणयोः धा०पा० १०९२) कथनार्थः। क्तप्रत्यये दधातेर्हिः (पा०सू० ७.४.४२) इत्यनेन हिआदेशे विभक्तिकार्ये अभिहितम्।

[३७] यद्वा तादर्थ्ये चतुर्थी वाच्या (वा० २.३.१३) इति वार्त्तिकेनात्र चतुर्थी। त्वदर्थमभिहितम् इत्यर्थः।

प्रश्नोत्तरमभिहितम् ।[३८]

## १.१२ रामेणोक्तं पुरा मम

श्रृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यतरं महत्।
अध्यात्मरामचरितं रामेणोक्तं पुरा मम॥

– अ०रा० १.२.४

अयं प्रयोगोऽध्यात्मरामायणस्य बालकाण्डस्य द्वितीयसर्गस्य चतुर्थे श्लोके शिवेन कृतो वर्तते। कृतरामविषयकप्रश्नां पार्वतीं सम्बोधयन् शिवः प्राह यत् यत्कथावस्तु पुरा रामेण ममोक्तम् । अत्र तु उक्तम् इति शब्दोऽकथितगणितब्रूधातुप्रकृतिक एव। यतो हि ब्रूधातोः (ब्रूञ् व्यक्तायां वाचि धा०पा० १०४४) कर्मणि क्तप्रत्ययः। ब्रुवो वचिः (पा०सू० २.४.५३) इत्यनेन वच् आदेशः। वचिस्वपियजादीनां किति (पा०सू० ६.१.१५) इत्यनेन सम्प्रसारणम्। सम्प्रसारणाच्च (पा०सू० ६.१.१०८) इत्यनेन पूर्वरूपैकादेशः। चोः कुः (पा०सू० ८.२.३०) इत्यनेन कुत्वम्। अत्र साक्षात्कारिकापरिगणितब्रूधातोरुपस्थितौ द्वितीयाया अवश्यम्भावितया षष्ठीति पाणिनिविरुद्धेव किन्तु वस्तुतस्त्वनुरुद्धाऽत्र सम्बन्धविवक्षया षष्ठी। रामायणशिवयोः प्रतिपाद्यप्रतिपादकरूपशाश्वतसम्बन्धस्य वक्तुमिष्टत्वात्। मम पुरः इति वा मम हितार्थम् इति वा। मम श्रवणे इति वा। अत्रास्मच्छब्दस्य श्रवणशब्देनावयवावयविभावसम्बन्धस्य सिद्धत्वात्सम्बन्धे षष्ठी।

## १.१३ ब्रह्मणे प्राह

भूमिर्भारेण मग्ना दशवदनमुखाशेषरक्षोगणानां
धृत्वा गोरूपमादौ दिविजमुनिजनैः साकमब्जासनस्य।
गत्वा लोकं रुदन्ती व्यसनमुपगतं ब्रह्मणे प्राह सर्वं
ब्रह्मा ध्यात्वा मुहूर्तं सकलमपि हृदावेदशेषात्मकत्वात्॥

– अ०रा० १.२.६

अत्रापि अकथितं च (पा०सू० १.४.५१) इत्यनेन द्वितीयैव। तत्स्थाने चतुर्थी तु ब्रह्माणं मोदयितुं प्राह इत्यप्रयुज्यमानमोदनक्रियाकर्मीभूतब्रह्मशब्दात्।[३९] यद्वा ब्रह्मणे हिताय इत्यध्याहारे हितयोगे च (वा० २.३.१३) इत्यनेन चतुर्थी। यद्वा सुखमित्यध्याहृत्य चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः (पा०सू० २.१.३६) इति चतुर्थीसमाससङ्केतसूचनाच्चतुर्थी। यद्वा

[३८] अत्र प्रश्नशब्दस्य साकाङ्क्षतया उत्तरशब्देन कथं समास इति न शङ्क्यम्। नित्यसापेक्षस्थलेष्वस्य नियमस्याप्रसरात्। यद्वा प्रश्नोत्तरशब्देन पार्ष्ठिकोऽन्वयः।

[३९] क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन।

ब्रह्म परमात्मानं नयति धराधाम प्रापयतीति ब्रह्मणः इति ब्रह्मोपपदे नीधातोर्व्युत्पन्नम्।[४०] ततश्च सप्तमी उपस्थिते इति शब्देऽध्याहृते यस्य च भावेन भावलक्षणम् (पा०सू० २.३.३७) इत्यनेन। यद्वा नमस्कुर्मो नृसिंहाय इतिवद्ब्रह्माणमनुकूलयितुं प्राह। यद्वाऽत्र पत्ये शेते इतिवत् क्रियया यमभिप्रैति सोऽपि सम्प्रदानम् (वा० १.४.३२) इति वार्त्तिकेन कथनक्रियया ब्रह्मणोऽभिप्रेतत्वात्सम्प्रदाने ततश्चतुर्थी।

## १.१४ कश्यपस्य वरो दत्तः

कश्यपस्य वरो दत्तस्तपसा तोषितेन मे॥

– अ०रा० १.२.२५

अत्र भाराक्रान्तया गोरूपधारिण्या पृथिव्या सह देवैः क्षीरसागरमभिगम्य स्तुवन्तं ब्रह्माणं प्रति स्वकीयावतरणप्रकारं प्रकटयन् भगवान् प्रणिगदति यन्मया पूर्वं कश्यपाय वरो दत्तो वर्तते। अतस्तस्यैव गृहे पुत्ररूपेणावतरिष्यामि। तत्र दत्तपदप्रयोगेण चतुर्थ्युचिता तस्मै चपेटां ददाति (भा०पा०सू० १.१.१) इति भाष्यप्रयोगात्किन्तु कश्यपस्य इति षष्ठी तन्त्रविरुद्धेव। परं नैतत्। दानस्य कर्मणा यमभिप्रैति स सम्प्रदानम्।[४१] अत्र सम्प्रदानस्य न विवक्षा। यतो हि प्रभुरात्मानं न सम्यक्प्रददाति। मङ्गलाचरण एव स्वधामगमनसङ्केतात्। यथा रजकस्य वस्त्रं ददाति इत्यत्र क्षालयितुं वस्त्राणि दीयन्ते पुनश्च परावर्त्यन्ते तथैवात्रापि सप्तविंशतिवर्षाणां कृते पुत्ररूपेणाऽगतः[४२] कश्यपावतारस्य दशरथस्य समक्षम्। पुनः श्रीरामवियोगानलदग्धशरीरः सनयननीरो धीरो दशरथ एव कश्यपतां गतः। अतोऽत्र षष्ठी दशरथस्याल्पकालिकत्वं सूचयति। सम्प्रदानं हि स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनम् (त०बो० ५६९) इति तत्त्वबोधिनी। अत्र भगवान् स्वस्वत्वं निवर्तयत्येव नहि स्थले स्थले लोकोत्तरकौतुकप्रदर्शनाय। यद्वा कृते इत्यध्याहार्यम्। कश्यपस्य कृते वरो दत्तः इति कृते-योगे षष्ठी। यद्वा भार्यायै इत्यध्याहार्यम्। कश्यपस्य भार्यायै वरो दत्तः अतो दाम्पत्यभावरूपे सम्बन्धे षष्ठी।

---

[४०] ब्रह्म नयतीति ब्रह्मणः।। ब्रह्मउपपदे नीधातोः (णीञ् प्रापणे धा.पा. ९०१) अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) इत्यनेन डप्रत्ययः। ब्रह्मन् अम् नी ड → ब्रह्मन् अम् नी अ → डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) → ब्रह्मन् अम् न् अ → सुपो धातुप्रातिपदिकयोः (पा०सू० २.४.७१) → ब्रह्मन् न् अ → नलोपः प्रातिपदिकान्तस्य (पा०सू० ८.२.७) → ब्रह्म न् अ → ब्रह्मन → पूर्वपदात्सञ्ज्ञायामगः (पा०सू० ८.४.३) → ब्रह्मण → विभक्तिकार्यम् → ब्रह्मणः।

[४१] कर्मणा यमभिप्रैति स सम्प्रदानम् (पा०सू० १.४.३२)। दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसञ्ज्ञः स्यात् (वै०सि०कौ० ५६९, ल०सि०कौ० ८९६)।

[४२] कथं तर्हि १०२तमे पृष्ठे ग्रन्थप्रस्तावनायाम् – जन्मतो विवाहं यावद्द्वादशाब्दावधिस्ततो द्वादशवर्षं यावदयोध्यायां वास एवं पञ्चविंशे वर्षे सीतालक्ष्मणाभ्यां सह वनगमनम् इति। कल्पभेदेन।

## १.१५ दृष्टं मे

त्वं ममोदरसम्भूत इति लोकान्विडम्बसे।
भक्तेषु पारवश्यं ते दृष्टं मेऽद्य रघूत्तम॥

– अ०रा० १.३.२६

अत्र परमपितरं परमात्मानं स्वपुर ईश्वररूपेण प्रस्तुतं विलोक्य भगवती कौसल्या स्तौति यत् हे रघूत्तम अद्य भक्तेषु ते पारवश्यं मे दृष्टम्। दृश् धातोः (दृशिँर् प्रेक्षणे धा०पा० ९८८) कर्मणि क्तप्रत्यये कृते तेन च कर्मणोऽभिहितत्वात्कर्तुश्चानभिहितत्वात् कर्तृ-करणयोस्तृतीया (पा०सू० २.३.१८) इत्यनेनानभिहितेऽस्मत्पदवाच्यकौसल्यारूपिणि कर्तरि तृतीया। अत्र षष्ठीविचारविषयतामाटीकते। कर्तरि सम्बन्धविवक्षायां षष्ठी। यद्वा दृष्टम् इति भावे कृत्प्रत्ययः नपुंसके भावे क्तः (पा०सू० ३.३.११४) इत्यनेन। ततश्च भावस्य विवक्षयाऽविवक्षितत्वाच्च कर्तुः क्तस्य च वर्तमाने नपुंसके भाव उपसङ्ख्यानम् (वा० २.३.६५) इत्यनेन मम इत्यत्र षष्ठी[४३] तस्य च मे इत्यादेशः।[४४] यद्वा मे इत्यस्मात्परं पुरतः इत्यध्याहार्यम्। मे पुरतो दृष्टम् अत्र सम्बन्धे षष्ठी स्वारसिकी। यद्वा मे शब्दस्य रघूत्तम-शब्देन अन्वयः। अर्थात् हे मे मम रघूत्तम भक्तेषु ते पारवश्यमथ दृष्टम्। अत्र पुत्रभावनया मे रघूत्तम इति व्याहरति। यथाऽयोध्याकाण्डे स्वयमेव कौसल्या कथयति यत् पुत्रः सभार्यो वनमेव यातः सलक्ष्मणो मे रघुरामचन्द्रः (अ०रा० २.७.८५)। अयं मम पुत्रः इति कौसल्या-वचनं माधुर्यं सूचयति। अत्र च जन्यजनकभावरूपे सम्बन्धे षष्ठीत्यनेन सूचितं यद्यदा जीवः श्रीरामं प्रत्येव मम इति सम्बोधयति तदा तस्य संसारममताजालं नश्यति।

## १.१६ रामेति

यस्मिन् रमन्ते मुनयो विद्यया ज्ञानविप्लवे।
तं गुरुः प्राह रामेति रमणाद्राम इत्यपि॥

– अ०रा० १.३.४०

एष प्रयोगोऽध्यात्मरामायणबालकाण्डतृतीयसर्गे चत्वारिंशे श्लोके श्रीमता वसिष्ठेन कृतो भगवतो नामकरणप्रसङ्गे। अत्र रामशब्दस्य व्युत्पत्तिप्रकारद्वयं दर्शयति। एकोऽधिकरण-घञन्तोऽपरः कर्त्रजन्तश्च। यस्मिन्मुनयो रमन्ते स रामो यश्च रमयति रमते वा स राम इति।

---

[४३] यथा छात्रस्य हसितम्। नटस्य भुक्तम्। मयूरस्य नृत्तम्। कोकिलस्य वयाहृतम् (भा०पा०सू० २.३.६७) इत्यादिभाष्योदाहरणेषु गतं तिरश्चीनमनूरुसारथेः (शि०व० १.२) हसितं मधुरम् … मधुराधिपतेः (म०अ० १) इत्यादिशिष्टप्रयोगेषु च। अद्य मे यद्दृष्टं दर्शनं तद्भक्तेषु ते पारवश्यम् इति तात्पर्यम्।

[४४] तेमयावेकवचनस्य (पा०सू० ८.१.२२) इत्यनेन।

अत्र प्रथमैकवचनान्तो रामः इति शब्दः। ततश्च इतिशब्देन सह संहिताकाले राम सुँ इति स्थिते पश्चात् ससजुषो रुः (पा०सू० ८.२.६६) इत्यनेन रुत्वे भोभगोअघोअपूर्वस्य योऽशि (पा०सू० ८.३.१७) इत्यनेन रोर्यत्वे लोपः शाकल्यस्य (पा०सू० ८.३.१९) इत्यनेन यकारलोपे पुना रामघटकाकारस्येतिघटकेकारेण सहाऽशङ्क्यमाने गुणे पूर्वत्रासिद्धम् (पा०सू० ८.२.१) इत्यनेन त्रिपादीत्वाद्यलोपासिद्धौ गुणानवसरे राम इति इत्येव पाणिनीयम्। पूर्वत्रासिद्धम् (पा०सू० ८.२.१) इति सूत्रस्य जागरूकतायां गुणाभावे कथं रामेति इति चेत्। मतौ च्छः सूक्तसाम्नोः (पा०सू० ५.२.५९) इति सूत्रज्ञापनात् अनुकरणानुकार्ययोर्भेदाभेदविवक्षा च[४५] इति परिभाषया तावद्भेदविवक्षाऽभेदविवक्षा च क्रियते। इतिशब्दसमभिव्याहरणेनात्र द्विःप्रयुक्तो रामशब्दोऽनुकरणपरः। इतिशब्दो ह्यनुकरणद्योतकः। तथा च पाणिनेः सूत्रम् अव्यक्तानुकरणस्यात इतौ (पा०सू० ६.१.९८)। ध्वनेरनुकरणस्य योऽच्छब्दस्तस्मादितौ परे पररूपमेकादेशः स्यात्। पटत् इति पटिति (वै०सि०कौ० ८१)। अत्रत्या तत्त्वबोधिनी च – यद्यपि "अतो गुणे" इति पूर्वसूत्रादत इत्यनुवर्त्यातोग्रहणमिह त्यक्तुं शक्यं तथाऽपि पूर्वसूत्रे अत इति तपरकरणाद्ध्रस्वाकारस्य ग्रहणमिह तु शब्दाधिकारपक्षाश्रयणादच्छब्दस्य ग्रहणमिति व्याख्याने क्लेशः स्यादिति पुनरत्रातोग्रहणं कृतम्। अव्यक्तशब्दं व्याचष्टे "ध्वनेरिति"। "अनुकरणस्येति"। परिस्फुटाकारादिवर्णस्येति भावः। तस्य चानुकरणत्वं किञ्चित्साम्येन बोध्यम्। पररूपस्यास्य नित्यत्वेऽपि संहितायामविवक्षितायां तदभावादाह। "पटदितीति" (त०बो० ८१)। अतोऽत्राभेदविवक्षायां विभक्त्यभावः।[४६] एवं च आद्गुणः (पा०सू० ६.१.८७) इत्यनेन गुणः।[४७] ज्ञानाधिकरणज्ञानस्वरूप इति न्यायवेदान्तबोध्यनिर्गुण-ब्रह्माभिन्न एव दशरथपुत्रो राम इत्येव वसिष्ठतात्पर्यं द्योतयितुमत्राभेदविवक्षायां संहिता। संहितात्वं नामार्धमात्राकालातिरिक्तकालव्यवधानशून्यत्वम्। यद्वा अपदं न प्रयुञ्जीत इति व्याकरणप्रसिद्धेर्द्विपदमनुकुर्वतो द्विपदस्य परमपदस्य भगवतः श्रीरामचन्द्रस्य कृते किमपदं प्रयुञ्जीत शिव इत्यपेक्षायामुच्यते। सह सुपा (पा०सू० २.१.४) इति हि सूत्रम्। अत्र हि योग-विभागः सह इति पृथक्पदं सुपा इति च पृथक्। सहेति समर्थेन सह समस्यते इत्यर्थक-योगविभागप्रथमांशेनात्र समासः रामशब्दस्य इतिशब्देन। पश्चात् सुपो धातुप्रातिपादिकयोः

[४५] मूलं मृग्यम्। मतौ च्छः सूक्तसाम्नोः (पा०सू० ५.२.५९) इत्यस्य भाष्ये प्रदीपोद्योतयोश्च स्पष्टमिदम्। अभेदपक्षे प्रकृतिवदनुकरणं भवति (भा०शि०सू० २) इति महाभाष्ये ऋऌक् (शि०सू० २) शिवसूत्र उक्तम्। अनुकरणं ह्यनुकार्याद्भिन्नम् इत्यपि महाभाष्ये मतौ च्छः सूक्तसाम्नोः (पा०सू० ५.२.४९) सूत्र उक्तमिति वैयाकरणभूषणसारस्य दर्पणव्याख्यायां चन्द्रिकाप्रसादद्विवेदाः। अस्माभिर्भाष्यसंस्करणेषु अनुकरणं ह्यनुकार्याद्भिन्नम् इति नोपलब्धम्।

[४६] तथा च गवित्ययमाह। अत्रानुकार्यानुकरणयोर्भेदस्याविवक्षितत्वादसत्यर्थवत्त्वे विभक्तिर्न भवति (का०वृ० १.१.१६)।

[४७] अत्रोक्तम् – अत्र द्विःप्रयुक्तो रामशब्दोऽनुकरणपरः। यद्युभयत्रानुकरणपरो रामशब्दः कथं तर्हि रमणाद्राम इत्यपि इति चेत्। संहिताया अविवक्षणात्।

(पा०सू० २.४.७१) इत्यनेन विभक्तिलोपः। पश्चाद्गुणः। प्रत्ययलक्षणमाश्रित्य पुनर्गुणव्यवधानं न शक्यं यथा गोहितम् इत्यत्रान्तर्वर्तिनीं ङेविभक्तिमाश्रित्य न अव् आदेशस्तथैव वर्णाश्रये नास्ति प्रत्ययलक्षणम् (प०शे० २०) इत्यनेनात्रापि प्रत्ययलक्षणं निषेध्यम्। अतो रामेति अयं शब्दः पाणिनीय एव।

## १.१७ मुनीन्द्राहम्

अभिवाद्य मुनिं राजा प्राञ्जलिर्भक्तिनम्रधीः।
कृतार्थोऽस्मि मुनीन्द्राहं त्वदागमनकारणात्॥

– अ०रा० १.४.३

अयं च प्रयोगोऽध्यात्मरामायणस्य बालकाण्डस्य चतुर्थसर्गीयः। अत्रायोध्यासमागतं श्रीराघवसमेतं विश्वामित्रं प्रणम्य प्राञ्जलिर्योगराजो दशरथः कथयति मुनीन्द्र अहं कृतार्थः एवम्। दूराद्धूते च (पा०सू० ८.२.८४) इत्यनेन प्लुतस्ततश्च प्लुतप्रगृह्या अचि नित्यम् (पा०सू० ६.१.१२५) इत्यनेन प्रकृतिभावस्तस्मादतः मुनीन्द्र३ अहम् इत्येव पाणिनीयम्। मुनीन्द्राहम् इत्यार्षप्रयोगो नैव पाणिनीय इति न भ्रमितव्यम्। अत्र विश्वामित्रमभिगम्यैव दशरथः प्रणमति तेन दूरसम्बोधनत्वाभावान्न प्लुतावसरः। यद्वा गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् (पा०सू० ८.२.८६) इत्यत्र प्राचाम् इति योगविभागः। तथोक्तं सिद्धान्तकौमुद्याम् इह प्राचामिति योगो विभज्यते। तेन सर्वः प्लुतो विकल्प्यते (वै०सि०कौ० ९७)। अनेन योगविभागेन सर्वेषां प्लुतानां वैकल्पिकता। प्लुताभावे अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) इत्यनेन सवर्णदीर्घः। अथवा अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) इति सूत्रं सपादसप्ताध्यायीस्थं प्लुतविधायकञ्च त्रिपादीस्थं दूराद्धूते च (पा०सू० ८.२.८४)। ततः पूर्वत्रासिद्धम् (पा०सू० ८.२.१) इति सूत्रबलेन सपादसप्ताध्याय्या दीर्घशास्त्रकर्तव्यतायां प्लुतविधायकं त्रिपादीशास्त्रमसिद्धम्। एवं तन्निमित्तकप्रकृतिभावस्य नास्ति प्रसरः। अतः मुनीन्द्राहम् इत्यत्र दीर्घः पाणिनितन्त्रशोऽनुकूलः। एवमेव तदप्यहोऽहं तव देव भक्ता (अ०रा० १.१.८) इत्यत्रापि समाधेयम्। यतो हि अहो इत्योदन्तनिपातः। ओत् (पा०सू० १.१.१५) इत्यनेन सूत्रेण अहो इत्यस्यौदन्तनिपातत्वात्प्रगृह्यसञ्ज्ञा। ततोऽकारेऽचि परे प्लुतप्रगृह्या अचि नित्यम् (पा०सू० ६.१.१२५) इत्यनेन प्रकृतिभावे अहो अहम् इत्येव पाणिनीयम् अहोऽहम् इत्यपाणिनीयं प्रतीयत इति चेत्। अत्रापि प्राचाम् (पा०सू० ८.२.८६) इति योगविभागेन प्लुतस्य विकल्प इव प्रगृह्यस्यापि विकल्पता। उपलक्षणत्वात्। यद्वा प्लुतप्रगृह्या अचि नित्यम् (पा०सू० ६.१.१२५) इत्यत्र नित्यग्रहणं प्रायिकार्थे। अर्थात्क्वचिदचि परे प्रगृह्यः प्रकृतिभावभाङ्। यथा ङमो ह्रस्वादचि ङमुण्नित्यम् (पा०सू० ८.३.३२) इत्यत्र नित्यग्रहणस्य प्रायिकत्वात् इको यणचि

(पा०सू० ६.१.७७) सुप्तिङन्तं पदम् (पा०सू० १.४.१४) इत्यादौ न ङुण्मुटौ। तथैवात्र नित्यग्रहणस्य प्रायिकत्वात् अहो इत्यस्मात्परेऽप्यकारेऽचि न प्रकृतिभावः।

## १.१८ मह्यम्

प्रत्याख्यातो यदि मुनिः शापं दास्यत्यसंशयः।
कथं श्रेयो भवेन्मह्यमसत्यं चापि न स्पृशेत्॥

– अ०रा० १.४.११

विश्वामित्रो दशरथमभिगम्य राक्षसवधार्थी सलक्ष्मणं श्रीरामचन्द्रं याचते। तत्र पुत्रवत्सलतया रामचन्द्रं न दित्सन्महाराजदशरथो विकल्पते यच्छ्रीरामविसर्जनेऽहं जीवनमपि नैव धारयितुं शक्नोमि। एवं च प्रत्याख्यातः स मुनिः शापं दास्यति। एवमसत्यभाषणजनितपातकमपि लगिष्यति। तदानीमयं प्रयोगः कथं श्रेयो भवेन्मह्यम् इति। अत्रास्मच्छब्दस्य चतुर्थ्येकवचनान्तरूपं मह्यम् इति।[४८] मह्यम् शब्दस्य श्रेयःप्रतियोगितया साकाङ्क्षत्वात्प्रतियोगिनः षष्ठ्यन्तत्वमेव। दृष्टिदृष्टप्रायत्वादत्र सम्बन्धे षष्ठी भवेत्। किन्तु चतुर्थीयं महाराज एव श्रेयसः सम्प्रदानमिति विवक्षया। यद्वा मह्यम् इत्यस्य शापं दास्यति इत्यत्रान्वयः। अर्थात्प्रत्याख्यातो मुनिरसंशयं मह्यं शापं दास्यत्येवं कथं श्रेयो भवेदसत्यं च न स्पृशेदित्यत्रान्वयप्रकारः। इत्थं मह्यम् शब्दस्य श्रेयः शब्देनासत्यन्वये परिहारः। यद्वा मह्यम् न शब्दरूपमपि तु कृत्यप्रत्ययान्तम्। महँ पूजायाम् (धा०पा० ७३०, १८६७) इत्यस्माद्धातोः कृत्यल्युटो बहुलम् (पा०सू० ३.३.११३) इति सूत्रानुरोधेनानुबन्धलोपे सति मह्यत इति मह्यम् इत्यस्मिन् विग्रहे कर्मणि यत्प्रत्ययः। अनुबन्धलोपे विभक्तिकार्ये सौ सोरमादेशे[४९] मह्यम् इति सिद्धम्। अत्र मह्यम् शब्दः श्रेयः शब्दस्य विशेषणम्। अर्थात् मह्यं महत्त्वपूर्णम्।

## १.१९ रामाय

विश्वामित्रोऽपि रामाय तां योजयितुमागतः।
एतद्गुह्यतमं राजन्न वक्तव्यं कदाचन॥

– अ०रा० १.४.१९

वसिष्ठवाक्यमिदम्। अत्र रामेण योजयितुं इति पाणिनीयं रामाय इत्यार्षचतुर्थी। विचारे कृत इयमपि पाणिनीया। अत्र हितशब्दोऽध्याहार्यः। ततश्च हितयोगे च (वा० २.३.१३)

---

[४८] अस्मद् ङे → ङे प्रथमयोरम् (पा०सू० ७.१.२८) → अस्मद् अम् → तुभ्यमह्यौ ङयि (पा०सू० ७.२.९५) → मह्य अद् अम् → अतो गुणे (पा०सू० ६.१.९७) → मह्यद् अम् → शेषे लोपः (पा०सू० ७.२.९०) → मह्य् अम् → मह्यम्।

[४९] अतोऽम् (पा०सू० ३.३.११३) इत्यनेन

इत्यनेन चतुर्थी। यद्वा रामं सुखयितुं तां योजयितुमागतः इति क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन चतुर्थी।

## १.२० रामरामेति

आहूय रामरामेति लक्ष्मणेति च सादरम्।
आलिङ्ग्य मूर्ध्न्यवघ्राय कौशिकाय समर्पयत्॥[५०]

– अ०रा० १.४.२२

अत्र रामशब्देन सह इतिशब्दस्य संहिता। तत्र रामघटकाकारस्य इतिघटकेकारेण सह संहितायामुभयोः स्थाने गुणः। स एव विचार्यः। दूराद्धूते च (पा०सू० ८.२.८४) इति सूत्रेण दूरसम्बोधनवाक्यस्य राम३ राम३ इत्यस्य टेर्मकारोत्तराकारस्य प्लुतः। एवं प्लुतप्रगृह्या अचि नित्यम् (पा०सू० ६.१.१२५) इति प्रकृतिभावः स्यात्। अत्र च राम३ राम३ इति इत्येव पाणिनितन्त्रीयः। अत्र सन्धिरार्षः।[५१] इत्थमेव प्रथमश्रीमद्भागवतटीकाकारैः श्रीधरस्वामिपादैः –

यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव।
पुत्रेति तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि॥

– भा०पु० १.२.२

इत्यत्र पुत्रेति अयं प्रयोगोऽप्यार्षत्वेन समाहितः।[५२] तथैवात्रापि। वस्तुतस्त्वयं पाणिनीय एव। अत्र चत्वारः पक्षाः प्रदर्श्यन्ते। प्रथमः गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् (पा०सू० ८.२.८६) इत्यत्र प्राचाम् इति योगविभागस्तेन सर्वेषां प्लुतानां विकल्पः।[५३] अतोऽत्रापि प्लुताभावाद्गुणः सुकरः। द्वितीयः पक्षः अप्लुतवदुपस्थिते (पा०सू० ६.१.१२९) इत्यनेन प्लुतस्याप्लुतवद्भाव उपस्थितशब्देऽवैदिकइतिपरे। अर्थादवैदिक इतिपरे प्लुतोऽप्लुतवद्भवतीत्यनेनाप्लुतवद्भावस्ततश्च गुणोऽतो रामरामेति अयं प्रयोगः पाणिनीयः। पक्षान्तरेऽपि सम्बुद्धौ शाकल्यस्येतावनार्षे (पा०सू० १.१.१६) इति सूत्रेण वैकल्पिकप्रकृतिभावः। चतुर्थे पक्षे प्लुतप्रकरणमेवानित्यम्। अथ मया पञ्चमपक्षः प्रस्तूयते यद्गुणविधौ कर्तव्ये प्लुत-

---

[५०] समार्पयत् इति प्रयोक्तव्ये समर्पयत् इति प्रयोगः। अस्मिन् विषये ३९१तमे पृष्ठे ३.११७ भक्षयेत् इति प्रयोगस्य विमर्शं पश्यन्तु।

[५१] पूर्वपक्षोऽयम्।

[५२] द्वैपायनो व्यासो विरहात्कातरो भीतः सन्पुत्र३ इति पलुतेन आजुहाव आहूतवान्। दूरादाह्वाने प्लुते सत्यपि सन्धिरार्षः (भा०पु० श्री०टी० १.२.२)।

[५३] इह प्राचामिति योगो विभज्यते। तेन सर्वः प्लुतो विकल्प्यते (वै०सि०कौ० ९७)। अत्रत्या तत्त्वबोधिनी – सर्वः प्लुतो विकल्प्यत इति। एतेन "द्वैपायनो विरहकातर आजुहाव पुत्रेति" इति भागवतं व्याख्यातम्। प्लुतस्य वैकल्पिकत्वात् 'आर्षः प्रयोगः' इति श्रीधराचार्योक्तिस्तु नादर्तव्या (त०बो० ९७)।

शास्त्रमेवासिद्धमतो रामरामेति पाणिन्यनुकूल एव।

## १.२१ लक्ष्मणेति

आहूय रामरामेति लक्ष्मणेति च सादरम्।
आलिङ्ग्य मूर्ध्न्यवघ्राय कौशिकाय समर्पयत्॥

– अ०रा० १.४.२२

अयमपि प्रयोगस्तथैव। लक्ष्मण इति स्थिते प्लुते जाते प्रकृतिभावो नित्यत्वेन प्राप्तः पुनः प्राचाम् (पा०सू० ८.२.८६) इति योगविभागसामर्थ्यात्प्लुतविकल्पे सन्धिः साधीयान्।

## १.२२ दीक्षां प्रविश्यताम्

पूजां च महतीं चक्रू रामलक्ष्मणयोर्द्रुतम्।
श्रीरामः कौशिकं प्राह मुने दीक्षां प्रविश्यताम्॥

– अ०रा० १.५.३

कौशिकेन स्वाश्रमं नीतो भगवान् श्रीरामो विश्वामित्रं कथयति हे मुने भवता दीक्षां प्रविश्यताम् । अत्र दीक्षां प्रविश इति कर्तृवाच्यरूपम्। कर्मवाच्ये च लः कर्मणि च भावे चाकर्मकेभ्यः (पा०सू० ३.४.६९) इति सूत्रानुसारं भावकर्मणोः (पा०सू० १.३.१३) इत्यनेनाऽत्मनेपदम्। तप्रत्ययः टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) इत्यनेन ते इति जातः। ततश्च आमेतः (पा०सू० ३.४.९०) इत्यनेन लोड्लकारे आम् आदेशे प्रविश्यताम् ।[५४] एवं यस्मिन्नर्थे प्रत्ययः स उक्तो महासञ्ज्ञाकरणाच्च प्रत्याययत्यर्थं यः स प्रत्यय इत्युभयोर्नियमयोर्जागरूकत्वे कर्मणि प्रत्ययस्य विहितत्वात्प्रथमैवोचिता। एवं च अनभिहिते (पा०सू० २.३.१) इति सूत्रं ह्यधिकारः। अधिकारो नामोत्तरोत्तरसम्बन्धित्वम्। ततः कर्मणि द्वितीया (पा०सू० २.३.२) इत्यनेनाप्येतस्य सम्बन्धः। अथ च अनभिहिते कर्मणि द्वितीया इत्येव सूत्रार्थः। तस्मात्कर्मणोऽभिहितत्वादत्र प्रथमैव। तथा चोक्तं सिद्धान्तकौमुद्यां कारकप्रकरणे अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः (वै०सि०कौ० ५३७) तेन हरिः सेव्यते इति प्रयोग इवात्रापि तिङ्। तिङोक्तं कर्म। अतो दीक्षाम् इत्यत्र द्वितीया पाणिनिविरुद्धेव। विचारे कृतेऽत्र प्रविश्यताम् इतिघटकधातुरकर्मकः। यद्यपि विश् धातुः (विशँ प्रवेशने धा०पा० १४२४) सकर्मकः सर्वजनविदितः कथमत्राकर्मकतेत्यपेक्षायां तत्रैव बालमनोरमायामात्मनेपदप्रक्रियाप्रकरणे दीक्षितमहाभागैरेका कारिका निरटङ्कि यत्कस्यां कस्यां

[५४] प्र विशँ प्रवेशने (धा०पा० १४२४) → प्र विश् → भावकर्मणोः (पा०सू० १.३.१३) → लोट् च (पा०सू० ३.३.१६२) → प्र विश् लोट् → प्र विश् त → सार्वधातुके यक् (पा०सू० ३.१.६७) → प्र विश् यक् त → प्र विश् य त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → प्र विश् य ते → आमेतः (पा०सू० ३.४.९०) → प्र विश् य ताम् → प्रविश्यताम्।

परिस्थितावकर्मिकाः क्रिया भवन्ति यथा –

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसङ्ग्रहात्।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥

– बा०म० २६९५, वै०सि०कौ० २७०१, वा०प० ३.७.८८

यदा धातोरर्थान्तरं भवति तदाऽकर्मता। यथा वहँ प्रापणे (धा०पा० १००४) इत्यस्य वहँ स्यन्दने। अयं भारं वहति इत्यत्र सकर्मकः नदी वहति इत्यत्र अकर्मकः। यदा धात्वर्थेनैव सङ्ग्रहो भवति तदैवाकर्मकः। यथा जीवनं धारयति इत्यस्य जीवति इत्यत्रोपसङ्ग्रहः। प्रसिद्धेरप्यकर्मकता। यथा मेघो वर्षति अत्र जलरूपस्य कर्मणः प्रसिद्धिस्तस्मादकर्मकः। एवमेव कर्मणोऽविवक्षातोऽकर्मकता। तस्मादत्र कर्मणो न विवक्षा। तस्मादकर्मकविश् - धातोर्भावे लोड्लकारे तप्रत्ययः। एवं दीक्षाम् इत्यस्य आश्रित्य इत्यध्याहृता क्रिया। तस्मादाश्रयानुकूलव्यापारस्य कर्मणः क्त्वाप्रत्ययस्थानापन्नल्यप्प्रत्ययनेनानुक्तत्वम्। तस्य कर्तर्येवं विधानम्। अतोऽनुक्ते कर्मणि द्वितीया पाणिन्यनुकूला। अतो दीक्षां प्रविश्यताम् अयं प्रयोगः सुकरः। अथवा गणकार्यमनित्यम् (प०श्लो० ९३.३) इति नियमात् प्रपूर्वक-विश् धातुर्दैवादिकः कल्प्यताम्।[५५] ततश्च दिवादिभ्यः श्यन् (पा०सू० ३.१.६९) इत्यनेन प्र-पूर्वकविश् धातोः श्यन् विकरणः। एवं हे मुने तां पूर्वनिर्दिष्टां दीक्षां त्वं प्रविश्य प्रविष्टो भव इति नेयं कर्मवाच्यक्रियाऽपि तु प्रविश्य इति कर्तृवाच्यक्रिया। इदं नव्यं समाधानम्। अथवा दीक्षां प्रविश्य ताम् इत्यत्र प्रविश्य इति ल्यबन्तप्रयोगः। तस्य च परवर्तिश्लोकस्थेन दर्शयस्व इत्यनेन क्रियापदेनान्वयः। अर्थात् हे महाभाग मुने तां पूर्वनिर्दिष्टां दीक्षां प्रविश्य कुतस्तौ राक्षसाधमौ दर्शयस्व।

## १.२३ पक्वफलादिभिः

भोजयित्वा सह भ्रात्रा रामं पक्वफलादिभिः।
पुराणवाक्यैर्मधुरैर्निनाय दिवसत्रयम्॥

– अ०रा० १.५.११

अत्र श्रीरामः फलं भुङ्क्ते विश्वामित्रः प्रेरयतीत्यर्थे विश्वामित्रो रामं पक्वफलादीनि भोजयति। अस्यामेवावस्थायां क्त्वाप्रत्यये पक्वफलादीनि भोजयित्वा इत्येव सामान्यतः पाणिनीयानुरूपम्। पक्वफलादिभिः इति कथम्। विमर्शे सति विवक्षाधीनानि कारकाणि

[५५] बहुलमेतन्निदर्शनम् (धा०पा० ग०सू० १९३८) आकृतिगणोऽयम् (धा०पा० ग०सू० १९९२) भूवादिष्वेतदन्तेषु दशगणीषु धातूनां पाठो निदर्शनाय तेन स्तम्भुप्रभृतयः सौत्राश्चुलुम्पादयो वाक्यकारीयाः प्रयोगसिद्धा विक्लवत्यादयश्च (मा०धा०वृ० १०.३२८) इत्यनुसारमाकृतिगणत्वाद्दिवादिगण ऊह्योऽयं धातुः।

भवन्ति[५६] इति नियमेनात्र करणत्वविवक्षा। करणं हि साधकतमं करणम् (पा०सू० १.४.४२) इति पाणिनीयसूत्रानुसारं क्रियासिद्धौ प्रकृष्टोपकारकं कारकम्। वाक्यपदीये च करण-लक्षणमित्थम् –

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्।
विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्॥

– वा०प० ३.७.९०

अतः कर्तृकरणयोस्तृतीया (पा०सू० २.३.१८) इति सूत्रेण तृतीया। यद्वा हेतौ (पा०सू० २.३.२३) इति सूत्रेण तृतीया पक्कफलादौ हेतुत्वविवक्षणात्। सिद्धान्तकौमुद्यां हेतुकरणयोरन्तरप्रतिपादनपुरःसरे लक्षणे व्याचष्ट दीक्षितो यत् द्रव्यादिसाधारणं निर्व्यापार-साधारणं च हेतुत्वम्। करणत्वं तु क्रियामात्रविषयं व्यापारनियतं च (वै०सि०कौ० ५६८) इति। अतः तृतीयायां नानुपपत्तिः। यद्वा प्रकृत्यादिभ्य उपसङ्ख्यानम् (वा० २.३.१८) इति वार्त्तिकबलेन तृतीया। सा चाभेदे।[५७] प्रकृत्यादिश्चाऽकृतिगणः।[५८] पक्कफलाद्यभिन्नं भोजनं श्रीरामं भोजयित्वेति तात्पर्यम्।

## १.२४ यत्राहल्यास्थिता तपः

गौतमस्याश्रमं पुण्यं यत्राहल्यास्थिता तपः।
दिव्यपुष्पफलोपेतपादपैः परिवेष्टितम्॥

– अ०रा० १.५.१५

अत्र स्थाधातुर्गतिनिवृत्तौ (ष्ठा गतिनिवृत्तौ धा०पा० ९२८)। अस्यैव क्त-प्रत्ययान्तं रूपमिदम्। अत्र तप इति वैषयिक आधारः। अत एव आधारोऽधिकरणम् (पा०सू० १.४.४५) इत्यनेनाधिकरणसञ्ज्ञा। ततश्च सप्तम्यधिकरणे च (पा०सू० १.४.४५) इत्यनेन सप्तमी सङ्गता। तपसि स्थिता इत्यनेन भवितव्यं किन्तु यत्राऽहल्या इत्यत्र आकारः प्रश्लिष्टः। स च आश्रित्य इत्यस्य सूचकः। अर्थात् तप आश्रित्य स्थिता अहल्या। यद्वाऽत्राधिरुपसर्गः स च विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इति वार्त्तिकेन लुप्तत्वात्सम्प्रति न दृश्यते किन्तु पूर्वमासीत्। तत्पूर्वकस्य स्थाधातोर्योगे तपः अधिष्ठिता इति स्थिते अधिशीङ्स्थासां कर्म (पा०सू० १.४.४६) इत्यनेन कर्मसञ्ज्ञायां कर्मणि

[५६] मूलं मृग्यम्। यद्वा कर्मादीनामविवक्षा शेषः (भा०पा०सू० २.३.५०, २.३.५२, २.३.६७) इत्यस्य तात्पर्यमिदम्।

[५७] धान्येन धनवान् (भा०पा०सू० २.१.३०) इतिवत्। मेधया तद्वान् धनेन धनवान् इत्यादि में प्रकृत्यादि होने से अभेद में तृतीया है इति व्याकरणचन्द्रोदयस्य प्रथमखण्डे कारकप्रकरणे ४६तमे पृष्ठे चारुदेवशास्त्रिणः (मोतीलाल बनारसीदास, ISBN 978-81-2082-518-5)।

[५८] "प्रकृत्यादिभ्य" इति। आकृतिगणोऽयम्। तेन "नाम्ना सुतीक्ष्णश्चरितेन दान्तः" (र०वं० १३.४१) इत्यादि सिद्धम् (त०बो० ४९६)।

द्वितीया (पा०सू० २.३.२) इत्यनेन द्वितीया विभक्तौ पश्चादधीत्यस्य लोपे द्वितीया न निवर्तते। जातसंस्कारो न निवर्तते इति परिभाषाबलेन। अथवा तपःस्थिता इत्येकं समस्तं पदम्। अत्र सप्तमी शौण्डैः (पा०सू० २.१.४०) इति सूत्रेण तपसि स्थिता इति विग्रहे लौकिके तपस् ङि स्थिता सुँ इत्यलौकिकविग्रहे सप्तमीतत्पुरुषे कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) इत्यनेन प्रातिपदिकसञ्ज्ञायां सुपो धातुप्रातिपदिकयोः (पा०सू० २.४.७१) इत्यनेन विभक्ति-लुकि विभक्त्यादिकार्ये तपःस्थिता इति।[५९] अथवा तपसि इति पृथक्पदं स्थिता इत्यपि पृथगुभे पदे च व्यस्ते तथा सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः (पा०सू० ७.१.३९) इति सूत्रेण छान्दसतया सप्तम्या लुक्। अथवाऽनेनैव सूत्रेण सुआदेशे पुनर्विसर्गादिः।[६०] यद्वा तप आस्थिता इति विग्रहः। आङ्पूर्वस्य स्थाधातोः करणार्थः। तप आस्थिता इत्यस्य तपः कुर्वत्यासीत् इत्यर्थः। यथा श्रीमद्भागवते आतिष्ठ तत्तात विमत्सरस्त्वमुक्तं समात्राऽपि यदव्यलीकम् (भा०पु० ४.८.१९) इत्यत्र टीकायां श्रीधरस्वामिनः आतिष्ठ कुरु (भा०पु० श्री०टी० ४.८.१९) वंशीधराश्च यत्तप उक्तं तत्कुरु (भा०पु० वं०टी० ४.८.१९) इति।

## १.२५ देवराजानम्

योनिलम्पट दुष्टात्मन्सहस्रभगवान्भव।
शप्त्वा तं देवराजानं प्रविश्य स्वाश्रमं द्रुतम्॥

– अ०रा० १.५.२६

अत्राहल्याभिमर्शसञ्जातरोषो गौतमः कृतकिल्बिषं पुरन्दरं क्रुद्धः शपति। अत्र देवराजानम् इति प्रयोगः कथम्। यतो हि देवानां राजा इति विग्रहे षष्ठीतत्पुरुषे राजाऽहस्सखिभ्यष्टच् (पा०सू० ५.४.९१) इत्यनेन टच्प्रत्यये चुटू (पा०सू० १.३.७) इत्यनेन टकारेत्सञ्ज्ञायां लोपे चकारस्याप्यनुबन्धकार्ये भत्वात् अन् इत्यस्य लोपेऽमि देवराजम्।[६१] परञ्च विचारे कृत इदमपि साधु। साधुत्वञ्चाऽत्र वृत्त्यप्रवृत्तनित्य-विध्युद्देश्यतावच्छेदकतानाक्रान्तत्वम्। एवं हि देवानां राजा इति विग्रहेऽपि कथं न

[५९] यत्राहल्या तपःस्थिता इत्येव मूलपाठ इति तात्पर्यम्।

[६०] तपस् ङि → सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः (पा०सू० ७.१.३९) → स्वादेशः → तपस् सुँ → स्वमोर्नपुंसकात् (पा०सू० ७.१.२३) → तपस् → ससजुषो रुः (पा०सू० ८.२.६६) → तपरुँ → तपर् → खरवसानयोर्विसर्जनीयः (पा०सू० ८.३.१५) → तपः।

[६१] देवानां राजा देवराजस्तम् → देव आम् राजन् अम् → सुपो धातुप्रातिपदिकयोः (पा०सू० २.४.७१) → देव राजन् अम् → देवराजन् अम् → राजाऽहस्सखिभ्यष्टच् (पा०सू० ५.४.९१) → देवराजन् टच् अम् → देवराजन् अ अम् → यचि भम् (पा०सू० १.४.१८) → भसञ्ज्ञा → नस्तद्धिते (पा०सू० ६.४.४४) → देवराज् अ अम् → देवराज अम् → अमि पूर्वः (पा०सू० ६.१.१०७) → देवराजम्।

टच् प्रत्यय इत्यपेक्षायां समासान्तप्रत्यया अनित्या इत्येव समाधानम्।[६२]

यद्वा राजृँ दीप्तौ (धा०पा० ८२२) इत्यस्माद्धातोः राजनं राट् इति विग्रहे भावे क्विप्।[६३] तस्य सर्वापहारिलोपः। पश्चात् व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः (पा०सू० ८.२.३६) इति सूत्रेण मूर्धन्यषकारो झलां जशोऽन्ते (पा०सू० ८.२.३९) इत्यनेन जश्त्वं वाऽवसाने (पा०सू० ८.४.५६) इत्यनेन वैकल्पिकचर्त्वमित्थं देवराट् इति निष्पन्नप्रयोगस्थितिः। किन्तु राजनं राट् इति विग्रहे क्विप्प्रत्ययान्तस्य राज् शब्दस्य देव शब्देन सह समासे तेन च देवराजाऽऽसमन्तादनिति देवशासनेन निश्वसिति पदलोलुपतया सम्मानाकाङ्क्षिततया सुखं निश्वसितीति विग्रहे आङ्उपसर्गपूर्वकात् अन् धातोः (अनँ प्राणने, धा०पा० १०७०) नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन अच् प्रत्ययः पश्चात् तृतीया तत्कृतार्थेन गुणवचनेन (पा०सू० २.१.३०) इति सूत्रे तृतीया इति योगविभाग-बलात् देवराजा इति शब्दस्य आन इति शब्देन तृतीयातत्पुरुषः। अथवा देवराजे सुर-शासनायाऽनिति इति विग्रहे चतुर्थीतत्पुरुषः। अथवा देवराज्यानिति निर्भरतया जीवतीति विग्रहे सप्तमीतत्पुरुषः। अथवा देवराज इदं देवराजार्थम् इति विग्रहे अर्थेन नित्य-समासो विशेष्यलिङ्गता चेति वक्तव्यम् (वा० २.१.३६) इति वार्त्तिकबलेन चतुर्थ्यन्त देवराजे शब्दस्य अर्थ शब्देन नित्यचतुर्थीसमासः। पश्चात् देवराजार्थमानिति इति विग्रहे देवराजार्थ शब्दस्य आन शब्देन सह सुप्सुपा (पा०सू० २.१.४) इति सूत्रेण समासः। एवं शब्दमिममाकृतिगणत्वाच्छाकपार्थिवादिगणे मत्वा शाकप्रियः पार्थिवः शाकपार्थिवः इतिवत् शाकपार्थिवादीनां सिद्धय उत्तरपदलोपस्योपसङ्ख्यानम् (वा० २.१.६०) इति वार्त्तिकेन अर्थ शब्दस्य लोपे विभक्तिकार्ये देवराजानम् इति पूर्णतया पाणिन्यनुकूलम्। एतादृक्समास-प्रकारस्तु पस्पशाह्निकेऽन्वमूमुदन्महाभाष्यकाराः सामोदम्। तत्रायं विचारः समुपस्थितो यद्यदि सिद्धः शब्दोऽर्थः सम्बन्धश्चेति लोकतो ज्ञायते। यदि लोक एषु प्रमाणं तर्हि किं शास्त्रेण क्रियत इत्यपेक्षायां वार्त्तिकमवतारयामासुः प्राञ्जलयः पतञ्जलयः यत् लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः। धर्मनियमशब्दे बहवः समासप्रकाराः प्रदर्शयाम्बभूविरे। किमिदं धर्मनियम इति। धर्माय नियमो धर्मनियमः। धर्मार्थो वा नियमो धर्मनियमः। धर्मप्रयोजनो वा नियमो धर्मनियमः (भा०प०) इत्यादि। इत्थं देवराजानम् इति त्रिमुनि-सम्मतम्। यद्वा अन् धातुमन्तर्भावितणिजन्तार्थमङ्गीकृत्य देवराजं देवशासनमनित्यानयति श्वासयतीति भावो निजप्रतापबलेन जीवयतीति हार्दं विग्रहेऽस्मिन्। तत्रोपपदं सप्तमीस्थम्

[६२] २६५तमे पृष्ठे २.३० स्थाप्य इति प्रयोगस्य विमर्शं पश्यन्तु – “समासान्तप्रत्ययप्रकरणं ह्यनित्यम्। प्रमाणं चात्र यचि भम् (पा०सू० १.४.१८) इति सूत्रम्। अत्र यश्चाच्च यच् इति समाहारद्वन्द्वः। इह द्वन्द्वाच्चु-दषहान्तात्समाहारे (पा०सू० ५.४.१०६) इत्यनेन चान्तत्वाट्टच्प्रत्ययः प्रयोक्तव्य आसीत्। तस्मिन् प्रयुक्ते यचे भम् इति स्यात्। यतो न प्रयुक्तोऽतः समासान्तप्रत्यस्यानित्यता ज्ञायते।”

[६३] सम्पदादिभ्यः क्विप् (वा० ३.३.१०८) इत्यनेन।

(पा०सू० ३.१.९२) इत्यनेन उपपदसञ्ज्ञायां कर्मण्यण् (पा०सू० ३.२.१) इत्यनेन अण् प्रत्यये अत उपधायाः (पा०सू० ७.२.११६) इत्यनेन वृद्धौ उपपदमतिङ् (पा०सू० २.२.१९) इति सूत्र-बलेन समासे विभक्तिकार्ये देवराजानम् इति सम्यक्सिद्धम्।

## १.२६ पुलकाङ्कितसर्वाङ्गा

उत्थाय च पुनर्दृष्ट्वा रामं राजीवलोचनम्।
पुलकाङ्कितसर्वाङ्गा गिरा गद्गदयैलत॥

– अ०रा० १.५.४२

श्रीरामचरणारविन्दरजःसंस्पर्शलब्धललितललनाशरीरा कलितलोचननीरा धीरा विगतशल्याऽहल्या कौसल्यासुतं श्रीरामं पुलकपूर्णाङ्गी स्तौति। अत्रैव पुलकाङ्कित-सर्वाङ्गा इति प्रयोगोऽपाणिनीय इव। पुलकेन अङ्कितानि सर्वाणि अङ्गानि यस्याः इति विग्रहे अनेकमन्यपदार्थे (पा०सू० २.२.२४) इत्यनेन चतुष्पदे बहुव्रीहौ स्वाङ्गाच्चोप-सर्जनादसंयोगोपधात् (पा०सू० ४.१.५४) इत्यस्योपरि अङ्गगात्रकण्ठेभ्य इति वक्तव्यम् (का०वृ०वा० ४.१.५४) इत्यनेन प्राप्तः ङीष् दुर्वार एव।[६४] एवञ्च पुलकाङ्कितसर्वाङ्गा इत्यत्र टाप् कथमिति चेत्। उच्यते। अत्र हि सिद्धान्तकौमुदीवर्णनम् – स्वाङ्गं त्रिधा। अद्रवं मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम् (वै०सि०कौ० ५१०)।[६५] तथाऽपि ङीष् भावो वैकल्पिकः। स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् (पा०सू० ४.१.५४) इति सूत्रं[६६] हि वैकल्पिकं ङीष् प्रत्ययं करोति।[६७] यद्यपि –

---

[६४] अङ्गगात्रकण्ठेभ्य इति वक्तव्यम् इति वार्त्तिकं स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् (पा०सू० ४.१.५४) इति सूत्रे काशिकायां पठितम्। भाष्यादर्शनादप्रमाणमिदम् इति नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च (पा०सू० ४.१.५५) सूत्रे भट्टोजिदीक्षिताः – अत्र वृत्तिः। अङ्गगात्रकण्ठेभ्य इति वक्तव्यम्। स्वङ्गी स्वङ्गेत्यादि। एतच्चानुक्तसमुच्चयार्थेन चकारेण सङ्ग्राह्यमिति केचित्। भाष्याद्यनुक्तत्वादप्रमाणमिति प्रामाणिकाः (वै०सि०कौ० ५११)। बालमनोरमायामपि एवञ्च तन्वङ्गी सुगात्री कलकण्ठी इत्यपभ्रंशा एवेति भावः (बा०म० ५११)। परन्त्वेतेन अनवद्याङ्गि (म०भा० ३.६४.७२) अवनताङ्गि (कु०स० ५.८६) इत्यादयः शिष्टप्रयोगा न सङ्गच्छन्ते। अत एव पदमञ्जर्यां हरदत्ताः – अङ्गगात्रेत्यादि भाष्येऽनुक्तमप्येतत्प्रयोग-बाहुल्याद्वृत्तिकारेणोक्तम् (प०म० ४.१.५४)।

[६५] अस्य भाष्ये मूलम् – किं स्वाङ्गं नाम। अद्रवं मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम्। अतत्स्थं तत्र दृष्टं च तस्य चेत्तत्तथा युतम्॥ (भा०पा०सू० ४.१.५४)।

[६६] तेन अङ्गगात्रकण्ठेभ्य इति वक्तव्यम् इति वार्त्तिकं च।

[६७] वाग्रहणम् अनुवर्तते। स्वाङ्गं यदुपसर्जनमसंयोगोपधं तदन्तात्प्रातिपदिकात्स्त्रियां वा ङीष् प्रत्ययो भवति (का०वृ० ४.१.५४)। असंयोगोपधमुपसर्जनं यत्स्वाङ्गं तदन्ताददन्तात्प्रातिपदिकाद्वा ङीष् (वै०सि०कौ० ५११)। असंयोगोपधमुपसर्जनं यत्स्वाङ्गं तदन्ताददन्तात् ङीष् वा स्यात् (ल०सि०कौ० १२६८)।

अद्य प्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ।

– कु०स० ५.८६

इति कुमारसम्भवे कालिदासः ङीष् प्रत्ययान्तमेवाश्रयति।[६८] अत्र कथं नाऽश्रित इति चेत्। कवीनां कामचारः। यद्वा विकल्पबुद्धिमतीमहल्यां वर्णयन् विकल्पपक्षमेवाश्रयति।[६९] यद्वा नायं स्त्रीप्रत्ययान्तोऽपि तु कर्मधारयान्मत्वर्थीयः। पुलकेनाङ्कितानि पुलकाङ्कितानि पुलकाङ्कितानि च तानि सर्वाण्यङ्गानि इति कर्मधारयः। विशेषणं विशेष्येण बहुलम् (पा०सू० २.१.५७) इत्यनेन पुलकाङ्कितशब्दस्य विशेषणतया पूर्वनिपातः। विशेषणत्वं नाम विद्यमानत्वे सति विधेयान्वयित्वे सतीतरव्यावर्तकत्वम्। एवं पुलकाङ्कितसर्वाङ्गाणि सन्ति यस्याः – प्रशस्तानि इति शेषः – इति विग्रहे अर्शआदिभ्योऽच् (पा०सू० ५.२.१२७) इत्यनेन अच् प्रत्यये टापि प्रत्यये[७०] पुलकाङ्कितसर्वाङ्गा इति दिक्।[७१]

## १.२७ रमणीयदेहिनम्

मर्त्यावतारे मनुजाकृतिं हरिं रामाभिधेयं रमणीयदेहिनम्।
धनुर्धरं पद्मविशाललोचनं भजामि नित्यं न परान्भजिष्ये॥

– अ०रा० १.५.४६

शापमुक्ता भक्तियुक्ता विगतशल्याऽहल्या कौशल्यानन्दवर्धनं स्तुवती[७२] श्रीराम-विशेषणं रमणीयदेहिनम् इतिशब्दं प्रायुङ्क्त। अत्र रमणीयश्चासौ देहश्चेति रमणीयदेहः। विशेषणं विशेष्येण बहुलम् (पा०सू० २.१.५७) इति कर्मधारयः। रमणीयदेहो नित्यत्वेन

[६८] एवमेव भारते वनपर्वणि दमयन्तीं प्रति महात्मनः – ब्रूहि सर्वानवद्याङ्गि का त्वं किं च चिकीर्षसि (म०भा ३.६४.७२)।

[६९] यद्वा भाष्येऽनुक्तत्वात् अङ्गगात्रकण्ठेभ्य इति वक्तव्यम् इत्यप्रमाणम्। ततः संयोगोपधात् स्वाङ्गाच्चोप-सर्जनादसंयोगोपधात् (पा०सू० ४.१.५४) इत्यस्याप्रवृत्तौ अजाद्यतष्टाप् (पा०सू० ४.१.४) इत्यनेन टाबेव।

[७०] अजाद्यतष्टाप् (पा०सू० ४.१.४) इत्यनेन टाप्।

[७१] बहुव्रीहौ "प्रशस्तानि" इत्यार्थस्याम्भवात् न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः इति नियमस्य न प्रसरः।

[७२] अत्र नुमागमो न। ष्टुञ् स्तुतौ (धा०पा० १०४३) → धात्वादेः षः सः (पा०सू० ६.१.६४) → निमित्तापाये नैमित्तिकस्याप्यपायः → स्तु → वर्तमाने लँट् (पा०सू० ३.२.१२३) → स्तु लँट् → लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) → स्तु शतृँ → तिङ्शित्सार्वधातुकम् (पा०सू० ३.४.११३) → सार्वधातुकमपित् (पा०सू० १.२.४) → ङिद्वत्त्वम् → स्तु अत् → कर्तरि शप् (पा०सू० ३.१.६८) → स्तु शप् अत् → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → स्तु अत् → क्क्ङिति च (पा०सू० १.१.५) → गुणनिषेधः → अचि श्नुधातुभ्रुवां य्वोरियँङुवँङौ (पा०सू० ६.४.७७) → स्त् उवँङ् अत् → स्त् उव् अत् → स्तुवत् → उगितश्च → स्तुवत् ङीप् → स्तुवत् ई → स्तुवती → विभक्तिकार्यम् → स्तुवती सुँ → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → स्तुवती।

प्राशस्त्येन वाऽस्ति यस्य स रमणीयदेही तं रमणीयदेहिनम्। विचारणीयमिदं यत् रमणीयो देहो यस्य स रमणीयदेहस्तथाभूतम् इत्थं विग्रहेऽपि रमणीयदेहवत्त्वरूपोऽर्थोऽवगम्येत। कर्मधारयानन्तरं मत्वर्थीयस्तु पाणिनीयतन्त्रविरुद्धः। न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः इति नियमेनात्र कर्मधारयादनन्तरं बहुव्रीहिरनुचित इति चेत्सत्यं किन्तु यदि बहुव्रीहौ विवक्षितार्थस्य प्रतीतिः स्यात्तदा कर्मधारयान्मत्वर्थीयो न। परमत्र मत्वर्थीयो नित्ययोगे प्राशस्त्ये च। तथा च कारिकां पेठुर्महाभाष्यकारा यत् –

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः॥

– भा०पा०सू० ५.२.९४

भगवतो रमणीयो देहो नित्यः। कौशल्यायाः समक्षन्तु केवलं प्रकटस्तथा वाल्मीकीयेऽपि कौसल्याजनयद्रामम् (वा०रा० १.१८.१०) इत्येव लिखितं न तु बालम् इत्यनेन पुराऽपि राम आसीदित्येव सूच्यते। अध्यात्मरामायणे तु शङ्खचक्रगदापद्मवनमाला-विभूषितं चतुर्भुजरूपमेवादर्शयत्।[७३] श्रीमानसे तु मनुशतरूपासमक्षं शरचापयुक्तद्विभुजरूप एवाऽगच्छत्। भगवतो द्विभुजं रूपं शाश्वतं चेति श्रुतिपुराणशास्त्रसम्मतम्। भागवतेऽपि ब्रह्मा कथयति –

अस्याऽपि देव वपुषो मदनुग्रहस्य स्वेच्छामयस्य न तु भूतमयस्य कोऽपि।

– भा०पु० १०.१४.२

तुलसीदासोऽपि साटोपं कथयति –

चिदानन्दमय देह तुम्हारी। बिगत बिकार जान अधिकारी॥[७४]

– रा०च०मा० २.१२७.५

इति। इत्थं नित्यसिद्धस्य भगवतो देहस्य प्रतीतिर्बहुव्रीहावसम्भवान्मत्वर्थीयमन्तरेण प्राशस्त्यमपि नैवावगन्तुं शक्यते। अतोऽसत्यां तादृशार्थप्रतीतौ मत्वर्थीयो वरीयान्। यद्वा दिहँ उपचये (धा०पा० १०१५) इत्यस्माद्धातोस्ताच्छील्ये णिनिः। तथा च रमणीयं देग्धुं तच्छीलः इति विग्रहे कर्मभूतरमणीयोपपदे सुप्यजातौ णिनिस्ताच्छील्ये (पा०सू० ३.२.७८) इत्यनेन णिनिप्रत्ययेऽनुबन्धकार्ये गुणेऽमि रमणीयदेहिनम् इति।[७५]

[७३] शङ्खचक्रगदापद्मवनमालाविराजितः (अ०रा० १.३.१७)।

[७४] एतद्रूपान्तरम्–भवदीयं चिदानन्दमयमस्ति कलेवरम्। तथा विकाररहितं विजानान्त्यधिकारिणः॥ (मा०भा० २.१२७.५)।

[७५] रमणीयं देग्धुं तच्छीलो रमणीयदेही तं रमणीयदेहिनम्। रमणीय अम् दिह् → सुप्यजातौ णिनिस्ताच्छील्ये (पा०सू० ३.२.७८) → रमणीय अम् दिह् णिनिँ → रमणीय अम् दिह् इन् → पुगन्त-लघूपधस्य च (पा०सू० ७.३.८६) → रमणीय अम् देह् इन् → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपदिकसञ्ज्ञा → सुपो धातुप्रातिपदिकयोः (पा०सू० २.४.७१) → रमणीय देह् इन् → रमणीयदेहिन्। विभक्तिकार्ये रमणीयदेहिन् अम् → रमणीयदेहिनम्।

अथवा रमणीया देहिनो मत्स्यादयश्चतुर्विंशतिरवतारा यस्य स रमणीयदेही तं रमणीयदेहिनम् । श्रीरामस्यैव सर्वावतारित्वात्।[७६] अथवा कृत्यल्युटो बहुलम् (पा०सू० ३.१.११३) इति सूत्रेण रमन्ते सर्वाकृतयो येषु ते रमणीयाः इति विग्रहे रमुँ क्रीडायाम् (धा०पा० ८५३) इत्यस्माद्धातोरधिकरणे अनीयर् प्रत्ययः। एवं रमणीया देहिनो जीवात्मानो यस्य स रमणीयदेही तम् । षष्ठ्यर्थश्चांशांशिभावरूपः। जीवात्मा परमात्मनोंऽश इति सार्वजनीनत्वात्। ममैवांशो जीवलोके जीवभूतः सनातनः (भ०गी० १५.७) इति गीतोक्तेः। अथवा रमन्ते इति रमणीयाः। कृत्यल्युटो बहुलम् (पा०सू० ३.१.११३) इत्यनेन कर्तरि अनीयर् । नित्यं रमणशीला जीवात्मानो देहिनो मुक्तनित्या यस्मिन्स रमणीयदेही तं रमणीयदेहिनम् ।

यस्मिन् रमन्ते मुनयो विद्ययाऽज्ञानविप्लवे।
तं गुरुः प्राह रामेति रमणाद्राम इत्यपि॥

– अ०रा० १.३.४०

इत्यत्रैव ग्रन्थ उक्तत्वात्। तस्मादिदं पाणिनीयमेव।

## १.२८ तस्मात्ते

योषिन्मूढाहमज्ञा ते तत्त्वं जाने कथं विभो।
तस्मात्ते शतशो राम नमस्कुर्यामनन्यधीः॥

– अ०रा० १.५.५७

ते नमस्कुर्याम् इत्यन्वयः। अत्र उपपदविभक्तेः कारकविभक्तिर्बलीयसी (भा०पा०सू० १.४.९५, २.३.४, ३.१.१९) इति परिभाषाबलेन द्वितीयैव सम्भवति। कदाचित्समासाभावः स्यात्तदा विसर्गस्य सत्वं न स्यात्। नमस्पुरसोर्गत्योः (पा०सू० ८.३.४०) इति सूत्रेण साम्प्रतं साक्षात्प्रभृतीनि च (पा०सू० १.४.७४) इत्यनेन गतिसञ्ज्ञायां विसर्गस्य सत्वेऽत्रैकार्थीभावः। एकार्थीभावत्वञ्च पृथगर्थानामेकोपस्थित्या बोधजनकत्वम् । यथा राजपुरुषः इत्यादौ समासात्प्राग्व्यस्तावस्थायां राज्ञः इत्यस्य पृथगर्थः पुरुषः इत्यस्य च पृथक्। सति समास उभयोरपि सत्ता समाप्ता साम्प्रतं हि स्व-

[७६] यथा सर्वेषामवताराणामवतारी रघूत्तमः। रामपादनखज्योत्स्ना परब्रह्मेति गीयते॥ (अग०सं०) तस्मिन्साकेतलोके विधिहरहरिभिः सन्ततं सेव्यमाने दिव्ये सिंहासने स्वे जनकतनयया राघवः शोभमानः। युक्तो मत्स्यैरनेकैः करिभिरपि तथा नारसिंहैरनन्तैः कूर्मैः श्रीनन्दनन्दैर्हयगलहरिभिर्नित्यमाज्ञोन्मुखैश्च॥ यज्ञः केशववामनौ नरवरो नारायणो धर्मजः श्रीकृष्णो हलधृक् तथा मधुरिपुः श्रीवासुदेवोऽपरः। एते नैकविधा महेन्द्रविधयो दुर्गादयः कोटिशः श्रीरामस्य पुरो निदेशसुमुखा नित्यास्तदीये पदे॥ (बृ०ब्र०सं०) नारायणोऽपि रामांशः शङ्खचक्रगदाधरः (वा०सं०) इत्यादिषु स्पष्टम्। एते वाल्मीकीयरामायणशिरोमणिटीकाया मङ्गलाचरणे शिवसहायमहाभागैरुद्धृताः।

स्वामिभावसम्बन्धावच्छिन्नराजविशिष्टपुरुषः इत्येकोऽर्थः। तथा चोक्तं वैयाकरणभूषणसारे समासशक्तिनिर्णये –

समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्॥

– वै०भू०सा० ५.३१, वै०सि०का० ३१

एवमत्रापि कृधातोः (डुकृञ् करणे धा०पा० १४७२) करणानुकूलव्यापारे शक्तिर्नास्ति न च नमस् इति शब्देऽवनत्यर्थबोधिका सति समासे परनिष्ठोत्कृष्टत्वविशिष्ट-स्वनिष्ठापकृष्टत्वानुकूलव्यापारो नमस्कारपदार्थः। अत्र च कारकविभक्तेर्बलवत्वाद्वितीयैव। ते तुभ्यं नमस्कुर्याम् इति कथम्। अत्रोच्यते। स्वयम्भुवे नमस्कृत्य (म०स्मृ० १.१, भा०पु० ४.६.२) इत्यादिवत् त्वामनुकूलयितुं प्रसादयितुं स्तोतुं वा नमस्कुर्याम् इति क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन चतुर्थी। यद्वा चरणौ इत्यध्याहृत्यावयावयविभावमूलकसम्बन्धे षष्ठी। इति शम्।

## १.२९ कुटुम्बहानिः

पादाम्बुजं ते विमलं हि कृत्वा पश्चात्परं तीरमहं नयामि।
नो चेत्तरी सद्युवती मलेन स्याच्चेद्विभो विद्धि कुटुम्बहानिः॥

– अ०रा० १.६.४

अहल्योद्धारानन्तरं भूभारहारी हरिर्गङ्गामुत्तर्तुं निषादं नौकां याचते। कैवर्तकः केशवमप्रस्तुतप्रशंसाभङ्ग्याऽऽक्षिपन्नाह यत्त्वच्चरणकमलरजसा शिला नारीरूपेण परिणता। तत्स्पर्शेन मम नौकाऽपि नारी मा भूदिति कृत्वा चरणौ क्षालयित्वैव गङ्गापारं नेष्यामि। अत्रैव कथयति स्याच्चेद्विभो विद्धि कुटुम्बहानिः। अत्र ज्ञानार्थको विद् धातुः (विदँ ज्ञाने धा०पा० १०६४)। स च सकर्मकः। ज्ञानस्य सविषयकत्वाद्विषयतया कर्मणः संस्कृते पाश्चात्यभाषायां सङ्कीर्तनात्। कर्मैव पाश्चात्यभाषायाम् ऑब्जेक्ट् शब्देन व्यवह्रियते। अतः कुटुम्बहानिम् इति द्वितीयया भवितव्यमिति चेत्सत्यम्। वैयाकरणसिद्धान्तकौमुद्याः कारके द्वितीयाविभक्तिप्रकरणेऽभिधानचर्चायां दीक्षितमहाभागाः संलिखन्ति यत् अभिधानञ्च प्रायेण तिङ्कृत्तद्धितसमासैः। तिङ् हरिः सेव्यते। कृत् लक्ष्म्या सेवितः। तद्धितः शतेन क्रीतः शत्यः। समासे प्राप्त आनन्दो यं स प्राप्तानन्दः। क्वचिन्निपातेनाप्यभिधानम्। विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्। असाम्प्रतमित्यस्य हि न युज्यते इत्यर्थः (वै०सि०कौ० ५३७)। अत्र प्रायेणापि शब्देनैव निपातेन कर्मोक्तं मन्यन्तेऽन्यथा संवर्ध्य इति ल्यबन्तपद-

समभिव्याहारेण विषवृक्षः इत्यत्र द्वितीया दुर्वारेति सर्वविदितम्।[७७] किन्त्वस्मत्सम्प्रदाये त्वस्मद्गुरुचरणा असाम्प्रतम् घटकसाम्प्रतम् इतिनिपातेनैवोक्तं कर्म व्यवस्थापयन्ति। अत्रैवार्थबोधनसामर्थ्यात्। सा रीतिरत्राप्यनुश्रियते। स्याच्चेद्विभो विद्धि कुटुम्बहानिः इति छन्दश्चतुर्थचरणघटकचेत् इतिनिपातेनैवोक्तं कर्म। अत उक्ते कर्मणि प्रथमा विषवृक्षोऽपि संवर्ध्य (कु०स० २.५५) इतिवत् विद्धि कुटुम्बहानिः इति। यद्वा कुटुम्बहानिः इति पदं विद्धि इति पदेन नान्वीयताम्। तथा चाविवक्षया कर्मणः विद्धि इतिघटकविद् धातुम् (विदँ ज्ञाने धा०पा० १०६४) अकर्मकं मत्वा वाक्यं विभिद्य व्याख्येयम्। अर्थात् नौकायां गतायां मम कुटुम्बहानिः स्याद्धे विभ इति त्वं विद्धि जानीहि इति तात्पर्यम्। इत्थं नापाणिनीयता।[७८]

## १.३० मे मनःप्रीतिकरौ

कस्यैतौ नरशार्दूलौ पुत्रौ देवसुतोपमौ।
मनःप्रीतिकरौ मेऽद्य नरनारायणाविव॥

– अ०रा० १.६.९

अत्र लोकाभिरामं श्रीरामं सुमित्रासुताभिरामं दृष्ट्वा योगिराजो जनको विश्वामित्रं पृच्छति यत् मे मनःप्रीतिकरौ एतौ कस्य सुतौ। अत्र मनसः प्रीतिकरौ इति समासः। मनःशब्दस्य हि ममस्थानापन्नमेइतिशब्देन साकाङ्क्षता। कस्य मन इत्यपेक्षायां मे जनकस्य यन्मनस्तस्य प्रीतिकरौ। मे इति मनःशब्दस्य विशेषणम्। इतरस्माद्व्यावर्तकत्वात्तत्र भाष्ये प्रतिपादितं सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणयोगो न (भा०पा०सू० २.१.१)। अर्थाद्विशेषणवतः शब्दस्य विशेषणं विहाय पञ्चसु वृत्तिषु कृत्तद्धितसमासैकशेषसनाद्यन्त-धातुरूपासु कतमाऽपि वृत्तिर्न भवति। यथा ऋद्धस्य राज्ञः पुरुषः इत्यत्र ऋद्धस्येति राज्ञ इत्यस्य विशेषणम्। एवं ऋद्धस्य इति पदं त्यक्त्वा राज्ञः इति शब्दस्य पुरुषः इति पदेन कथमपि न समासः।[७९] एवं राज्ञः इत्यस्य पुरुषः इत्यनेन समासे ऋद्धस्य इति विशेषणं कथमपि न योजयितुं शक्यते। तस्मात् मे इत्यस्य विशेषणतया जागरूकतायां मनः इत्यस्य प्रीतिकरौ इति शब्देन कथं समासः। सापेक्षमसमर्थवत् इति न्यायात्सामर्थ्यविरहात् समर्थः पदविधिः (पा०सू० २.१.१) इति सूत्रस्य प्रसरणगन्धोऽपि नेत्यपेक्षायामुच्यते। नित्यसापेक्ष-स्थले नियमोऽयमपोद्यते। चैत्रस्य दासभार्या इतिवत् देवदत्तस्य गुरुकुलम् इतिवच्च। मनसो

---

[७७] मल्लिनाथोऽपि – असाम्प्रतमित्यमेन निपातेनाभिहितत्वाद्वृक्ष इति द्वितीयान्तो न भवत्यनभिहिते कर्मणि द्वितीयाभिधानात्। यथाऽह वामनः – “निपातेनाप्यभिहिते कर्मणि न विभक्तिः परिगणनस्य प्रायिकत्वात्” इति (कु०स० स०व्या० २.५५)।

[७८] पश्य मृगो धावति इतिवत्क्रिया कर्मेति भावः।

[७९] न च षष्ठीतत्पुरुषादिस्थलेऽपि लुप्तविभक्तिस्मरण एव चेदन्वयबोधस्तदा ‘ऋद्धस्य राजमातङ्गाः’ इत्यादि-प्रयोगापत्तिः (व्यु०वा० का०प्र०)।

व्यक्तिविशेषेण नित्यसाकाङ्क्षतया व्यक्ताविव तन्निष्ठत्वादस्य नियमस्यापवादः। यद्वा मनःप्रीति-करौ पृथक्समासः पश्चात् मे इत्यनेन सह पार्ष्ठिकोऽन्वय इति न विरोधः।

## १.३१ नोदितो मे

मखसंरक्षणार्थाय मयाऽऽनीतौ पितुः पुरात्।
आगच्छन् राघवो मार्गे ताटकां विश्वघातिनीम्॥
शरेणैकेन हतवान्नोदितो मेऽतिविक्रमः।
ततो ममाश्रमं गत्वा मम यज्ञविहिंसकान्॥

– अ०रा० १.६.११-१२

विश्वामित्रो रामपराक्रमं प्रशंसन् कथयति मे नोदितः शरेणैकेन श्रीरामस्ताटकां हतवान्। अत्र अहं राममनोदयम् इति कर्तृवाच्यार्थे मया रामोऽनोद्यत इति कर्मवाच्ये तस्मिन्नेव तयोरेव कृत्यक्तखलर्थाः (पा०सू० ३.४.७०) इति सूत्रानुसारं निष्ठा (पा०सू० २.२.३६) इत्यनेन कर्मणि क्तप्रत्ययेन कर्मण उक्तत्वादनुक्ते कर्तरि तृतीयासम्भवात्[८०] मया नोदितः इत्येव वाच्यम्। मे इति तु सम्बन्धविवक्षायां कर्तरि षष्ठी। मत्सम्बन्धिनोदनाश्रयो रामः इति तात्पर्यम्। यद्वा नोदनं नोदः। भावघञन्तः।[८१] स सञ्जातोऽस्य स नोदितः। मे इत्यस्य राघवः (अ०रा० १.६.११) इत्यनेन सम्बन्धः। स च गुरुशिष्यभावमूलको भावनापक्षे सेवक-सेव्यभावमूलकश्चेति मीमांसायां तदस्य सञ्जातं तारकादिभ्य इतच् (पा०सू० ५.२.३६) इति सूत्रेणाऽकृतिगणतया तारकादिगणे मत्वा नोदशब्दात् इतच् प्रत्यय एवं भत्वाट्टिलोपे[८२] नोदितः। प्रेरणावाल्लीँलाशक्त्या मे मम विश्वामित्रस्य शिष्य आराध्य इष्टदेवः श्रीराम-चन्द्रस्ताटकामेकेनैव बाणेन हतवानिति पाणिनीयतयाऽर्थमाधुर्यमपि समायातम्।

## १.३२ रामाय दर्शय

ततः सम्प्रेषयामास मन्त्रिणं बुद्धिमत्तरम्।
जनक उवाच
शीघ्रमानय विश्वेशचापं रामाय दर्शय॥

– अ०रा० १.६.१८

अत्र महर्षिविश्वामित्रः श्रीरामपराक्रमपरिचयप्रस्तावनया जनकस्य हृदि श्रीरामस्य शैवकोदण्डखण्डनसामर्थ्यविषयकविश्वासं सबलमुत्पाद्य रामाय धनुर्दर्शय इत्यादिशति।

---

[८०] कर्तृकरणयोस्तृतीया (पा०सू० २.३.१८) इत्यनेन।
[८१] भावे (पा०सू० ३.३.१८) इत्यनेन।
[८२] यचि भम् (पा०सू० १.४.१८) इत्यनेन भत्वम्। यस्येति च (पा०सू० ६.४.१४८) इत्यनेनाकारलोपः।

अत्र रामाय इति चतुर्थी विचारविषयः। वस्तुतस्तु रामश्चापं पश्यतु त्वं च प्रेरय इत्यर्थे हेतुमति च (पा०सू० ३.१.२६) इत्यनेन ण्यन्तदृश् धातुर्ज्ञानसामान्यार्थकः। एवं च गतिबुद्धि-प्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ (पा०सू० १.४.५२) इति सूत्रेणाण्यन्तः कर्तृभूतो रामोऽधुना ण्यन्तावस्थायां कर्म स्यात्। रामं दर्शय इत्येवाऽपातत उचितम्। पुनर्ण्यन्ते सति रामम् इत्येव भवितव्यं रामाय इति कथं तदुपर्युच्यते। तादर्थ्ये चतुर्थी वाच्या (वा० २.३.१३) इति वार्त्तिकेनात्र चतुर्थी। रामार्थं धनुर्दर्शय इति तात्पर्यम्। तवानेन किमपि प्रयोजनं न सेत्स्यतीति व्यज्यते। यद्वाऽत्र सम्प्रदानस्य विवक्षा। अर्थादिदं रामाय सम्प्रदेहि स्वस्वत्वनिवर्तनं कुरु। रामः सज्जीकृत्य त्रोटयेद्वा रक्षेद्वा। तव कोऽप्यधिकारो नापेक्षते। एतावत्कालं यावद्धनुः पूजितवानधुना धनुर्धरं पूजय समुद्रं प्राप्य नदीमिव धनुर्धरे ममतां कुरु धनुर्ममतां च त्यजेत्येव विश्वामित्रतात्पर्यं प्रतिभाति। यद्वा रामाय दातुं धनुर्दर्शय इति गम्यमानदानक्रिया। तद्बलेन सुतरां चतुर्थी। यद्वा रामं परीक्षितुं धनुर्दर्शय इति क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन चतुर्थी। यद्वा रामाय इति न चतुर्थ्यन्तमपि तु जनकस्य सम्बोधनमिदम्। विश्वामित्राद्रामं सगुणं ब्रह्म श्रुत्वा तमेवात्मना प्रविशन्तं समाधिमग्नं श्रीरामरूपमाधुरीचोरितहृदयं पावके द्रवीभूतं कनकमिव जनकं विलोक्य विश्वामित्रो रामाय इति शब्देन जनकं सम्बोधयति। अयँ गतौ (धा०पा० ४७४) इति धातुः। गत्यर्थस्य ज्ञानार्थतया प्राप्त्यर्थतया च प्रसिद्धत्वात्[८३] रामं श्रीरामचन्द्रमयते गच्छति प्रविशति जानाति वा स रामायः इति विग्रहे कर्मण्यण् (पा०सू० ३.२.१) इत्यनेन अण् प्रत्यये विभक्तिकार्ये रामायः। तत्सम्बुद्धौ हे रामाय। हे रामतत्त्वज्ञ। अधुना विश्वस्तः सन्नहङ्कारप्रतीकं तमःप्रतीकं वा शिवधनुः श्रीरामं दर्शय। तस्मिन् सज्जीकृते सति यथा श्रीसीतारामविवाहो विलोक्येत।

## १.३३ दर्शयामास रामाय

दर्शयामास रामाय मन्त्री मन्त्रयतां वरः।
दृष्ट्वा रामः प्रहृष्टात्मा बद्ध्वा परिकरं दृढम्॥

– अ०रा० १.६.२३

अत्रापि रामं दर्शयामास इति प्रयोक्तव्ये रामाय इति प्रायुङ्क्त। यतो ह्यत्र सम्प्रदानस्य विवक्षा। रामाय दातुं दर्शयामास इति तात्पर्यम्।[८४] यद्वा तादर्थ्ये चतुर्थी।[८५] रामार्थं दर्शयामास

[८३] गत्यर्थका ज्ञानार्थकाः प्राप्त्यर्थका अपि भवन्ति।
[८४] दातुम् इत्यध्याहार्यमिति भावः।
[८५] तादर्थ्ये चतुर्थी वाच्या (वा० २.३.१३) इत्यनेन।

इति।[८६]

## १.३४ दीयते मे सुता

दीयते मे सुता तुभ्यं प्रीतो भव रघूत्तम।
इति प्रीतेन मनसा सीतां रामकरेऽर्पयन्॥

– अ०रा० १.६.५४

अत्र मया दीयते इति प्रयोक्तव्ये मे दीयते इति प्रयुक्तम्। यतो ह्यत्र सम्बन्धविवक्षायां षष्ठी। स च सम्बन्धः पालकपाल्यरूपः। यद्वा मे इत्यस्य सुतया साकमन्वयः। मत्सम्बन्धिनी सुता तुभ्यं दीयते। इत्थमन्वयविपरिणाम आपत्तिनिरासः।

## १.३५ वसिष्ठाय विश्वामित्राय

ततोऽब्रवीद्वसिष्ठाय विश्वामित्राय मैथिलः।
जनकः स्वसुतोदन्तं नारदेनाभिभाषितम्॥

– अ०रा० १.६.५८

अत्र वसिष्ठाय विश्वामित्राय चेति प्रयोगद्वयमपि द्वितीयायां प्रयोक्तव्यमासीत्किन्तु विवक्षाधीनानि कारकाणि भवन्ति[८७] इति नियममनुसृत्य चतुर्थी प्रयुक्ता। यद्वा वसिष्ठं विश्वामित्रञ्च तोषयितुम् इति क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन चतुर्थी। यद्वा स्वसुतोदन्तम् इत्यत्र रुचितम् इत्यध्याहार्यम्। सीताकथायाः सर्वेभ्योऽपि रुचितत्वौचित्यात्। अतः रुचितं स्वसुतोदन्तम्। काभ्याम्। वसिष्ठाय विश्वामित्राय। द्वयोरेवर्षिवर्ययोर्नाम।[८८] कथम्। यतो हि द्वावपि वैदिकावृषी। वसिष्ठो राममन्त्रार्थतत्त्वज्ञो विश्वामित्रश्च सीतामन्त्रार्थतत्त्ववित्। इत्थं राममन्त्रे स्थिता सीता सीतामन्त्रे च राघवः[८९] इति प्राचीनोक्तेरुभयोरपि वेदमन्त्रसाक्षात्कारित्वम्। विश्वामित्रस्तु साक्षाद्ब्रह्मगायत्र्या ऋषिः सीतैव गायत्रीमन्त्रार्थः। वसिष्ठश्च महामृत्युञ्जयमन्त्रद्रष्टर्षिर्महामृत्युञ्जयश्च सीतारामगुणगान-परः। तथा हि –

---

[८६] यद्वा पूर्ववत् रामं परीक्षितुं धनुर्दर्शयामास इति क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन चतुर्थी।

[८७] मूलं मृग्यम्। यद्वा कर्मादीनामविवक्षा शेषः (भा०पा०सू० २.३.५०, २.३.५२, २.३.६७) इत्यस्य तात्पर्यमिदम्।

[८८] "द्वयोः एव ऋर्षिवर्ययोः" इत्यत्र सम्बन्धविवक्षायां षष्ठी।

[८९] मूलं मृग्यम्।

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्॥

– ऋ०वे०सं० ७.५९.१२

अस्यार्थः। तिस्रः कौसल्याकैकेयीसुमित्रा अरुन्धत्यहल्यानसूयाः कौसल्यासुनयना-शबर्योऽम्बा यस्य स त्र्यम्बको रामचन्द्रः। तं सुगन्धिं सुरभियुक्तं पुष्टिवर्धनमनुग्रहवर्धन-कर्तारमुर्वारुकं दूर्वादलमिव श्यामलं श्रीरामचन्द्रं यजामहे यथा मृत्योर्मुक्षीय मुक्तो भवेयं माऽमृतादमृतान्मुक्तो न भवेयम्। यद्वा त्रीण्यम्बकानि सीतालक्ष्मणभरताख्यानि यस्य स त्र्यम्बको रामस्तं त्र्यम्बकं शेषं समानम्। अत एव द्वाभ्यां सीतावृत्तं रोचेतैव। तस्मात् वसिष्ठाय विश्वामित्राय रुचितम् इति वाक्ये रुच्यर्थानां प्रीयमाणः (पा०सू० १.४.३३) इत्यनेन चतुर्थी।

॥ इति बालकाण्डीयप्रयोगाणां विमर्शः ॥

॥ अथायोध्याकाण्डीयप्रयोगाणां विमर्शः ॥

## १.३६ प्रतिज्ञा ते कृता

यदि राज्याभिसंसक्तो रावणं न हनिष्यसि।
प्रतिज्ञा ते कृता राम भूभारहरणाय वै॥

– अ०रा० २.१.३४

एष प्रयोगोऽयोध्याकाण्डस्य प्रथमसर्गीयः। अत्र विविधविद्याविशारदो भगवान्नारदः श्रीराममभिगम्य कथयति यद्राज्यलोभासक्तो रावणं न हनिष्यसि तदा ते कृता प्रतिज्ञा व्यर्था भविष्यति। त्वया कृता इति प्रयोक्तव्ये ते कृता इति प्रयुक्तम्। अत्र सम्बन्धविवक्षायां षष्ठी। यद्वा ते प्रतिज्ञा इत्यन्वये सम्बन्धे षष्ठी।

## १.३७ शृणु मे

शृणु नारद मे किञ्चिद्विद्यतेऽविदितं क्वचित्।
प्रतिज्ञातं च यत्पूर्वं करिष्ये तन्न संशयः॥

– अ०रा० २.१.३६

अत्र शृणु मत् इति प्रयोक्तव्ये शृणु मे इति सम्बन्धविवक्षायां षष्ठी। यद्वा मे वाक्यं शृणु इत्यन्वये षष्ठी साधु। सा च सम्बन्धसामान्ये। सम्बन्धमीमांसायां न्यायव्याकरणयोरीषदन्तरम्। नैयायिकाः सम्बन्धमेकनिष्ठं मन्यन्ते तदपि प्रतियोगित्व-समानाधिकरणेन व्यवस्थापयन्ति किन्तु वयं सम्बन्धं द्विष्ठं मन्यामहे। एवं सम्यग्बध्नाति

प्रतियोग्यनुयोगिनौ यः स सम्बन्धः। अत एव सम्बन्धत्वं नाम सम्बन्धिभिन्नत्वे सति द्विष्ठत्वे सति विशिष्टबुद्धिनियामकतावच्छेदकत्वम् ।[९०] यथा राजपुरुषः इत्यत्र स्वस्वामिभाव-रूपः सम्बन्धः स च राजनि पुरुषे चेति द्वयोस्तिष्ठति राजपुरुषाभ्यां भिन्न एवं स्वस्वामि-भावसम्बन्धावच्छिन्नराजविशिष्टः पुरुषः इति विशिष्टबुद्धिनियामकश्च। तस्माच्छक्तिनिर्णय-प्रसङ्गे को नाम शक्तिपदार्थः इति जिज्ञासायां बोधजनकता शक्तिः[९१] इति यत्प्राचीनानां मतं तदप्यनयैवापत्त्या खण्डितप्रायम्। शक्तिर्हि शब्दार्थयोः सम्बन्धः। स च बोध-जनकत्वरूपश्चेदसङ्गतः। यतो हि बोधजनकता समवायतया शब्दमधितिष्ठति नार्थम्। सम्बन्धस्य द्विष्ठत्वं सकलवैयाकरणसम्मतं नोपपद्येत। तस्माद्वाच्यवाचकभावापरपर्याया शक्तिः।[९२] स एव सम्बन्धो द्वावपि शब्दार्थावधितिष्ठति। सम्बन्धोऽयं तादात्म्यमूलकः शब्दार्थयोः। तत्रापि तादात्म्ये मूलमितरेतराध्यासः। तादात्म्यं नामाद्वैतवादिवेदान्तिदृष्ट्या तु तदभिन्नत्वे सति तद्भेदेन प्रतीयमानतावच्छेदकत्वम्। अस्मन्मते तद्भिन्नत्वे सति तदभेदेन प्रतीयमानतावच्छेदकत्वम् ।[९३] अद्वैतवेदान्तिनोऽभेदं पारमार्थिकं मन्यन्ते वयञ्च तमौपचारिकं स्वीकुर्महे। इत्थं वैयाकरणसिद्धान्तितः सम्बन्ध एव सूत्रकारैः शेषशब्देन व्यवह्रियते। तथा च सूत्रं षष्ठी शेषे (पा०सू० २.३.५०)। अत्र कौमुदीकारो लिखति कारकप्रातिपदिकार्थादि-व्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषस्तत्र षष्ठी स्यात् (वै०सि०कौ० ६०६)। भाष्य-कारास्तु कथयन्ति यत् एकशतं हि षष्ठ्यर्थाः (भा०पा०सू० १.१.४९)। तथाऽपि सम्बन्ध-सामान्ये षष्ठी प्रसिद्धा। कुत्रचित्तत्तत्कारकेष्वपि षष्ठी भवति तत्तत्सूत्रविहितषष्ठी। सामान्य-सम्बन्धषष्ठ्योर्बाह्यतस्तु न कोऽपि भेदः किन्तु शाब्दबोधे वैलक्षण्यम्। तत्तल्लक्षणेष्वपि समासाद्यभावरूपं वैलक्षण्यमवगम्यत एव। यथा सम्बन्धषष्ठ्यां षष्ठी (पा०सू० २.२.८) इति सूत्रेण तत्पुरुषसमासो भवति राजपुरुषः इतिवत्। कृत्षष्ठ्यां च कृद्योगा च षष्ठी समस्यत इति वक्तव्यम् (वा० २.२.८) इति वार्त्तिकेन तत्पुरुषसमासो भवति इध्मप्रव्रश्चनः इतिवत्। परञ्च प्रतिपदविहितषष्ठ्यां समासं नैवेच्छन्ति भाष्यकारा यथा प्रतिपदविधाना षष्ठी च न समस्यते (भा०पा०सू० २.२.८)।[९४] तस्मादत्रापादाने सम्बन्धविवक्षया षष्ठी। यद्वा मे वाक्यं श्रृणु इति योजनया वाच्यवाचकभावमूलिका षष्ठी।

---

९० "सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सत्याश्रयतया विशिष्टबुद्धिनियामकः" इत्यभियुक्त-व्यवहारात् (प०ल०म० ११)।

९१ इन्द्रियाणां चक्षुरादीनां स्वविषयेषु चाक्षुषेषु घटादिषु यथाऽनादिर्योग्यता तदीयचाक्षुषादिकारणता तथा शब्दानामप्यर्थैः सह तद्बोधकारणतैव योग्यता सैव शक्तिरित्यर्थः (वै०भू०सा० ६.३७)।

९२ तस्मात्पदपदार्थयोः सम्बन्धान्तरमेव शक्तिर्वाच्यवाचकभावापरपर्याया (प०ल०म० ११)।

९३ तादात्म्यञ्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम् (ल०म०, प०ल०म० १६)।

९४ यथा – सर्पिषो ज्ञानम्। मधुनो ज्ञानम् (का०वृ० २.२.१०)। अत्र ज्ञोऽविदर्थस्य करणे (पा०सू० २.३.५१) इत्यनेन प्रतिपदविधानाषष्ठी। ततः समासाभावः।

## १.३८ तवाहितं कर्ता

को वा तवाहितं कर्ता नारी वा पुरुषोऽपि वा।
स मे दण्ड्यश्च वध्यश्च भविष्यति न संशयः॥

– अ०रा० २.३.९

अत्र श्वोभाविरामराज्याभिषेकसूचनादित्सया चक्रवर्ती दशरथः कोपभवने शयानां कैकेयीं श्रुत्वा तामनुनयन् कथयति यद्भवत्याः कः अहितं कर्ता। अत्र कृधातोः (डुकृञ् करणे धा०पा० १४७२) ण्वुल्तृचौ (पा०सू० ३.१.१३३) इत्यनेन विहिते तृचि ततः कर्तृकर्मणोः कृति (पा०सू० २.३.६५) इत्यनेन कृतायां षष्ठ्याम् अहितस्य कर्ता इत्यनेन भवितव्यमासीत्। अहितं कर्ता इत्यापाततोऽपाणिनीयं लगति। परं तृन्नन्तमिदम्। अर्थात् तृन् (पा०सू० ३.२.१३५) इति सूत्रेण कृधातोस्तृन्। रपरत्वेन गुणे विभक्तिकार्ये सौ ऋदुशनस्पुरुदंसोऽनेहसां च (पा०सू० ७.१.९४) इत्यनेनानङि अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृ-होतृपोतृप्रशास्तृणाम् (पा०सू० ६.४.११) इत्यनेन दीर्घे सुलोपे नलोपे चेति कर्ता।[९५] एवं प्राप्तायां षष्ठ्यां न लोकाव्ययनिष्ठाखलर्थतृनाम् (पा०सू० २.३.६९) इत्यनेन निषेधेऽनुक्तत्वाच्च कर्मणस्तत्रैव कर्मणि द्वितीया (पा०सू० २.३.२) इत्यनेन द्वितीया विभक्तिः। यद्वा कर्ता इति तिङन्तरूपं न कृदन्तम्। एवं हि कृधातोः अनद्यतने लुट् (पा०सू० ३.३.१५) इत्यनेन लुङ्कारे तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासाथान्ध्वमिड्वहिमहिङ् (पा०सू० ३.४.७८) इत्यनेन प्रथमपुरुषैकवचने तिप् प्रत्यये स्यतासी लृलुटोः (पा०सू० ३.१.३३) इत्यनेन तासिप्रत्यये गुणे रपरत्वे लुटः प्रथमस्य डारौरसः (पा०सू० २.४.८५) इत्यनेन डा आदेशे चुटू (पा०सू० १.३.७) इत्यनेन डकारेत्सञ्ज्ञायां डित्त्वसामर्थ्यादभस्यापि टेर्लोपः (ल०सि०कौ० ३४३) इति नियमेन[९६] टिलोपे कर्ता इति सिद्धम्।[९७] अतः कर्मणि द्वितीया

---

[९५] डुकृञ् करणे (धा०पा० १४७२) → कृ → तृन् (पा०सू० ३.२.१३५) → कृ तृन् → कृ तृ → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → उरण् रपरः (पा०सू० १.१.५१) → कर् तृ → कर्तृ → विभक्तिकार्यम् → कर्तृ सुँ → कर्तृ स् → ऋदुशनस्पुरुदंसोऽनेहसां च (पा०सू० ७.१.९४) → कर्त् अनँङ् स् → कर्त् अन् स् → कर्तन् स् → अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् (पा०सू० ६.४.११) → कर्तान् स् → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → कर्तान् → न लोपः प्रातिपदिकान्तस्य (पा०सू० ८.२.७) → कर्ता।

[९६] डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३)।

[९७] डुकृञ् करणे (धा०पा० १४७२) → कृ → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → अनद्यतने लुट् (पा०सू० ३.३.१५) → कृ लुट् → कृ तिप् → कृ ति → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → कृ तासिँ ति → कृ तास् ति → एकाच उपदेशेऽनुदात्तात् (पा०सू० ७.२.१०) → इडागमनिषेधः → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → उरण् रपरः (पा०सू० १.१.५१) → कर् तास् ति → लुटः प्रथमस्य डारौरसः (पा०सू० २.४.८५) → कर् तास् डा → कर् तास् आ → डित्यभस्याप्यनुबन्धकरण-सामर्थ्यात् (वा० ६.४.१४३) → कर् त् आ → कर्ता।

निरुपद्रवा निर्भ्रान्ता।

## १.३९ मम

रामः प्राह न मे मातर्भोजनावसरः कृतः।
दण्डकागमने शीघ्रं मम कालोऽद्य निश्चितः॥

– अ०रा० २.४.४

अत्र निउपसर्गपूर्वकाच्चयनार्थकचिञ् धातोः (धा०पा० १२५१) भूते कर्मणि क्तः। कर्मण्युक्ते सति तत्र प्रथमा किन्त्वनुक्ते कर्तरि तृतीया। अतः मया कालः निश्चितः इत्येव। मम कालः निश्चितः इति कथम्। कर्तरि सम्बन्धविवक्षया षष्ठी। यद्वा मम इत्यस्य कालः इत्यनेनान्वयः। तेन सम्बन्धसामान्ये षष्ठी। अर्थात्स्वयं कालातीतः सन् भक्तवत्सलो राघवः कालमेव नियन्तारं मत्वा मातरं प्राह यदद्य मन्निरूपकः कालो दण्डकारण्यगमनाय पित्रा निश्चितः। यद्वा निरुपसर्गचिञ्धातोः नपुंसके भावे क्तः (पा०सू० ३.३.११४) इत्यनेन भावार्थे क्तप्रत्ययः। ततश्च निश्चितमस्त्यस्मिन् इति विग्रहे अर्शआदिभ्योऽच् (पा०सू० ५.२.१२७) इत्यनेन अच् प्रत्ययः। अर्थाद्दण्डकारण्यगमनाय कालोऽयं निश्चयवानिति राघवेन्द्रस्य तात्पर्यं प्रतिभाति। यद्वा निश्चिनोतीति निश्चितः इति विग्रहे कर्तर्येव क्तप्रत्ययः।[९८] अर्थात्साम्प्रतमयं कालो मम विश्रामं न ह्यनुमन्यते। तस्मादाज्ञां देहि। यद्वा मम शब्दस्य दण्डकागमने इति शब्देनान्वयः।

## १.४० शरीरम्

प्रतिक्षणं क्षरत्येतदायुरामघटाम्बुवत्।
सपत्ना इव रोगौघाः शरीरं प्रहरन्त्यहो॥

– अ०रा० २.४.२८

अत्र श्रीरामचन्द्रः क्रुद्धं लक्ष्मणं सान्त्वयन्नुपदिशति यत्कामक्रोधादयः षड्सपत्नाः शरीरं प्रहरन्ति। शरीरे प्रहरन्ति इति प्रयोक्तव्ये शरीरम् इति प्रयुक्तम्। शरीरेऽरिः प्रहरति हृदये स्वजनस्तथा (प्र०ना० १.१२) इति प्रतिमानाटके प्रयुक्तत्वात्प्रहारस्याधार-तयाऽधिकरणत्वं परित्यज्य कर्मत्वमुक्तमिति चेत्। कथ्यते। शरीरमवलोक्य प्रहरन्ति इति

[९८] गत्यर्थाकर्मकश्लिषशीङ्स्थाऽऽसवसजनरुहजीर्यतिभ्यश्च (पा०सू० ३.४.७२) इत्यनेन कर्तरि क्तः। धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसङ्ग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥ (वा०प० ३.७.८८)। कर्मणोऽविवक्षणादकर्मकत्वम्। यथा रघुवंशे कालिदासोऽपि प्रायुङ्क्त – निर्ययावथ पौलस्त्यः पुनर्युद्धाय मन्दिरात्। अरावणमरामं वा जगदद्येति निश्चितः॥ (र०वं० १२.८३)। अत्र मल्लिनाथः – अद्य जगदरावणं रावणशून्यमरामं रामशून्यं वा भवेदेति निश्चितो निश्चितवान्। कर्तरि क्तः (र०वं० स०व्या० १२.८३)।

व्याख्यायताम्।[९९] न चास्मिन् व्याख्याने ल्यब्लोपे कर्मण्यधिकरणे च (वा० २.३.२८) इत्यनेन पञ्चम्याशङ्का। तदा शरीरं लक्षयन्तः शरीरं घातयन्तो वा प्रहरन्ति।[१००] यद्वा परौ भुवोऽवज्ञाने (पा०सू० ३.३.५५) इत्यत्रावज्ञानग्रहणेन धातोरनेकार्थत्वं सूच्यते। यतो हि परिपूर्वकस्य भूधातोः (भू सत्तायाम् धा०पा० १) निष्पन्नः परिभवशब्दोऽपमानसूचकः। अपमानं ह्यवज्ञानम्। अनादरः परिभवः परीभावस्तिरस्क्रिया (अ०को० १.७.२२) इति कोष-प्रामाण्यात्। परिपूर्वकभूधातोर्निसर्गतोऽपमानार्थे सिद्धेऽवज्ञानार्थं एवं प्रत्ययविधानेनावज्ञान-ग्रहणं व्यर्थम्। तदेव व्यर्थं सञ्ज्ञापयति यत् अनेकार्था हि धातवः। तेनात्रावज्ञान-ग्रहणं चरितार्थं ज्ञापकञ्च। तदेव परं यत् स्वांशे चरितार्थं वचनसिद्धिः फलमन्यत्र इति नियमेनावज्ञानग्रहणं स्वांशे चरितार्थमन्यस्मिन्नर्थे प्रत्ययव्यावर्तकत्वात् अनेकार्था हि धातवः इति वचनसिद्धिः परिभाव्य इत्यादौ सत्क्रियारूपं फलम्।[१०१] तथैवात्रापि प्रपूर्वस्य हृधातोः (हृञ् हरणे धा०पा० ८९९) हननरूपोऽर्थः। यद्यपि प्रहारशब्दस्य सामान्यतो हिंसार्थशस्त्रादिप्रक्षेपकरूपोऽर्थः स्वीक्रियते। प्रक्षेपणञ्च कस्मिंश्चिदाधारे सम्भवात्प्रक्षिप्तवस्तु-संयोगाश्रयतयौपश्लेषिक आधारो जागरूकतामापद्यते। अतो मनन्ति प्राचीनाः –

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
प्रहाराहारसंहारविहारपरिहारवत्॥

तथाऽप्यत्र लक्ष्यानुरोधेन प्रहारशब्दस्य हननार्थस्वीकारे तत्कर्मतया शरीरम् इत्यत्र द्वितीया। यद्वाऽधिकरणेऽविवक्षिते सति अकथितं च (पा०सू० १.४.५१) इत्यनेन कर्म। न च परिगणितषोडशधातुभ्योऽतिरिक्तस्य कथं कर्मतेति चेत् तथा स्यान्नीहृकृष्वहाम् (वै०सि०कौ० ५३९) इत्युत्तरार्धे हृधातोरपि गणनात्। ननु प्रपूर्वस्य हृधातोर्धात्वन्तरतया न सङ्ग्रहो भविष्यति। उपसर्गसंयोजनेन धातुर्न परिवर्तते। यथा नीलवस्त्रधरस्य बालकस्य कदाचिच्छ्वेतवस्त्रधारणेऽपि नैव परिवर्तनं लोके। न हि शास्त्रं लोकाद्भिद्यते (भा०पा०सू० १.१.३, ४.१.९३) इति महाभाष्यवचनाल्लोकमतमप्यादर्तव्यम्। न च प्रउपसर्ग-संयोजनेन धातोरर्थान्तरं तथा च अर्थनिबन्धनेयं सञ्ज्ञा (वै०सि०कौ० ५३९) इति वचनेन हृधात्वर्थाभावान्न कर्मसंज्ञेति वाच्यम्। प्रापणरूपस्यैवार्थस्य हृधातोर्वास्तविकत्वमिति नैव राजाज्ञा। धातोरनेकार्थकत्वस्यानुपदमेव निरूपितत्वात्। प्रायो धातूनामर्था भवन्त्युपसर्गास्तु केवलं प्रस्फोटयन्ति। निपाता द्योतका वाचका वेति पश्चाद्वक्ष्यते।

---

[९९] पूर्वपक्षोऽयम्।

[१००] उत्तरपक्षोऽयम्।

[१०१] यथा – अस्यां वृणीष्व मनसा परिभाव्य कञ्चित् (नै०च० ११.८) मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च (वै०सि०कौ० मङ्गलाचरणे १) एवं स परिभाव्य बिलद्वारं गत्वा तमाहूतवान् (प०त० ४) इत्यादिशिष्ट-प्रयोगेषु परिभाव्य इत्यस्य विचार्य पर्यालोच्य वेत्यर्थः। एवमेव ग्रन्थकारस्य श्रीभार्गवराघवीयमहाकाव्ये मनसा परिभाव्य भामिनीभयमाशङ्क्य भवाय भावुकः (भा०रा० ५.६१) इति प्रयोगे।

यथा भूधातोः (भू सत्तायाम् धा०पा० १) अनुभवरूपोऽर्थः शाश्वतः। अनुरुपसर्गो द्योतयति तद्यथा अनुभवति इत्यादि। अत एवात्र हननार्थतया शरीरं कर्म। ततो द्वितीया।

## १.४१ तव

अहमग्रे गमिष्यामि वनं पश्चात्त्वमेष्यसि।
इत्याह मां विना गन्तुं तव राघव नोचितम्॥

– अ०रा० २.४.६३

अत्र भगवती सीता श्रीरामं प्रार्थयमानाऽनुनयन्ती ब्रवीति हे राघव मां विना तव गन्तुं न उचितम् । अत्र त्वया इति प्रयोक्तव्ये तव इति प्रयुक्तम्। अत्र कर्तृशेषत्वविवक्षायां षष्ठी। यद्वा उचितशब्देन सहान्वयात्सम्बन्धषष्ठी। यद्वा भावे तुमुन् (भा०पा०सू० ३.३.१०, ३.४.९)। ततः कर्तुरनुक्तत्वादनुक्ते कर्तरि कर्तृकर्मणोः कृति (पा०सू० २.३.६५) इति षष्ठी। यद्वा तव कृते इत्यध्याहार्यम्। अतः षष्ठ्युचिता।

## १.४२ श्रुतानि बहुभिर्द्विजैः

अन्यत्किञ्चित्प्रवक्ष्यामि श्रुत्वा मां नय काननम्।
रामायणानि बहुशः श्रुतानि बहुभिर्द्विजैः॥

– अ०रा० २.४.७७

वनगमनायानुरोधं कुर्वती भगवती सीता कथयति यत् द्विजैर्बहूनि रामायणानि श्रुतानि। अत्र शब्दानां पृथग्भवनतः ध्रुवमपायेऽपादानम् (पा०सू० १.४.२४) इत्यनेनापादान-सञ्ज्ञा स्यात्। यतो हि अपायो विश्लेषस्तस्मिन्साध्ये यद्ध्रुवमवधिभूतं कारकं तदपादानसञ्ज्ञं स्यात् (ल०सि०कौ० ८९९) इत्यर्थः। तदनु विश्लिष्टरामायणात्मकशब्दसमूहस्यावधिभूत-द्विजानामपादानसञ्ज्ञा। ततश्च अपादाने पञ्चमी (पा०सू० २.३.२८) इत्यनेन पञ्चमी विभक्तिः। एवं द्विजेभ्यः इत्युचितं कथं द्विजैः इति। अत्रोच्यते। अत्र करणत्वविवक्षा। एवं करणतृतीया। यद्वा हेतुत्वविवक्षायां हेतौ (पा०सू० २.३.२३) इत्यनेन तृतीया। यद्वा कथितानि निगदितानि इत्यध्याहार्यम्। एवं द्विजैः कथितानि निगदितानि वा रामायणानि श्रुतानि इत्यनुक्ते कर्तरि तृतीया। यद्वा भवता तु श्रुतान्येव किन्तु द्विजैरपि श्रुतानि। अतो रामायणस्य श्रवणस्य द्विजेषु कर्तृत्वम्। तात्पर्यमिदं यद्भवतश्चरित्रं श्लाघाविपर्ययतः कदाचिद्भवान्न शृणोति किन्तु संस्कारशीला द्विजा बहुशः शृण्वन्त्यश्रौषुश्च। शुद्धसंस्कारतया ते न विस्मरन्ति। तेषां वाक्यस्य प्रामाण्यं भवानपि मन्यतेऽतस्तान् पृच्छतु यत्कस्मिंश्चिद्रामायणे कस्मिंश्चिद्वा कल्पे भवान्मां विना वनमगच्छत्। श्रीसीताया हार्दमिदं यद्यपि प्रतिकल्पं भवानवतरति मया सह तेषु तेषु कल्पेषु भिन्नानि भिन्नानि चरित्राणि समाचरति भवानतश्च तच्चारुचारुचरित्रप्रतिपादनपरतया

सहस्रशो रामायणानि व्याचक्षत मुनीन्द्राः। सत्सु प्रतिरामायणे भिन्नेषु भवच्चरित्रेषु जन्म-लीला विवाहलीला वनलीला रणलीला राज्यलीलाश्च सर्वत्र समाना एव। तत्र वनलीलायां मया सह भवद्वनगमनं सर्वैरपि रामायणैरनुमोदितं श्रुतवन्तो द्विजास्तत्र प्रमाणम्। अतो द्विजैः इत्यनुक्तकर्तरि तृतीया।

## १.४३ सजानकिम्

आयान्तं नागरा दृष्ट्वा मार्गे रामं सजानकिम्।
लक्ष्मणेन समं वीक्ष्य ऊचुः सर्वे परस्परम्॥

– अ०रा० २.५.१

जानक्या सह वर्तमानं रामम् इति विग्रहे तेन सहेति तुल्ययोगे (पा०सू० २.२.२८) इत्यनेन समासे सहस्य सादेशे[१०२] अमि च सजानकीम् इत्येव।[१०३] ह्रस्वः कथम्। जानकीवाऽचरति जानकयति।[१०४] जानकयतीति जानकिः इति विग्रहे कर्तरि क्विप्। पृषोदरादित्वाद्ध्रस्वः। ततः समासे सजानकिम् इति। यद्वा जानक्या सह वर्तमानम् इति विग्रहेऽपि गोस्त्रियोरुपसर्जनस्य (पा०सू० १.२.४८) इत्यनेन ह्रस्वः।[१०५] अनित्यत्वाच्च न

---

[१०२] वोपसर्जनस्य (पा०सू० ६.३.८२) इत्यनेन।

[१०३] पूर्वपक्षोऽयम्।

[१०४] जानकी → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → जानकी क्विँप् → जानकी व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → जानकी → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → जानकी लट् → जानकी तिप् → जानकी ति → कर्तरि शप् (पा०सू० ३.१.६८) → जानकी शप् ति → जानकी अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → जानके अ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → जानकय् अ ति → जानकयति।

[१०५] अत्र तेन सहेति तुल्ययोगे (पा०सू० २.२.२८) इत्यनेन बहुव्रीहिसमासः। अनेकमन्यपदार्थे (पा०सू० २.२.२४) इति निर्देशनेन सर्वोपसर्जनो बहुव्रीहिः। तस्मात् सह इत्यस्य जानकी इति स्त्रीप्रत्ययान्तस्य चोपसर्जनसञ्ज्ञा। वोपसर्जनस्य (पा०सू० ६.३.८२) इत्यनेन सह इत्यस्य स इत्यादेशः। गोस्त्रियोरुपसर्जनस्य (पा०सू० १.२.४८) इत्यनेन जानकी इत्यस्य जानकि इति ह्रस्वः। यथा गोभिः सह वर्तमानः इति विग्रहे सगुः इत्यत्र। यथा तैत्तिरीयारण्यके – इन्द्र॑स्य गृ॒हो॑सि तं त्वा॒ प्रप॑द्ये स॒गुः साश्वः॑ स॒ह यन्मे॒ अस्ति॒ तेन॑ (कृ०य० तै०आ० ४.४२.९)। अत्र सायणाचार्याः – सगुर्गोसहितः। एवमेवापस्तम्बश्रौतसूत्रे ब्रह्म वर्म ममान्तरं तं त्वेन्द्रग्रह प्रविशानि सगुः साश्वः सपूरुषः (आ०श्रौ०सू० १४.२६.१) इत्यत्रापि सगुः।

कप्प्रत्ययः।[१०६]

## १.४४ वनम्

गन्ताऽद्यैव वनं रामो लक्ष्मणेन सहायवान्।
एषा सीता हरेर्माया सृष्टिस्थित्यन्तकारिणी॥

– अ०रा० २.५.२३

एष प्रयोगोऽध्यात्मरामायणस्यायोध्याकाण्डे पञ्चमसर्गीयः। अत्र सीतालक्ष्मणाभ्यां सह दण्डकावनं गच्छन्तं श्रीरामं विलोक्य शोकसन्तप्तहृदयान् विषादजलधौ निमज्जतः कोशलपुरवासिनो निरीक्ष्य भगवान् वामदेव आध्यात्मिकश्रीरामतत्त्ववर्णनमाध्यमेन सर्वेषां शोकापनोदाय यतमानो ब्रवीति यत् लक्ष्मणेन सह श्रीरामोऽद्यैव वनं गन्ता। अत्र गन्ता इति तृजन्तप्रयोगः। गम् धातोः (गमॢँ गतौ धा.पा. ९८२) गच्छतीति गन्ता इति विग्रहे तृच् प्रत्यये[१०७] नश्चापदान्तस्य झलि (पा०सू० ८.३.२४) इत्यनेनानुस्वारे अनुस्वारस्य ययि परसवर्णः (पा०सू० ८.४.५८) इत्यनेन परसवर्णे नकारे विभक्तिकार्ये सौ प्रत्यये ॠदुशनस्पुरुदंसोऽनेहसां च (पा०सू० ७.१.९४) इत्यनेन अनङि अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृ-क्षत्तृहोतृपोतृप्रशास्तॄणाम् (पा०सू० ६.४.११) इत्यनेन दीर्घे सुलोपनलोपयोः[१०८] गन्ता इति सिध्यति। वनम् इत्यत्र कर्तृकर्मणोः कृति (पा०सू० २.३.६५) इत्यनेन षष्ठ्युचिता। परञ्चात्र न तृच् अपि तु तृन्।[१०९] तृन्तृचोः स्वरभेदः।[११०] तृन्प्रत्ययेऽपि कर्तृकर्मणोः कृति (पा०सू० २.३.६५) इत्यनेन षष्ठी प्राप्ता किन्तु न लोकाव्ययनिष्ठाखलर्थतृनाम् (पा०सू० २.३.६९) इत्यनेन षष्ठीनिषेधः। यद्वा गन्ता इति लुट्प्रथमपुरुषैकवचनान्तं तिङन्त-रूपम्। अतस्तद्योगे कर्तुरीप्सिततमं कर्म (पा०सू० १.४.४९) इत्यनेन कर्मसञ्ज्ञा कर्मणि

[१०६] नद्यृतश्च (पा०सू० ५.४.१५३) इत्यनेन बहुव्रीहिसमासान्ते कप् प्रत्ययः प्राप्तः। यथा तेन सहेति तुल्ययोगे (पा०सू० २.२.२८) इत्यनेन जातेषु सदेवीकः (क०स०सा० ७.१.९६) सपत्नीकः (र०वं० १.८१, म०पु० ५८.२०, ७१.२) सश्रीकः (अ०शा० ५.९, ह०व० २२.२९) सश्रीकम् (भा०पु० ९.६.१९) ससाध्वीकाः (बृ०सं० १३.४) ससुन्दरीकः (क०स०सा० ८.६.२५०) सस्त्रीकाः (भा०पु० १०.३३.५) सहपत्नीकाः (आ०श्रौ०सू० ७.२१.६, ७.२७.१६, १३.२०.५, १५.१३.१०) सारुन्धतीकाः (कु०स० ६.४) इत्यादिसमासेषु। अत्र कबभावः। समासान्तप्रत्ययप्रकरणस्यानित्यत्वात्। २६५तमे पृष्ठे २.३० स्थाप्य इति प्रयोगस्य विमर्शे पश्यन्तु – "समासान्तप्रत्ययप्रकरणं ह्यनित्यम्। प्रमाणं चात्र यचि भम् (पा०सू० १.४.१८) इति सूत्रम्। अत्र यश्चाच्च यच् इति समाहारद्वन्द्वः। इह द्वन्द्वाच्चुदषहान्तात्समाहारे (पा०सू० ५.४.१०६) इत्यनेन चान्तत्वाट्टच्प्रत्ययः प्रयोक्तव्य आसीत्। तस्मिन् प्रयुक्ते यचे भम् इति स्यात्। यतो न प्रयुक्तोऽतः समासान्तप्रत्ययस्यानित्यता ज्ञायते।"

[१०७] ण्वुल्तृचौ (पा०सू० ३.१.१३३) कर्तरि कृत् (पा०सू० ३.४.६७) इत्याभ्याम्।

[१०८] हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) न लोपः प्रातिपदिकान्तस्य (पा०सू० ८.२.७) इत्याभ्याम्।

[१०९] तृन् (पा०सू० ३.२.१३५) इत्यनेन तद्धर्मकर्तरि।

[११०] शेषप्रक्रिया तु पूर्ववदिति भावः।

द्वितीया (पा०सू० २.३.२) इत्यनेन द्वितीया। अनद्यतनत्वस्य चाविवक्षा।[१११]

## १.४५ रामसीतयोः

य इदं चिन्तयेन्नित्यं रहस्यं रामसीतयोः।
तस्य रामे दृढा भक्तिर्भवेद्विज्ञानपूर्विका॥

– अ०रा० २.५.३१

भगवान् वामदेवः श्रीरामचन्द्रं वल्कलधारिणं वनं प्रयान्तं दृष्ट्वा शोककलित-मनस्कानयोध्यावासिनः श्रीरामस्याऽध्यात्मिकतत्त्वं बोधयित्वा फलश्रुतिं श्रावयन्नाह रहस्यं रामसीतयोः इति। यो मानवो मयोदितं रामसीतयो रहस्यं चिन्तयिष्यति स निष्पापो भविष्यति। रामश्च सीतेति रामसीते तयोः इति द्वन्द्वः। विप्रतिपत्तिर्यत् सीतारामयोः इत्यनेन भवितव्यं यथा तुलसीदासोऽपि प्रयुङ्क्ते सीतारामगुणग्रामपुण्यारण्यविहारिणौ (रा०च०मा० १/म० १.४)। सीता ह्यस्माकं जनन्यतः श्रीरामापेक्षयाऽभ्यर्हितैवं तस्या एव पूर्वप्रयोगो भवेत्।[११२] उक्तश्च स्मृतौ –

पितुर्दशगुणा माता गौरवेणातिरिच्यते।
मातुर्दशगुणा मान्या विमाता धर्मभीरुणा॥[११३]

वाल्मीकीयरामायणे बङ्गसंस्करणे चापि जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।[११४] प्रसिद्धं चापि गौरीशङ्करौ लक्ष्मीनारायणौ शचीपुरन्दरौ सीतारामौ राधाकृष्णौ इत्याद्यत्रेयमेवापाणिनीयता प्रतिभाति। आर्षत्वात् इत्यपि न विचार्यताम्। ऐश्वर्यदृष्ट्या सीता सर्वेषां जननी। मुनिरत्र वामदेवो दशरथपुरोहितो गुरुपुत्रो मन्त्री च। अयोध्यायाः सीता पुत्र-वधूरिति। श्वशुरालये स्त्रियः प्राधान्यं वा श्रैष्ठ्यत्वं वा नाङ्गीक्रियते शास्त्रीयसंस्कृतौ पत्न्याः पतिं

---

[१११] अनद्यतने लुँट् (पा०सू० ३.३.१५) इत्यनेनानद्यतने भविष्यति लुँट् विहितः। कथं तर्हि अद्यैव इत्यस्य योगेऽपि लुँट्। इत्यपेक्षायामुक्तम् – अनद्यतनत्वस्य चाविवक्षा। यथा भारते युवा षोडशवर्षो हि यदद्य भविता भवान् (म०भा० १४.५६.२२) इत्यत्रापि अद्ययोगेऽपि लुँट्। यद्वाऽत्र परिदेवने भविष्यति लुँट्। परिदेवने श्वस्तनीभविष्यन्त्यर्थे (वा० ३.३.१५) इत्यनेन। शोकसन्तप्तान् कोशलपुरवासिनो निरीक्ष्य वामदेवोऽपि शोकसन्तप्तः सन् निजपरिदेवनं द्योतयति।

[११२] अभ्यर्हितम् (वा० २.२.३४)। अभ्यर्हितं पूर्वं निपततीति वक्तव्यम्। मातापितरौ श्रद्धामेधे (भा०पा०सू० २.२.३४)।

[११३] मूलं स्मृतिग्रन्थेषु मृग्यम्। महाभारतस्य दाक्षिणात्यपाठे पितुः शतगुणं माता गौरवेणातिरिच्यते (म०भा० १४.११०.६०) इति वर्तते। "पितुः शतगुणं माता" इति स्मृतेश्च (वा०रा० भू०टी० १.२३.२) इति कौसल्या सुप्रजा राम (वा०रा० १.२३.२) इति श्लोके भूषणटीकायां गोविन्दराजाः।

[११४] Julius J. Lipner (Translator) (2005). Chatterji, Bankimcandra. *Anandamath, or The Sacred Brotherhood*. Oxford University Press: Oxford, UK. ISBN 978-01-95346-33-6. p. 241: *VMBS* (Sabyasachi Bhattacharya's *Vande Mataram: The Biography of a Song*) says that this eulogy of the mother and the birthland ocurred in the version of Valmiki's Ramayana current in Bengal.

प्रति दासीभावव्यवस्थापनात्। अतो वामदेवदृष्टावयोध्यानिवासकारणाच्छ्रीरामोऽभ्यर्हितः। अतः रामश्च सीता चेति तयो रामसीतयोः इति प्रयुक्तम्। यद्वा सिनोति बध्नाति। प्रेम्णा सिनोति सीतां यः स सीतः।[११५] सीता च सीतश्च इति विग्रहे पुमान् स्त्रिया (पा०सू० १.२.६७) इत्यनेनैकशेषः सीतौ। रमयत इति रामौ।[११६] रामौ च तौ सीतौ चेति रामसीतौ तयो रामसीतयोः इति। यद्वा पूर्वनिपातप्रकरणमनित्यम्। लक्षणहेत्वोः क्रियायाः (पा०सू० ३.२.१२६) इति दर्शनात्।[११७]

## १.४६ मे

गृहाण फलमूलानि त्वदर्थं सञ्चितानि मे।
अनुगृह्णीष्व भगवन् दासस्तेऽहं सुरोत्तम॥

– अ०रा० २.५.६७

अयोध्यातः प्रतिष्ठमानः सीतालक्ष्मणसमेतः श्रीरामो निषादेन सह गतः। तदनु फलमूलानि श्रीरामाय निषादो न्यवेदयत यत् मे सञ्चितानि फलमूलानि गृहाण। अत्र सञ्चयनानुकूलव्यापारस्याऽश्रयः कर्ता निषादः प्रत्ययश्चात्र कर्मणि। अतः कर्तुरनुक्तत्वादत्र तृतीयया भवितव्यं[११८] किन्तु कर्तुः सम्बन्धविवक्षायां षष्ठी। यद्वा क्तस्य च वर्तमाने (पा०सू० २.३.६८) इति सूत्रेण क्तयोगा षष्ठी।[११९] यद्वा मे इति फलमूलैः सहान्वितम्। तेन

---

[११५] षिञ् बन्धने (धा०पा० १४७७) इति धातोः गत्यर्थाकर्मकश्लिषशीङ्स्थाऽऽसवसजनरुहजीर्यतिभ्यश्च (पा०सू० ३.४.७२) इत्यनेन कर्तरि क्तः। पृषोदरादित्वाद्दीर्घः। अविवक्षितकर्मकत्वादकर्मकत्वम्। एवमेव ग्रन्थकारैः श्रीसीतासुधानिधौ सीताशब्दस्य व्युत्पत्तिः प्रदर्शिता – यत्पादपङ्कजपरागरसानुरागखड्गात् खडन्ति मुनयो भवबन्धनानि। रामं सिनोषि तमहो निजभावरज्वा सीतेति नाम समगास्त्वमतो जगत्याम्॥ (सी०सु०नि० १.१७)। अत्र भाषायां भक्तिटीका च – सिनोति इति सीता इस व्युत्पत्ति से षिञ् बन्धने धातु से कर्ता में क्त प्रत्यय और पृषोदरादित्वात् दीर्घ ईकार करके सीता शब्द की निष्पत्ति की जाती है (सी०सु०नि० भ०टी० १.१७)।

[११६] रमयति सर्वान् गुणैरिति रामः। "रामो रमयतां वरः" (वा०रा० ७.४२.२१, ७.१०८.२५) इत्यार्षनिर्वचनबलात्कर्तर्यपि कारके घञ् वर्ण्यते (वा०रा० भू०टी० १.१.८)। एवमेव रमयतः सर्वान् गुणैरिति रामौ।

[११७] लक्षणहेत्वोः इत्यत्र द्वन्द्वसमासे अल्पाच्तरम् (पा०सू० २.२.३४) इत्यनेन हेतुशब्दस्य पूर्वनिपाते हेतुलक्षणयोः इत्यनेन भवितव्यमासीत्। लक्षणहेत्वोः इति पाणिनिप्रयोगः पूर्वनिपातप्रकरणस्यानित्यत्वं ज्ञापयति। लक्षणहेत्वोरिति निर्देशः पूर्वनिपातव्यभिचारलिङ्गम् (का०वृ० ३.२.१२६)।

[११८] कर्तृकरणयोस्तृतीया (पा०सू० २.३.१८) इत्यनेन।

[११९] मतिबुद्धिपूजार्थेभ्यश्च (पा०सू० ३.२.१८८) इत्यनेन वर्तमाने क्तः। चकारेणान्यत्रापि। शीलितो रक्षितः क्षान्त आक्रुष्टो जुष्ट इत्यपि। रुष्टश्च रुषितश्चोभावभिव्याहृत इत्यपि॥ हृष्टतुष्टौ तथा कान्तस्तथोभौ संयतोद्यतौ। कष्टं भविष्यतीत्याहुरमृताः पूर्ववत्स्मृताः॥ न म्रियन्तेऽमृताः (भा०पा०सू० ३.२.१८८)। अनुक्तसमुच्चयार्थश्चकारः। ... तथा सुप्तः शयित आशितो लिप्तस्तृप्त इत्येवमादयोऽपि वर्तमाने द्रष्टव्याः (का०वृ० ३.२.१८८)। चकारोऽनुक्तसमुच्चयार्थः (वै०सि०कौ० ३०८९)।

मत्सम्बन्धीनि फलमूलानि गृहाण इति सामान्यसम्बन्धेन षष्ठी। यद्वा मे इति अनुगृह्णीष्व इत्यनेनान्वितम्। मे ममोपर्यनुगृह्णीष्वानुग्रहं कुरुष्व इति तात्पर्यम्।

## १.४७ आरुह्यतां नौकाम्

स्वयमेव दृढं नावमानिनाय सुलक्षणाम्।
स्वामिन्नारुह्यतां नौकां सीतया लक्ष्मणेन च॥

– अ०रा० २.६.१८

गङ्गापारं गन्तुकामं रामं राजीवलोचनं स्वामिनम् आरुह्यतां नौकाम् इत्युवाच निनाय नावं निषादः। अत्र आरुह्यताम् इति कर्मवाच्यप्रयोगः।

कर्मवाच्यप्रयोगेषु प्रथमा कर्मकारके।
तृतीयान्तो भवेत्कर्ता कर्माधीनं क्रियापदम्॥

– अस्मद्गुरुचरणाः

इति नियमानुसारमत्र आरुह्यताम् इति कर्मवाच्यप्रयोगः। अत्र नौका इति कर्म। एवमत्र प्रथमाविभक्त्या भवितव्यम् आरुह्यतां नौका इत्येव आरुह्यतां नौकाम् इत्यार्ष-प्रयोगः प्रतिभाति। कारणमिदं यद्यस्मिन्नर्थे प्रत्ययो भवति स उक्तः। लकाराः प्रायस्त्रिषु कर्तरि कर्मणि भावे च भवन्ति। तत्र सूत्रम् लः कर्मणि च भावे चाकर्मकेभ्यः (पा०सू० ३.४.६९) इति। अकर्मकेभ्यो धातुभ्यः कर्तरि भावे चैवं सकर्मकेभ्यो धातुभ्यः कर्मणि कर्तरि च लकारा भवन्त्विति। अत्राऽऽशङ्क्यते यत् भावकर्मणोः (पा०सू० १.३.१३) इत्यस्मात्सूत्राद्भावकर्मणोर्ज्ञाने कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यस्मात् कर्तृ-पदस्यावगतौ भावे कर्तरि कर्मणि लकाराः स्युरिति द्वाभ्यां सूत्राभ्यामुपात्तं[120] किमनेन सूत्रारम्भेण इति चेन्न। सूत्राभावे सकर्मकेभ्यो धातुभ्यो लकारा भावेऽपि भविष्यन्ति प्रतिरोधकाभावात्। एवं घटं क्रियते इत्यनिष्टप्रयोगः स्यात्। अकर्मकेभ्यश्च धातुभ्यः कर्मणि लकारा भविष्यन्ति। तदर्थं सूत्रारम्भ आवश्यकः। न च अकर्मकेभ्यो भावे लः इत्येव न्यासोऽस्तु। एतन्न्यासे असति बाधके सर्वं वाक्यं सावधारणं भवति[121] इति न्यायेन अकर्मकेभ्यो भाव एव लः इति नियमे जातेऽकर्मकेभ्यो भाव एव लकारा

[120] एताभ्यां सूत्राभ्यां कर्मणि भावे कर्मव्यतिहारे कर्तरि चात्मनेपदप्रत्ययाः स्युरित्युपात्तम्। तिप्तस्झि-सिप्थस्थमिब्वस्मस्ताताञ्झथासाथान्ध्वमिड्वहिमहिङ् (पा०सू० ३.४.७८) लः परस्मैपदम् (पा०सू० १.४.९९) तङानावात्मनेपदम् (पा०सू० १.४.१००) इत्येभिर्लादेशाः परमैपदसञ्ज्ञका आत्मनेपदसञ्ज्ञका वा स्युरित्युपात्तम्। ततः कर्मणि भावे कर्तरि च लादेशाः स्युरित्युपात्तम्। तस्माद्वह्निधूमन्यायेन कर्मणि भावे कर्तरि च लकाराः स्युरित्यप्युपात्तम्। तथा च शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) इत्यस्मात्कर्तरि परस्मैपदसञ्ज्ञका लादेशाः स्युरित्युपात्तम्। अपि च कर्तरि कृत् (पा०सू० ३.४.६७) इत्यस्माल्लकाराः कर्तरि स्युरित्युपात्तम्। तेषां कृत्त्वात्।

[121] मूलं मृग्यम्।

भविष्यन्ति न कर्तरि। तदा रामः शेते इत्यादिप्रयोगा न भविष्यन्ति रामेण क्रीड्यते इत्यादयो भावप्रयोगा एव सेत्स्यन्ति। एवकारस्य त्रिधाऽर्थोऽस्मत्सम्प्रदाये प्रसिद्धोऽन्ययोग-व्यवच्छेदोऽयोगव्यवच्छेदोऽत्यन्तायोगव्यवच्छेदश्च। अन्ययोगव्यवच्छेदो नामान्यसम्बन्धि-योगनिवर्तकत्वम्। अयोगव्यवच्छेदो नाम योगाभावनिवर्तनम्। अत्यन्तायोगव्यवच्छेदो नाम योगत्वावच्छिन्ने प्रतियोगितावच्छेदकाभावव्यावर्तकत्वम्। यत्र विशेषणसङ्गत एवकारो भवति तत्रान्ययोगो व्यवच्छिद्यते यथा नीलमेवोत्पलम् अत्र नीलत्वप्रतिष्ठापनेन श्वेतत्वादीनां व्यवच्छेदः। विशेष्यसङ्गत एवकारे सत्ययोगो व्यवच्छिद्यते यथा दाशरथी राम एव सर्वावतारिब्रह्म। अत्यन्तायोगो व्यावर्त्यते क्रियासङ्गतेनैवकारेण यथा दाशरथी रामः शरणागतान् रक्षत्येव। इत्थम् अकर्मकेभ्यो भाव एव लकारः इत्येवकारेण कर्ता व्यवच्छिद्यते तथा रामो राजते मुकुन्दः इत्यादयः प्रयोगा न भविष्यन्ति। लो भावे चाकर्मकेभ्यो इति सूत्र्यतां चकारेण कर्ताऽऽगमिष्यति पुनर्द्वितीयचकारस्य किं प्रयोजनमिति चेत्सत्यम्। तथा सत्यकर्मकेभ्य एव कर्तरि प्रयोगो भविष्यति। एवम् आरामे रमते रामः इत्यादय एव प्रयोगाः सेत्स्यन्ति। एवं सकर्मकधातोः कर्तरि प्रयोगो नैव सम्पत्स्यते। तथा सति लश्च भावे चाकर्मकेभ्यः न्यासो भवतु। द्वितीयचकारेण सकर्मकेभ्योऽपि कर्तरि लकारो भविष्यति पुनः कर्मणि इति पदस्य काऽऽवश्यकता इति चेत्। कर्मणि पदाभावे रामो रावणं हन्ति इत्यादय एव प्रयोगाः सम्पत्स्यन्ते तथा च रामेण रावणो हन्यते इत्यादयः प्रयोगा न निष्पत्स्यन्ते। न च यथा द्वितीयचकारेण कर्तरि इत्यस्यानुकर्षणं[१२२] तथैव कर्मणि इत्यस्य[१२३] कथं नेति चेत् कर्मणि इत्यस्य पुनर्वैयर्थ्यं सत्यम्। उत्तरसूत्रेऽनुवृत्त्यर्थमिदम्। न च सकर्मकेभ्यः कर्तरि कर्मणि च लकाराः इति कुत आयातं सूत्रे। अकर्मकेभ्यो भावे लकारविधानात् कर्मणि इति पदग्रहणेन तत्र लकारस्य प्राप्तत्वात्कर्मणश्चाकर्मक-धातुष्वसम्भवात् सकर्मकेभ्यः इत्यस्य सुतरां लाभः। नास्ति कर्म येषां त अकर्मकाः कर्मणा सहिताः सकर्मकाः। यत्र फलव्यापारौ द्वावपि धातुवाच्यावेकस्मिन्नधिकरणे तिष्ठतः स एवाकर्मको यत्र च फलव्यापारौ धात्वर्थौ विरुद्धमधिकरणमधितिष्ठतस्तत्रैव सकर्मकत्वम्। यद्यपि प्राचीना बालोपलालनार्थमिमां कारिकामपाठिषुर्यत् –

लज्जासत्तास्थितिजागरणं वृद्धिक्षयभयजीवितमरणम्।
शयनक्रीडारुचिदीप्त्यर्थं धातुगणं तमकर्मकमाहुः॥[१२४]

इति। किन्त्विदं न्यूनम्। रामः पश्यति, रावणो माद्यति, लक्ष्मणः परिश्राम्यति, रामो हसति इत्यादीनामसङ्ग्रहात्। अतो व्यवस्थितं लक्षणम् स्वार्थव्यापारसमानाधिकरणफल-

१२२ कर्तरि कृत् (पा०सू० ३.४.६७) इत्यस्मात्।
१२३ उपमाने कर्मणि च (पा०सू० ३.४.४५) इत्यस्मान्मण्डूकप्लुत्या।
१२४ मूलं मृग्यम्।

वाचकत्वमकर्मकत्वम् इति। कर्मवाच्ये कर्मणि लकारे नौका आरुह्यताम् इत्येव वरमुक्ते कर्मणि प्रथमानियमादिति चेदुच्यते। आरुह्यताम् इत्यविवक्षितकर्माकर्मकधातुप्रयोगः। नौकां दृष्ट्वा आरुह्यताम् यद्वा नौकां सनाथयिष्यताऽऽरुह्यतां भवता इति तात्पर्यम्। यद्वा आरुह्य इति ल्यबन्तः प्रयोगः तां नौकां आरुह्य स्वामिन् पारं व्रज इति निदर्शयत्यन्यथा स्वामिन् इति कथयित्वा कर्तृसम्बोधनं पुनः आरुह्यताम् इति कर्मवाच्यं कथं प्रयुञ्जीत। न च स्वामिन्। भवता आरुह्यताम् इति चेत्। सम्भवत्येकवाक्यत्वे वाक्यभेदो न युज्यते (श्लो०वा० १.९) इति वचनबलेन निरर्थकवाक्यभेदस्यानौचित्यात् स्वामिन् इति शब्देन सह ल्यबन्तप्रयोगमेव रोचयामहे। तद्योगे च तां नौकाम् इति कर्मणि द्वितीया साध्वी। यद्वा आरोहणमित्यारुट् इति विग्रहे आङ्पूर्वकरुह् धातोः (रुहँ बीजजन्मनि प्रादुर्भावे च धा०पा० ८५९) क्विप्।[१२५] ततः सुप आत्मनः क्यच् (पा०सू० ३.१.८) इत्यनेन आत्मन आरुहमिच्छति इति विग्रहे आरुह्यति। सनाद्यन्ता धातवः (पा०सू० ३.१.३२) इत्यनेन धातु-सञ्ज्ञायां तस्यैव लोङ्लकारप्रथमपुरुषैकवचनान्तं रूपम् आरुह्य अतो द्वितीया। यद्वाऽऽकृति-गणत्वात् आङ्पूर्वको रुह् धातुर्दिवादिगणे पठ्यताम्।[१२६] तथा च धातुसञ्ज्ञायां लङ्कारे तिप्प्रत्यये दिवादिभ्यः श्यन् (पा०सू० ३.१.६९) इत्यनेन श्यन् विकरणेऽनुबन्धकार्ये आरुह्यति इति रूपं भवति[१२७] तस्यैव लोङ्लकारे प्रथमपुरुषैकवचने रूपम् आरुह्य इति।[१२८]

---

[१२५] आङ्पूर्वकात् रुह् धातोः सम्पदादिभ्यः क्विप् (वा० ३.३.१०८) इत्यनेन भावे क्विप्। सर्वापहारिलोपे कित्त्वाल्लघूपधगुणनिषेधे आरुह् इति प्रातिपदिके जाते विभक्तिकार्ये सौ प्रत्यये हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन सोर्लोपे हो ढः (पा०सू० ८.२.३१) इत्यनेन ढत्वे झलां जशोऽन्ते (पा०सू० ८.२.३९) इत्यनेन जश्त्वे वाऽवसाने (पा०सू० ८.४.५६) इत्यनेन वैकल्पिकचर्त्वे आरुट् इति सिध्यति।

[१२६] बहुलमेतन्निदर्शनम् (धा०पा० ग०सू० १९३८) आकृतिगणोऽयम् (धा०पा० ग०सू० १९९२) भूवादिष्वेतदन्तेषु दशगणीषु धातूनां पाठो निदर्शनाय तेन स्तम्भुप्रभृतयः सौत्राश्चुलुम्पादयो वाक्यकारीयाः प्रयोगसिद्धा विक्लवत्यादयश्च (मा०धा०वृ० १०.३२८) इत्यनुसारमाकृतिगणत्वाद्दिवादिगणेऽप्यूह्योऽयं धातुः।

[१२७] आ रुह् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → आ रुह् लट् → आ रुह् तिप् → आ रुह् ति → दिवादिभ्यः श्यन् (पा०सू० ३.१.६९) → आ रुह् श्यन् ति → सार्वधातुकमपित् (पा०सू० १.२.४) → ङित्त्वम् → क्ङिति च (पा०सू० १.१.५) → लघूपधगुणनिषेधः → आ रुह् य ति → आरुह्यति।

[१२८] आ रुह् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → आ रुह् लोट् → आ रुह् सिप् → आ रुह् सि → दिवादिभ्यः श्यन् (पा०सू० ३.१.६९) → आ रुह् श्यन् सि → सार्वधातुकमपित् (पा०सू० १.२.४) → ङित्त्वम् → क्ङिति च (पा०सू० १.१.५) → लघूपधगुणनिषेधः → आ रुह् य सि → सेर्ह्यपिच्च (पा०सू० ३.४.८७) → आ रुह् य हि → अतो हेः (पा०सू० ६.४.१०५) → आ रुह् य → आरुह्य।

यद्वाऽत्र कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेनात्मनेपदम्।[१२९] एवं लोड्लकारे प्रथम-पुरुषैकवचने तप्रत्यये टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) इत्यनेनैत्वे आमेतः (पा०सू० ३.४.९०) इत्यनेन आम् आदेशे आरुह्यताम्।[१३०] स्वामिन् भवान् नौकाम् आरुह्यताम् इत्यनुक्ते कर्मणि द्वितीया।

## १.४८ बहिर्वनस्य

रामो दाशरथिः सीतालक्ष्मणाभ्यां समन्वितः।
आस्ते बहिर्वनस्येति ह्युच्यतां मुनिसन्निधौ॥

– अ०रा० २.६.३०

नौकया जाह्नवीमवतीर्य सौमित्रिसीतानुचरः पदचरः श्रीरामो भरद्वाजचरणकमलं दिदृक्षुर्दृष्टिं पातयन् भरद्वाजशिष्यं प्रत्यात्मनो दर्शनेच्छां भारद्वाजाय ज्ञापयन् ब्रूते यत्सीता-लक्ष्मणसहायो रामो भवद्दर्शनं चिकीर्षन् बहिर्वनस्य तिष्ठन् प्रतीक्षत इति। तत्रैव बहिर्वनस्य इति प्रयोगं करोति। बहिर्योगे पञ्चमीति अपपरिबहिरञ्चवः पञ्चम्या (पा०सू० २.१.१२) इति सूत्रेण ज्ञापिता। अत्र पञ्चमी प्रयोक्तव्याऽऽसीत्किन्तु षष्ठी प्रयुक्ता। किमिदमार्षम्। वस्तुतस्त्विदमपि पाणिनीयम्। आस्ते बहिर्वनस्य इत्यत्र वनस्य बहिःप्रदेश आस्ते इति योजनीयम्। इत्थं चावयवावयविभावसम्बन्धमूलिका षष्ठी। यद्वा बहिर्योगे पञ्चमी इति वचनं ज्ञापकमूलकम्। यतो हि अपपरिबहिरञ्चवः पञ्चम्या (पा०सू० २.१.१२) इति समासविधायकेन सूत्रेण बहिः शब्दस्य पञ्चम्यन्तप्रादिपदिकेन समासो ज्ञाप्यते। वनाद्बहिरिति बहिर्वनम्। तेनैव बहिर्योगे पञ्चमी ज्ञापिता। यदि बहिर्योगे पञ्चमी न स्यात्तर्हि तत्र योगे समासविधानमपि न स्याद्यतः समासविधानं ततः पञ्चमीत्यन्वयव्यतिरेकाभ्यां बहिर्योगे पञ्चमी साधिता। ज्ञापक-

---

[१२९] अस्यार्थः। निषादो विवक्षति यत्स्वामिन् भवान् मां सुदृढनावमयाचत (उवाच शीघ्रं सुदृढां नावमानय मे सखे अ०रा० २.६.१७)। सैवानीता मया (स्वयमेव दृढं नावमानिनाय सुलक्षणाम् अ०रा० २.६.१८)। परन्त्वियं न राजनौः। भवान् हि ज्येष्ठराजपुत्रः। अतो भवतः कृते राजनौरेवोचिता। ज्येष्ठराजपुत्रो भूत्वाऽपि भवान् सुदृढनावमेवारोहति न राजनावम्। अयमेव कर्मव्यतिहारः। तं ध्वनयितुं निषाद आत्मनेपदं प्रयुङ्क्ते। न च निषादस्य राजनौर्न वर्तत इति चेत्। भरतशत्रुघ्नकौसल्यावसिष्ठानां कृते स एव निषादो राजनावमानेष्यति। यथाऽष्टमे सर्गे – इत्युक्त्वा त्वरितं गत्वा नावः पञ्चशतानि ह॥ समानयत्ससैन्यस्य तर्तुं गङ्गां महानदीम्। स्वयमेवानिनायैकां राजनावं गुहस्तदा॥ आरोप्य भरतं तत्र शत्रुघ्नं राममातरम्। वसिष्ठं च तथाऽन्यत्र कैकेयीं चान्ययोषितः॥ (अ०रा० २.८.३८.४०) इत्यत्र तस्य राजनौकानयनं वर्णितमस्ति।

[१३०] आ रुह् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → लोट् च (पा०सू० ३.३.१६२) → आ रुह् लोट् → आ रुह् त → दिवादिभ्यः श्यन् (पा०सू० ३.१.६९) → आ रुह् श्यन् त → सार्वधातुकमपित् (पा०सू० १.२.४) → ङित्त्वम् → ग्क्ङिति च (पा०सू० १.१.५) → लघूपधगुणनिषेधः → आ रुह् य त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → आ रुह् य ते → आमेतः (पा०सू० ३.४.९०) → आ रुह् य ताम् → आरुह्यताम्।

सिद्धं न सर्वत्र[१३१] इति नियमेन नियमोऽयं ज्ञापकसिद्धतया न सार्वत्रिकः।[१३२] अतः षष्ठी। यद्वा विवक्षाधीनानि कारकाणि भवन्ति[१३३] इति नियमेन षष्ठी। यद्वा पञ्चम्या सह बहिःशब्दस्य समासो ज्ञापितः। किन्तु बहिर्योगे पञ्चम्येव भवतु इति नेतरा विभक्तयो निषिद्धाः। केवलं बहिःशब्दस्येतरविभक्त्यन्तयोगसमास एव नियन्त्रितस्तस्मादर्थानुरोधेनात्र षष्ठी साधीयसी। पञ्चम्यां सत्यां समासाग्रहो गले पतितः षष्ठ्यां तु समास आग्रहो नास्ति। इयान् विशेषः।

## १.४९ भरद्वाजाय मुनये

सभार्यः सानुजः श्रीमानाह मां देवसन्निभः।
भरद्वाजाय मुनये ज्ञापयस्व यथोचितम्॥

– अ०रा० २.६.३२

अत्र स्वकीयं सन्देशप्रकारं तन्वन् श्रीरामो ब्रवीति भरद्वाजाय मुनये ज्ञापयस्व। अत्र भरद्वाजो जानातु त्वं प्रेरय इत्यर्थे भरद्वाजं ज्ञापयस्व। यतो ह्यण्यन्तावस्थायाः कर्ता ण्यन्ते कर्म भवति। तथा च सूत्रं गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ (पा०सू० १.४.५२)। अत्र ज्ञाधातुः (ज्ञा अवबोधने धा०पा० १५०७) बुद्ध्यर्थस्तस्याण्यन्तावस्थायां कर्ता भरद्वाज इति सम्प्रति ण्यन्तावस्थायां कर्म भवत्वित्येव पाणिनीयम्। परमत्र चतुर्थ्यपि पाणिनीयैव। भरद्वाजाय मुनय आनन्दं दातुं ज्ञापयस्व इति दाधातुयोगे (डुदाञ् दाने धा०पा० १०९१) चतुर्थी।[१३४] यद्वा भरद्वाजाय मुनये रुचितं ज्ञापयस्व इति रुचितपदाध्याहारे रुच्यर्थानां प्रीयमाणः (पा०सू० १.४.३३) इत्यनेन सम्प्रदान-सञ्ज्ञा ततश्चतुर्थी। यद्वा भरद्वाजं मुनिं हर्षयितुं ज्ञापयस्व इत्यप्रयुज्यमानतुमुन्कर्मणि चतुर्थी क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन।

## १.५० सीतया लक्ष्मणेन च

ततो राजा नमन्तं तं सुमन्त्रं विह्वलोऽब्रवीत्।
सुमन्त्र रामः कुत्रास्ते सीतया लक्ष्मणेन च॥

– अ०रा० २.७.३

---

१३१ मूलं मृग्यम्।

१३२ अपपरिबहिः। अपपरियोगे ‘पञ्चम्यपाङ्परिभिः’ (पा०सू० २.३.१०) इति पञ्चमी विहिता। अञ्चूत्तरपदयोगेऽपि ‘अन्यारात्’ (पा०सू० २.३.२९) इत्यादिना विहितैव। तेनाऽत्र ‘पञ्चम्या’ इति ग्रहणं ‘बहिर्योगे पञ्चमी भवति’ इति ज्ञापनार्थम्। ‘ज्ञापकसिद्धं न सर्वत्र’ इति ‘करस्य करभो बहिः’ (अ०को० २.६.८०क) इत्यपि सिद्धम् (त०बो० ६६६)।

१३३ मूलं मृग्यम्। यद्वा कर्मादीनामविवक्षा शेषः (भा०पा०सू० २.३.५०, २.३.५२, २.३.६७) इत्यस्य तात्पर्यमिदम्।

१३४ आनन्दं दातुम् इत्यध्याहार्यमिति भावः।

श्रीरामं रथेन प्रयागं यावत्प्रेष्य प्रत्यागतमयोध्यां सुमन्त्रं प्रति राजा पप्रच्छ यत्सीतया लक्ष्मणेन च रामः कुत्रास्ते। अत्र तृतीया विमर्शास्पदम्। यतो हि नहि काचिदत्र क्रिया यां प्रत्यनयोः कर्तृत्वं संसाध्य तयोस्तृतीयोपकल्प्यताम्।[१३५] न वा कश्चन क्रियासिद्धौ व्यापारोऽवशिष्यते यद्व्यापारादनन्तरं क्रिया परिनिष्पद्येत येन करणत्वं साध्यताम्। न वा किमपि व्यापारगीतं विलोक्यते येन हेतुत्वं साधयित्वा ततश्च तृतीया क्रियताम्।[१३६] अत्रोच्यते। विनाऽपि सहार्थवाचकशब्दयोगेन तृतीया भवति वृद्धो यूना तल्लक्षणश्चेदेव विशेषः (पा०सू० १.२.६५) इत्यादिनिर्देशात्। यद्वा प्रयुक्तसहशब्दस्य विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इति वार्त्तिकेन सह इत्यस्य लोपे यः शिष्यते स लुप्यमानार्थाभिधायी इति नियमेन लुप्यमानसहार्थावगतेस्तृतीया। यद्वा प्रकृत्यादिभ्य उपसङ्ख्यानम् (वा० २.३.१८) इति वार्त्तिकेन प्रकृत्यादित्वादभेदार्थे तृतीया। प्रकृत्या चारु इतिवत्। सीतालक्ष्मणाभिन्नो राम इति भावः। सीतया लक्ष्मणेन च श्रीरामस्याभेदप्रसिद्धेः। वाल्मीकीयरामायणे द्वाभ्यामपि श्रीसीतारामाभ्यामभेदस्य प्रतिपादितत्वात् –

अनन्या हि मया सीता भास्करेण यथा प्रभा॥

– वा०रा० ६.११८.१९

इति रामवचनम्।

अनन्या राघवेणाहं भास्करेण यथा प्रभा॥

– वा०रा० ५.२१.१५

इति सीतावचनम्। उभयत्र प्रयुक्तोऽनन्यशब्दोऽभावाभावप्रतिपादनपरः। अभावाभावो हि प्रतियोगिज्ञानम्। यथा घटाभावाभावो घट एव। तथैव न अन्या अनन्या।[१३७] अन्या रामाद्भिन्ना। न अन्या अन्यभिन्ना अर्थादभिन्नैव –

प्रभा जाइ कहँ भानु बिहाई। कहँ चन्द्रिका चन्द्र तजि जाई॥[१३८]

– रा०च०मा० २.९७.६

अन्यत्वं हि भेदे सिध्यत्यनन्यत्वमभेदे।

गिरा अरथ जल बीचि सम देखियत भिन्न न भिन्न।[१३९]

– रा०च०मा० १.१८

---

[१३५] कर्तृकरणयोस्तृतीया (पा०सू० २.३.१८) इत्यनेन।

[१३६] हेतौ (पा०सू० २.३.२३) इत्यनेन।

[१३७] नञ् (पा०सू० २.२.६) इत्यनेन समासे नलोपो नञः (पा०सू० ६.३.७३) इत्यनेन नकारलोपे तस्मान्नुडचि (पा०सू० ६.३.७४) इत्यनेन नुँट्।

[१३८] एतद्रूपान्तरम्–कुत्र प्रगन्तुं शक्नोति प्रभा त्यक्त्वा प्रभाकरम्। त्यक्त्वा चन्द्रमसं कुत्र गन्तुं शक्नोति चन्द्रिका॥ (मा०भा० २.९७.६)।

[१३९] एतद्रूपान्तरम्–वागर्थतुल्यौ जलवीचितुल्यौ वाच्यौ पृथक्किन्तु विभेदशून्यौ (मा०भा० १.१८)।

इति गोस्वामिनाऽपि तत्र तत्र मानसेऽपि प्रतिपादितत्वात्। अतः प्रकृत्यादित्वादभेदे तृतीया स्वर्णसौरभसंयोग इवोत्कर्षमाटीकते। करपात्रस्वामिचरणैरपि रामायणमीमांसामङ्गलाचरणे लिखितं यत् –

सौन्दर्यसारसर्वस्वं माधुर्यगुणबृंहितम्।
ब्रह्मैकमद्वितीयं तत्तत्त्वमेकं द्विधा कृतम्॥

– रा०मी० मङ्गलाचरणे

लक्ष्मणस्याभेदत्वं तु शेषत्वात्। शेषस्तु लक्ष्मणो राजन् (अ०रा० १.४.१७) इत्यस्मिन् ग्रन्थ एवोक्तत्वाच्छेषोंऽशः श्रीरामोंऽश्यंशांशिनोर्बिन्दुसिन्धोरिवाभेदप्रसिद्धेः। सीतालक्ष्मणयोः प्रकृत्यादिगणे पठितत्वौचित्यं हि सीताया मूलप्रकृतित्वाल्लक्ष्मणस्य च जीवाचार्यत्वात्। यद्वा इत्थंभूतलक्षणे (पा०सू० २.३.२१) इदं हि सूत्रम्। अस्यार्थः किञ्चित्प्रकारस्य लक्षणे तृतीया। अर्थात् इत्थं भूतं लक्षयतीति इत्थंभूतलक्षणं तस्मिन्। कर्तरि बाहुलकाल्ल्युँट्।[140] ततश्चानुबन्धकार्ये सति युवोरनाकौ (पा०सू० ७.१.१) इत्यनेनानादेशे अट्कुप्वाङ्नुम्व्यवायेऽपि (पा०सू० ८.४.२) इत्यनेन णत्वम्। यद्वा लक्ष्यतेऽनेनेति लक्षणम्। करणाधिकरणयोश्च (पा०सू० ३.३.११७) इति करणे ल्युट्। इत्थंभूतस्य लक्षणमित्थंभूतलक्षणम् इति षष्ठीतत्पुरुषः।[141] अर्थाद्येन व्यापकचिह्नविशेषेण व्यक्तेः कश्चित्प्रकारो द्योत्यते तत्र तृतीया स्यात्। एवं हि इत्थंभूतलक्षणे इत्यनेनैव तृतीया। रामचन्द्रस्य रामत्वं हि सीतालक्ष्मणाभ्यामेव सूच्यते। यथा जटाभिस्तापसः। मौञ्जीमेखलया ब्रह्मचारी। अत्र जटा-ज्ञाप्यतापसत्वविशिष्टस्तापस एवं मौञ्जीमेखलाज्ञाप्यब्रह्मचारित्वविशिष्टो ब्रह्मचारी। तथैवात्र सीतालक्ष्मणज्ञाप्यरामत्वविशिष्टः श्रीरामः। रामत्वं हि सीतालक्ष्मणाभ्यामेव ज्ञाप्यते। रामेति नामन्यपि वर्णत्रयविवरणं कृत्वा ब्रह्ममायाजीवानिव रामसीतालक्ष्मणानवगच्छन्ति भावुकभक्ताः। एवं रकारे श्रीराम आकारे श्रीसीता मकारे च श्रीलक्ष्मणः। यथा –

रकारे रामचन्द्रः स्यान्मकारे लक्ष्मणः स्वराट्।
तयोः संयोजनार्थाय सीता आकार उच्यते॥

– इति साम्प्रदायिकाः

इत्थं सीतया लक्ष्मणेन च इति द्वावपि पाणिनीयौ।

---

[140] कृत्यल्युटो बहुलम् (पा०सू० ३.३.११३) इत्यनेन।

[141] कर्तृकर्मणोः कृति (पा०सू० २.३.६५) इत्यनेन कृद्योगा षष्ठी कृद्योगा च षष्ठी समस्यत इति वक्तव्यम् (वा० २.२.८) इत्यनेन समासः।

## १.५१ तयोः

तयोस्त्वमुदकं देहि शीघ्रमेवाविचारयन्।
न चेत्त्वां भस्मसात्कुर्यात्पिता मे यदि कुप्यति॥

– अ०रा० २.७.२८

म्रियमाणो दशरथः शरीररक्षायै राममात्रा प्रार्थितः। मरणमपरिवर्तनीयमिति साधयन् प्रसङ्गोपात्तश्रमणकुमारकथां प्रस्तुवन् शब्दवेधिबाणविक्रियमाणमहाप्रयाणश्रमण-वचनमानुपूर्वीतयाऽनुवदति यत्प्राणांस्त्यजञ्छ्रमणो दशरथं कथयति विचारं न कृत्वा तयोरुदकं देहि। अर्थान्मम पितृभ्यां जलमर्पयेति। अभीप्सिते ताभ्याम् इति चतुर्थ्यन्ते प्रयोक्तव्ये तयोः इति षष्ठ्यन्तं प्रयुक्तम्। अत्र विवक्षाधीनानि कारकाणि भवन्ति[१४२] इति नियमेन सम्बन्धविवक्षणात्षष्ठी। अथवा तयोः इत्यस्य त्वम् शब्देन सहान्वयः। अत्र च रक्ष्य-रक्षकभावसम्बन्धमूलिका षष्ठी।[१४३] यद्वा पित्रोर्म्रियमाणत्वात्तत्र सम्प्रदानविवक्षैव न। यतो हि पुत्रप्रदत्तोदकमेव पितरौ सम्यग्गृह्णीतः। अतः तयोः इति षष्ठी न पाणिनीयविरुद्धा।

## १.५२ देह्यावयोः

देह्यावयोः सुपानीयं पिब त्वमपि पुत्रक।
इत्येवं लपतोर्भीत्या सकाशमगमं शनैः॥

– अ०रा० २.७.३४

अत्र श्रमणकुमारे मृते हस्ते कलशं गृहीत्वा निकटं गच्छतो दशरथस्य चरणसञ्चार-ध्वनिं श्रुत्वा श्रमणकुमारबुद्ध्याऽन्धौ पितरौ प्राहतुर्यत् आवयोः सुपानीयं देहि। अत्र दाधातु-प्रयोगे (डुदाञ् दाने धा०पा० १०९१) कर्मणा यमभिप्रैति स सम्प्रदानम् (पा०सू० १.४.३२) इत्यनेन सम्प्रदानसञ्ज्ञा तदनुगामिनी चतुर्थीविभक्तिश्च प्रयोक्तव्या। आवाभ्यां सुपानीयं देहि इत्येव वक्तव्यम्। परमत्र षष्ठी पाणिनीयविरुद्धेव। अथोच्यते। वात्सल्यधिया पितरौ सम्प्रदानं न विवक्षतः। अर्थाज्जलदानं तु तव कर्तव्यं नैव ते कृपा न वा नैमित्तिकं कर्म। अत आवयोरुदकं देहीति भावं प्रकटयितुं सम्बन्धविवक्षा। अथवा आवयोर्मुख उदकं देहि इति मुखशब्दस्याध्याहारेणावयवावयविभावे सम्बन्धषष्ठी। यद्वा आवयोः शब्दस्य पुत्रक शब्देन

[१४२] मूलं मृग्यम्। यद्वा कर्मादीनामविवक्षा शेषः (भा०पा०सू० २.३.५०, २.३.५२, २.३.६७) इत्यस्य तात्पर्यमिदम्।

[१४३] षड्विंशतितमे श्लोके दशरथं सम्बोधयन् श्रमणः कथयति – मा भैषीर्नृपसत्तम (अ०रा० २.७.२६)। नॄन् नरान् पातीति नृपः। यथाह मनुः – ब्राह्मं प्राप्तेन संस्कारं क्षत्त्रियेण यथाविधि। सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम्॥ अराजके हि लोकेऽस्मिन्सर्वतो विद्रुतो भयात्। रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः॥ (म०स्मृ० ७.२.३)। श्रमणमते दशरथस्तु नृपसत्तमः। अर्थान्नररक्षितृश्रेष्ठः। अत एव तेन तयोस्त्वमुदकं देहि इत्यत्र रक्ष्यरक्षकभावसम्बन्धमूलिका षष्ठी प्रयुक्ता।

अन्वयः। अर्थात् हे आवयोः पुत्रक सुपानीयं देहि त्वमपि पिब इत्यन्वये आवयोः इत्यत्र जन्यजनकसम्बन्धे षष्ठी।

## १.५३ मे वद

त्वया विना न मे तातः कदाचिद्रहसि स्थितः।
इदानीं दृश्यते नैव कुत्र तिष्ठति मे वद॥

– अ०रा० २.७.६३

अत्र मृते दशरथे दूतद्वारा गुरुसन्देशं प्राप्यायोध्यां प्रत्यागतो भरतः कैकेयीसकाशं गत्वाऽदृष्ट्वा पितरं साश्चर्यं पृच्छति यत् कुत्र तिष्ठति मे वद। अत्र ब्रूधातुसमानार्थकतया (ब्रूञ् व्यक्तायां वाचि धा०पा० १०४४) अकथितं च (पा०सू० १.४.५१) इत्यनेन कर्मसञ्ज्ञा प्राप्ता कर्मणि द्वितीया (पा०सू० २.३.२) इत्यनेन च द्वितीया प्रयोक्तव्या। एवं च मां वद इत्यनेनैव भवितव्यम्। तदुपर्युच्यते। अत्र सम्प्रदानविवक्षया चतुर्थी। यद्वा मामनुग्रहीतुं वद इति गम्यमानतुमुन्प्रयोगेण तस्य कर्मणि चतुर्थी मह्यम् इति क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन तस्य च मे इत्यादेशः।[१४४] यद्वा मातः इत्यध्याहृत्य तेन सहान्वये हे मे मातः वद इत्यर्थे सम्बन्धसामान्ये षष्ठी।

## १.५४ हेऽम्ब

तामाह भरतो हेऽम्ब रामः सन्निहितो न किम्।
तदानीं लक्ष्मणो वाऽपि सीता वा कुत्र ते गताः॥

– अ०रा० २.७.७१

अत्र शोकाकुलितहृदयो भरतो मातरं पृच्छति यत् हेऽम्ब रामलक्ष्मणसीताः कुत्र गताः। अत्र हैहेप्रयोगे हैहयोः (पा०सू० ८.२.८५) इति सूत्रेण हेघटकैकारस्य प्लुते प्लुतप्रगृह्या अचि नित्यम् (पा०सू० ६.१.१२५) इत्यनेन प्रकृतिभावे हे३ अम्ब इत्येव पाणिनीयं हेऽम्ब इति कथम्। उच्यते। गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् (पा०सू० ८.२.८६) इत्यत्र प्राचाम् इत्यस्य ग्रहणं व्यर्थं सञ्ज्ञापयति यत्सर्वोऽपि प्लुतो विकल्प्यते।[१४५] तस्मादत्रापि प्लुतविकल्पः। एवं हे इत्यव्ययं मत्वा अव्ययादाप्सुपः (पा०सू० २.४.८२) इत्यनेन विभक्ति-लोपे पदान्तत्वादेकाराकारयोः एङः पदान्तादति (पा०सू० ६.१.१०९) इत्यनेन पररूपे हेऽम्ब इति सिद्धम्। यद्वा त्रिपादीस्थत्वात्सपादसप्ताध्यायीपररूपविधायकशास्त्रदृष्ट्येदमसिद्धं ततः पररूपे हेऽम्ब इति सिद्धम्। न च प्लुतारम्भसामर्थ्यादसिद्धत्वं लोपयितुं न शक्यते।

[१४४] तेमयावेकवचनस्य (पा०सू० ८.१.२२) इत्यनेन।
[१४५] इह प्राचामिति योगो विभज्यते। तेन सर्वः प्लुतो विकल्प्यते (वै०सि०कौ० ९७)।

हे३ राम राम है३ इत्यादौ प्लुतस्वरे चारिताथ्यात्। न च प्रतिलक्ष्यं लक्षणोपप्लवः[१४६] इति नियमेन प्रकृतिभावरूपे लक्ष्येऽचारितार्थ्यात्तद्वैयर्थ्ये नैवासिद्धत्वं रोधयिष्यते। अन्यत्र हे३ अरिसूदन हे३ अम्ब इत्यादिप्रयोगेषु च चारितार्थ्यात्।[१४७] यद्वा प्लुतप्रगृह्या अचि नित्यम् (पा०सू० ६.१.१२५) इत्यत्र नित्यग्रहणस्य प्रायिकत्वात्प्रकृतिभावाभावः।[१४८]

## १.५५ तव राज्यप्रदानाय

रामस्य यौवराज्यार्थं पित्रा ते सम्भ्रमः कृतः।
तव राज्यप्रदानाय तदाहं विघ्नमाचरम्॥

– अ०रा० २.७.७२

कैकयी भरतं प्रबोधयन्ती प्राह यत् तव राज्यप्रदानायाहमेव रामराज्ये विघ्नमाचरम्। अत्र दानयोगे चतुर्थी वक्तव्याऽऽसीत् तुभ्यं राज्यप्रदानाय इति। तव इति सम्बन्धविवक्षायां षष्ठी। अर्थात् न च राज्यमिदं परकीयं मम विवाहे पितुः पण आसीद्यन्मम दौहित्र एव राज्याधिकारी भवेत्तत इदं राज्यमधिकारतस्तव। अस्मादधिकार्याधिकारकभावे[१४९] सम्बन्धे षष्ठी। न च सापेक्षमसमर्थवत् इति नियमेन राज्यशब्दस्य तवशब्देन सह साकाङ्क्षतया तव इत्यस्य च विशेषणत्वात् राज्यप्रदानाय इति कथं तत्पुरुष इति वाच्यम्। नित्यसाकाङ्क्षा-स्थले तस्य नियमस्यानङ्गीकारात्। देवदत्तस्य गुरुकुलम् (भा०पा०सू० २.१.१) इत्यादि-भाष्यप्रयोगाच्च। यद्वा कृते इत्यध्याहार्यम्। अर्थात् तव कृते राज्यप्रदानाय इति। सम्बन्धे षष्ठी।

## १.५६ तवैव

राज्यं रामस्य चैकेन वनवासो मुनिव्रतम्।
ततः सत्यपरो राजा राज्यं दत्त्वा तवैव हि॥

– अ०रा० २.७.७४

अत्र कैकेयी रामवनवासघटनां वर्णयति। तवैव राज्यं दत्त्वा पिता दिवं गतः। दत्त्वा

[१४६] मूलं मृग्यम्।

[१४७] संहिताया अविवक्षायामिति शेषः।

[१४८] १४२तमे पृष्ठे १.१७ मुनीन्द्राहम् इति प्रयोगस्य विमर्शं पश्यन्तु – “यथा ङमो ह्रस्वादचि ङमुण्नित्यम् (पा०सू० ८.३.३२) इत्यत्र नित्यग्रहणस्य प्रायिकत्वात् इको यणचि (पा०सू० ६.१.७७) सुप्तिङन्तं पदम् (पा०सू० १.४.१४) इत्यादौ न ङुण्मुटौ।”

[१४९] अधिक्रियते यत्तत् अधिकार्यम्। तयोरेव कृत्यक्तखलर्थाः (पा०सू० ३.४.७०), ऋहलोर्ण्यत् (पा०सू० ३.१.१२४) इत्याभ्याम् अधिपूर्वककृधातोः (डुकृञ् करणे धा०पा० १४७२) कर्मणि कृत्यसञ्ज्ञको ण्यत्। अधिकरोतीति अधिकारकः। अधिपूर्वककृधातोः ण्वुल्तृचौ (पा०सू० ३.१.१३३) इत्यनेन कर्तरि ण्वुल्।

इति स्पष्टो दाधातोः (डुदाञ् दाने धा०पा० १०९१) क्त्वान्तप्रयोगः। अत्र तुभ्यम् इति सम्प्रदानाच्चतुर्थीप्रयोग एव सम्यग्भाति। तव इति षष्ठी तु सम्बन्धसामान्ये। यद्वा तव कृते राज्यं दत्त्वा। यद्वा तव शासनाय राज्यं दत्त्वा इति।[१५०] यद्वा कैकेयीमुखात्सरस्वत्येव भरतं सङ्केतयति यदिदं राज्यं तुभ्यं महाराजेन न दत्तम्। यावद्रामागमनं शासनाय दत्तम्। अतस्तव तत्र स्वत्वं नास्ति। स्वत्वं तु राघवस्यैव। तस्मात् रजकस्य वस्त्रं ददाति इतिवदत्र राज्यपरावर्तनसङ्केते षष्ठी।

## १.५७ मे

असम्भाष्याऽसि पापे मे घोरे त्वं भर्तृघातिनी।
पापे त्वद्गर्भजातोऽहं पापवानस्मि साम्प्रतम्।
अहमग्निं प्रवेक्ष्यामि विषं वा भक्षयाम्यहम्॥

– अ०रा० २.७.८०

कैकेयीमुखाद्रामवनवासकथाश्रवणेन जातकारुण्यकोपो भरतः कथयति हे पापे त्वं मे असम्भाष्या। अथ ऋहलोर्ण्यत् (पा०सू० ३.१.१२४) इत्यनेन तयोरेव कृत्य-क्तखलर्थाः (पा०सू० ३.४.७०) इत्यनेन च सम्पूर्वकभाष् धातोः (भाषँ व्यक्तायां वाचि धा०पा० ६१२) कर्मणि ण्यत्प्रत्यये चुटू (पा०सू० १.३.७) इत्यनेन णकारेत्सञ्ज्ञायां तस्य लोपः (पा०सू० १.३.९) इत्यनेन लोपे हलन्त्यम् (पा०सू० १.३.३) चेत्यनेन तकारेत्सञ्ज्ञायां तेनैव सूत्रेण लोपे विभक्तिकार्ये सम्भाष्या। न सम्भाष्येत्यसम्भाष्या।[१५१] असम्भाष्या इत्यत्र कर्मणि प्रत्ययविधानादनुक्तत्वाच्च कर्तुः कर्तृकरणयोस्तृतीया (पा०सू० २.३.१८) इत्यनेन तृतीयया भवितव्यम्। मया असम्भाष्यासि। मे इति कृत्यानां कर्तरि वा (पा०सू० २.३.७१) इत्यनेन वैकल्पकी षष्ठी। यद्वा मे इत्यस्मादग्रे दृष्टौ इत्यध्याहार्यम्। पापे मे दृष्टावसम्भाष्या। अत्राप्यवयवावयविभावसम्बन्धे षष्ठी।

## १.५८ मे

हा राम हा मे रघुवंशनाथ जातोऽसि मे त्वं परतः परात्मा।
तथाऽपि दुःखं न जहाति मां वै विधिर्बलीयानिति मे मनीषा॥

– अ०रा० २.७.८६

अत्र शोकसन्तप्तहृदया भगवती कौसल्याम्बा श्रीभरतसमक्षं श्रीराममुद्दिश्य विलपति।

---

[१५०] शासनाय इत्यध्याहार्यमिति भावः। एवं तव इत्यत्र कर्तृकर्मणोः कृति (पा०सू० २.३.६५) इत्यनेन षष्ठी।
[१५१] नञ् (पा०सू० २.२.६) इत्यनेन नञ्तत्पुरुषसमासः। नलोपो नञः (पा०सू० ६.३.७३) इत्यनेन नञो नलोपे असम्भाष्या।

परतः परात्मा त्वं मे जातोऽसि। अत्र मे इति षष्ठ्यन्तं विचाराय। यतो हि जायमानस्याऽधारो माता। एवं पुत्रजन्मनि पिता निमित्तकारणं रजःशुक्रसंयोगोऽसमवायिकारणमेवं माता समवायिकारणम्।[१५२] तत्र मातरि समवायसम्बन्धेन सन्ततिरुत्पद्यते।[१५३] तथा च तस्या एवाऽधारत्वात्सप्तम्युचिता। आधारो ह्यत्रौपश्लेषिको बोध्यः संयोगरूपो न तु समवायः।[१५४] अतः मयि जातः इत्युचितं यथा भागवते –

निशीथे तमउद्भूते जायमाने जनार्दने।
देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः॥
आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कलः॥

– भा०पु० १०.३.८

इति। अत्र देवक्याम् इति सप्तम्यन्तप्रयोगः। तस्मादत्रापि सप्तम्युचितेति चेत्। उच्यते। मे कुक्षौ इत्यध्याहारे सम्बन्धे षष्ठी। यद्वा जातः इत्यस्य पुत्रोऽर्थः।[१५५] अर्थात् त्वं मे जातः पुत्रोऽसि। इत्यर्थान्तरसम्बन्धे षष्ठी। अथवा मे इति चतुर्थ्यन्तं तादर्थ्ये चतुर्थी वाच्या (वा० २.३.१३) इति वार्त्तिकेन चतुर्थी। कौसल्याहितकारी[१५६] (रा०च०मा० १.१९२.१) इति मानसेऽपि समर्थितत्वात्। अथवा भगवतः कौसल्यां निमित्तीकृत्य प्राकट्यान्नैव सप्तमी। ततः मे जातः इत्यस्य मे पुरतः प्रकटः इति नव्यं समाधानम्।

## १.५९ मे

यत्र रामस्त्वया दृष्टस्तत्र मां नय सुव्रत।
सीतया सहितो यत्र सुप्तस्तद्दर्शयस्व मे॥

– अ०रा० २.८.२५

अत्र चित्रकूटं गच्छन् भरतो निषादेन सङ्गम्य भगवच्छयनस्थानं पृच्छति यत्र भगवान् सुप्तस्तन्मे दर्शयस्व। अत्र अहं पश्यानि त्वं प्रेरय इत्यर्थे त्वं मां दर्शयस्व इत्येव द्वितीयोचिता। चतुर्थीप्रयोगस्तु सम्प्रदानविवक्षया। भरतो दानरूपेण स्थानदर्शनं याचते। यद्वा मां सुखयितुं

[१५२] कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात्। यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्। यथा तन्तवः पटस्य पटश्च स्वगतरूपादेः। कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत्कारणमसमवायिकारणम्। यथा तन्तुसंयोगः पटस्य। तन्तुरूपं पटरूपस्य। तदुभयभिन्नं कारणं निमित्तकारणम्। यथा तुरीवेमादिकं पटस्य (त०स० ४०)।

[१५३] यस्मिन्समवेतं सत्समवायेन सम्बद्धं सत्कार्यमुत्पद्यते तत्समवायिकारणमित्यर्थः ... समवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणत्वं समवायिकारणतत्वमिति (त०स० न्या०बो०व्या० ४०)।

[१५४] अनयोरयं भेदः – अयुतसिद्धयोस्सम्बन्धः समवायः। अन्ययोस्तु संयोगः (बा०म० ६३३)।

[१५५] यथा अयि जात कथयितव्यं कथय (उ०रा०च० ४.२३) इति भवभूतिप्रयोगे।

[१५६] एतद्रूपान्तरम्–कोसलात्मजाहितावहो (मा०भा० १.१९२.१)।

दर्शयस्व इति क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन चतुर्थी।

॥ इत्ययोध्याकाण्डीयप्रयोगाणां विमर्शः ॥

अध्यात्मरामायणसंसृतानां बहिःस्थितानामिव पाणिनीयात्।
मया पदानां प्रथमो विमर्शो शोधे परिच्छेद इति व्यधायि॥

इत्यध्यात्मरामायणेऽपाणिनीयप्रयोगाणांविमर्शनामके शोधप्रबन्धे प्रथमाध्याये प्रथमपरिच्छेदः।

॥ अथ प्रथमाध्याये द्वितीयः परिच्छेदः ॥

॥ अथारण्यकाण्डीयप्रयोगाणां विमर्शः ॥

## १.६० सहितेन मे

इतः परं प्रयत्नेन गन्तव्यं सहितेन मे।
धनुर्गुणेन संयोज्य शरानपि करे दधत्॥

– अ०रा० ३.१.१२

प्रयोगोऽयमध्यात्मरामायणेऽरण्यकाण्डे प्रथमे सर्गे श्रीरामेण विहितः। चित्रकूटं त्यक्त्वा पश्चात्सीतालक्ष्मणाभ्यां सह कियद्दूरं गत्वा घोरकाननं निरीक्ष्य लक्ष्मणं सतर्कयति यत् इतः परं मे सहितेन त्वया गन्तव्यम्। सहितेन इति लक्ष्मणस्य विशेषणम्। तथा च सहयुक्तेऽप्रधाने (पा०सू० २.३.१९) इत्यनेनात्र तृतीयायां मया सहितेन त्वया गन्तव्यं मे इति कथमिति चेत्। सम्बन्धविवक्षायां षष्ठी। यद्वा हितेन सह वर्तमानः सहितः। तेन सहेति तुल्ययोगे (पा०सू० २.२.२८) इत्यनेन समासः।[१५७] तेनात्र मे इत्यस्य हितशब्देनान्वयः। तत्र मे हितसहितेन त्वया गन्तव्यम् इति श्रीरामस्य तात्पर्यम्। न च सापेक्षमसमर्थवत् इति वचनेन हितशब्दस्य मे इत्यनेन सापेक्षतया कथं समासः। नित्यसापेक्षस्थल उक्तनियमस्यानादरात्। यद्वा गमनक्रियायाः कर्ता श्रीरामः। एवं हितेन सह वर्तमानेनेति सहितेन त्वया लक्ष्मणेन सह इतो मे गन्तव्यम्। अत्र तव्यत्प्रत्ययो भावे।[१५८] तस्मादनुक्तकर्तरि यद्यपि तृतीया प्राप्नोति तथाऽपि कृत्यानां कर्तरि वा (पा०सू० २.३.७१) इति सूत्रेण कृत्याः (पा०सू० ३.१.९५) इत्यधिकारे विहितस्य तव्यत् प्रत्ययस्य कर्तरि रामवाच्येऽस्मच्छब्दे तृतीयास्थाने षष्ठी मम इति तस्य मे इत्यादेशः।[१५९] यद्वा बन्धुना इत्यध्याहार्यम्। मे बन्धुना त्वया गन्तव्यम् इति विग्रहे पाल्यपालकभावे स्वस्वामिभावे वा षष्ठी। यद्वा कृते इत्यध्याहार्यम्। मे मम कृते सहितेन त्वया गन्तव्यम्। यद्वा मे इति चतुर्थ्यन्तं मे मह्यं गन्तव्यम्। तादर्थ्ये चतुर्थी वाच्या (वा० २.३.१३) इति चतुर्थी। अर्थात् इतः पूर्वं मया साकं त्वं स्वसुखानुभूत्याऽयासीः किन्त्वधुनेतः परं राक्षससङ्ग्रामे महत्त्वपूर्णयोगदानाय मदर्थमेव गन्तव्यम् इति श्रीरामस्य तात्पर्यं प्रतिभाति। रामरावणसङ्ग्रामे मेघनादादिवधे लक्ष्मणस्य महत्त्वपूर्णा भूमिका सर्वैरपि ज्ञाता। अथवा मया इत्यर्थे मे इत्यव्ययम्।

[१५७] वोपसर्जनस्य (पा०सू० ६.३.८२) इत्यनेन सह इत्यस्य स इत्यादेशः।
[१५८] तयोरेव कृत्यक्तखलर्थाः (पा०सू० ३.४.७०) इत्यनेन।
[१५९] तेमयावेकवचनस्य (पा०सू० ८.१.२२) इत्यनेन।

## १.६१ तव दास्यामि

तव सन्दर्शनाकाङ्क्षी राम त्वं परमेश्वरः।
अद्य मत्तपसा सिद्धं यत्पुण्यं बहु विद्यते।
तत्सर्वं तव दास्यामि ततो मुक्तिं व्रजाम्यहम्॥

– अ॰रा॰ ३.२.५

श्रीसीतालक्ष्मणसमेतश्रीरामेण शरभङ्गश्चितायां शरीरं दिधक्षुः प्राप्यते। अथात्र सम्पूर्णस्य तपसः पुण्यं तुभ्यं दास्यामि। श्लोकेऽस्मिन् तुभ्यं दास्यामि इति प्रयोक्तव्ये तव दास्यामि इति प्रयुक्तम्। अत्र सम्प्रदाने सम्बन्धविवक्षायां षष्ठी। यतो हि पुण्यस्य त्वयैव सह शाश्वतः सम्बन्धः। त्वमेव पुण्यनिधानं त्वत्तः किमपि परं नास्ति। अतस्तवैव वस्तु तवैव दास्यामि मम किमपि स्वामित्वं नास्ति। यथा रजकस्य वस्त्रं ददाति इत्यत्र दाता स्वस्वत्वं न त्यजति।[१६०] पुनर्न सम्प्रदानं विनियमः। विनिमयो नाम प्रतिदानम्। तव प्रतिदास्यामि इदमेव वाक्यम्।[१६१] प्रति इत्यस्य विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा॰ ५.३.८३) इत्यनेन लोपः। अथवा तव दास्यामि येन त्वं राक्षसानां संहारं कुरु। उपासकानामयं नियमो यत्सत्कर्माणि समाचरन्ति तेषां फलञ्च स्वस्मायिष्टदेवाय प्रयच्छन्ति यथा भागवते –

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्याऽऽत्मना वाऽनुसृतस्वभावात्।
करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत्॥

– भा॰पु॰ ११.२.३६

अत एव जय जय इति कथयन्ति जनाः। वाल्मीकिरप्यन्तिमवाक्यं लिखति बलं विष्णोश्च वर्धताम् (वा॰रा॰ ६.१२८.१२१)।

## १.६२ समर्प्य रामस्य

समर्प्य रामस्य महत्सुपुण्यफलं विरक्तः शरभङ्गयोगी।
चितिं समारोहयदप्रमेयं रामं ससीतं सहसा प्रणम्य॥

– अ॰रा॰ ३.२.६

अत्र भगवाञ्छरभङ्गः समस्तं पुण्यजातं श्रीरामाय समर्पयति। अत्र रामस्य समर्प्य

[१६०] दानं चापुनर्ग्रहणाय स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनम्। अत एव "रजकस्य वस्त्रं ददाति" इत्यादौ न भवति (त॰बो॰ ५६९)। रजकवस्त्रदाने वस्त्रपरावर्तनात्स्वस्वत्वनिवृत्तिर्न परस्वत्वोत्पादनञ्च न। तस्मान्न सम्प्रदानत्वम्। एवमेवात्र भगवत्पुण्यदानेऽपि भगवत एव पुण्यस्वामित्वात्स्वस्वत्वनिवृत्तिर्न पर-स्वत्वोत्पादनञ्च न। तस्मान्न सम्प्रदानत्वम्। अयं भावः।

[१६१] अत्र शरभङ्गः पुण्यं ददाति मुक्तिं च प्राप्नोति। भगवांश्च पुण्यं प्राप्नोति मुक्तिं च ददाति। इदमेव प्रतिदानम्। भगवान् पुण्यात्प्रतियच्छति मुक्तिमिति भावः।

इति लिखितम्।[१६२] समर्प्य इति पदस्य योगेन चतुर्थी प्रयोक्तव्या दाधातुसमानार्थकत्वात्। किन्त्वत्र षष्ठी किमपि विशेषं वक्ति। रामस्यैव पुण्यजातं न्यासरूपेण मम पार्श्वे आसीत्साम्प्रतं परावर्तयामि इमं भावं ध्वनयितुं रामस्य इति। यद्वा रामस्य करे समर्प्य इत्यध्याहृते सम्बन्ध-सामान्यविवक्षायां षष्ठी।[१६३]

## १.६३ शरभङ्गयोगी

समर्प्य रामस्य महत्सुपुण्यफलं विरक्तः शरभङ्गयोगी।
चितिं समारोहयदप्रमेयं रामं ससीतं सहसा प्रणम्य॥

– अ०रा० ३.२.६

अत्र राघवेन्द्रं प्रणम्य पुण्यजातं समर्प्य महर्षिः शरभङ्गश्चितां समारोहत्। शरभङ्ग एव योगीति शरभङ्गयोगी इति विग्रहे कर्मधारयः। अत्र योगिशब्दः शरभङ्गशब्दस्य विशेषणम्। अन्यः कोऽपि शरभङ्गो न योग्येवायं हि शरभङ्गयोगी संसारजनस्तु रसभङ्ग-योगीति। विशेषणत्वं नाम विद्यमानत्वे सति विधेयान्वयित्वे सतीतरव्यावर्तकत्वम्। अत्रेदं ध्येयं विशेषणमुपलक्षणमुपाधिरिमे त्रयः प्रायः समाना अतिसूक्ष्ममन्तरमेतेषु। विशेषण-लक्षणमुक्तम्। उपाधिरविद्यमानत्वे सति विधेयान्वयित्वे सतीतरव्यावर्तकत्वम्। उपलक्षणं ह्यविद्यमानत्वे सति विधेयानन्वयित्वे सतीतरव्यावर्तकत्वम्। यथा काकवन्तो देवदत्तस्य गृहाः इति। एवमेवेतरव्यावर्तकतया योगीति विशेषणं शरभङ्गश्च विशेष्यम्। तथा विशेषणं विशेष्येण बहुलम् (पा०सू० २.१.५७) इत्यनेन समासे प्रथमानिर्दिष्टं समास उपसर्जनम् (पा०सू० १.२.४३) समासविधायके शास्त्रे प्रथमया निर्दिष्टं पदं समास उपसर्जनसञ्ज्ञं स्यात्। अत्र समासविधायकं शास्त्रं विशेषणं विशेष्येण बहुलम् इति। प्रथमया निर्दिष्टं विशेषणम् इति। अत्रानुपूर्व्यां न तात्पर्यं तस्या अनुपयोगात्। विशेषणम् इत्यानुपूर्व्याः विशेष्येण इत्यानुपूर्व्या सह समासाभावादनुपयोगाच्च। तस्मादानुपूर्व्या आनुपूर्व्यभिधेये तात्पर्यमत्र। विशेषणवाचकपदमित्यर्थः। एवं नीलम् उत्पलम् इत्यत्र नीलम् इत्यस्योपसर्जनसञ्ज्ञा। न च समासविधायके शास्त्रे त्रीणि पदानि विशेषणम् विशेष्येण बहुलम् इत्येतेष्वेकं

[१६२] णिजन्तात् सम् पूर्वकात् ऋधातोः (ऋ गतिप्रापणयोः धा०पा० ९३६) क्त्वा प्रत्यये समर्प्य इति रूपं सिध्यति। ऋ → हेतुमति च (पा०सू० ३.१.२६) → ऋ णिच् → ऋ इ → अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (पा०सू० ७.३.३६) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → ऋ पुँक् इ → ऋ प् इ → पुगन्त-लघूपधस्य च (पा०सू० ७.३.८६) → उरण् रपरः (पा०सू० १.१.५१) → अर्प् इ → अर्पि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा। सम् अर्पि → समानकर्तृकयोः पूर्वकाले (पा०सू० ३.४.२१) → समर्पि क्त्वा → कुगतिप्रादयः → समासेऽनञ्पूर्वे क्त्वो ल्यप् (पा०सू० ७.१.३७) → समर्पि ल्यप् → समर्पि य → णेरनिटि (पा०सू० ६.४.५१) → समर्प् य → समर्प्य।

[१६३] अवयवावयविभावमूलकश्चात्र सम्बन्धः।

तृतीयान्तं द्वे च प्रथमान्ते। यथा विशेषणम् इति प्रथमानिर्दिष्टं तथैव बहुलम् इत्यपि। अस्य कथं नोपसर्जनसञ्ज्ञेति चेत्सत्यम्। उपसर्जनसञ्ज्ञाविधायकसूत्रं प्रथमानिर्दिष्टं समास उपसर्जनम् इति। अत्र समासे इति सप्तमी च वैषयिकी। विषयता च घटकत्वरूपा। अर्थात्समासे घटकतया सत्प्रविष्टं सत्समासविधायकसूत्रे प्रथमया निर्दिष्टमेवोपसर्जन-सञ्ज्ञम्। बहुलम् इति प्रथमया निर्दिष्टं किन्तु समासे घटकतया न प्रविष्टम्। अतो न दोषः। तस्मादुपसर्जनसञ्ज्ञायाम् उपसर्जनं पूर्वम् (पा०सू० २.२.३०) इत्यनेन पूर्वप्रयोगे सति योगिशरभङ्गः न तु शरभङ्गयोगी इति। अत्रोच्यते। पूर्वनिपातप्रकरणमनित्यमिति पूर्वमेवोपपादितम्। तेन शरभङ्गशब्दस्य पूर्वप्रयोगः। अथवा विशेषणविशेष्यभावे कामचारः। प्रत्येकं पदं प्रत्येकस्य विशेषणं विशेष्यञ्च भवति। को योगी योगिनस्तु बहवस्तदा शरभङ्ग इति। अत्रापि त्वितरव्यावर्तकता। तस्माच्छरभङ्गशब्दस्येतरव्यावर्तकतया विशेषणता। ततश्च पूर्वप्रयोगः। यद्वाऽनेन सूत्रेण समासस्त्यज्यताम्। मयूरव्यंसकादयश्च (पा०सू० २.१.७२) इत्यनेन समासः। भाष्याब्धिः (भा०प्र० मङ्गलाचरणे ६) इति कैयटेनापि सरणिस्वीकारात् शरभङ्ग एव योगी इति विग्रहः। यद्वा शरं चिता तस्मिन् शरीरभङ्ग इति शरभङ्गस्तमेव योजयितुं शीलमस्य इति विग्रहे सुप्यजातौ णिनिस्ताच्छील्ये (पा०सू० ३.२.७८) इत्यनेन णिनिप्रत्ययः। अनुबन्धलोपे गुणे[१६४] चजोः कु घिण्ण्यतोः (पा०सू० ७.३.५२) इत्यनेन जकारस्य कुत्वे[१६५] विभक्तिकार्ये शरभङ्गयोगी इति।

## १.६४ आदौ ऋषीणाम्

शेषांशं शङ्खचक्रे द्वे भरतं सानुजं तथा।
अतश्चादौ ऋषीणां त्वं दुःखं मोक्तुमिहार्हसि॥

– अ०रा० ३.२.१६

अत्र सीतालक्ष्मणसमन्वितं श्रीरामं दृष्ट्वा तं ब्रह्म ज्ञात्वा कथयन्ति मुनीश्वरा यत् ऋषीणामादौ त्वं दुःखं हर्तुमर्हसि। अत्र एचोऽयवायावः (पा०सू० ६.१.७८) इत्यनेनाऽवादेशोऽनिवार्यः। आदावृषीणाम् इत्येव भवेत् आदौ ऋषीणाम् इति त्वपाणिनीयमिव। अत्रोच्यते। सन्धेरविवक्षया। साम्प्रतं भगवान् राक्षसैः सह विग्रहं चिकीर्षत्यतो राक्षसैः सह सन्धिरनुचित इति भावं ध्वनयितुमत्र सन्धिर्न। यथा पत्न्या सह विजिघृक्षुर्भर्तृहरिर्नीतिशतकस्य द्वितीये श्लोके कथयति –

यां चिन्तयामि सततं मयि सा विरक्ता
साऽप्यन्यमिच्छति जनं स जनोऽन्यसक्तः।

[१६४] पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) इत्यनेन।

[१६५] कुत्वे सति स्थानेऽन्तरतमः (पा०सू० १.१.५०) इत्यनेन गत्वम्।

अस्मत्कृते च परिशुष्यति काचिदन्या
धिक्ताञ्च तञ्च मदनञ्च इमाञ्च माञ्च॥

– भ०नी० २

अत्र सन्धिरिष्टो नाऽसीदतः श्लोकेऽपि मदनञ्च इमाञ्च इत्यत्र न सन्धिस्तथैवात्रापि राक्षसैः सह विग्रह इष्टोऽतोऽसन्धिप्रयोगः। सन्धिर्वाक्ये विवक्षाधीनो भवतीति व्याकरणसिद्धान्तः। एकपदे सन्धिर्नित्यो यथा रामेण। धातूपसर्गयोस्तथा यथा प्राच्छंति। समासेऽपि सन्धिर्नित्यो यथा रामानुजः। किन्तु वाक्ये तु विवक्षामपेक्षते तथा चोक्तम् –

संहितैकपदे नित्या नित्या धातूपसर्गयोः।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते॥

– वै०सि०कौ० २२३२

अतोऽत्र न विवक्षा। अतो न सन्धिः।

## १.६५ त्वन्मन्त्रसाधनपरेषु

त्वं सर्वभूतहृदयेषु कृतालयोऽपि
त्वन्मन्त्रजाप्यविमुखेषु तनोषि मायाम्।
त्वन्मन्त्रसाधनपरेष्वपयाति माया
सेवानुरूपफलदोऽसि यथा महीपः॥

– अ०रा० ३.२.२९

नीलोत्पलदलश्यामं रामं राजीवलोचनं जानकीलक्ष्मणयुतं जटावल्कलधारिणं सुतीक्ष्णस्तीक्ष्णया भक्त्या तुष्टाव रघुनन्दनम्। त्वन्मन्त्रसाधनपरेषु इति प्रायुङ्क्त सुतीक्ष्णः। तत्र हि अपयाति माया इति पदद्वयसमभिव्याहारेण त्वन्मन्त्रसाधनपरेषु इत्यत्र पञ्चम्या भवितव्यम्। अपयाति इत्यस्य हि पूर्वदेशत्यागानुकूलो व्यापारोऽर्थः। तत्र च कस्मादपयातीत्यपेक्षायां विश्लेषे साध्यमाने विश्लिष्टमायाया अवधिभूततया त्वन्मन्त्रसाधनपरेभ्यः इत्यपादानसञ्ज्ञाफलभूतपञ्चमी। तथा च सूत्रम् ध्रुवमपायेऽपादानम् (पा०सू० १.४.२४)। अपायो विश्लेषस्तस्मिन् साध्ये ध्रुवमवधिभूतं कारकमपादानं स्यात् (वै०सि०कौ० ५८६) इति। सप्तम्यत्र विमर्शविषयः। अत्र समाधानम्। सत्सु इत्यध्याहार्यं तथा च त्वन्मन्त्रसाधनपरेषु सत्सु पश्चान्मायाऽपयाति इति। यस्य च भावेन भावलक्षणम् (पा०सू० २.३.३७) इत्यनेन सप्तमी। यद्वा सप्तम्यधिकरणे च (पा०सू० २.३.३६) इत्यत्र चकारात्सप्तमी।[१६६] यद्वा त्वन्मन्त्रसाधनपरानपेक्ष्य मायाऽपयाति इति ल्यबन्तलोपे सति

[१६६] चकाराद्दूरान्तिकार्थेभ्यः (का०वृ० २.३.३५, वै०सि०कौ० ६३३, ल०सि०कौ० ९०६)।

तत्रानादरार्थे सप्तमी।[१६७] यद्वा असाधुपदस्याध्याहारे साध्वसाधुप्रयोगे च (वा० २.३.३६) इत्यनेन त्वन्मन्त्रसाधनपरेष्वसाधुमायाऽप्यपयाति इति सप्तमी।

## १.६६ मनो मे त्वरयति

देहान्ते मम सायुज्यं लप्स्यसे नात्र संशयः।
गुरुं ते द्रष्टुमिच्छामि ह्यगस्त्यं मुनिनायकम्।
किञ्चित्कालं तत्र वस्तुं मनो मे त्वरयत्यलम्॥

– अ०रा० ३.२.३९

अत्र सुतीक्ष्णमभिगम्य श्रीरामोऽगस्त्यं द्रष्टुमिच्छुः कथयति यत् मे मनस्त्वरयति। अत्र णिजन्तात् त्वर् धातोः[१६८] (ञित्वराँ सम्भ्रमे धा०पा० ७७५) कर्मतया माम् इति प्रयोक्तव्ये मे इति प्रयुक्तम्। अत्र कर्तुरीप्सिततमं कर्म (पा०सू० १.४.४९) इत्यनेन कर्मसञ्ज्ञा। ततः कर्मणि द्वितीया (पा०सू० २.३.२) इत्यनेन द्वितीया प्राप्ता किन्त्वत्र षष्ठी। कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव (वै०सि०कौ० ६०६) तथैवात्राप्येवम्। मनःकर्तृकवर्तमानकालिकश्रीरामकर्मकमुनिदर्शनविषयकोत्कण्ठानुकूलव्यापारः इति शाब्दबोधः। यद्वा मे मनः इत्यन्वये मत्सम्बन्धि मनः। सम्बन्धसामान्ये षष्ठी। तथा च मे मनः मां त्वरयति इत्यध्याहार्यम्।

## १.६७ सुतीक्ष्णेन

अथ रामः सुतीक्ष्णेन जानक्या लक्ष्मणेन च।
अगस्त्यस्यानुजस्थानं मध्याह्ने समपद्यत॥

– अ०रा० ३.३.१

अत्र सहशब्दं विनाऽपि तृतीया। विनाऽपि सहशब्दं तृतीयाविधानात्।[१६९] यद्वा इत्थंभूतलक्षणे (पा०सू० २.३.२१) इति सूत्रेण तृतीया।[१७०] यद्वा हेतौ (पा०सू० २.३.२३) इत्यनेन

[१६७] षष्ठी चानादरे (पा०सू० २.३.३८) इत्यनेन।

[१६८] अस्य धातोर्घटाद्यन्तर्गणे पाठात् घटादयो मितः (धा०पा० ग०सू०) इत्यनेन मित्त्वाण्णिचि अत उपधायाः (पा०सू० ७.२.११६) इत्यनेनोपधावृद्धौ मितां ह्रस्वः (पा०सू० ६.४.९२) इत्यनेन ह्रस्वे त्वरि इत्यस्य धातुसञ्ज्ञायां लटि तिपि शपि गुणेऽयादेशे त्वरयति।

[१६९] विनाऽपि तद्योगं तृतीया। वृद्धो यूनेत्यादिनिर्देशात् (वै०सि०कौ० ५६४)।

[१७०] सुतीक्ष्णज्ञाप्यरामत्वविशिष्टः श्रीरामोऽग्निजिह्वस्थानं समपद्यतेति भावः।

तृतीया।[१७१] यद्वा प्रकृत्यादिभ्य उपसङ्ख्यानम् (पा०सू० २.३.१८) इत्यनेनाभेदे तृतीया।[१७२]

## १.६८ अगस्त्यमुनिवर्याय

सुतीक्ष्ण गच्छ त्वं शीघ्रमागतं मां निवेदय॥
अगस्त्यमुनिवर्याय सीतया लक्ष्मणेन च।
महाप्रसाद इत्युक्त्वा सुतीक्ष्णः प्रययौ गुरोः॥

– अ०रा० ३.३.५-६

अत्र श्रीरामः सुतीक्ष्णं प्रति कथयति त्वमागतं मामगस्त्यमुनिवर्याय निवेदय। गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ (पा०सू० १.४.५२) इत्यनेन निपूर्वकविद् धातोः (विदँ ज्ञाने धा०पा० १०६४) बुद्ध्यर्थतया शब्दकर्मतया च अगस्त्यमुनिवर्य इत्यस्य कर्मसञ्ज्ञा प्राप्ता। एवं तदनुगामिनी द्वितीयाविभक्तिः प्राप्ता। किन्त्वत्र चतुर्थ्यपाणिनीयेव। परं विचारे कृत इयमपि पाणिन्यनुकूला। अत्र अगस्त्यमुनिवर्यं तोषयितुं मां निवेदय इति क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन चतुर्थी। यद्वा तादर्थ्ये चतुर्थी वाच्या (वा० २.३.१३) इत्यनेन मुक्तये हरिं भजति इत्यादिवच्चतुर्थी। यद्वा अगस्त्यमुनिवर्याय इति सुतीक्ष्णसम्बोधनम्। एवम् अगस्त्यमुनिवर्यमयतेऽन्तेवासित्वेन सेवार्थं गच्छतीत्यगस्त्यमुनिवर्यायः तत्सम्बुद्धौ अगस्त्यमुनिवर्याय। अत्र कर्मण्यण् (पा०सू० ३.२.१) इत्यनेन अण् प्रत्ययः।[१७३] ततश्च उपपदमतिङ् (पा०सू० २.२.१९) इत्यनेन समासे प्राप्ते कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) इत्यनेन विभक्तिः प्राप्ता। द्वयोर्मध्ये कतरेण भाव्यमिति सामञ्जस्ये गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः (भा०पा०सू० ८.४.११) इत्यनेन समास उपक्रान्ते पूर्वं कर्तृकर्मणोः कृति (पा०सू० २.३.६५) इत्यनेन कृद्योगे षष्ठी पश्चात्समासे पश्चाद्विभक्तिलोपे दीर्घे पुनर्विभक्तिकार्ये अगस्त्यमुनिवर्यायः तत्सम्बुद्धौ हे अगस्त्यमुनिवर्याय इति न दोषः। अर्थात्त्वं निरन्तरमगस्त्यमुनिवर्यमुपगच्छसि सेवार्थमतस्त्वं तस्य स्वभावेन परिचितोऽतो मामप्यागतं निवेदय।[१७४]

---

[१७१] पुण्येन दृष्टो हरिः (वै०सि०कौ० ५६८) इतिवदत्राग्निजिह्वमुनिस्थानगमने सुतीक्ष्णो हेतुरिति भावः।

[१७२] एतत्पूर्वसर्गे निरपेक्षा नान्यगतास्तेषां दृश्योऽहमन्वहम् (अ०रा० ३.२.३७) इत्यत्र श्रीरामेण सुतीक्ष्णस्य कृते स्वस्य नित्यदृश्यत्वमुक्तम्। देहान्ते मां सायुज्यं लप्स्यसे नात्र संशयः (अ०रा० ३.२.३९) इत्यत्राभेदश्चोक्तः। तस्मादभेदे तृतीयेति भावः।

[१७३] अयँ गतौ (धा०पा० ४७४) इति धातोः अगस्त्यमुनिवर्यम् इति कर्मोपपदे।

[१७४] यद्वा अयत इत्ययः। अयः अयते अच् गन्तरि इति वाचस्पत्यकारः। नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन कर्तर्यच्। अगस्त्यमुनिवर्यस्यायः अगस्त्यमुनिवर्यायः तत्सम्बुद्धौ अगस्त्यमुनिवर्याय। कर्तृकर्मणोः कृति (पा०सू० २.३.६५) इत्यनेन कृत्षष्ठ्यां कृद्योगा च षष्ठी समस्यत इति वक्तव्यम् (वा० २.२.८) इति वार्त्तिकेन तत्पुरुषसमासः इध्मप्रव्रश्चनः इतिवत्।

## १.६९ गुरोः

अगस्त्यमुनिवर्याय सीतया लक्ष्मणेन च।
महाप्रसाद इत्युक्त्वा सुतीक्ष्णः प्रययौ गुरोः॥

– अ०रा० ३.३.६

अत्र श्रीरामवचनं श्रुत्वा सुतीक्ष्णः सहर्षमगस्त्यं प्रति गतः। अत्र प्रययौ गुरोः इति षष्ठ्यन्तं प्रयुक्तम्। तदपाणिनीयभ्रमावहम्। यतो हि कर्तुरीप्सिततमं कर्म (पा०सू० १.४.४९) इति सूत्रम्। अस्य सामान्योऽर्थः कर्तुः क्रिययाऽऽप्तुमिष्टतमं कारकं कर्मसञ्ज्ञं स्यात् (वै०सि०कौ० ५३५)। विशेषस्तु कारके (पा०सू० १.४.२३) इत्यधिकार-सूत्रेण क्रियापदस्य लाभः। एवं या या क्रिया सा सा कर्तारं विनाऽनुपपन्नेति क्रिययैव कर्तुराक्षेपे सिद्धे पुनः कर्तुर्ग्रहणं व्यर्थं सञ्ज्ञापयति यत् प्रकृतिधातूपात्तकर्तृवृत्तिव्यापार-प्रयोज्यफलाश्रयः कर्म। तेन भक्तो रामं भजति इत्यत्र प्रकृतिधातूपात्तकर्ता भक्तस्तद्वृत्ति-व्यापारो भजनानुकूलस्तत्प्रयोज्यफलं भजनं तदाश्रयो राम इत्यत्र कर्मसञ्ज्ञा। असति कर्तृग्रहणे क्रियाया लब्धस्य कर्तृपदस्य प्रकृतिधातुकर्तेत्यर्थो नावगन्तुं शक्येत। एवं माषेष्वश्वं बध्नाति इत्यत्र माषाणामपि कर्मसञ्ज्ञा स्यात्तथा च कर्ताऽश्वस्तद्वृत्तिव्यापारो गल-विलाधःसंयोगरूपस्तत्प्रयोज्यफलं भक्षणानुकूलं तदाश्रयः कर्म माषा एवेति माषाणामेव कर्मसञ्ज्ञा स्यात्। सति कर्तुः इति पदग्रहणे प्रकृतिधातूपात्तो यो व्यापारस्तदाश्रयो यः कर्तेत्यर्थे सम्पन्ने प्रकृतिधातुः बन्ध् धातुः (बन्धँ बन्धने धा०पा० १५०८) तद्वृत्ति-व्यापारः शङ्कुसंयोगानुकूलस्तदाश्रयो देवदत्तस्तादृक्कर्तृवृत्तिव्यापारप्रयोज्यं फलं बन्धनरूपं तदाश्रयः कर्माश्व एव। एवं कर्तुः इत्यत्र षष्ठी क्तस्य च वर्तमाने (पा०सू० २.३.६७) इत्यनेन। साऽपि कर्तर्येव। अतः कर्तृपदमपि कर्तारं बोधयति षष्ठ्यपि। कर्तैव यः कर्ता इत्यर्थे सति प्रधानभूतव्यापाराश्रयकर्ता इत्यर्थोऽवगम्यते। तथा च ईप्सिततमम् इति आप् धातोः (आपॢँ लम्भने धा०पा० १८३९) सन्नन्तरूपम्। आप्तुमिष्टमीप्सितम्।[१७५]

---

[१७५] आप्तुमिष्यमाणमीप्सितम् (बा०म० ५३५) इति बालमनोरमा। इष्टम् इत्यत्रापि मतिबुद्धिपूजार्थेभ्यश्च (पा०सू० ३.२.१८८) इत्यनेनेच्छार्थे वर्तमानकाल एव क्तप्रत्ययः। तस्मादुभे अप्युक्ती समानार्थिके। आपॢँ लम्भने (धा०पा० १८३९) → आप् → धातोः कर्मणः समानकर्तृकादिच्छायां वा (पा०सू० ३.१.७) → आप् सन् → आप् स → एकाच उपदेशेऽनुदात्तात् (पा०सू० ७.२.१०) → इडागमनिषेधः → आप्ज्ञप्यृधामीत् (पा०सू० ७.४.५५) → ईप् स → सन्यङोः (पा०सू० ६.१.९) → ईप् ईप् स → पूर्वोऽभ्यासः (पा०सू० ६.१.४) → अत्र लोपोऽभ्यासस्य (पा०सू० ७.४.५८) → ईप् स → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → तयोरेव कृत्यक्तखलर्थाः (पा०सू० ३.४.७०) → मतिबुद्धिपूजार्थेभ्यश्च (पा०सू० ३.२.१८८) → ईप्स क्त → ईप्स त → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → ईप्स इट् त → ईप्स इ त → ईप्सित → विभक्तिकार्यम् → ईप्सित सुँ → अतोऽम् (पा०सू० ७.१.२४) → ईप्सित अम् → अमि पूर्वः (पा०सू० ६.१.१०७) → ईप्सितम्।

अतिशयेनेप्सितमितीप्सिततमम्[१७६] इति विग्रहे अतिशायने तमबिष्ठनौ (पा०सू० ५.३.५५) इत्यनेन तमप् प्रत्ययः। तथा च प्रकृतिधातूपात्तप्रधानभूतव्यापाराश्रयकर्तृवृत्तिव्यापार-प्रयोज्यफलाश्रयताप्रकारिकेच्छानिरूपितोद्देश्यताफलाश्रयत्वावच्छेदकं कर्म। एवं च भक्तो रामं भजति इत्यत्र प्रकृतिधातुः भज् धातुः (भजँ सेवायाम् धा०पा० ९९८) तत्प्रधानभूत-व्यापारो भजनानुकूलव्यापारस्तदाश्रयः कर्ता भक्तस्तद्वृत्तिर्भजनानुकूलव्यापारप्रकारिकेच्छा यद्वृत्तिव्यापारेण रामः सन्तुष्टो भवतीत्याकारिका तन्निरूपितोद्देश्यताफलाश्रयत्वावच्छेदकं राम एव तस्यैव कर्मसञ्ज्ञा। इत्थं कर्तुरीप्सिततमं कर्म (पा०सू० १.४.४९) इत्यत्रेप्सिततम-ग्रहणाभावे कर्तुः कर्म इति सूत्रे सम्पन्ने कर्तुरुद्देश्यं कर्म इत्यर्थे पयसौदनं भुङ्क्ते इति प्रत्युदाहरणम्। अर्थात्पयसा मिश्रमोदनं भुङ्क्ते। कृतभोजनं प्रति यदि कश्चिद्ब्रवीति यत् ओदनं भुङ्क्ष्व तुभ्यं पयो दास्यामि ततश्च स भोजने प्रवर्तते तर्ह्येव पय ओदनं भुङ्क्ते इति प्रयुज्यते। पयसा मिश्रमोदनं भुङ्क्ते इत्यर्थे पयसौदनं भुङ्क्ते इति प्रयुज्यते। अत्र तृतीया। कर्तुरुद्देश्यं कर्म इत्यर्थे कृतेऽत्रापि द्वितीया स्यात्। पयसोऽपि कर्तुरुद्देश्यत्वात्। पय उद्देश्यं किन्त्वीप्सिततमं नास्ति। न च तमप् ग्रहणं मा भूत् ईप्सितग्रहणेनैव कार्ये सिद्धे तथा च कर्तुरीप्सितं कर्म इत्येव सूत्रं स्यात्। तथा सति अग्नेर्माणवकं वारयति इत्यत्र अग्नेः इत्यत्रापि कर्मसञ्ज्ञा स्यात्। वारयति इत्यस्यार्थः अग्निसंयोगानुकूलव्यापाराभावानुकूल-व्यापारः। मद्वृत्तिव्यापारेणाग्निर्बालकसंयोगाभाववान् भवत्वितीच्छाश्रयः। अग्नेः इत्यत्रापि कर्मसञ्ज्ञा मा भूत्तस्मात्तमब्ग्रहणम्। न च वारणार्थानामीप्सितः (पा०सू० १.४.२७) इत्यपादानसञ्ज्ञा कर्मसञ्ज्ञां बाधिष्यते सा च माणवकम् इत्यत्र स्यादियं कर्मसञ्ज्ञा च। परत्वात्कर्मसञ्ज्ञैव।[१७७] सूत्राभावे अग्नेः इत्यत्र कर्मसञ्ज्ञां च को वारयिष्यति।[१७८] न च अधिशीङ्स्थासां कर्म (पा०सू० १.४.४६) इत्यतः कर्म इति पदमनुवर्त्यतां पुनरत्र कर्म-ग्रहणं किमर्थमिति चेत्। यदि ततः कर्म इति पदं तर्हि एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः (प०शे० १७) इति नियमेनाधारस्यैव कर्मसञ्ज्ञा स्यात् गेहं प्रविशति इत्यादावेव। तदर्थं कर्मग्रहणम्। क्वचिदेकदेशोऽप्यनुवर्तते (प०शे० १८) इति नियमेनाधार-निवृत्तौ कर्मग्रहणमदृष्टार्थम्। इत्यर्थं कर्तुरीप्सिततमं कर्म इत्यनेन सञ्ज्ञाऽनिवार्या। तथा च प्रययौ इति याधातोः (या प्रापणे धा०पा० १०४९) कर्ता सुतीक्ष्णस्तद्वृत्तिव्यापार उत्तरदेश-संयोगानुकूलव्यापारस्तत्प्रयोज्यफलाश्रयत्वप्रकारिकेच्छा मद्वृत्तिव्यापारेण गुरुर्मत्संयोगवान्

[१७६] अतिशयेनेप्सितमीप्सिततमम् (बा०म० ५३५)।

[१७७] "गाम्" इत्यत्रेप्सितत्वप्रयुक्ताऽपादानसञ्ज्ञा न भवति। ईप्सिततमत्वविवक्षायां परत्वात्कर्मसंज्ञाप्रवृत्तेः (त०बो० ५९०)।

[१७८] कर्तुरीप्सिततमं कर्म (पा०सू० १.४.४९) इति सूत्रस्याभावे अकथितं च (पा०सू० १.४.५१) इत्यनेनापि माणवकम् इत्यत्रेप्सिततमस्य कर्मसञ्ज्ञा प्राप्नोति परन्त्वेतेन सूत्रेणेप्सितस्याप्यकथितस्य कर्मसञ्ज्ञाप्राप्तौ *अग्निं माणवकं वारयति इत्यनिष्टप्रयोगः स्यात्तस्मात्सूत्रारम्भ आवश्यक इति भावः।

भवतु तन्निरूपितोद्देश्यता गुरावेव ततः स एव कर्म। अतोऽत्र कथं न कर्मसञ्ज्ञेति चेत्। उच्यते। कर्मणः शेषत्वविवक्षायां षष्ठी। कर्मसञ्ज्ञा तु जातैव केवलं तत्फलभूता द्वितीया न। ननु या या सञ्ज्ञा सा सा फलवती भवति इति न्यायेन फलाभावेन कर्मसञ्ज्ञायाः किं प्रयोजनम्। असत्याञ्च कर्मसञ्ज्ञायां सूत्राप्रवृत्तौ न साधुताऽभावे साधुताया न पुण्यजनकतावच्छेदकतेति चेत्। कर्मसञ्ज्ञायाः फलं न केवलं द्वितीया। अन्यान्यफलानि सन्ति। अत्र किं फलमिति चेत्। गुरोः प्रययौ इत्यत्र हि गुरुकर्मकभूतकालावच्छिन्नोत्तरदेशसंयोगानुकूलव्यापारः इत्यत्र शाब्दबोधे कर्ममूलकसम्बन्धबोधयोः फलम्। यद्वा गुरोः सकाशं प्रययौ इति पदाध्याहारे सम्बन्धे षष्ठी।

## १.७० शिष्येभ्यः

व्याख्यातराममन्त्रार्थं शिष्येभ्यश्चातिभक्तितः।
दृष्ट्वाऽगस्त्यं मुनिश्रेष्ठं सुतीक्ष्णः प्रययौ मुनेः॥

– अ०रा० ३.३.८

अत्र शिष्यान् प्रति राममन्त्रार्थं व्याचक्षाणस्यागस्त्यस्य स्थितिं वर्णयति। अत्र शिष्यान् प्रति इति प्रयोक्तव्यमासीत्। शिष्येभ्यः इति चतुर्थीप्रयोगस्तु शिष्यान् बोधयितुम् इत्यप्रयुज्यमानतुमुनः कर्मणि चतुर्थी।[१७९] यद्वा सुखयोगे सति चतुर्थी।[१८०] यद्वा शिष्येभ्यः हिताय इत्यध्याहारे हितयोगे च (वा० २.३.१३) इत्यनेन चतुर्थी। यद्वा तादर्थ्ये चतुर्थी वाच्या (वा० २.३.१३) इति वार्त्तिकेन चतुर्थी। न च केभ्यो राममन्त्रार्थो व्याख्यात इत्यपेक्षायां शिष्येभ्यः इत्यस्य व्याख्यातघटकव्याख्यानक्रियाया अपेक्षितत्वात्कथं बहुव्रीहिरिति चेत्। नित्यसाकाङ्क्षस्थल उक्तनियमस्य प्रसक्त्यभावात्। यद्वा शिष्यान् आहूय वा शिष्यान् अपेक्ष्य व्याख्यातराममन्त्रार्थः इति योजनया ल्यब्लोपे कर्मण्यधिकरणे च (वा० २.३.२८) इति वार्त्तिकेनात्र पञ्चमी। अस्य वार्त्तिकस्यार्थः ल्यबन्तस्य लोपे सति तस्य कर्मण्यधिकरणे च पञ्चमी भवति। अत्र हि ल्यबन्तम् आहूय अपेक्षतयाऽस्य कर्म शिष्यान् इति ततः पञ्चमी श्वशुराज्जिह्रेति (वै०सि०कौ० ५९४) इतिवत्। इत्थं शिष्येभ्यः इति चतुर्थ्यन्तः पञ्चम्यन्तो वा पाणिनीय एव।

---

[१७९] क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन।

[१८०] शिष्येभ्यः सुखाय इत्यध्याहार्यमिति भावः।

## १.७१ ब्रवीमि ते

किं राम बहुनोक्तेन सारं किञ्चिद्ब्रवीमि ते।
साधुसङ्गतिरेवात्र मोक्षहेतुरुदाहृता॥

– अ०रा० ३.३.३६

अत्रागस्त्यः श्रीरामं प्रति गोपनीयविषयं वर्णयति यत् ते किञ्चित्सारं ब्रवीमि। ब्रूधातुः (ब्रूञ् व्यक्तायां वाचि धा०पा० १०४४) अत्राकथितपरिगणितधात्वन्तर्गतः – चिब्रूशासुजिमथ्मुषाम् (वै०सि०कौ० ५३९)। अत्र त्वां ब्रवीमि इति पाणिनीयम्। ते ब्रवीमि इति कथम्। कर्मणः शेषत्वविवक्षायां षष्ठी। यद्वा समक्षम् इत्यध्याहार्यम्। एवं ते इति-शब्दे सम्बन्धविवक्षायां षष्ठी। अथवा त्वां स्तोतुं ब्रवीमि इति तुमुन्यप्रयुक्ते तत्कर्मणि क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इति चतुर्थी। अथवा ते इत्यस्य सारम् इत्यनेनान्वयस्तेन सम्बन्धे षष्ठी। त्वत्सम्बन्धिसारं ब्रवीमि इत्यर्थः। अथवा शृण्वतः इति शत्रन्तमध्याहार्यम्। ते शृण्वतः सारं ब्रवीमि इत्यर्थे यस्य च भावेन भावलक्षणम् (पा०सू० २.३.३७) इति षष्ठी।[१८१]

## १.७२ नेतव्यस्तत्र ते कालः

अस्ति पञ्चवटीनाम्ना आश्रमो गौतमीतटे।
नेतव्यस्तत्र ते कालः शेषो रघुकुलोद्वह॥

– अ०रा० ३.३.४८

अत्र अगस्त्यः श्रीरामचन्द्रं दण्डकवासाय प्रेरयति यत् रामभद्र तत्रैव ते भवतः कालो नेतव्यः। आशङ्क्योऽयम्।[१८२] णीञ् प्रापणे (धा०पा० ९०१) इत्यस्माद्धातोः तयोरेव कृत्यक्त-खलर्थाः (पा०सू० ३.४.७०) इति सूत्रसहकारेण तव्यत्तव्यानीयरः (पा०सू० ३.१.९६) इत्यनेन तव्यत्प्रत्ययः स च कर्मणि। तेन कर्ताऽनुक्तः। तत्रैव तृतीया भाव्या।[१८३] अत्र कृत्यानां कर्तरि वा (पा०सू० २.३.७१) इत्यनेन वैकल्पिकी षष्ठी।[१८४] अथवा ते इत्यस्य कालः इत्यनेनान्वयः। अर्थात्त्वत्सम्बन्धी कालस्तत्रैव नेतव्यः। अकथितं च (पा०सू० १.४.५१) इत्यत्र परिगणित-षोडशधातूनां मध्य उत्तरार्धे तथा स्यान्नीहृकृष्वहाम् (वै०सि०कौ० ५३९) इत्यत्र नी इत्यस्य ग्रहणात्तथा च ग्राममजां नयति इतिवदत्रापि तत्र इत्यस्य कर्मसञ्ज्ञा भवेत्।[१८५] न च

[१८१] दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् (पा०सू० २.३.३४) इत्यतः षष्ठी इत्यनुवर्त्य षष्ठी चानादरे (पा०सू० २.३.३८) इत्यतः षष्ठी इत्यपकृष्य वाऽऽदरेऽपि भावलक्षणा षष्ठीति भावः।

[१८२] पूर्वपक्षोऽयम्।

[१८३] कर्तृकरणयोस्तृतीया (पा०सू० २.३.१८) इत्यनेन।

[१८४] पक्षे कर्तृकरणयोस्तृतीया (पा०सू० २.३.१८) इत्यनेन तृतीयाऽपि।

[१८५] अयमपि पूर्वपक्षः।

कर्मसञ्ज्ञायामेवं त्रल्। सप्तमी शौण्डैः (पा०सू० २.१.४०) इत्यत्र सप्तमीपदस्य ग्रहणात् सप्तम्यास्त्रल् (पा०सू० ५.३.१०) इत्यनेन तत्र इति सप्तम्यन्तस्य प्रयोगः।[186] सप्तमीं विना द्वितीयातस्त्रल् कथं सम्भवेत्। उच्यते। यदाऽपादानादिभिर्न विवक्षा स्यात्तदा कर्मसञ्ज्ञा भवति।[187] अधुना त्वधिकरणविवक्षैव। आत्मसमानाधिकरणस्य सकलजगदधिकरणस्य विविधदिव्याभरणस्य जगदाधारस्यापि रामस्याऽधारभूतत्वात् नेतव्यस्तत्र ते कालः इति पञ्चवटीं जगदाधारस्याऽधारभूतामिति साम्प्रदायिका ध्वनयितुं षष्ठीं युक्तिभिः साधयन्ति।

## १.७३ तयोः

अध्युवास सुखं रामो देवलोक इवापरः।
कन्दमूलफलादीनि लक्ष्मणोऽनुदिनं तयोः॥
आनीय प्रददौ रामसेवातत्परमानसः।
धनुर्बाणधरो नित्यं रात्रौ जागर्ति सर्वतः॥

– अ०रा० ३.४.१२-१३

दण्डकारण्ये निवसतोः तयोर्लक्ष्मणः कन्दमूलफलानि प्रददौ। अत्र दाधातुयोगे (डुदाञ् दाने धा०पा० १०९१) चतुर्थ्यां ताभ्याम् इति भवेत्।[188] तयोः इति कथनं तु सम्प्रदाने सम्बन्धविवक्षायाम्। यद्वा तयोः पुरतः इत्यध्याहारे सामान्यसम्बन्धे षष्ठी। यद्वा निवसतोः तयोः इति शत्रन्ते यस्य च भावेन भावलक्षणम् (पा०सू० २.३.३७) इति षष्ठीसप्तम्यौ।[189] अथवा कन्दमूलफलानि इत्यनेन साकमन्वित्य तयोः एव कन्दमूल-फलानि इत्यर्थे सम्बन्धे षष्ठी। सीता च प्रकृतिः श्रीरामः पुरुषस्तयोः संयोगात्सृष्टिरिति सार्वभौमत्वादध्यात्मरामायणे च तत्र तत्र प्रतिपादितत्वाज्जन्यजनकभावसम्बन्धे षष्ठ्यैश्वर्यं द्रढयितुम्।

---

[186] तद् ङि → सप्तम्यास्त्रल् (पा०सू० ५.३.१०) → तद् ङि त्रल् → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपदिकसञ्ज्ञा → सुपो धातुप्रातिपदिकयोः (पा०सू० २.४.७१) → तद् त्र → प्राग्दिशो विभक्तिः (पा०सू० ५.३.१) → त्यदादीनामः (पा०सू० ७.२.१०२) → त अ त्र → अतो गुणे (पा०सू० ६.१.९७) → त त्र → तत्र → तद्धितश्चासर्वविभक्तिः (पा०सू० १.१.३८) → अव्ययसञ्ज्ञा → विभक्तिकार्यम् → तत्र सुँ → अव्ययादाप्सुपः (पा०सू० २.४.८२) → तत्र। पक्षे तस्मिन् इति। तद् ङि → ङसिङ्योः स्मात्स्मिनौ (पा०सू० ७.१.१५) → तद् स्मिन् → त्यदादीनामः (पा०सू० ७.२.१०२) → त अ स्मिन् → अतो गुणे (पा०सू० ६.१.९७) → त स्मिन् → तस्मिन्।

[187] अपादानादिविशेषैरविवक्षितं कारकं कर्मसञ्ज्ञं स्यात् (वै०सि०कौ० ५३९)।

[188] चतुर्थी सम्प्रदाने (पा०सू० २.३.१३) इत्यनेन।

[189] दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् (पा०सू० २.३.३४) इत्यतः षष्ठी इत्यनुवर्त्य षष्ठी चानादरे (पा०सू० २.३.३८) इत्यतः षष्ठी इत्यपकृष्य वाऽऽदरेऽपि यस्य च भावेन भावलक्षणम् (पा०सू० २.३.३७) इत्यनेन भावलक्षणा षष्ठीति भावः।

## १.७४ मे

ज्ञानं विज्ञानसहितं भक्तिवैराग्यबृंहितम्।
आचक्ष्व मे रघुश्रेष्ठ वक्ता नान्योऽस्ति भूतले॥

– अ०रा० ३.४.१८

अत्र लक्ष्मणः श्रीरामं प्रार्थयते यत् ज्ञानं विज्ञानञ्च मे आचक्ष्व। अत्र आचक्ष्व इति प्रयुक्तम्। चक्ष् धातोः (चक्षिङ् व्यक्तायां वाचि धा०पा० १०१७) लोङ्लकारस्य मध्यम-पुरुषस्यैकवचनान्तं रूपमिदम्। अयं हि धातुः कथनार्थः। कथनार्थकधातूनां योगे द्वितीया प्रसिद्धा। अत्र चतुर्थी तु मे हिताय आचक्ष्व इति तात्पर्य एवं हितयोगे च (वा० २.३.१३) इति चतुर्थी। अथवा मे मम इति षष्ठ्यन्तप्रयोगः पश्चात् परतः इत्यध्याहार्यम्। अथवा पृच्छतः इति शत्रन्तप्रयोग एवं यस्य च भावेन भावलक्षणम् (पा०सू० २.३.३७) इत्यनेन षष्ठी।[१९०]

## १.७५ ते

शृणु वक्ष्यामि ते वत्स गुह्याद्गुह्यतरं परम्।
यद्विज्ञाय नरो जह्यात्सद्यो वैकल्पकं भ्रमम्॥

– अ०रा० ३.४.१९

श्रीरामो लक्ष्मणं प्रति वक्ति यत् ते गुह्याद्गुह्यतरं वक्ष्यामि। वक्ष्यामि इति ब्रूधातु-निष्पन्नो (ब्रूञ् व्यक्तायां वाचि धा०पा० १०४४) लृडुत्तमपुरुषैकवचनान्तः।[१९१] अत्र ब्रूधातु-योगे द्वितीया प्राप्तैव। चतुर्थी तु त्वां बोधयितुं वक्ष्यामि इत्यप्रयुज्यमानतुमुन्कर्मणि चतुर्थी।[१९२] ते हितं वक्ष्यामि इत्यध्याहारे हितयोगे च (वा० २.३.१३) इत्यनेन वा। पृष्टवतः ते वक्ष्यामि इत्यध्याहारे भावलक्षणा षष्ठी वा।[१९३] ते समक्षं वक्ष्यामि इत्यध्याहारबलेन षष्ठी वा।

---

[१९०] दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् (पा०सू० २.३.३४) इत्यतः षष्ठी इत्यनुवर्त्य षष्ठी चानादरे (पा०सू० २.३.३८) इत्यतः षष्ठी इत्यपकृष्य वाऽऽदरेऽपि भावलक्षणा षष्ठीति भावः।

[१९१] ब्रूञ् व्यक्तायां वाचि (धा०पा० १०४४) → ब्रू → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → ब्रू लृट् → ब्रू मिप् → ब्रू मि → ब्रुवो वचिः (पा०सू० २.४.५३) → वच् मि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → वच् स्य मि → एकाच उपदेशेऽनुदात्तात् (पा०सू० ७.२.१०) → इडागमनिषेधः → वच् स्य मि → चोः कुः (पा०सू० ८.२.३०) → वक् स्य मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → वक् स्या मि आदेशप्रत्यययोः (पा०सू० ८.३.५९) → वक् ष्या मि → वक्ष्यामि।

[१९२] क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन।

[१९३] दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् (पा०सू० २.३.३४) इत्यतः षष्ठी इत्यनुवर्त्य षष्ठी चानादरे (पा०सू० २.३.३८) इत्यतः षष्ठी इत्यपकृष्य वाऽऽदरेऽपि यस्य च भावेन भावलक्षणम् (पा०सू० २.३.३७) इत्यनेन भावलक्षणा षष्ठीति भावः।

## १.७६ मे

एतैर्विलक्षणो जीवः परमात्मा निरामयः।
तस्य जीवस्य विज्ञाने साधनान्यपि मे शृणु॥

– अ०रा० ३.४.३०

श्रीरामः श्रीलक्ष्मणमामन्त्रयति मे शृणु इति। अत्र विषयः श्रीराममुखान्निर्गत्य लक्ष्मण-कर्णौ प्रविशतीति शब्दविश्लेषे श्रीरामस्य ध्रुवत्वेनावधिभूतत्वात्तत्रापादानसञ्ज्ञा तन्मूलिका च पञ्चम्याशङ्क्यते। किन्त्वत्र शब्दानां विश्लेषोऽपेक्ष्यत एव नहि। वैयाकरणानां नये शब्दो ब्रह्म। वाग्वै ब्रह्म (बृ०उ० १.३.२१) इति श्रुतेः। श्रीरामस्तु परब्रह्म शब्दब्रह्म यस्य निःश्वासभूतम्। अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस (बृ०उ० २.४.१०) इति श्रुतेः। यस्य निश्श्वसितं वेदाः (ऋ०वे०सं० सा०भा० उ०प्र० २) इति वचनाच्च। तर्हि तस्य शब्दब्रह्मणः श्रीरामाद्विश्लेषः सम्भव एव नहि। ब्रह्मणो रामचन्द्रस्य सर्व-व्यापित्वात्। लक्ष्मणश्च भगवदंशः। शेषांशो लक्ष्मणः साक्षात् इति वचनात्।[१९४] भगवान् श्रीरामोंऽशी। अंशांशिनोरप्यभेदात्तेन सम्बन्धविवक्षायामेव षष्ठ्यत्रत्यभावगरिमाणं गरयति। यद्वा मे सकाशात् शृणु इत्यध्याहारेण सम्बन्धषष्ठी। यद्वा मे मह्यम् इति चतुर्थी सा च माम् तोषयितुम् माम् अनुकूलयितुम् वेति तुमुन्कर्मणि चतुर्थी।[१९५] सावधानश्रोतुरुपरि वक्तुः प्रीतिर्वर्धत इति न केषामप्यविदितम्।

## १.७७ चक्षुष्मताम्

चक्षुष्मतामपि तथा रात्रौ सम्यङ्न दृश्यते।
पदं दीपसमेतानां दृश्यते सम्यगेव हि॥

– अ०रा० ३.४.४६

अत्र दृश्यते इति हि भाववाच्यप्रयोगः। अत्र कर्तुरनुक्तत्वात्तत्र तृतीयया भवितव्यम्।[१९६] चक्षुष्मद्भिर्न दृश्यते इत्येव। षष्ठी तु विवक्षाधीनानि कारकाणि भवन्ति[१९७] इत्यनेन षष्ठी सम्बन्धविवक्षायाम्। यद्वा दृष्ट्या इत्यध्याहार्यम्। चक्षुष्मतां दृष्ट्या न दृश्यते इत्यवयवावयविभावे सा।

---

[१९४] मूलं मृग्यम्।

[१९५] क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन।

[१९६] कर्तृकरणयोस्तृतीया (पा०सू० २.३.१८) इत्यनेन।

[१९७] मूलं मृग्यम्। यद्वा कर्मादीनामविवक्षा शेषः (भा०पा०सू० २.३.५०, २.३.५२, २.३.६७) इत्यस्य तात्पर्यमिदम्।

## १.७८ राघवे

लक्ष्मणोऽपि गुहामध्यात्सीतामादाय राघवे।
समर्प्य राक्षसान्दृष्ट्वा हतान्विस्मयमाययौ॥

– अ०रा० ३.५.३६

खरदूषणवधानन्तरं लक्ष्मणो गुहातो निर्गत्य सीतां राघवाय समर्पयत्। तत्र राघवे इति सप्तमीप्रयोगस्तु शङ्कावहः। अत्र सम्प्रदानत्वस्यैव प्राप्तत्वात्। अत्रोच्यते। यत्र स्वकीयं वस्तु कस्मैचिद्दीयते तत्रैव सम्प्रदानम्।[१९८] अत्र तथाविधप्रसङ्गो नास्ति। यतो भगवाञ्छ्रीरामः सीतायाः प्राणाधारः। लौकिकव्यवहारेऽपि सीताया लतास्थानित्वाच्छ्रीरामस्य च तरु-स्थानित्वात्। इमं पक्षमेव स्पष्टयितुमेकं रामकथासम्बन्धदृष्टान्तं प्रस्तूयते। चित्रकूटे निवासं कुर्वन् रममाणो रामचन्द्रः सीतया लक्ष्मणेन सह विनोदभङ्ग्या सीतात्यागगौरवं व्यञ्जनया वर्णयल्लँतामेकां सङ्केत्य समवोचत्प्रणतां वनितां यत् प्रिये। इयं लता सम्मान-योग्यतामर्हति या खलु नीरसतरुमपि विभूषयति सौन्दर्यलक्ष्म्या स्वकीयसमालिङ्गनद्वारा। अर्थाल्लतास्थानापन्ना त्वं तरुस्थानीयस्य मे श्रियं वर्धयसि। तत्क्षणं सीतोवाच देव। नेत्थम्। लताश्रयस्तरुरेव धन्यो यः खलु निराधारां लतां सबहुमानं शाखाबाहुभिरालम्बते। अर्थाल्लतास्थानीयाया म आधारभूतस्तरुस्थानीयो भवान्। उभयोर्वार्तां निशम्य निरीक्ष्य पावनप्रेममण्डितपरस्परप्रशंसानिःस्पृहां सुमित्रानन्दनो लक्ष्मणः प्राह यत् प्रभो लता तरुर्वा नोभौ धन्यौ लक्ष्मणरूपः पथिक एव धन्यो यः सीतालताश्रीरामकल्पवृक्षस्निग्धछायामाश्रित्य समेधते। अत्रत्यभावसङ्ग्रहरूपमेकं शार्दूलविक्रीडितं प्रस्तुवन् धृष्टतामाधरामि यत् –

रामः प्राह लता प्रिये बहुमता सम्भूषयन्ती तरुं
सीतोवाच लताश्रयस्तरुरयं धन्यो न चैषा लता।
सौमित्रिर्निजगाद नाथ विटपो धन्यो न वल्ली तथा
श्लाघ्योऽयं पथिको नितान्तमुभयोश्छायां श्रयन्मोदते॥

इत्थमनेन सीतारामलक्ष्मणवार्तालापदृष्टान्तप्रस्तावेन सीताया आधारो रामः। अतः आधारोऽधिकरणम् (पा०सू० १.४.४५) इत्यनेनाधिकरणसञ्ज्ञा। आधारश्च त्रिधौपश्लेषिको वैषयिकोऽभिव्यापकश्च। औपश्लेषिको नाम सामीप्यसंयोगान्तरः सम्बन्धो यथा कटे आस्ते गुरौ वसति।[१९९] वैषयिकः संयोगसमवायसम्बन्धभिन्नो यथा मोक्षे इच्छा। अभिव्यापकः सर्वावयवव्यापको यथा तिलेषु तैलम् सर्वस्मिन् आत्मा दधिनि सर्पिः इत्यादि। इमे त्रयोऽप्याधारगुणाः श्रीरामेऽत्र। सीताविषयकमाधारत्रितयत्वं श्रीराम एव सङ्घटते। यथा कटे

[१९८] दानं चापुनर्ग्रहणाय स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनम्। अत एव "रजकस्य वस्त्रं ददाति" इत्यादौ न भवति (त०बो० ५६९)।

[१९९] गुरोः समीपे वसतीत्यर्थ औपश्लेषिक आधारः।

आस्ते इतिवत्सीता रामोपश्लिष्टा। सामीप्येनापि संयोगेनापि निरन्तरं सा भगवतोऽत्यन्त-निकटा। एवमाह्लादिनीशक्तिरूपेण कृपाशक्तिरूपेण वा संयुक्ता। भावुकानां मते तु स्वयं मैथिली पीताम्बररूपेण भगवतः श्रीविग्रहं निरन्तरमुपश्लिष्यति। सामीप्यञ्चात्राव्यवहितमेव यथा इको यणचि (पा०सू० ६.१.७७) इत्यत्र अचि औपश्लेषिक आधारः संसारे संसाधितः संहितायाम् (पा०सू० ६.१.७२) इति सूत्रे भगवता भाष्यकारेण।[२००] तथैव भगवती सीता शब्दार्थयोरिवाव्यवहितसामीप्यमञ्चति। वैषयिकश्चाप्याधारो राम एव। आकाशे पक्षी इतिवत्सीता रामे। अत्र संयोगसमवायावान्तरेण निरूप्यनिरूपकसम्बन्धतया श्रीसीताया वैषयिक आधारः श्रीराम एव। मोक्षे इच्छा इतिवत्। अभिव्यापकश्चाधारः श्रीराम एव कात्स्र्न्येन। सर्वस्मिन् आत्मा इत्यादिवत्। सीता श्रीरामस्य प्रतिरामं रमते। एषु त्रिष्वप्याधारेषूपश्लेष एव मुख्यो भेदकल्पनया त्रयः। तथा कारकप्रकरणे भर्तृहरिः प्राह –

उपश्लेषस्य चाभेदस्तिलाकाशकटादिषु।

– वा०प० ३.७.१४९

हेलाराजोऽपि समर्थयति यद्वैषयिकाभिव्यापकयोरप्युपश्लेषस्यानुस्यूतत्वात्।[२०१] तथैव सीतोपश्लेषस्य पक्षत्रयेऽपि सम्भवः। अनन्या राघवेणाहं भास्करेण यथा प्रभा (वा०रा० ५.२१.१५) इति प्रभाभास्करयोः समवायसम्बन्धो यथा तथैव सीतारामयोः किन्तु सीताऽप्यनुगता रामं शशिनं रोहिणी यथा (वा०रा० १.१.२८) इति वचनेनोपश्लेष एव सार्वत्रिकः। अतो राघवे समर्प्य इत्यत्र न्यासभूतां सीतां लक्ष्मणः पुना राघवमाधारं मत्वा समर्पयतीत्यर्थबुबोधयिषया सप्तमीऽयं मधुरभावबोधनपुरःसरं सर्वतोभावेन पाणिनीया।

## १.७९ निशायाम्

विचिन्त्यैवं निशायां स प्रभाते रथमास्थितः।
रावणो मनसा कार्यमेकं निश्चित्य बुद्धिमान्॥

– अ०रा० ३.६.१

निशायाम् इत्यत्राजन्तप्रयोगोऽपाणिनीय इव। प्रायशोऽयं हलन्तप्रयोगः। निशायाम् इति कथम्। यतो हि अजाद्यतष्टाप् (पा०सू० ४.१.४) इति सूत्रं ह्यजादीनामकारान्तस्य च टाप्प्रत्ययं करोत्ययं नाजादिर्न वाऽकारान्त इति चेत्। भागुरिर्हलन्तस्त्रीलिङ्गे पठितानां टाप् प्रत्ययं वदति। तथा च कारिका –

[२००] अयं योगः शक्योऽवक्तुम्। कथम्। अधिकरणं नाम त्रिःप्रकारम्। व्यापकम् औपश्लेषिकम् वैषयिकम् इति। शब्दस्य च शब्देन कोऽन्योऽभिसम्बन्धो भवितुमर्हत्यन्यदत उपश्लेषात्। इको यणचि। अच्युपश्लिष्टस्येति। तत्रान्तरेण संहिताग्रहणं संहितायामेव भविष्यति (भा०पा०सू० ६.१.७२)।

[२०१] उपश्लेष आधारस्याधेयेन सम्बन्धः। यद्वशावसावाधारः। तस्य त्रिष्वप्यधिकरणेष्वभेदः (वा०प० हे०टी० ३.७.१४९)।

वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः।
आपं चैव हलन्तानां यथा वाचा दिशा निशा॥

– वै॰सि॰कौ॰ अव्ययप्रकरणान्ते कारिका २

न च भागुरिमतमपि त्वपाणिनीयमिति वाच्यम्। निशाशब्दस्य सूत्र उच्चारणात्पाणिनिनाऽपि भागुरिमतस्य कृतसमादरदर्शनात्। यथा विभाषा सेनासुराच्छायाशालानिशानाम् (पा॰सू॰ २.४.२५) इत्यत्र निशानाम् षष्ठ्यन्तप्रयोगेणायं पाणिनीय एव। एवमेव दिवाविभानिशाप्रभाभास्करान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्र-सङ्ख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु (पा॰सू॰ ३.२.२१) निशाप्रदोषाभ्यां च (पा॰सू॰ ४.३.१४) इत्यनयोरपि।

## १.८० ब्रूहि मे

ब्रूहि मे न हि गोप्यं चेत्करवाणि तव प्रियम्।
न्याय्यं चेद्ब्रूहि राजेन्द्र वृजिनं मां स्पृशेन्नहि॥

– अ॰रा॰ ३.६.६

माम् इति वक्तव्ये मे इत्युक्तम्। कर्मणि सम्बन्धविवक्षया षष्ठी। यद्वा मे पुरतः इत्यध्याहारबलेन षष्ठी। यद्वा मे मह्यम् । मां ज्ञापयितुं ब्रूहि इति तुमुन्कर्मणि चतुर्थी।[२०२]

## १.८१ आश्रमादपनेष्यसि

त्वं तु मायामृगो भूत्वा ह्याश्रमादपनेष्यसि।
रामं च लक्ष्मणं चैव तदा सीतां हराम्यहम्॥

– अ॰रा॰ ३.६.१३

अत्र रावणो मारीचं प्रत्युपायं निर्दिशति। अकथितं च (पा॰सू॰ १.४.५१) इत्यनेनात्र कर्मसञ्ज्ञा। अकथितकर्मणां धातूनां क्रमे नीधातोरपि (णीञ् प्रापणे धा॰पा॰ ९०१) पठितत्वात्।[२०३] किन्त्वपादानादिभिरविवक्षिते सतीयं व्यवस्था। अत्र त्वपादानस्य विवक्षाऽऽवश्यकी विश्लेषावधिभूतस्याश्रमस्य ध्रुवत्वं स्पष्टयितुम्।

[२०२] क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा॰सू॰ २.३.१४) इत्यनेन।

[२०३] दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम्। कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम्॥ (वै॰सि॰कौ॰ ५३९)।

## १.८२ देवायम्

लक्ष्मणो राममाहेदं देवायं मृगरूपधृक्।
मारीचोऽत्र न सन्देह एवंभूतो मृगः कुतः॥

– अ०रा० ३.७.९

अत्र कपटकुरङ्गवेषधारिणं मारीचमभिगन्तुकामं श्रीरामं लक्ष्मणो निर्दिशति देव। अयं मृगरूपधृङ्मारीचः। अत्र देव इति सम्बोधनम्। अत्र च गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् (पा०सू० ८.२.८६) इत्यनेन प्लुतः। ततश्च प्लुतप्रगृह्या अचि नित्यम् (पा०सू० ६.१.१२५) इत्यनेन प्रकृतिभावे कथं दीर्घ इति चेत्। प्राचाम् इति योगविभागेन सर्वः प्लुतो विकल्प्यते (वै०सि०कौ० ९७) इत्यनेन प्लुतस्य वैकल्पिकत्वात्प्लुताभावपक्षे दीर्घः।[२०४]

## १.८३ कालमेघसमद्युतिम्

स्वरूपं दर्शयामास महापर्वतसन्निभम्।
दशास्यं विंशतिभुजं कालमेघसमद्युतिम्॥

– अ०रा० ३.७.५०

सीताहरणाय यतिवेषेणागतो रावणः सीतां स्वरूपं दर्शयामास। अत्र स्वरूपम् इति नपुंसकलिङ्गं तस्य विशेषणं कालमेघसमद्युतिम् इति नपुंसकलिङ्गस्य विशेषणं कथं यतो ह्यत्र कालमेघेन समाना द्युतिर्यस्य तत् इति विग्रहेऽन्यपदार्थे बहुव्रीहिः। अन्यपदार्थो हि स्वरूपम् इति। तस्य नपुंसकलिङ्गता सर्वविदिताऽतस्तद्विशेषणेनाप्यनिवार्या सा। व्युत्पत्तिवादेऽपि समानलिङ्गता समानवचनकत्वञ्च बहुशः प्रतिपादितम्। कथयन्ति च बुधाः –

या विशेष्येषु दृश्यन्ते लिङ्गसङ्ख्याविभक्तयः।
प्रायस्ता एव कर्तव्याः समानार्थे विशेषणे॥[२०५]

अतः सति नपुंसकलिङ्गे कालमेघसमद्युतिम् इत्यपाणिनीयतामावहतीव। यतो हि नपुंसकलिङ्गेऽमि विभक्तौ स्वमोर्नपुंसकात् (पा०सू० ७.१.२३) इति लुग्विधानात् कालमेघसमद्युति इत्येव पाणिनीयम्। परं विमर्शे कृते विरोधः परिहर्तुं शक्यते। अर्धर्चाः पुंसि च (पा०सू० २.४.३१) इति सूत्रेऽर्धर्चादिगणस्य पुल्लिँङ्गे नपुंसकलिङ्गे च विधानादाकृतिगणत्वात् स्वरूपशब्दमर्धर्चादिगणे पठित्वा तत्र पुल्लिँङ्गतास्वीकारे तद्विशेषणेऽपि। तेन हरिम् इत्यादिवदत्रापि अमि पूर्वः (पा०सू० ६.१.१०७) इत्यनेन पूर्वरूपम्। यद्वा स्वरूपं वर्णयित्वा द्युतिं पृथग्वर्णयति। एवं चात्र कर्मधारयः कालमेघसमा चासौ द्युतिश्च तां काल-

[२०४] अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) इत्यनेन।
[२०५] मूलं मृग्यम्।

मेघसमद्युतिम् इति मतिम् इत्यादिवत्।

## १.८४ त्वरा

त्वद्वाक्यसदृशं श्रुत्वा मां गच्छेति त्वराऽब्रवीत्।
रुदन्ती सा मया प्रोक्ता देवि राक्षसभाषितम्।
नेदं रामस्य वचनं स्वस्था भव शुचिस्मिते॥

– अ०रा० ३.८.११

अत्र त्वरया अब्रवीत् इति वक्तव्ये त्वरा अब्रवीत् इति प्रयुक्तम्। यतो हि हलन्तस्त्री-लिङ्गानां वैकल्पिकटाब्विधाने पाक्षिकहलन्तत्वे तृतीयायां त्वर् टा इति स्थिते टकारानुबन्ध-लोपे त्वरा इति गिरा इव।[२०६] यद्वा सह सुपा (पा०सू० २.१.४) इत्यनेन सुबन्तस्य धातुना सह समासे त्वराब्रवीत् इति।[२०७] समासस्य षड्विधत्वं प्रसिद्धमेव। यथा सिद्धान्तकौमुद्याम् – किञ्च

सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा।
सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः॥

सुपां सुपा राजपुरुषः। तिङा पर्यभूषत्। नाम्ना कुम्भकारः। धातुना कटप्रूः। अजस्रम्। तिङां तिङा पिबतखादता। खादतमोदता। तिङां सुपा कृन्त विचक्षणेति यस्यां क्रियायां सा कृन्त-विचक्षणा। (वै०सि०कौ० सर्वसमासशेषप्रकरणे)। तस्मात्तृतीयान्तत्वरयाइतिशब्देन समासो विभक्तिलोपश्च।

## १.८५ जायेति सीतेति

निर्ममो निरहङ्कारोऽप्यखण्डानन्दरूपवान्।
मम जायेति सीतेति विललापातिदुःखितः॥

– अ०रा० ३.८.२०

अत्र सीताहरणसञ्जातशोकः श्रीरामोऽखण्डानन्दरूपवान् सन् हे मम जाये इति हे सीते इति व्यलपत्। अत्र जायेति सीतेति च प्रयोगद्वयं विभाव्यम्। जाये सीते

[२०६] ञित्वराँ सम्भ्रमे (धा०पा० ७७५) इति धातोः सम्पदादिभ्यः क्विप् (वा० ३.३.१०८) इत्यनेन स्त्रियां भावे क्विप्। तस्मात्तृतीयायां विभक्तौ टाप्रत्यये त्वरा इति भावः।

[२०७] अस्मिन् पक्षे त्वर् धातोः घटादयः षितः (धा०पा० ग०सू०) इत्यनेन षित्त्वात् षिद्भिदादिभ्योऽङ् (पा०सू० ३.३.१०४) इत्यनेनाङि अजाद्यतष्टाप् (पा०सू० ४.१.४) इत्यनेन टापि त्वरा प्रातिपदिकम्। सम्भ्रमस्त्वरा (अ०को० ३.२.२६) इत्यमरः। तस्मात्तृतीयायां विभक्तौ – त्वरा टा → त्वरा आ → आङि चापः (पा०सू० ७.३.१०५) → त्वरे आ → एचोऽयवायावः (पा०सू० ६.१.७८) → त्वरय् आ → त्वरया। ततः त्वरया अब्रवीत् इति स्थिते सुपस्तिङा समासे सुपो धातुप्रातिपदिकयोः (पा०सू० २.४.७१) इत्यनेन विभक्तेर्लुकि त्वरा अब्रवीत् इति जाते अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) इत्यनेन सवर्णदीर्घे त्वराऽब्रवीत् इति।

च द्वावपि शब्दौ सम्बोधनान्तौ। एवं प्रातिपदिकात्सौ विभक्तौ सम्बोधनतया संबुद्धौ च (पा०सू० ७.३.१०६) इत्येकार्ये एङ्ह्रस्वात्सम्बुद्धेः (पा०सू० ६.१.६९) इत्यनेन सुलोपे जाये सीते इति सिध्यतः। तत इतिघटकेकारेण सह सन्धावयादेशे[२०८] यलोपे[२०९] जाय इति सीत इति च। जायेति सीतेति अपाणिनीयमिव। उच्यते। अत्र च इतिशब्दार्थकः तिशब्दः।[२१०] जाये ति सीते ति। यथा ईदूदेद्द्विवचनं प्रगृह्यम् (पा०सू० १.१.११) इत्यनेनेदन्तोदन्तैदन्तानां द्विवचनानां प्रगृह्यसञ्ज्ञा क्रियते। सत्यां च तस्यां प्रकृति-भावो भवति। हरी एतौ विष्णू इमौ गङ्गे अमू (वै०सि०कौ० १००) इत्यादिवत्। तर्हि मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम (म०भा० १२.१७६.११) इति महाभारतश्लोक-वाक्ये मणी इव उष्ट्रस्य इति स्थितेऽत्रापीदन्तद्विवचनतया प्रगृह्यत्वात्प्रकृतिभावे कथं मणीव इत्यत्र दीर्घः। अतः कौमुद्यामाक्षिप्य समाहितं 'मणी वोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम' इत्यत्र त्विवार्थे वशब्दो वाशब्दो वा बोध्यः (वै०सि०कौ० १००)। तत्रत्या तत्त्वबोधिनी च – वशब्द इत्यादि। 'वं प्रचेतसि जानीयादिवार्थे च तदव्ययम्' (मे०को० व० १) इति मेदिनी। 'व वा यथा तथैवैवं साम्ये' (अ०को० ३.४.९) इत्यमरः। 'कादम्बखण्डित-दलानि व पङ्कजानि' इत्यादिप्रयोगदर्शनाच्चेति भावः (त०बो० १००)। स एव पन्था अत्राप्यनुयातव्यः। इतिअर्थे तिशब्दो बोद्धव्यः। एतेन हे कृष्ण हे यादव हे सखे ति (भ०गी० ११.४१) इति भगवद्गीतोक्तमप्यपाणिनीयं समाहितम्।[२११] यद्वा जाया इति सीता इति शुद्धप्रथमान्तमेव रूपद्वयं ततो गुणे जायेति सीतेति। अथवा न मु ने (पा०सू० ८.२.३) इत्यत्र नग्रहणमेव पूर्वत्रासिद्धम् (पा०सू० ८.२.१) इति सूत्रस्यासिद्धकरणानित्यत्वं ज्ञापयति क्वाचित्कम्। अन्यथा अमुना इत्येव ब्रूयात्। तत्र हि न। मु ने इति योगविभागः। पूर्वत्रासिद्धं न इति प्रथमोऽर्थः। ने मु न असिद्धः इति द्वितीयोऽर्थः। योगविभागफलं क्वचित्क्वचित् पूर्वत्रासिद्धम् (पा०सू० ८.२.१) इति सूत्रस्य प्रसराभावः। तेन न चीरमस्याः प्रविधीयतेति (वा०रा० २.३७.३४) इह प्रविधीयते इति इत्यवस्थायां एचोऽयवायावः (पा०सू० ६.१.७८) इत्यनेनायादेशे प्रविधीयतय् इति इति जाते लोपः शाकल्यस्य (पा०सू० ८.३.१९) इत्यनेन यकारलोपे आद्गुणः (पा०सू० ६.१.८७) इत्यनेन गुणे प्राप्ते यलोपस्य त्रिपादीत्वाद्गुणशास्त्रस्य सपादसप्ताध्यायीत्वात् पूर्वत्रासिद्धम् (पा०सू० ८.२.१) इत्यनेन लोपकार्यस्यासिद्धत्वे गुणाभावे प्रविधीयतेति इति कथम्। ततो न मु ने इत्यनेनैव

[२०८] एचोऽयवायावः (पा०सू० ६.१.७८) इत्यनेन।

[२०९] लोपः शाकल्यस्य (पा०सू० ८.३.१९) इत्यनेन।

[२१०] तिशब्दस्यार्थौ वाचस्पत्ये – इति + वेदे पृषो०। इतिशब्दार्थे। "सहोवाचास्तीह प्रायश्चित्तिरित्यस्तीति का ति पिता ते वेदेति शत० ब्रा० ११.६.१.३। का प्रायश्चित्तिस्ति इति प्रश्नः। शतपथब्राह्मणे त्रिषु मन्त्रेषु तिशब्द इतिअर्थे प्रयुक्तः – का ति पिता ते वेदेति (श०ब्रा० ११.६.१.३) का ति पितैव ते वेदेति (श०ब्रा० ११.६.१.४) का ति पितैव ते वेदेति (श०ब्रा० ११.६.१.५)।

[२११] इदं प्रथमं समाधानम्। द्वितीयं पश्चाद्वक्ष्यन्ति।

पूर्वत्रासिद्धम् (पा०सू० ८.२.१) इत्यस्याप्रवृत्तौ लोपकार्ये सिद्धे गुणे प्रविधीयतेति।[२१२] एवमेव हे कृष्ण हे यादव हे सखेति (भ०गी० ११.४१) इत्यत्रापि कर्तव्ये लोपकार्ये सिद्धे गुणः।[२१३] एवमेव प्रियः प्रियायार्हसि देव सोढुम् (भ०गी० ११.४४) इत्यत्रापि प्रियायास् अर्हसि इति स्थिते ससजुषो रुः (पा०सू० ८.२.६६) इत्यनेन सकारस्य रुत्वे भोभगोअघोअपूर्वस्य योऽशि (पा०सू० ८.३.१७) इत्यनेन यत्वे लोपः शाकल्यस्य (पा०सू० ८.३.१९) इत्यनेन लोपे दीर्घे प्राप्ते पुनस्त्रिपादित्वाल्लोपकार्यस्यासिद्धत्वे प्राप्ते दीर्घे च सङ्कटापन्ने न मु ने (पा०सू० ८.२.३) इत्यनेन पूर्वत्रासिद्धम् (पा०सू० ८.२.१) इति सूत्रे निराकृते लोपकार्ये सिद्धे दीर्घे प्रियायार्हसि इति साधु। अनया मीमांसया प्रियाय अर्हसि इति चतुर्थ्यन्तं श्रीरामानुजकथनमपास्तम्।[२१४] एवमेव मम जाये इति सीते इति इत्युभयत्राप्येकारस्यायादेशे यकारस्य शाकललोपे[२१५] गुणे प्राप्ते पूर्वत्रासिद्धम् (पा०सू० ८.२.१) इति सूत्रेण यकार-लोपस्यासिद्धत्वे प्राप्ते न मु ने (पा०सू० ८.२.३) इत्यनेन सूत्रेऽस्मिन्निराकृते गुण उभावपि प्रयोगौ निरवद्यौ। न मु ने इत्यत्र नकारयोगविभागं समर्थयन्ते वैयाकरणसिद्धान्तकौमुदी-तत्त्वबोधिनीटीकाकारा ज्ञानेन्द्रसरस्वतीमहाभागाः। तथा च तत्रत्या तत्त्वबोधिनी – ननु "अधुना" इतिवत् "अमुना" इत्योवोच्यतां किमनेनासिद्धत्वनिषेधेनेति चेत्। अत्राहुः। "न मु ने" (पा०सू० ८.२.३) इत्युक्तिः "न" इति योगविभागार्था। तेन रामः रामेभ्य इत्यादि सिध्यति। अन्यथा हि रोरसिद्धतयोकारस्येत्सञ्ज्ञालोपौ कथं स्याताम्। न चानुनासिक-निर्देशसामर्थ्यादित्सञ्ज्ञालोपौ प्रति रुत्वं नासिद्धमिति वाच्यम्। तरुमूलं देवरुहीत्यादौ "हशि च" (पा०सू० ६.१.११४) इत्यस्य व्यावृत्तये "अतो रोरप्लुतादप्लुते" (पा०सू० ६.१.११३) इत्यत्रानुनासिकस्यैव निर्देशेन तत्रैव चरितार्थत्वात्। एवं च स्थानिवत्सूत्रस्यापि प्रवृत्तौ

[२१२] प्रविधीयतेतीत्यत्र सन्धिस्तु 'न मु ने' इत्यत्र योगविभागेन क्वचित्त्रिपाद्या असिद्धत्वाभावज्ञापनादार्षत्वाद्वा (वा०रा० ति०टी० २.३७.३४)।

[२१३] इदं द्वितीयं समाधानम्।

[२१४] यस्मात्त्वं सर्वस्य पिता पूज्यतमो गुरुश्च कारुण्यादिगुणैश्च सर्वाधिकोऽसि तस्मात्त्वामीशमीड्यं प्रणम्य प्रणिधाय च कायं प्रसादये। यथा कृतापराधस्य अपि पुत्रस्य यथा च सख्युः प्रणामपूर्वकं प्रार्थितः पिता सखा वा प्रसीदति तथा त्वं परमकारुणिकः प्रियः प्रियाय मे सर्वं सोढुमर्हसि (भ०गी० रा०भा० ११.४४)।

[२१५] शाकलश्चासौ लोपश्चेति शाकललोपः। शकलस्य गोत्रापत्यं पुमान् शाकल्यः। गर्गादित्वात् यञ्-प्रत्ययः। शाकल्यस्यायं शाकलः। लोपः शाकल्यस्य (पा०सू० ८.३.१९) इत्यनेन विहितो लोपः शाकलो लोपः शाकललोपो वा। शकल → गर्गादिभ्यो यञ् (पा०सू० ४.१.१०५) → शकल यञ् → शकल य → यचि भम् (पा०सू० १.४.१८) → भसञ्ज्ञा → तद्धितेष्वचामादेः (पा०सू० ७.२.११७) → शाकल य →यस्येति च (पा०सू० ६.४.१४८) → शाकल् य → शाकल्य → तस्येदम् (पा०सू० ४.३.१२०) → शाकल्य अण् → शाकल्य अ → यचि भम् (पा०सू० १.४.१८) → भसञ्ज्ञा → यस्येति च (पा०सू० ६.४.१४८) → शाकल्य् अ → आपत्यस्य च तद्धितेऽनाति (पा०सू० ६.४.१५१) → शाकल् अ → शाकल → विभक्तिकार्यम् → शाकलः। ष्फाणौ प्रत्ययौ शाकल्यशब्दाद्भवत इति महाभाष्ये स्पष्टम्। यथा – कण्वात्तु शकलः पूर्वः कतादुत्तर इष्यते। पूर्वोत्तरौ तदन्तादी ष्फाणौ तत्र प्रयोजनम्॥ (भा०पा०सू० ४.१.१८)। तत्रैव शाकल्यायनी शाकल्यस्य च्छात्राः शाकलाः इत्युदाहृतौ।

पदत्वाद्विसर्गो लभ्यते। "प्रत्ययः" (पा०सू० ३.१.१) "परश्च" (पा०सू० ३.१.२) इत्यादि-निर्देशाश्चेह लिङ्गमिति दिक् (त०बो० ४३९)।

## १.८६ जटायो

जटायो ब्रूहि मे भार्या केन नीता शुभानना।
मत्कार्यार्थं हतोऽसि त्वमतो मे प्रियबान्धवः॥

– अ०रा० ३.८.३१

इत्युक्त्वा राघवः प्राह जटायो गच्छ मत्पदम्।
मत्सारूप्यं भजस्वाद्य सर्वलोकस्य पश्यतः॥

– अ०रा० ३.८.४०

जटायामायुर्यस्य इति विग्रहे व्यधिकरणबहुव्रीहौ विभक्तिकार्ये सम्बोधने हे जटायुः इति चेत्।[२१६] आयुस् आयु शब्दश्च द्वावप्यायुष्यवाचकौ।[२१७] अत्र आयु शब्द एव जटाशब्देन सह समस्तः। ततो प्रथमाविभक्तौ एकवचनं सम्बुद्धिः (पा०सू० २.३.४९) इत्यनेन सम्बुद्धिसञ्ज्ञायां

---

[२१६] जटायुस् प्रातिपदिकात्सम्बुद्धौ सौ विभक्तौ जटायुस् सुँ → जटायुस् स् → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → जटायुस् → ससजुषो रुः (पा०सू० ८.२.६६) → जटायुरुँ → जटायुर् → खरवसानयोर्विसर्जनीयः (पा०सू० ८.३.१५) → जटायुः।

[२१७] उकारान्तआयुशब्दो यथा – यथा श्रुतं मया पूर्वं वायुना जगदायुना (वायु०पु० १.५४.२) स्थाणोः पश्चिमदिग्भागे वायुना जगदायुना (वाम०पु० स०मा० २५.३९)। तत्त्वबोधिन्यामुणादिप्रकरणे छन्दसीणः (प०उ० १.२) इति सूत्रे ज्ञानेन्द्रसरस्वतीमहाभागास्तु – उणनुवर्तते। एति गच्छतीत्यायुः। "मा न आयौ" इति। आयुशब्दो मनुष्यपर्यायेषु वैदिकनिघण्टौ पठितः। अत एव "त्वामग्ने प्रथममायुमायवे" (ऋ०वे०सं० १.३१.११) "मा नस्तोके तनये मा न आयौ" (ऋ०वे०सं० १.११४.८) इत्यादिमन्त्रेषु वेदभाष्ये तथैव व्याख्यातम्। अर्वाचीनास्तु "छन्दसीणः" इति सूत्रं बहुलवचनाद्भाषायामपि प्रवर्तत इति स्वीकृत्य "आयुर्जीवितकालो ना" (अ०को० २.८.१२०) इत्यमरग्रन्थे 'आयु'शब्दमुकारान्तं व्याचख्युः। ननु "एतेर्णिच्च" (प०उ० २.११८) इत्युस्प्रत्यये सकारान्तो वक्ष्यमाण 'आयुः'शब्दस्तु लोकवेदयोर्निर्विवाद एव। अत एव 'जटा आयुरस्य' इति विग्रहे "गृध्रं हत्वा जटायुषम्" (वा०रा० १.१.५२) इति रामायणप्रयोगः "यदि त्रिलोकी गणनापरा स्यात्तस्याः समाप्तिर्यदि नायुषः स्यात्" (नै०च० ३.४०) इति श्रीहर्षप्रयोगश्च सङ्गच्छते। तथा च "आयुर्जीवितकालो ना" (अ०को० २.८.१२०) इत्यत्रायुःशब्दः सकारान्त इत्येव व्याख्यायतां किमुकारान्ताभ्युपगमेनेति चेत्। अत्राहुः – सकारान्त आयुःशब्दो नपुसंक इति तस्य पुँल्लिङ्गता नेत्याशयेन तथोक्तमिति। अन्ये तु "छन्दसीणः" (प०उ० १.२) इति सूत्रस्य भाषायां प्रवृत्त्यभावे "मा वधीष्ट जटायुं माम्" (भ०का० ६.४१) इति भट्टिप्रयोगः "तटीं विन्ध्यस्याऽद्रेरभजत जटायोः प्रथमजः" इति विन्ध्यवर्णने अभिनन्दोक्तप्रयोगश्च न सङ्गच्छेतेत्याहुः। वस्तुतस्तु "जटां याति प्राप्नोतीति जटायुः"। मृगय्वादित्वात्कुः। आयातीत्यायुः। एवं च "जटायुषा जटायुं च विद्यादायुं तथायुषा" इति द्विरूपकोशः "वायुना जगदायुना" इति वर्णविवेकश्च सुसाध इति दिक्। ऋग्वेदसंहितायाम् अग्ने जरस्व स्वपत्य आयुन्यूर्जा पिन्वस्व समिषो दिदीहि नः (ऋ०वे०सं० ३.३.७) वत्सं न पूर्व आयुनि जातं रिहन्ति मातरः (ऋ०वे०सं० सा०भा० ९.१००.१) इति मन्त्रयोरुकारान्तः आयु शब्द इति केचित्। अत्र सायणाः आयुनि आयुषि (ऋ०वे०सं० ३.३.७) आयुनि वयसि (ऋ०वे०सं० सा०भा० ९.१००.१)।

ह्रस्वस्य गुणः (पा०सू० ७.३.१०८) इत्यनेन गुणे सति एङ्ह्रस्वात्सम्बुद्धेः (पा०सू० ६.१.६९) इत्यनेन सोर्लोपे जटायो इति।[२१८]

## १.८७ वन्दितो मे

अष्टावक्रः पुनः प्राह वन्दितो मे दयापरः।
शापस्यान्तं च मे प्राह तपसा द्योतितप्रभः॥

– अ०रा० ३.९.१८

अत्र मया वन्दितः इत्येवोचितं यतो हि कर्मणि क्तप्रत्ययः कर्ता चानुक्तोऽतोऽनुक्ते कर्तरि तृतीया मया इति।[२१९] अत्र कर्मणि सम्बन्धविवक्षायां षष्ठी। अथवा क्तस्य च वर्तमाने (पा०सू० २.३.६७) इत्यनेन षष्ठी।[२२०] यद्वा मे इत्यस्य प्राह इत्यनेनान्वयः। तुमुन्कर्मणि चतुर्थी।[२२१]

## १.८८ देवराजानम्

कदाचिद्देवराजानमभ्याद्रवमहं रुषा।
सोऽपि वज्रेण मां राम शिरोदेशेऽभ्यताडयत्॥

– अ०रा० ३.९.२१

देवानां राजेति देवराजः इति विग्रहे षष्ठीतत्पुरुषे राजाऽहस्सखिभ्यष्टच् (पा०सू० ५.४.९१) इत्यनेन टच्प्रत्यये देवराजम् इत्युचितम्। देवराजानम् इति च समासान्तप्रत्ययानामनित्यत्वस्वीकारे सति। अथवा राजनं राट्। भावे क्विप्।[२२२] देवानां

---

२१८ सकारान्तजटायुस् शब्दः सर्वविदितः। उकारान्तो जटायुशब्दोऽपि दृश्यते। यथा जटायोस्तु वधं श्रुत्वा दुःखितः सोऽरुणात्मजः (वा०रा० ५.३५.६५) इति वाल्मीकिरामायणे सुन्दरकाण्डे पाठभेदः। अत्र जटायुषो वधं श्रुत्वा इति गोविन्दराजसम्मतपाठः। अरण्यकाण्डे तु तलेनाभिजघानार्तो जटायुं क्रोधमूर्छितः (वा०रा० ३.५१.३७) इत्यत्र गोविन्दराजा अपि – जटायुं जटायुरित्युकारान्तोऽप्यस्ति (वा०रा० भू०टी० ३.५१.३७)। अन्यच्च – जटायोः कीर्तनं चक्रू रामकार्ये मृतं पुरा (आ०रा० १.८.१११) जघान तेन दुष्टात्मा जटायुं धर्मचारिणम् (नर०पु० ४९.९६) माऽऽवधिष्ठा जटायुं माम् (भ०का० ६.४१) जटायोः मोक्षप्राप्तिः (सा०द० ६.६९) ब्रह्मास्त्रे चापि दत्ते पथि पितृसुहृदं वीक्ष्य भूयो जटायुम् (ना० ९.३४.७) इत्यादिषु।

२१९ कर्तृकरणयोस्तृतीया (पा०सू० २.३.१८) इत्यनेन।

२२० मतिबुद्धिपूजार्थेभ्यश्च (पा०सू० ३.२.१८८) इत्यनेन पूजार्थे वर्तमाने क्तः। मे वन्दितः सन् वन्द्यमानो वा प्राह इत्यर्थो न त्वहं तमवन्दे पश्चात्स प्राहेति। एवमेव त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे (भ०गी० ११.१८) इति गीतावचने मतः इत्यत्र मतिबुद्धिपूजार्थेभ्यश्च (पा०सू० ३.२.१८८) इत्यनेन पूजार्थे वर्तमाने क्तः क्तस्य च वर्तमाने (पा०सू० २.३.६७) इत्यनेन च षष्ठी।

२२१ क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन। मां बोधयितुमुद्धर्तुं वा प्राह इत्यर्थः। एवमेवोत्तरार्धे शापस्यान्तं च मे प्राह इत्यत्र बोध्यम्।

२२२ सम्पदादिभ्यः क्विप् (वा० ३.३.१०८) इत्यनेन।

राडिति देवराट्। देवराजाऽऽसमन्तादनिति इति विग्रहे देवराजानः तं देवराजानम् इति पाणिनीयमेव।[२२३]

## १.८९ ते

भक्त्या त्वत्पादकमले भक्तिमार्गविशारदा।
तां प्रयाहि महाभाग सर्वं ते कथयिष्यति॥

– अ०रा० ३.१०.२

अत्र त्वां बोधयितुं कथयिष्यति इति तुमुन्कर्मणि चतुर्थी।[२२४] यद्वा ते पुरतः कथयिष्यति इति सम्बन्धषष्ठी।

॥ इत्यरण्यकाण्डीयप्रयोगाणां विमर्शः ॥

॥ अथ किष्किन्धाकाण्डीयप्रयोगाणां विमर्शः ॥

## १.९० भाति मनो मम

युवां त्रैलोक्यकर्ताराविति भाति मनो मम।
युवां प्रधानपुरुषौ जगद्धेतू जगन्मयौ॥

– अ०रा० ४.१.१३

अत्र पम्पातीर ऋष्यमूकगिरेः पार्श्वे गच्छन्तौ रामलक्ष्मणौ विलोक्य भीतेन सुग्रीवेण प्रेषितो विप्रवेषधारी हनुमान् तौ पृच्छन् कथयति यत् युवाम् ईश्वरौ इति मे मनो भाति। मनः इति द्वितीयान्तम्। अर्थात् मे मनः प्रतीत्थं प्रतीयते।[२२५] यद्वा मनः इति प्रथमान्तमेव। भाति इत्यस्य प्रत्यायनमर्थो न तु भानम्। प्रतीत्युपसर्गसंयोजनेन धातोः प्रत्यायनरूपस्यार्थस्य स्वीकारात्।[२२६] न च प्रतीत्यत्र न विलोक्यत इति चेत्। विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इति लुप्तत्वात्।

---

[२२३] विस्तृतव्याख्यानं १४८तमे पृष्ठे १.२५ देवराजानम् इति प्रयोगस्य विमर्शे पश्यन्तु।

[२२४] क्रियार्थोपपदस्य च कर्मणि स्थानिनः (वा० २.३.१४) इत्यनेन।

[२२५] प्रति इत्यध्याहार्यमिति भावः। ततः अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि (वा० २.३.२) इत्यनेन द्वितीया।

[२२६] यथा भारते विराटपर्वणि विराटोऽर्जुनं प्रति – नैवंविधाः क्लीबरूपा भवन्ति कथञ्चनेति प्रतिभाति मे मनः (म०भा० ४.११.७)।

## १.९१ समागम्य रघूत्तमम्

ततोऽतिहर्षात्सुग्रीवः समागम्य रघूत्तमम्।
वृक्षशाखां स्वयं छित्त्वा विष्टराय ददौ मुदा॥

– अ०रा० ४.१.३२

समागम्य इत्यस्य मित्रतारूपेऽर्थे स्वीकृतेऽलिङ्गने वा तृतीयया भवितव्यं[२२७] किन्त्वागमनरूपार्थस्वीकारे नापत्तिः।[२२८] यद्वा रघूत्तमं प्रति समागम्य पश्चात्तेन मैत्रीं चकार इति द्वितीया सङ्गता।[२२९]

## १.९२ हा सीतेति (४.१.४१)

विमुच्य रामस्तद्दृष्ट्वा हा सीतेति मुहुर्मुहुः।
हृदि निक्षिप्य तत्सर्वं रुरोद प्राकृतो यथा॥

– अ०रा० ४.१.४१

अत्रापि हा सीते इति अस्यामवस्थायां गुणोऽसङ्गतः।[२३०] किन्तु इतिशब्दग्राहकतिशब्दस्वीकारे न दोषः।[२३१] अथवा शुद्धप्रथमान्तस्वीकारे गुणः सङ्गत एव। अथवा अवङ् स्फोटायनस्य (पा०सू० ६.१.१२३) इति व्यवस्थितविभाषया क्वचिदन्यदेव इति नियमेनात्राचि परेऽपि पूर्वरूपम्। अथवा पृषोदरादीनि यथोपदिष्टम् (पा०सू० ६.३.१०९) इति सूत्रेण तस्मिन् गणे पठित्वाऽत्र पूर्वरूपं हा सीतेति। अथवा पूर्वोक्तरीत्या न मु ने (पा०सू० ८.२.३) इत्यस्य नकारस्य मुभावादतिरिक्ते स्थलेऽपि प्रवृत्तत्वाद्यकारलोपे सिद्धे गुणे च हा सीतेति इति पाणिनीयम्।[२३२]

---

[२२७] यथा राजभिस्तत्र वार्ष्णेयः समागच्छद्यथावयः (म०भा० ५.९१.७) त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समागच्छतु काञ्चनेन (र०वं० ६.७९) प्रहृष्टो भव विप्रर्षे समागच्छ मया सह (म०भा० १३.५०.८५) सा त्वं मया समागच्छ (म०भा० ३.३०७.२८) इत्यादिषु। अन्यान्युदाहरणानि चारुदेवशास्त्रिकृतायाम् उपसर्गार्थचन्द्रिकायाम् द्वितीयखण्डे समा–गम् इत्यत्र पश्यन्तु।

[२२८] यथा भारते क्व नु नाम वयं सर्वाः कालेनाल्पेन तं नरम्। समागच्छेम यो नस्तद्रूपमापादयेत्पुनः॥ (म०भा० १.२१७.१३) इत्यत्र।

[२२९] प्रति इत्यध्याहार्यमिति भावः। ततः अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि (वा० २.३.२) इत्यनेन द्वितीया।

[२३०] हा सीते इति इति स्थिते एचोऽयवायावः (पा०सू० ६.१.७८) इत्यनेन हा सीतय् इति इति जाते लोपः शाकल्यस्य (पा०सू० ८.३.१९) इत्यनेन यकारलोपे हा सीत इति जाते यकारलोपविधायिसूत्रस्य त्रिपादीस्थत्वात् आद्गुणः (पा०सू० ६.१.८७) इति गुणविधायिसूत्रस्य सपादसप्ताध्यायीस्थत्वाद्यलोपेऽसिद्धे गुणोऽसङ्गत इति भावः।

[२३१] २०१तमे पृष्ठे २१०तमीं पादटिप्पणीं पश्यन्तु।

[२३२] २००तमे पृष्ठे १.८५ जायेति सीतेति इति प्रयोगस्य विमर्शमपि पश्यन्तु।

## १.९३ ते

आश्वास्य राघवं भ्राता लक्ष्मणो वाक्यमब्रवीत्।
अचिरेणैव ते राम प्राप्यते जानकी शुभा।
वानरेन्द्रसहायेन हत्वा रावणमाहवे॥

– अ०रा० ४.१.४२

अत्र प्राप्यते इति कर्मवाच्ये प्रयोगेऽनुक्तत्वात्कर्तरि तृतीया प्रयोक्तव्या।[२३३] षष्ठी-प्रयोगस्तु कर्मणि सम्बन्धविवक्षया। यद्वा ते इत्यस्य जानकी इति शब्देन सह अन्वयः। अर्थात् ते तव जानकी इति सामान्यसम्बन्धे षष्ठी।

## १.९४ तव

सुग्रीवोऽप्याह हे राम प्रतिज्ञां करवाणि ते।
समरे रावणं हत्वा तव दास्यामि जानकीम्॥

– अ०रा० ४.१.४३

अत्र दाधातुप्रयोगे (डुदाञ् दाने धा०पा० १०९१) तुभ्यम् इति चतुर्थी प्रयोक्तव्या।[२३४] षष्ठीप्रयोगस्तु सम्प्रदानेऽपि सम्बन्धविवक्षायाम्। अथवा तव सहचारिणीं जानकीं दास्यामि इति दाम्पत्यभावे सम्बन्धे षष्ठी।[२३५]

## १.९५ रघुनायके

स्वोदन्तं कथयामास प्रणयाद्रघुनायके।
सखे शृणु ममोदन्तं वालिना यत्कृतं पुरा॥

– अ०रा० ४.१.४६

अत्र कथयामास इति कथधातुप्रयोगे (कथँ वाक्यप्रबन्धने धा०पा० १८५१) रघुनायकम् इति द्वितीयया भवितव्यमासीत्।[२३६] रघुनायके इति सप्तमी त्वपाणिनीयेव। अत्र वैषयिक आधारे सप्तमी। विषयता च प्रतिपाल्यतारूपा। यद्वा रघुनायके शृण्वति कथयामास इत्यध्याहारे यस्य च भावेन भावलक्षणम् (पा०सू० २.३.३७) इत्यनेन सप्तमी। यद्वा रघुनायके साधुः सुग्रीवः कथयामास इत्यध्याहारे साध्वसाधुप्रयोगे च (वा० २.३.३६) इत्यनेन सप्तमी।

[२३३] कर्तृकरणयोस्तृतीया (पा०सू० २.३.१८) इत्यनेन।
[२३४] चतुर्थी सम्प्रदाने (पा०सू० २.३.१३) इत्यनेन।
[२३५] सहचारिणीम् इत्यध्याहार्यमिति भावः।
[२३६] अकथितं च (पा०सू० १.४.५१) इत्यनेन कर्मसञ्ज्ञायां कर्मणि द्वितीया (पा०सू० २.३.२) इत्यनेन।

## १.९६ तदादि

तदादि मम भार्यां स स्वयं भुङ्क्ते विमूढधीः।
अतो दुःखेन सन्तप्तो हृतदारो हृताश्रयः॥

– अ०रा० ४.१.५७

अत्र प्रभृत्यर्थतया पञ्चमी युक्ता[२३७] किन्तु आरभ्ययोगे द्वितीया च[२३८] इति द्वितीयैवात्र।[२३९]

## १.९७ कपीन्द्राय

किन्तु लोका वदिष्यन्ति मामेवं रघुनन्दनः।
कृतवान्किं कपीन्द्राय सख्यं कृत्वाऽग्निसाक्षिकम्॥

– अ०रा० ४.२.३

अत्र कपीन्द्रस्य इति षष्ठ्यापाततः किन्तु विचारे कृते हिताय इत्यध्याहारे हितयोगे च (वा० २.३.१३) इत्यनेन चतुर्थी। यद्वा तादर्थ्ये चतुर्थी वाच्या (वा० २.३.१३) इति वार्त्तिकेन चतुर्थी।

## १.९८ मे

एवं मे प्रत्ययं कृत्वा सत्यवादिन् रघूत्तम।
उपेक्षसे किमर्थं मां शरणागतवत्सल॥

– अ०रा० ४.२.१२

मे इति षष्ठीप्रयोगोऽसङ्गतः। यतो हि रामः सुग्रीवे विश्वासमुत्पादितवान् वालिहननप्रत्ययतः। वैषयिकाधारतया मयि इति प्रयोक्तव्यम्। परं मे उपरि मे हृदये वेत्यध्याहारे न दोषः। अथवा सुग्रीव आत्मीयतया कथयति हे मे रघूत्तम इति मत्सम्बन्धिरघूत्तम। सम्बन्धश्च रक्ष्यरक्षकभावरूपः। तत्र षष्ठी।

---

[२३७] 'अपादाने पञ्चमी' इति सूत्रे 'कार्तिक्याः प्रभृति' इति भाष्यप्रयोगात् प्रभृत्यर्थयोगे पञ्चमी (वै०सि०कौ० ५९५)।

[२३८] मूलं मृग्यम्।

[२३९] अत्राऽरभ्येति क्रियापेक्षया कर्मत्वविवक्षायां द्वितीयैव। 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इत्युक्तेः। यथा 'सूर्योदयमारभ्य आऽस्तमयाज्जपति' इत्यादौ (बा०म० ५९५)।

## १.९९ त्वां शपे

गत्वाऽह्वय पुनः शत्रुं हतं द्रक्ष्यसि वालिनम्।
रामोऽहं त्वां शपे भ्रातर्हनिष्यामि रिपुं क्षणात्॥

– अ०रा० ४.२.१५

अत्र त्वाम् इति प्रयोगः सन्दिग्धः। शापस्थविषयतया सुग्रीवो वैषयिक आधारः। तद्वाचकयुष्मच्छब्द एकवचने सप्तम्युचिता।[२४०] किन्तु मीमांस्यमाने प्रतिरध्याहार्यः। त्वां प्रति शपे इति योजने अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि (वा० २.३.२) इत्यनेन द्वितीया।

## १.१०० ते

इदानीमेव ते भग्नः पुनरायाति सत्वरः।
सहायो बलवांस्तस्य कश्चिन्नूनं समागतः॥

– अ०रा० ४.२.२१

इति निश्चित्य तौ यातौ निश्चितं श्रृणु मद्वचः।
इदानीमेव ते भग्नः कथं पुनरुपागतः॥

– अ०रा० ४.२.३०

ते इत्यनुचितो यतो हि भग्नः इति कर्मणि क्तान्तस्ततः कर्तर्यनुक्ते तृतीया[२४१] किन्तु ते मुष्टिना भग्नः इत्यध्याहारेऽङ्गाङ्गिभावसम्बन्धे षष्ठी।

## १.१०१ एकामपि

अधर्मकारिणं हत्वा सद्धर्मं पालयाम्यहम्।
दुहिता भगिनी भ्रातुर्भार्या चैव तथा स्नुषा॥
समा यो रमते तासामेकामपि विमूढधीः।
पातकी स तु विज्ञेयः स वध्यो राजभिः सदा॥

– अ०रा० ४.२.६०.६१

रमणं सार्धं वाऽऽधारे वा भवति। यदि चेत्सार्धं तदा एकया सह इति सहयुक्तेऽप्रधाने (पा०सू० २.३.१९) इत्यनेन तृतीया। यदि चेदौपश्लेषिक आधारे रमणं चेत् एकस्याम् इति सप्तमी। किन्त्वत्र एकाम् इति द्वितीया तु एकां गृहीत्वा इत्यध्याहारेण ग्रहणकर्मणि।

---

[२४०] सप्तम्यधिकरणे च (पा०सू० २.३.३६) इत्यनेन।

[२४१] कर्तृकरणयोस्तृतीया (पा०सू० २.३.१८) इत्यनेन।

## १.१०२ चतुर्द्वारकपाटादीन्

चतुर्द्वारकपाटादीन् बद्ध्वा रक्षामहे पुरीम्।
वानराणां तु राजानमङ्गदं कुरु भामिनि॥

– अ०रा० ४.३.३

अत्र श्रीरामभद्रेण वालिनि हते तारां प्रति भीतवानराः कथयन्ति यत् चतुर्द्वारकपाटादीन् रुन्त्स्व। अत्र बहुव्रीहिः। चतुर्द्वारकपाटान्यादौ येषां तान् इति विग्रहेऽत्र पदार्थस्य सामान्यतया सामान्ये नपुंसकम् (वा० २.४.३०) इत्यनेन नपुंसके चतुर्द्वारकपाटादीनि इत्येव पाणिनीयम्।[२४२] किन्तु विशेषणवस्तुयोजनान्न दोषः। यथा चतुर्द्वारकपाटादीन् उपकरणविशेषान् इत्यध्याहारे न दोषः।[२४३]

## १.१०३ पतिना

किमङ्गदेन राज्येन नगरेण धनेन वा।
इदानीमेव निधनं यास्यामि पतिना सह॥

– अ०रा० ४.३.५

अत्र रामेण वालिनि हते तारा विलपन्ती प्राह यत् पतिना सह निधनं यास्यामि। अत्र पतिना इति प्रयोगोऽपाणिनीय इव। यतो हि पतिशब्दस्य तृतीयैकवचने घिसञ्ज्ञायाम् आङो नाऽस्त्रियाम् (पा०सू० ७.३.१२०) इत्यनेनाङो नादेशे पतिना इति सम्भवति किन्तु नादेशः सत्यां घिसञ्ज्ञायां सम्भवः। सा च घिसञ्ज्ञा पतिशब्दस्य समास एव सम्भवा। पतिः समास एव (पा०सू० १.४.८) इति सूत्रात्। अतः समासाभावे घिसञ्ज्ञाया असम्भवात्तदभावे च नादेशस्यासम्भवे पतिना इत्यनुपपन्न एवेति चेत्। अत्र नास्ति शुद्धपतिशब्दोऽपि तु

---

[२४२] चतुर्द्वारकपाटादि शस् → जश्शसोः शिः (पा०सू० ७.१.२०) → चतुर्द्वारकपाटादि शि → शि सर्वनामस्थानम् (पा०सू० १.१.४२) → सर्वनामस्थानसञ्ज्ञा → चतुर्द्वारकपाटादि इ → इकोऽचि विभक्तौ (पा०सू० ७.१.७३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → चतुर्द्वारकपाटादि नुँम् इ → चतुर्द्वारकपाटादि न् इ → सर्वनामस्थाने चासम्बुद्धौ (पा०सू० ६.४.८) → चतुर्द्वारकपाटादी न् इ → चतुर्द्वारकपाटादीनि।

[२४३] चतुर्द्वारकपाटादि शस् → प्रथमयोः पूर्वसवर्णः (पा०सू० ६.१.१०२) → चतुर्द्वारकपाटादी शस् → तस्माच्छसो नः पुंसि (पा०सू० ६.१.१०३) → चतुर्द्वारकपाटादी न् → चतुर्द्वारकपाटादीन्।

पतिरिवाऽचरति पतयति इति विग्रह आचारे क्विप्।[२४४] पुनः पतयतीति पतिः। कर्तरि क्विप्।[२४५] सर्वापहारिलोपे गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः (प०शे० १५) इति परिभाषा-बलेनात्र गौणे पतिशब्दे पतिः समास एव (पा०सू० १.४.८) इति सूत्रस्याप्रवृत्तौ शेषो घ्यसखि (पा०सू० १.४.७) इति सूत्रेण घिसञ्ज्ञायाम् आङो नाऽस्त्रियाम् (पा०सू० ७.३.१२०) इत्यनेन नादेशे पतिना इति सिद्धं पाणिनीयमेव।[२४६] यद्वा पतिं स्वर्गं नयति इति विग्रहे उणादयो बहुलम् (पा०सू० ३.३.१) इत्यनेन डन् प्रत्यये[२४७] डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) इत्यनेन नीघटकेकारस्य लोपे पतिनन् इति जाते ततः प्रातिपदिक-सञ्ज्ञायां सौ विभक्तौ अलोऽन्त्यात्पूर्व उपधा (पा०सू० १.१.६५) इत्यनेनोपधासञ्ज्ञायां सर्वनामस्थाने चासम्बुद्धौ (पा०सू० ६.४.८) इत्यनेन दीर्घे हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन सुलोपे नलोपः प्रातिपदिकान्तस्य (पा०सू० ८.२.७) इत्यनेन नकारलोपे पतिना इति प्रथमान्त एव न तृतीयान्तः। अर्थात् पतिना भवान् अर्थात् रामभद्र भवान् पतिं स्वर्गं नीतवानतोऽहमपि निधनं यास्यामि।[२४८] निःशेषं धनं निधनं स्वकीयं

---

[२४४] पति → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → पति क्विँप् → पति व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → पति → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → पति लट् → पति तिप् → पति ति → कर्तरि शप् (पा०सू० ३.१.६८) → पति शप् ति → पति अ ति → सार्वधातुकार्ध-धातुकयोः (पा०सू० ७.३.८४) → पते अ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → पतय् अ ति → पतयति।

[२४५] पति → पूर्ववद्धातुसञ्ज्ञा → क्विप् च (पा०सू० ३.२.७६) → पति क्विँप् → पति व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → पति → विभक्तिकार्यम् → पतिः।

[२४६] अपि च तत्त्वबोधिनीकाराः पतिः समास एव (पा०सू० १.४.८) इति सूत्रे – अथ कथं 'सीतायाः पतये नमः' (रा०र०स्तो० २७) इति 'नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ' (प०स्मृ० ४.३०) इति पराशरश्च। अत्राहुः। पतिरित्याख्यातः पतिः 'तत्करोति तदाचष्टे' (धा०पा० ग०सू०) इति णिचि टिलोपे 'अच इः' (प०उ० ४.१४८) इत्यौणादिकप्रत्यये 'णेरनिटि' (पा०सू० ६.४.५१) इति णिलोपे च निष्पन्नोऽयं पतिशब्दः 'पतिः समास एव' (पा०सू० १.४.८) इत्यत्र न गृह्यते लाक्षणिकत्वादिति। एतेन 'कृष्णस्य सखिरर्जुनः' इति भारतम् 'सखिना वानरेन्द्रेण' इति रामायणं च व्याख्यातम् (त०बो० २५७)। अत्रत्या प्रक्रिया – पति → तत्करोति तदाचष्टे (धा०पा० ग०सू० १८७) → पति णिच् → पति इ → णाविष्ठवत्प्रातिपदिकस्य पुंवद्भाव-रभावटिलोपयणादिपरार्थम् (वा० ६.४.४८) → पत् इ → पति → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → पति लट् → पति तिप् → पति ति → कर्तरि शप् (पा०सू० ३.१.६८) → पति शप् ति → पति अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → पते अ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → पतय् अ ति → पतयति। पति → पूर्ववद्धातुसञ्ज्ञा → अच इः (प०उ० ४.१४८) → पति इ → णेरनिटि (पा०सू० ६.४.५१) → पत् इ → पति → विभक्तिकार्यम् → पतिः।

[२४७] कार्याद्विद्यादनूबन्धम् (भा०पा०सू० ३.३.१) केचिदविहिता अप्यूह्याः (वै०सि०कौ० ३१६९) इत्यनुसारमूह्योऽत्राविहितो डन् प्रत्ययः।

[२४८] सहशब्दान्वये अहमपि सह युगपदेव निधनं यास्यामीत्यर्थः। सहशब्दो यौगपद्ये इति वाचस्पत्यकाराः। यथा अस्तोदयौ सहैवासौ कुरुते नृपतिर्द्विषाम् इत्यत्र।

सर्वस्वं पतिमनुयास्यामि। अथवा निचितं निखिलं भोगादिधनं मोक्षरूपं वा धनं यस्मिन् तादृशं निधनं साकेतमहमपि यास्यामि। तारा प्रार्थयते यत् भवान् पतिनाऽर्थात्पतितमपि मे पतिं यया कृपया साकेतं नीतवान् तयैवाहमपि निधनं साकेतं यास्यामि इति पाणिनीय एव पतिना शब्दस्तेन नात्रासिद्धिः। अथवा पतिं न असहते अर्थात्सहत एवेति षहँ मर्षणे (धा०पा० ८५२, १८०९) इत्यस्मात् अच् प्रत्ययः पचादित्वात्।[२४९] अत्र न सहः इति असहः इति नञ्तत्पुरुषः। न असहः इति नासहः इति सुप्सुपासमासः।[२५०] ततः पत्युर्नासहः इति पतिनासहः इति षष्ठीतत्पुरुषसमासस्तत्सम्बुद्धौ हे पतिनासह अर्थात् हे पतिपापसहनकर्तः। अर्थात्प्रभो त्वमतिकरुणोऽसि कारुणिकोत्तमोऽसि यतो हि परकलत्रगामिनं नितान्तकामिनं पापिनं मम स्वामिनमपि त्वं नासहसे। अभावाभावः प्रतियोगिज्ञानस्य कारणं भवति इति न्यायेन तमपि क्षमसे स्मेदृशी ते क्षमा तयैव प्रभो मेऽपराधमपि क्षान्त्वा मामपि निधनं साकेतं नय। ह इति पादपूर्तौ पतिमपि नाऽसिनोषि न कर्मबन्धनेन बध्नास्यपि तु तमपि कर्मबन्धनान्मोचयित्वा साकेतं नयसीति पतिनासः इति विग्रहे न आसिनोतीति नासः इति विग्रहे आपूर्वकात् षिञ् बन्धने (धा०पा० १२४८, १४७७) इत्यस्मात् अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) इत्यनेन डप्रत्यये डित्त्वाट्टिलोपे[२५१] पतिनासः तत्सम्बुद्धौ हे पतिनास हे वालिमोक्षदायिन् मामपि साकेतं नय। अथवा पतिश्चासाविनश्चेति पतिनः।[२५२] न सहते भक्ताभक्तपीडामित्यसहः।[२५३] पतिनश्चासावसहश्चेति पतिनासहस्तत्सम्बुद्धौ हे पतिनासह इति विग्रहेऽपि प्रयोगसिद्धिः। अत्र पूर्वं स्वामिवाचकेन इनशब्देन पतिशब्दस्य कर्मधारयः पतिरेवेनः इति विग्रहः। अत्र पतिशब्दः पालकार्थवाचकः। सति कर्मधारये विभक्ति-

२४९ नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन।

२५० नलोपो नञः (पा०सू० ६.३.७३) इत्यनेन नलोपो नञ्तत्पुरुषसमासे भवति परन्तु सुप्सुपा-समासे न भवतीति व्याकरणचन्द्रोदये प्रथमखण्डे चारुदेवशास्त्रिणः। यथा नचिर (यथा नचिरकालं नो निष्कृतिः स्यात्त्रिलोकगे म०भा० १.९६.१९, मुनिर्ब्रह्म नचिरेणाधिगच्छति भ०गी० ५.६, भवामि नचिरात्पार्थ मय्यावेशितचेतसाम् भ०गी० १२.७), नान्तरीयक (यत्र नान्तरीयकोऽलाश्रीयते नासावल्विधिः भा०पा०सू० १.१.५६ नान्तरीयकत्वात् भा०पा०सू० १.२.३९, ३.३.१८, ३.४.२१, ४.१.९२) नाणक (तुलाशासनमानानां कूटकृन्नाणकस्य च या०स्मृ० २.२०.२४०), नास्ति (अस्ति नास्ति न जानन्ति देहि देहि पुनः पुनः म०सु०स० ५५४), नेष्ट (अतिककुदाः कृशदेहा नेष्टा हीनाधिकाङ्गश्च॥ बृ०सं० ६१.४), नसंहत (नसंहतास्तस्य नभिन्नवृत्तयः कि० १.१९), नभिन्न (नसंहतास्तस्य नभिन्नवृत्तयः कि० १.१९), नसुकर (कृत्वा नसुकरं कर्म गता वैवस्वतक्षयम् म०भा० ८.३.२१), नैकभेद (उच्चावचं नैकभेदम् अ०को० ३.१.८३) नैक (सा ददर्श नगान्नैकान् नैकाश्च सरितस्तथा म०भा० ३.६१.१०४, एको नैकः सवः कः किं यत्तत्पदमनुत्तमम् वि०स०ना० ६१) इत्यादिषु। यथा वाचस्पतये – नैक त्रि० न एकः नञर्थनशब्देन "सह सुपा" पा०स० अनेके १ एकभिन्ने २ विष्णौ पु० "एको नैकः सवः कः किम्" विष्णुस० मायया बहुरूपत्वान्नैकः "इन्द्रो मायाभिः पुरुरूप ईयते इति श्रुतेः" भा०।

२५१ डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) इत्यनेन।

२५२ शकन्ध्वादिषु पररूपं वाच्यम् (वा० ६.१.९४) इत्यनेन पररूपः।

२५३ अत्रापि नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेनाच्।

लोपे पतिघटकेकारस्येनघटकेकारेण सह अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) इति दीर्घः स्यादिति वाच्यम्। शकन्ध्वादिषु पररूपं वाच्यम् (वा० ६.१.९४) इत्यनेन पररूपे सति न दोषः। न च पतिनशब्दस्य शकन्ध्वादिगणे न पाठः। तस्याप्याकृतिगणतया[२५४] पाठस्वीकारे क्षतिविरहः। एवं न सहते इति पचाद्यज्निष्पन्नस्य[२५५] असहशब्दस्य पतिन एवासहः इति विग्रहे कर्मधारये दीर्घे सम्बोधने च हे पतिनासह इति सिद्धम्। यद्वा पतिं नाशयतीति पतिनाशः इति विग्रहे कर्मण्यण् (पा०सू० ३.२.१) इत्यनेन अण् प्रत्यये नश् - धातोः (णशँ अदर्शने धा०पा० ११९४) उपधावृद्धौ[२५६] समासे पृषोदरादित्वादन्त्यसकारे सति सम्बोधने हे पतिनास। ह इति पादपूर्तौ। अथवा अनः शकटे जले इति नानार्थ-कोषात्।[२५७] अत्र पत्युरनः शरीररूपं शकटं हन्तीति पतिनासहः तत्सम्बुद्धौ हे पतिनासह इति विग्रहे पतिशब्दस्य अनस् शब्देन तत्पुरुषे पृषोदरादित्वादकारलोपे डसप्रत्यये[२५८] डित्त्वसामर्थ्याट्टिलोप[२५९] आकारादेशे[२६०] पुनः हन् धातोः (हनँ हिंसागतयोः धा०पा० १०१२) अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) इत्यनेन डप्रत्यये टिलोपे[२६१] पतिनासहः[२६२] तत्सम्बुद्धौ हे पतिनासह अर्थाद्धे मत्पतिशरीरशकटहन्तः प्रभोऽहमपि त्वल्लोकं जिगमिषामि। अथवा अपतत्त्वच्चरणारविन्दे यः स पतिर्वाली इति पत् धातोः (पतॢँ गतौ धा०पा० ८४५) भूतकाल औणादिके इच् प्रत्यये[२६३] चकारानुबन्धकार्ये पुनस्तस्यैव घिसञ्ज्ञायां तृतीयाटा-

---

[२५४] आकृतिगणोऽयम् (वै०सि०कौ० ७९, ल०सि०कौ० ३९)।

[२५५] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४)इत्यनेन।

[२५६] अत उपधायाः (पा०सू० ७.२.११६) इत्यनेन।

[२५७] मूलं मृग्यम्। क्लीबेऽनः शकटोऽस्त्री स्यात् (अ०को० २.८.५२) इत्यमरः। आ ते कारो शृणवामा वचांसि ययाथ दूरादनसा रथेन (ऋ०वे०सं० ३.३३.१०) इति मन्त्रे अनसा शकटेन इति सायणाः।

[२५८] कार्याद्विद्यादनूबन्धम् (भा०पा०सू० ३.३.१) केचिदविहिता अप्यूह्याः (वै०सि०कौ० ३१६९) इत्यनुसारमूह्योऽत्राविहितः समासान्तो डसप्रत्ययः।

[२५९] डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) इत्यनेन।

[२६०] पृषोदरादित्वादाकारादेशः।

[२६१] डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) इत्यनेन।

[२६२] पति अनस् → पृषोदरादीनि यथोपदिष्टम् (पा०सू० ६.३.१०९) → अलोपः → पति नस् → पतिनस् → उणादयो बहुलम् (पा०सू० ३.३.१) → पतिनस् डस → पतिनस् अस → डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) → पतिन् अस → पतिनस → पृषोदरादीनि यथोपदिष्टम् (पा०सू० ६.३.१०९) → आकारादेशः → पतिनास। पतिनासं हन्ति इति विग्रहे पतिनासम् इत्युपपदे अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) इत्यनेन डप्रत्ययः। पतिनास अम् हन् ड → पतिनास अम् हन् अ → डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) → पतिनास अम् ह् अ → पतिनास अम् ह → सुपो धातुप्रातिपदिकयोः (पा०सू० २.४.७१) → पतिनास ह → पतिनासह → विभक्तिकार्यम् → पतिनासहः।

[२६३] कार्याद्विद्यादनूबन्धम् (भा०पा०सू० ३.३.१) केचिदविहिता अप्यूह्याः (वै०सि०कौ० ३१६९) इत्यनुसारमूह्योऽत्राविहितः इच् प्रत्ययः।

विभक्तौ आङो नाऽस्त्रियाम् (पा०सू० ७.३.१२०) इत्यनेन नादेशे[२६४] योगे सहयुक्तेऽप्रधाने (पा०सू० २.३.१९) इत्यनेन तृतीयाप्राप्तौ पतिना सह इति पाणिनीयपरम्परया सम्यक्साधु। अर्थात् त्वच्चरणारविन्दपतितेन पतिना वालिना सहाहमपि निधनं त्वत्सालोक्यं यास्यामि। अथवा पत्युर्वालिनो नाशः कुकर्मकार्यतया नरकगमनमिति पतिनासः पृषोदरादित्वाद्दन्त्य-सकारः तमेव हन्तीति पतिनासहस्तत्सम्बुद्धौ हे पतिनासह इति विग्रहे हन् धातोः (हनँ हिंसागतयोः धा०पा० १०१२) अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) इत्यनेन ड-प्रत्ययेऽभत्वेऽपि डित्त्वसामर्थ्याट्टिलोपे[२६५] सम्बोधन एकवचने पतिनासह। अर्थान्निजकृत-कुकर्मपरिणामेन तु मम पत्युर्नरकगमनमनिवार्यमासीत्किन्तु रामभद्र त्वमेव दीनवत्सलतया निजकृपामन्दाकिनीशीकरसम्पातसेचनेन तादृशं नरकरूपं पतिनासमपि निहत्य तस्मै परां गतिं दत्तवानतोऽहमपि तामेव गन्तुमीह इति तारातात्पर्यम्।

## १.१०४ नाथनाथेति

पतितं वालिनं दृष्ट्वा रक्तैः पांसुभिरावृतम्।
रुदती नाथनाथेति पतिता तस्य पादयोः॥

– अ०रा० ४.३.७

अत्र रामेण निहतं वालिनं नाथनाथेति तारा रुदती व्याहरत्। नाथनाथ इति अयं सम्बोधने प्रथमैकवचनान्तः। अतोऽत्र प्लुतः।[२६६] एवं च प्लुतप्रगृह्या अचि नित्यम् (पा०सू० ६.१.१२५) इत्यनेन प्रकृतिभावे गुणोऽसङ्गत इव[२६७] किन्तु प्राचाम् (पा०सू० ८.२.८६) इति योगविभागे प्लुतानां वैकल्पिकत्वाद्गुणसम्भवः।[२६८] यद्वा अनुकरणानु-कार्ययोर्भेदाभेदविवक्षा च[२६९] इति परिभाषयाऽस्य प्रयोगस्यानुकरणतयाऽभेदविवक्षायां विभक्त्यभावे सति गुणः सङ्गत एव। यद्वा नाथ एव नाथो यस्याः सा नाथनाथा अर्थान्नाथो वाल्येव नाथः पतिर्यस्याः सा नाथनाथा तारा। वालिपरिचयार्थं सम्बोधयति यत् पते त्वमेव

---

[२६४] पूर्ववत् गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः (प०शे० १५) इति परिभाषया गौणे पतिशब्दे पतिः समास एव (पा०सू० १.४.८) इति सूत्रस्याप्रवृत्तौ शेषो घ्यसखि (पा०सू० १.४.७) इति सूत्रेण घिसञ्ज्ञा।

[२६५] डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) इत्यनेन।

[२६६] दूराद्धूते च (पा०सू० ८.२.८४) इत्यनेन।

[२६७] नाथनाथ३ इति इत्यनेन भवितव्यमिति भावः।

[२६८] इह प्राचामिति योगो विभज्यते। तेन सर्वः प्लुतो विकल्प्यते (वै०सि०कौ० ९७)।

[२६९] मूलं मृग्यम्। मतौ च्छः सूक्तसाम्नोः (पा०सू० ५.२.५९) इत्यस्य भाष्ये प्रदीपोद्योतयोश्च स्पष्टमिदम्। अभेदपक्षे प्रकृतिवदनुकरणं भवति (भा०शि०सू० २) इति महाभाष्ये ऋऌक् (शि०सू० २) शिवसूत्र उक्तम्। अनुकरणं ह्यनुकार्याद्भिन्नम् इत्यपि महाभाष्ये मतौ च्छः सूक्तसाम्नोः (पा०सू० ५.२.४९) सूत्र उक्तमिति वैयाकरणभूषणसारस्य दर्पणव्याख्यायां चन्द्रिकाप्रसादद्विवेदाः। अस्माभिर्भाष्यसंस्करणेषु अनुकरणं ह्यनुकार्याद्भिन्नम् इति नोपलब्धम्।

यस्याः स्वामी सा एति तव सम्मुखमागच्छत्यतो मां पश्य इत्यभिप्राये नाथनाथाशब्दे बहुव्रीहिरन्यपदार्थश्च तारा। एवं गच्छत्यर्थकएतिशब्दो नाथनाथा इत्यनेन सह सन्धीयतां ततः एङि पररूपम् (पा॰सू॰ ६.१.९४) इत्यनेन पररूपे नाथनाथेति। न चोक्तसूत्रमुपसर्ग-धातुसन्धिविषयकमिति वाच्यम्। लक्ष्यानुरोधेनोपसर्गांशानुवृत्तिमोषे न दोषः।[२७०] यथा कर्तुरीप्सिततमं कर्म (पा॰सू॰ १.४.४९) इत्यत्र क्रियाक्षिप्तकर्त्रंशे जागरूके व्यर्थीभूते कर्तुः इति पदं प्रकृतिधातूपात्तप्रधानभूतव्यापाराश्रयो यः कर्ता इति विशिष्टार्थं बोधयति। तत्र पुनः ईप्सित इति वर्तमाने क्तप्रयोगात् क्तस्य च वर्तमाने (पा॰सू॰ २.३.६७) इति षष्ठ्यपि कर्तरि।[२७१] तत इयमप्येवं प्रकृतिरपीत्युभे कर्त्रर्थं बोधयतः। अतः षष्ठीवाच्यकर्त्रर्थस्य मोषं कुर्वन्ति गुरवः शेमुषीजुषः। तथैवात्राप्युपसर्गांशमोषेऽपि न रोषः कर्तव्यः। इत्थं नाथनाथेति इत्यत्र एङि पररूपम् (पा॰सू॰ ६.१.९४) इत्यनेन पररूपम्।

## १.१०५ मे

पूर्वजन्मनि ते सुभ्रु कृता मद्भक्तिरुत्तमा।
अतस्तव विमोक्षाय रूपं मे दर्शितं शुभे॥

– अ॰रा॰ ४.३.३४

अत्र क्तस्य च वर्तमाने (पा॰सू॰ २.३.६७) इत्यनेन षष्ठी तृतीयां प्रबाध्य।[२७२] यद्वा मे इत्यस्य रूपम् इत्यनेनान्वयः।[२७३]

---

[२७०] उपसर्गादृति धातौ (पा॰सू॰ ६.१.९१) इत्यतोऽनुवृत्तम् उपसर्गात् इति पदं लक्ष्यानुरोधेनात्र मोषणीयमिति भावः।

[२७१] मतिबुद्धिपूजार्थेभ्यश्च (पा॰सू॰ ३.२.१८८) इत्यनेन ईप्सित इत्यत्र मत्यर्थे पूजार्थे वा वर्तमाने क्तः। मतिरिच्छा (का॰वृ॰ ३.२.१८८) इति काशिका। मतिरिहेच्छा (वै॰सि॰कौ॰ ३०८९) इति सिद्धान्तकौमुदी।

[२७२] मतिबुद्धिपूजार्थेभ्यश्च (पा॰सू॰ ३.२.१८८) इत्यनेन बुद्ध्यर्थे वर्तमाने क्तः। सूत्रेऽस्मिन् बुद्धेर्ज्ञानमर्थः। यथा काशिकाकाराः – बुद्धिर्ज्ञानम् (का॰वृ॰ ३.२.१८८)। भगवतो रूपदर्शनं च प्रत्यक्षज्ञापनम्। यतो हि इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् (त॰स॰ ४२)। यद्वा मतिबुद्धिपूजार्थेभ्यश्च (पा॰सू॰ ३.२.१८८) इत्यत्र चकारेणान्यत्रापि। चकारोऽनुक्तसमुच्चयार्थः। “शीलितो रक्षितः क्षान्त आक्रुष्टो जुष्ट इत्यपि” इत्यादि (वै॰सि॰कौ॰ ३०८९) इति सिद्धान्तकौमुद्यां भट्टोजिदीक्षितमहाभागाः।

[२७३] तर्हि सम्बन्धसामान्ये षष्ठी। सम्बन्धश्च धर्मिधर्मभावरूपः। पूर्वार्धे च त्वया कृता इति प्रयोक्तव्ये ते कृता इति प्रयुक्तम्। ते इत्यस्य पूर्वजन्मनि इत्यनेनान्वये शङ्कापरिहारः। सुभ्रु तव पूर्वजन्मनि उत्तमा मद्भक्तिः कृता इति भावः।

## १.१०६ कुण्डेन

अगस्त्येनोक्तमार्गेण कुण्डेनाऽऽगमवित्तमः।
जुहुयान्मूलमन्त्रेण पुंसूक्तेनाथवा बुधः॥

– अ०रा० ४.४.३१

अत्र सप्तम्यां तृतीया प्रोक्ता। करणत्वविवक्षायां[२७४] हेतुत्वविवक्षायां[२७५] प्रकृत्यादित्वाद्वा[२७६] इयं साध्वी।[२७७]

## १.१०७ माम्

मद्भक्तो यदि मामेवं पूजां चैव दिने दिने।
करोति मम सारूप्यं प्राप्नोत्येव न संशयः॥

– अ०रा० ४.४.३९

अत्र पूजाम् इति कृदन्तप्रयोगेण कर्तृकर्मणोः कृति (पा०सू० २.३.६५) इत्यनेन षष्ठ्युचिता किन्तु प्रति इत्यध्याहारेण मां प्रति पूजां करोति इति अभितःपरितःसमयानिकषा-हाप्रतियोगेऽपि (वा० २.३.२) इति प्रतियोगे द्वितीयेति सिद्धम्।

## १.१०८ शेषांशाय

एवं परात्मा श्रीरामः क्रियायोगमनुत्तमम्।
पृष्टः प्राह स्वभक्ताय शेषांशाय महात्मने॥

– अ०रा० ४.४.४१

अत्रापि पूर्वप्रकारेण चतुर्थी हितयोगे च (वा० २.३.१३) इत्यनेन।[२७८]

## १.१०९ हा सीतेति

पुनः प्राकृतवद्रामो मायामालम्ब्य दुःखितः।
हा सीतेति वदन्नैव निद्रां लेभे कथञ्चन॥

– अ०रा० ४.४.४२

---

२७४ कर्तृकरणयोस्तृतीया (पा०सू० २.३.१८) इत्यनेन।

२७५ हेतौ (पा०सू० २.३.२३) इत्यनेन।

२७६ प्रकृत्यादिभ्य उपसङ्ख्यानम् (वा० २.३.१८) इत्यनेन।

२७७ यद्वा कुण्डे नाऽऽगमवित्तमः इति पदच्छेदे आगमवित्तमो ना मनुष्यः कुण्डे जुहुयात् इत्यपि समाधानम्।

२७८ हितम् इत्यध्याहार्यमिति भावः। यद्वा तादर्थ्ये चतुर्थी वाच्या (वा० २.३.१३) इत्यनेन चतुर्थी।

हा सीतेति इत्यत्र इतिशब्दार्थकं तिशब्दं स्वीकृत्य समाधेयम्।[२७९]

## १.११० मणिसानौ

रामस्तु पर्वतस्याग्रे मणिसानौ निशामुखे।
सीताविरहजं शोकमसहन्निदमब्रवीत्॥

– अ०रा० ४.५.१

अत्र सानुशब्दस्य प्रायो नपुंसकलिङ्गे प्रयोगात्[२८०] सप्तम्येकवचने इकोऽचि विभक्तौ (पा०सू० ७.१.७३) इत्यनेन नुम्यनुबन्धकार्ये मणिसानुनि इत्येव पाणिनीयम्।[२८१] परं मणि-सानुशब्दम् अर्धर्चादिगणे (अर्धर्चाः पुंसि च पा०सू० २.४.३१) आकृतिगणतया मत्वा पुंस्त्वम्। यद्वा लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य (भा०पा०सू० २.१.३६) इति भाष्यवचनेन लिङ्गानामनियमनतया पुल्लिँङ्गे प्रयोगोऽपि पाणिनीयः।[२८२]

## १.१११ मम

जीवतीति मम ब्रूयात्कश्चिद्वा प्रियकृत्स मे।
यदि जानामि तां साध्वीं जीवन्तीं यत्र कुत्र वा॥

– अ०रा० ४.५.३

अत्र ब्रूधातुयोगे (ब्रूञ् व्यक्तायां वाचि धा०पा० १०४४) द्वितीया तूचितैव[२८३] किन्तु कर्मणि सम्बन्धविवक्षायां षष्ठ्यपि साध्वी।

---

[२७९] विस्तराय २००तमे पृष्ठे १.८५ जायेति सीतेति इति प्रयोगस्य विमर्शं पश्यन्तु।

[२८०] यथा या सानुनि पर्वतानामदाभ्या महस्तस्थतुरर्वतेव साधुना (ऋ०वे०सं० १.१५५.१) बृहतः सानुनस्परि (ऋ०वे०सं० ५.५९.७) सानूनि दिवो अमृतस्य केतुना (ऋ०वे०सं० ६.७.६) सानूनि मृगपक्षिणः (वा०रा० २.३३.२३) गिरेः सानूनि रम्याणि (वा०रा० २.९३.९) तस्य शैलस्य सानूनि (वा०रा० ३.६१.२१) दक्षिणे गिरिसानुनि (वा०रा० ४.१.७३) अस्मिन्सानुनि (वा०रा० ४.१.१०३) सानूनि सुमहान्ति च (वा०रा० ६.६७.४) तस्मिन्मन्दरसानुनि (ग०सं० ७.४३.१४, भा०पु० ४.२३.२४) यत्र स्रुतक्षीरतया प्रसूतः सानूनि गन्धः सुरभीकरोति (कु०स० १.९) इत्यादिषु। सानुगतां (कु०स० १.५) इत्यत्र मल्लिनाथाः – सानूनि मेघमण्डलादधस्तटानि गतां प्राप्ताम् (कु०स० स०व्या० १.९)।

[२८१] पूर्वपक्षोऽयम्।

[२८२] यद्वा लिङ्गानुशासने मद्गुमधुसीधुशीधुसानुकमण्डलूनि नपुंसके च (लि० ५६) इत्यत्र चकारात्पुंस्यपि सानुशब्दः। यथा अपादहस्तो अपृतन्यदिन्द्रमास्य वज्रमधि सानौ जघान (ऋ०वे०सं० १.३२.७) उर्व्याः पदो नि दधाति सानौ (ऋ०वे०सं० १.१४६.२) पृथिव्याः सानौ जङ्घनन्त पाणिभिः (ऋ०वे०सं० २.३१.२) मनानग्रेतो जहतुर्वियन्ता सानौ (ऋ०वे०सं० १०.६१.६) इत्यादिषु। स्नुः प्रस्थः सानुरस्त्रियौ (अ०को० २.३.५) इत्यमरः। 'सानु'आदिशब्दानां स्वत एव द्विलिङ्गता – 'सानुने' 'सानवे'। स्नुः प्रस्थः सानुरस्त्रियामित्यमरः (ह०ना०व्या० २.९३) इति हरिनामामृतव्याकरणे जीवगोस्वामिनः।

[२८३] अकथितं च (पा०सू० १.४.५१) इत्यनेन कर्मसञ्ज्ञायां कर्मणि द्वितीया (पा०सू० २.३.२) इत्यनेन।

## १.११२ बहुऋक्षवानरैः

भेरीमृदङ्गैर्बहुऋक्षवानरैः श्वेतातपत्रैर्व्यजनैश्च शोभितः।
नीलाङ्गदाद्यैर्हनुमत्प्रधानैः समावृतो राघवमभ्यगाद्धरिः॥

– अ०रा० ४.५.६३

अत्र लक्ष्मणेन मृत्योर्भीयमानः प्रमादी सुग्रीवः श्रीराममुपगच्छति। अत्रैव प्रयोगः बहुऋक्षवानरैः। अत्र बहुशब्दघटकोकारस्य ऋक्षघटकर्कारेण सन्धौ बह्वृक्षवानरैः इत्येव पाणिनीयम्। बहुशब्दस्य ऋक्षवानरशब्देन तत्पुरुषकर्मधारये समासे संहिताया नित्यत्वात् इको यणचि (पा०सू० ६.१.७७) इत्यनेन यण् अनिवार्यः। किन्तु व्यस्तावस्थायां सन्धिरनिवार्यो नास्ति। अतः बहु ऋक्षवानरैः इति पाणिनीयमेव। न च समासं विना बहुशब्दस्य ऋक्षवानरशब्दविशेषणतया बहुभिः ऋक्षवानरैः इति सविभक्तिकः प्रयोगः स्यादेवं बहु ऋक्षवानरैः इत्यसङ्गतमिति वाच्यम्। सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः (पा०सू० ७.१.३९) इत्यनेन भिस्विभक्तेर्लुकि सङ्गतम्। यद्वा बहु इति क्रियाविशेषणम्। क्रियाविशेषणानां द्वितीयात्वं नपुंसकत्वमेकवचनत्वमौत्पत्तिकं सर्वविदितमेव। तेन नात्र सन्धिः। यद्वा ऋत्यकः (पा०सू० ६.१.१२४) इत्यनेन शाकल्यमते वैकल्पिकप्रकृतिभावः तस्यां वै भार्गवऋषेः (भा०पु० ९.१५.१३) इतिवत्।[२८४]

## १.११३ बहिर्गुहाम्

यूयं पिदध्वमक्षीणि गमिष्यथ बहिर्गुहाम्।
तथैव चक्रुस्ते वेगाद्गताः पूर्वस्थितं वनम्॥

– अ०रा० ४.६.५८

अत्र बहिर्योगे पञ्चमी पाणिनीया[२८५] किन्तु गुहां प्रति बहिः इति प्रतियोगे द्वितीयाऽपि पाणिनिसम्मता।[२८६] यद्वा बहिर्देशे स्थितां गुहाम् इत्यध्याहारेण द्वितीया।[२८७]

---

[२८४] समासेऽप्ययं प्रकृतिभावः। सप्तऋषीणाम्। सप्तर्षीणाम् (वै०सि०कौ० ९२)। अन्यच्च तत्रासीनं सुरऋषिम् (भा०पु० ७.१.१४) सम्पूज्य देवऋषिवर्यम् (भा०पु० १०.६९.१६) ब्रह्मऋषीनेतान् (भा०पु० १०.८६.५७) इत्यादिष्वपि।

[२८५] अपपरिबहिरञ्चवः पञ्चम्या (पा०सू० २.१.१२) इति ज्ञापनेन।

[२८६] प्रति इत्यध्याहार्यमिति भावः। ततः अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि (वा० २.३.२) इत्यनेन द्वितीया।

[२८७] यद्वा ज्ञापकसिद्धं न सर्वत्र इत्यनेन करस्य करभो बहिः (अ०को० २.६.८०क) इतिवत्पञ्चमीतरविभक्तिः। विशेषं १७२तमे पृष्ठे १.४८ बहिर्वनस्य इति प्रयोगस्य विमर्शो पश्यन्तु।

## १.११४ मे

दासी तवाहं राजेन्द्र दर्शनार्थमिहागता।
बहुवर्षसहस्राणि तप्तं मे दुश्चरं तपः॥

– अ०रा० ४.६.६१

अत्र मया तप्तम् इति कर्मणि क्तप्रत्ययविधानादनुक्तकर्तरि तृतीया पाणिनीया[२८८] किन्तु मे इति कृद्योगा षष्ठी क्तस्य च वर्तमाने (पा०सू० २.३.६७) इति विहितत्वात्पाणिनिसम्मता।[२८९]

## १.११५ रक्षोगणविनाशने

ब्रह्मणा प्रार्थिताः सर्वे रक्षोगणविनाशने।
मायामानुषभावेन जाता लोकैकरक्षकाः॥

– अ०रा० ४.७.१८

अत्र रक्षोगणविनाशनाय इति तादर्थ्ये चतुर्थी सामान्यतः पाणिनीया[२९०] किन्तु निमित्तात्कर्मसंयोगे (वा० २.३.३६) इत्यनेन सप्तमी। निमित्तमिह फलं तस्य कर्मणा सह योगे तद्वाचकात्सप्तमी यथा भाष्यवचनम् –

चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः॥

– भा०पा०सू० २.३.३६

तथा रक्षोगणविनाशनं हि फलम्। कर्म लोके जन्मग्रहणम् । अतोऽत्र सप्तमी।

## १.११६ वानरवृन्दान्

सुग्रीवः प्रेषयामास सीतायाः परिमार्गणे।
अस्मान्वानरवृन्दान्वै महासत्त्वान्महाबलः॥

– अ०रा० ४.७.४३

वृन्दशब्दस्य नपुंसकतया वानरवृन्दानि इति पाणिनिसम्मतं किन्तु लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य (भा०पा०सू० २.१.३६) इति वचनेन पुँल्लिङ्गेऽप्यनुकूलता।

---

[२८८] कर्तृकरणयोस्तृतीया (पा०सू० २.३.१८) इत्यनेन।

[२८९] मतिबुद्धिपूजार्थेभ्यश्च (पा०सू० ३.२.१८८) इत्यनेन वर्तमानविवक्षायां क्तः। चकारेणान्यत्रापि। चकारोऽनुक्तसमुच्चयार्थः। "शीलितो रक्षितः क्षान्त आक्रुष्टो जुष्ट इत्यपि" इत्यादि (वै०सि०कौ० ३०८९) इति सिद्धान्तकौमुद्यां भट्टोजिदीक्षितमहाभागाः। यद्वा मे इत्यस्य दुश्चरं तपः इत्यनेनान्वये कर्मणि सम्बन्ध-विवक्षायां षष्ठी। मे दुश्चरं तपो बहुवर्षसहस्राणि तप्तम् इति भावः।

[२९०] तादर्थ्ये चतुर्थी वाच्या (वा० २.३.१३) इत्यनेन।

॥ इति किष्किन्धाकाण्डीयप्रयोगाणां विमर्शः ॥

॥ अथ सुन्दरकाण्डीयप्रयोगाणां विमर्शः ॥

## १.११७ देवतावृन्दः

अब्रवीद्देवतावृन्दः कौतूहलसमन्वितः।
गच्छ त्वं वानरेन्द्रस्य किञ्चिद्विघ्नं समाचर॥

– अ०रा० ५.१.११

अत्रापि नपुंसकलिङ्गे वृन्दशब्दस्य प्रचलितप्रयोगात्[२९१] पुँल्लिङ्गप्रयोगस्तु लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य (भा०पा०सू० २.१.३६) इति भाष्यनियमेन पाणिनीय एव।[२९२] यथोत्तरं मुनीनां प्रामाण्यम् इति वचनात्।

## १.११८ मे

सर्वं कथय रामाय यथा मे जायते दया।
मासद्वयावधि प्राणाः स्थास्यन्ति मम सत्तम॥

– अ०रा० ५.३.४०

अत्र मयि इति प्रयोगस्त्वर्थानुकूलः किन्तु उपरि इत्यध्याहारे सम्बन्धविवक्षायां मे इत्यपि। यद्वा मे इति मह्यम् इति चतुर्थी।[२९३] सा च मामुद्धर्तुं दया जायते मे हिताय वा दया जायताम् इत्युभयथाऽपि तुमुन्कर्मणि[२९४] हितयोगे[२९५] वा चतुर्थी।

## १.११९ देव्यै

श्रुत्वा तद्वचनं देव्यै पूर्वरूपमदर्शयत्।
मेरुमन्दरसङ्काशं रक्षोगणविभीषणम्॥

– अ०रा० ५.३.६४

[२९१] यथा वृन्दान्युत्सार्यमाणानि दूरमुत्ससृजुस्तदा (वा०रा० ६.११७.२१) वृन्दानि ददृशे तदा (म०भा० ३.१५०.१९) अभ्यकीर्यन्त वृन्दानि (म०भा० ४.१८.३२) मासादयैतद्रथसिंहवृन्दम् (म०भा० ४.४९.४) संशप्तानि च वृन्दानि (म०भा० ५.५४.५५) मेघवृन्दानि (म०भा० ५.१७८.८४) सदश्ववृन्दानि (म०भा० ६.५६.१६) अश्ववृन्दानि (म०भा० ७.१७२.२६) रथवृन्दानि (म०भा० ६.५९.११, ७.१६१.४९, ७.१७२.२६) यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां (मे०दू० २.३६) इत्यादिषु।

[२९२] यद्वा शब्दमिममर्धर्चादिगणे पठित्वा अर्धर्चाः पुंसि च (पा०सू० २.४.३१) इत्यनेन पुँल्लिङ्गप्रयोगः समर्थनीयः। एवमेव देववृन्दः सदा त्वां तु स्मृत्वा विजयतेऽसुरान् (म०भा० १.२११.१९) इत्यादिषु बोध्यम्।

[२९३] तेमयावेकवचनस्य (पा०सू० ८.१.२२) इत्यनेन।

[२९४] क्रियार्थोपपदस्य च कर्मणि स्थानिनः (वा० २.३.१४) इत्यनेन।

[२९५] हितयोगे च (वा० २.३.१३) इत्यनेन।

अत्र देवीं विश्वासयितुं पूर्वरूपमदर्शयत् इति क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेनाप्रयुज्यमानतुमुन्कर्मणि चतुर्थी। हितशब्दस्याध्याहारे हितयोगा वा।[२९६]

## १.१२० महाप्रियम्

प्रासादरक्षिणः सर्वान्हत्वा तत्रैव तस्थिवान्।
तच्छ्रुत्वा तूर्णमुत्थाय वनभङ्गं महाप्रियम्॥

– अ०रा० ५.३.७७

अत्र महत् अप्रियम् इति महाप्रियम् इति विग्रहे समासः। सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः (पा०सू० २.१.६१) इति सूत्रेण कर्मधारयः। आन्महतः समानाधिकरणजातीययोः (पा०सू० ६.३.४६) इत्यनेनाऽकारादेशः। महाप्रियम् इति महाखलः इतिवत्।

## १.१२१ राघवे

राक्षसीनां तर्जनैस्तत्सर्वं कथय राघवे।
मयोक्तं देवि रामोऽपि त्वच्चिन्तापरिनिष्ठितः॥

– अ०रा० ५.५.४९

अत्र कथ् धातुप्रयोगात् (कथँ वाक्यप्रबन्धने धा०पा० १८५१) द्वितीयोचितैव किन्तु राघवे शृण्वति कथय इत्यध्याहारे सति सप्तम्यपि सिद्धान्तानुकूला।[२९७]

॥ इति सुन्दरकाण्डीयप्रयोगाणां विमर्शः ॥

॥ अथ युद्धकाण्डीयप्रयोगाणां विमर्शः ॥

## १.१२२ हनूमन्तम्

आययुश्चानुपूर्व्येण समुद्रं भीमनिःस्वनम्।
अवतीर्य हनूमन्तं रामः सुग्रीवसंयुतः॥

– अ०रा० ६.१.४२

अत्र लङ्कां प्रतिष्ठमानो भगवाञ्छ्रीरामो हनूमतोऽवतीर्य समुद्रवेलायां सैन्यं निवेशयति। रामविश्लेषस्य ध्रुवत्वेनावधिभूतत्वात् हनूमन्तम् इति द्वितीया पाणिनीय-विरुद्धेव। ध्रुवमपायेऽपादानम् (पा०सू० १.४.२४) इत्यनेनापादानसञ्ज्ञायां पञ्चम्येव।

[२९६] हितयोगे च (वा० २.३.१३) इत्यनेन।
[२९७] यस्य च भावेन भावलक्षणम् (पा०सू० २.३.३७) इत्यनेन।

किन्तु हनूमन्तं त्यक्त्वा अवतीर्य इत्यध्याहारेण त्यज् कर्मतया (त्यजँ हानौ धा०पा० ९८६) द्वितीया। यद्वा दुह्याच् (वै०सि०कौ० ५३९) इति परिगणनस्य शब्दरत्नादौ खण्डनेनापादानस्याविवक्षायां वृक्षं पुष्पं चिनोति[२९८] इत्यादिवद्द्वितीया। अकथितं च (पा०सू० १.४.५१) इत्यनेन कर्मसञ्ज्ञाबलाद्द्वितीया सङ्गतेति पाणिनीयता।

## १.१२३ रघुनायकस्य

यावन्न रामस्य शिताः शिलीमुखा लङ्कामभिव्याप्य शिरांसि रक्षसाम्।
छिन्दन्ति तावद्रघुनायकस्य भोस्तां जानकीं त्वं प्रतिदातुमर्हसि॥

– अ०रा० ६.२.२४

अत्र यद्यपि दाधातुयोगे (डुदाञ् दाने धा०पा० १०९१) चतुर्थी पाणिनीया किन्तु प्रतीत्युपसर्गयोजनतया विनिमयरूपेऽर्थे जाते सम्प्रदानताभावे षष्ठीसाहित्यम्। प्रतिदातुम् इत्यनेन विनिमयद्योतनात्। यद्वा रघुनायकस्य इत्यस्य जानकीम् इत्यनेनान्वये दाम्पत्य-भावसम्बन्धे षष्ठी।

## १.१२४ मे

मन्त्रिभिः सायुधैरस्मान् विवरे निहनिष्यति।
तदाज्ञापय मे देव वानरैर्हन्यतामयम्॥

– अ०रा० ६.३.८

अत्र सुग्रीवो विभीषणं प्रत्याशङ्कमानः प्राह मे आज्ञापय। मां पोषयितुमाज्ञापय इति चतुर्थी।[२९९] यद्वा कारकाणां बुद्धिकल्पितत्वात्[३००] दाधातुं (डुदाञ् दाने धा०पा० १०९१) विनाऽपि सम्प्रदाने चतुर्थी।[३०१]

---

[२९८] वृक्षमवचिनोति फलानि (भा०पा०सू० १.४.५१) इति महाभाष्य उदाहृतः।

[२९९] क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन।

[३००] यथा अयं योगः शक्योऽवक्तुम्। … स बुद्ध्या सम्प्राप्य निवर्तयति। तत्र “ध्रुवमपायेऽपादानम्” इत्येव सिद्धम् (भा०पा०सू० १.४.२५)। अयमपि योगः शक्योऽवक्तुम्। … स बुद्ध्या सम्प्राप्य निवर्तते। तत्र “ध्रुवमपायेऽपादानम्” इत्येव सिद्धम् (भा०पा०सू० १.४.२६)। अयमपि योगः शक्योऽवक्तुम्। … स बुद्ध्या सम्प्राप्य निवर्तयति। तत्र “ध्रुवमपायेऽपादानम्” इत्येव सिद्धम् (भा०पा०सू० १.४.२७)। अयमपि योगः शक्योऽवक्तुम्। … स बुद्ध्या सम्प्राप्य निवर्तते। तत्र “ध्रुवमपायेऽपादानम्” इत्येव सिद्धम् (भा०पा०सू० १.४.२८)। अयमपि योगः शक्योऽवक्तुम् (भा०पा०सू० १.४.२९)। अयमपि योगः शक्योऽवक्तुम् (भा०पा०सू० १.४.३०)। अयमपि योगः शक्योऽवक्तुम् (भा०पा०सू० १.४.३१) इत्यादिषु स्पष्टम्।

[३०१] चतुर्थी सम्प्रदाने (पा०सू० २.३.१३) इत्यनेन।

## १.१२५ रघूणां पतये

नमोऽनन्ताय शान्ताय रामायामिततेजसे।
सुग्रीवमित्राय च ते रघूणां पतये नमः॥

– अ०रा० ६.३.१८

अत्र शरणागतविभीषणो रघुकुलभूषणं सुग्रीवलक्ष्मणाभिरामं रामं समीडानो रघूणां पतये नमः इति प्रयुङ्क्ते। अत्र समासाभावे रघूणां पत्ये इत्येव पाणिनीयं पतिः समास एव (पा०सू० १.४.८) इत्यनेनासमाससञ्ज्ञानिषेधात् घेर्ङिति (पा०सू० ७.३.१११) इति गुणाभावेऽयादेशाभावे च रघूणां पतये इति कथम्। परं पतिरिवाऽचरतीति पतिः। आचारे क्विप्।[302] ततः सर्वापहारिलोपे लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्[303] इति परिभाषया लाक्षणिकपतिशब्दे पतिः समास एव (पा०सू० १.४.८) इति सूत्रं न प्रवर्तते। अतो घिसञ्ज्ञायां गुणेऽयादेशे रघूणां पतये इति।[304] यद्वा अपां पतये नमः, तस्कराणां पतये नमः (कृ०य० तै०सं० ४.५.३.१) इति छान्दसप्रयोग इव विभीषणेनाप्यत्र ब्राह्मणत्व-प्रदिदर्शयिषया भगवतो रामचन्द्रस्य छन्दोमयत्वाच्छान्दसः प्रयोगः कृतः। षष्ठीयुक्तश्छन्दसि वा (पा०सू० १.४.९) इति सूत्रेण। षष्ठीयुक्तश्छन्दसि वा इत्यत्र वा ग्रहणेन लोकेऽपि। अथवा षष्ठ्याऽलुक्समासे चोक्तप्रयोगः पाणिनीयः बहुलं छन्दसि (पा०सू० २.४.७३) इति सूत्रेण सुपो धातुप्रातिपदिकयोः (पा०सू० २.४.७१) इति सूत्राप्रवृत्तेः। अथवा तत्पुरुषे कृति बहुलम् (पा०सू० ६.३.१४) इति सूत्रेण पूर्वसाधितकृदन्तपतिशब्दे परेऽलुकि रघूणां पतये इत्यपि पाणिनीयम्।[305]

## १.१२६ विभीषणे

सीतां प्रयच्छ रामाय राज्यं देहि विभीषणे।
वनं याहि महाबाहो रम्यं मुनिगणाश्रयम्॥

– अ०रा० ६.६.४६

---

[302] पति → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → पति क्विँप् → पति व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → पति → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → क्विप् च (पा०सू० ३.२.७६) → पति क्विँप् → पति व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → पति → विभक्ति-कार्यम् → पतिः।

[303] सिद्धं तु लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणात् (वा० ६.२.२)।

[304] २१०तमे पृष्ठे १.१०३ पतिना इति प्रयोगस्य विमर्शमपि पश्यन्तु।

[305] मण्डूकप्लुत्या हलदन्तात्सप्तम्याः संज्ञायाम् (पा०सू० ६.३.९) इत्यस्मादनुवृत्तस्य सप्तम्याः इति पदस्य तत्पुरुषे कृति बहुलम् (पा०सू० ६.३.१४) इत्यत्र निवृत्तौ षष्ठ्या अप्यलुक्। यद्वा बहुलम् इत्यस्य ग्रहणेन षष्ठ्या अप्यलुक्।

अत्र चिरजीवित्वादाधारविवक्षयाऽधिकरणसप्तम्यपि पाणिनीया।[३०६]

### १.१२७ परैः

निहन्मि त्वां दुरात्मानं मच्छासनपराङ्मुखम्।
परैः किञ्चिद्गृहीत्वा त्वं भाषसे रामकिंकरः॥

– अ०रा० ६.७.२

अत्र ग्रहणस्यावधिभूतत्वात् परेभ्यः किञ्चिद्गृहीत्वा इति वक्तव्यं तथाऽपि परैः दीयमानम् इत्यध्याहारे कर्तरि तृतीया। उताहो परैः इति करणे तृतीया। दानक्रियायां परदानस्याऽपि करणत्वात्।

### १.१२८ वायुसूनोः

हतस्यापि शरैस्तीक्ष्णैर्वायुसूनोः स्वतेजसा।
व्यवर्धत पुनस्तेजो ननर्द च महाकपिः॥

– अ०रा० ६.६.२४

अत्र कर्मणि सम्बन्धविवक्षायां षष्ठी।[३०७]

### १.१२९ लक्ष्मणाय

चिकित्सां कारयामास लक्ष्मणाय महात्मने।
ततः सुप्तोत्थित इव बुद्धा प्रोवाच लक्ष्मण॥

– अ०रा० ६.७.३७

लक्ष्मणस्य महात्मनः इति सम्बन्धविवक्षया षष्ठ्युचिता किन्तु लक्ष्मणं महात्मानं जीवयितुम् इत्यप्रयुज्यमानतुमुन्कर्मणि चतुर्थी।[३०८]

### १.१३० रघूत्तमे

इतः परं वा वैदेहीं प्रेषयस्व रघूत्तमे।
विभीषणाय राज्यं तु दत्त्वा गच्छामहे वनम्॥

– अ०रा० ६.१०.५४

[३०६] अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः। कृपः परशुरामश्च सप्तैते चिरजीविनः॥ (आ०रा० ९.७.११८)।

[३०७] षष्ठी शेषे (पा०सू० २.३.५०) इत्यनेन।

[३०८] क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन।

अत्राप्याधारविवक्षायां सप्तमी।[३०९] रामस्याधारत्वं पूर्वं निरूपितम्।[३१०]

## १.१३१ कारुण्यभाजनाः

वयं तु सात्त्विका देवा विष्णोः कारुण्यभाजनाः।
भयदुःखादिभिर्व्याप्ताः संसारे परिवर्तिनः॥

– अ०रा० ६.११.८०

कारुण्यभाजनमेषाम् इत्यर्शआदित्वादच्।[३११] अथवा भजन्त इति भजनाः कर्तरि ल्युट्।[३१२] भजना एव भाजनाः इति प्रज्ञादित्वादण्।[३१३] कारुण्यस्य भाजनाः इति षष्ठी-समासः।[३१४] अतो न लिङ्गदोषः।

## १.१३२ शिबिकोत्तमे

सर्वाभरणसम्पन्नामारोप्य शिबिकोत्तमे।
याष्टीकैर्बहुभिर्गुप्तां कञ्चुकोष्णीषिभिः शुभाम्॥

– अ०रा० ६.१२.७०

अस्याप्यत्र नपुंसकलिङ्गे पाठात् शिबिकोत्तमायाम् इत्यनुक्त्वेदं कथमुक्तमिति न भ्रमितव्यम्।[३१५]

## १.१३३ देवताभ्यः

पश्यतां सर्वलोकानां देवराक्षसयोषिताम्।
प्रणम्य देवताभ्यश्च ब्राह्मणेभ्यश्च मैथिली॥

– अ०रा० ६.१२.८०

देवता अनुकूलयितुं प्रसादयितुं वा प्रणम्य इति तुमुन्कर्मणि चतुर्थी।[३१६]

---

[३०९] आधारोऽधिकरणम् (पा०सू० १.४.४५) सप्तम्यधिकरणे च (पा०सू० २.३.३६) इत्याभ्याम्।

[३१०] १९६तमे पृष्ठे १.७८ राघवे इति प्रयोगस्य विमर्शं पश्यन्तु।

[३११] अर्शआदिभ्योऽच् (पा०सू० ५.२.१२७) इत्यनेन।

[३१२] कृत्यल्युटो बहुलम् (पा०सू० ३.३.११३) इत्यनेन।

[३१३] प्रज्ञादिभ्यश्च (पा०सू० ५.४.३८) इत्यनेन।

[३१४] कृद्योगा च षष्ठी समस्यत इति वक्तव्यम् (वा० २.२.८) इत्यनेन। यद्वा कारुण्यस्य भाजनं येषाम् इति बहुव्रीहिः।

[३१५] लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य (भा०पा०सू० २.१.३६) इत्यनेन लिङ्गं शिष्टप्रयोगाधीनमिति भावः। वाल्मीकीयरामायणे भारते तु शिबिका इति स्त्रीलिङ्ग एव प्रयोगः।

[३१६] क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन। एवमेव ब्राह्मणेभ्यः इत्यत्रापि बोध्यम्।

## १.१३४ गन्धर्वाप्सरसोरगाः

ततः शक्रः सहस्राक्षो यमश्च वरुणस्तथा।
कुबेरश्च महातेजाः पिनाकी वृषवाहनः॥
ब्रह्मा ब्रह्मविदां श्रेष्ठो मुनिभिः सिद्धचारणैः।
ऋषयः पितरः साध्या गन्धर्वाप्सरसोरगाः॥
एते चान्ये विमानाग्र्यैराजग्मुर्यत्र राघवः।
अब्रुवन् परमात्मानं रामं प्राञ्जलयश्च ते॥

– अ०रा० ६.१३.१-३

हलन्तअप्सरस् इति पाठे तु गन्धर्वाप्सरउरगाः इत्येव।[३१७] अजन्ते गन्धर्वाप्सरसोरगाः।[३१८] अथवा द्वन्द्वाच्चुदषहान्तात्समाहारे (पा०सू० ५.४.१०६) इत्यत्र द्वन्द्वात् इति योगविभागेन टच् प्रत्ययः।[३१९] न चायमन्ते करोति। तर्हि पूर्वं गन्धर्वाप्सरसाः

[३१७] गन्धर्वाश्चाप्सरसश्चोरगाश्चेति गन्धर्वाप्सरउरगाः। गन्धर्व जस् अप्सरस् जस् उरग जस् → चार्थे द्वन्द्वः (पा०सू० २.२.२९) → सुपो धातुप्रातिपदिकयोः (पा०सू० २.४.७१) → गन्धर्व अप्सरस् उरग → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → गन्धर्वाप्सरस् उरग → ससजुषो रुः (पा०सू० ८.२.६६) → गन्धर्वाप्सररुँ उरग → भो भोभगोअघोअपूर्वस्य योऽशि (पा०सू० ८.३.१७) → गन्धर्वाप्सरय् उरग → लोपः शाकल्यस्य (पा०सू० ८.३.१९) → गन्धर्वाप्सर उरग → गन्धर्वाप्सरउरग → विभक्तिकार्यम् → गन्धर्वाप्सरउरग जस् → गन्धर्वाप्सरउरग अस् → प्रथमयोः पूर्वसवर्णः (पा०सू० ६.१.१०२) → गन्धर्वाप्सरउरगास् → ससजुषो रुः (पा०सू० ८.२.६६) → खरवसानयोर्विसर्जनीयः (पा०सू० ८.३.१५) → गन्धर्वाप्सरउरगाः।

[३१८] सर्वे सान्ता अदन्ताः स्युः इत्युक्तेः अप्सर इति शब्दोऽपि स्वीकरणीय इति भावः। अप्सर-शब्दस्य प्रयोगः स्कन्दपुराणेऽवन्तीखण्डे रेवाखण्डे कुसुमेश्वरतीर्थमाहात्म्यवर्णने कृतोऽस्ति – वसन्तमासे कुसुमाकराकुले मयूरदात्यूहसुकोकिलाकुले। प्रनृत्यदेवाप्सरगीतसङ्कुले प्रवाति वाते यमनैर्ऋताकुले॥ (स्क०पु० रे०ख० १५०.१४)। अत्र प्रनृत्यदेवाप्सरगीतसङ्कुले इत्यत्र अप्सर इत्येव शब्दः। एवमेवात्र अप्सर-शब्दस्वीकारे सशब्दः सर्पे ("सः स्याद्विष्णौ हरे सर्पे" इति भरतैकार्थसङ्ग्रहः इति शब्दकल्पद्रुमः) उरगशब्दश्च नागे स्वीकरणीयः। देवगन्धर्वमानुषोरगराक्षसान् (न०उ० १.२९) गन्धर्वोरगरक्षसाम् (म०स्मृ० ३.१९६) इत्यादिषु उरगशब्दो नागार्थ इत्याप्टेकोशः। अत्र पर्याययोः कथं पृथगुपादानमिति न भ्रमितव्यम्। सर्प-नागयोरीषदन्तरम्। अत एव गीतायां सर्पाणामस्मि वासुकिः (भ०गी० १०.२८) इत्युक्त्वाऽपि अनन्तश्चास्मि नागानाम् (भ०गी० १०.२९) इत्युक्तं भगवता। नागा नागलोकवासिनो मानवमुखाः सर्पजातिविशेषाः। सर्पा एकशिरसः (भ०गी० रा०भा० १०.२९) नागा बहुशिरसः (भ०गी० रा०भा० १०.२९) इति भगवन्तो रामानुजाचार्या गीताभाष्ये। एवं तर्हि गन्धर्व जस् अप्सर जस् स जस् उरग जस् → चार्थे द्वन्द्वः (पा०सू० २.२.२९) → सुपो धातुप्रातिपदिकयोः (पा०सू० २.४.७१) → गन्धर्व अप्सर स उरग → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → गन्धर्वाप्सर स उरग → आद्गुणः (पा०सू० ६.१.८७) → गन्धर्वाप्सर सोरग → गन्धर्वाप्सरसोरग → विभक्तिकार्यम् → गन्धर्वाप्सरसोरग जस् → गन्धर्वाप्सरसोरग अस् → प्रथमयोः पूर्वसवर्णः (पा०सू० ६.१.१०२) → गन्धर्वाप्सरसोरगास् → ससजुषो रुः (पा०सू० ८.२.६६) → खरवसानयोर्विसर्जनीयः (पा०सू० ८.३.१५) → गन्धर्वाप्सरसोरगाः।

[३१९] योगविभागे चुदषहान्तात् समाहारे इत्यनयोर्मोषे सान्तादितरेतरद्वन्द्वादपि कुत्रचिदिति भावः।

इति खण्डवाक्यमेकं पश्चात् उरगशब्देन समासः।[३२०]

॥ इति युद्धकाण्डीयप्रयोगाणां विमर्शः ॥

॥ अथोत्तरकाण्डीयप्रयोगाणां विमर्शः ॥

## १.१३५ मम

श्रृणु राम यथा वृत्तं रावणे रावणस्य च।
जन्म कर्म वरादानं सङ्क्षेपाद्वदतो मम॥

– अ०रा० ७.१.२४

अत्र पञ्चम्या भवितव्यमासीत् [३२१] किन्तु वदतो मम इति भावलक्षणा षष्ठी यस्य च भावेन भावलक्षणम् (पा०सू० २.३.३७) इति सूत्रेण।[३२२]

## १.१३६ कालस्य

स तत्र सुचिरं कालमुवास पितृसम्मतः।
कस्यचित्त्वथ कालस्य सुमाली नाम राक्षसः॥

– अ०रा० ७.१.४५

आगतस्य इति व्यतीतस्य वेत्यध्याहारे भावलक्षणा षष्ठी।[३२३]

---

[३२०] यद्वाऽत्र न समासोऽपि तु गन्धर्वाप्सरसः इति पृथक् उरगाः इति च पृथक्। ततः संहितायां ससजुषो रुः (पा०सू० ८.२.६६) इत्यनेन रुत्वे भो भोभगोअघोअपूर्वस्य योऽशि (पा०सू० ८.३.१७) इत्यनेन यत्वे लोपः शाकल्यस्य (पा०सू० ८.३.१९) इत्यनेन यलोपे गुणे प्राप्ते त्रिपादीत्वाल्लोपकार्यस्यासिद्धत्वे सामान्यतः गन्धर्वाप्सरस उरगाः इत्येव। परन्त्वत्र न मु ने (पा०सू० ८.२.३) इत्यनेन पूर्वत्रासिद्धम् (पा०सू० ८.२.१) इति सूत्रे निराकृते सिद्धे यलोपे आद्गुणः (पा०सू० ६.१.८७) इत्यनेन गुणे गन्धर्वाप्सरसोरगाः इति सिद्धम्। विस्तराय २००तमे पृष्ठे १.८५ जायेति सीतेति इति प्रयोगस्य विमर्शे पश्यन्तु।

[३२१] अपादाने पञ्चमी (पा०सू० २.३.२८) इत्यनेन। अत्र शब्दविश्लेषादपादानत्वम्। यद्वा आख्यातोपयोगे (पा०सू० १.४.२९) इत्यनेनापादानत्वम्।

[३२२] दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् (पा०सू० २.३.३४) इत्यतः षष्ठी इत्यनुवर्त्य षष्ठी चानादरे (पा०सू० २.३.३८) इत्यतः षष्ठी इत्यपकृष्य वाऽऽदरेऽपि यस्य च भावेन भावलक्षणम् (पा०सू० २.३.३७) इत्यनेन भावलक्षणा षष्ठीति भावः।

[३२३] दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् (पा०सू० २.३.३४) इत्यतः षष्ठी इत्यनुवर्त्य षष्ठी चानादरे (पा०सू० २.३.३८) इत्यतः षष्ठी इत्यपकृष्य वाऽऽदरेऽपि यस्य च भावेन भावलक्षणम् (पा०सू० २.३.३७) इत्यनेन भावलक्षणा षष्ठीति भावः।

## १.१३७ जगत्त्रयम्

भगवन्ब्रूहि मे योद्धुं कुत्र सन्ति महाबलाः।
योद्धुमिच्छामि बलिभिस्त्वं ज्ञाताऽसि जगत्त्रयम्॥

– अ०रा० ७.४.२

अत्र ज्ञाता इति तृन्प्रत्ययान्तः।[३२४] तृन्प्रत्ययान्तप्रयोगात् जगत्त्रयम् इत्यत्र द्वितीया पाणिनीया।[३२५] न लोकाव्ययनिष्ठाखलर्थतृनाम् (पा०सू० २.३.६९) इत्यनेन षष्ठीनिषेधात्।

## १.१३८ जगाम ऋषिवाटस्य

वाल्मीकिरपि सङ्गृह्य गायन्तौ तौ कुशीलवौ।
जगाम ऋषिवाटस्य समीपं मुनिपुङ्गवः॥

– अ०रा० ७.६.३६

अत्र संहिताया अविवक्षणान्न सन्धिः।[३२६]

## १.१३९ मह्यम्

एवमेतन्महाप्राज्ञ यथा वदसि सुव्रत।
प्रत्ययो जनितो मह्यं तव वाक्यैरकिल्बिषैः॥

– अ०रा० ७.७.३४

मां विश्वासयितुं प्रत्ययो जनितो मां तोषयितुं वेति तुमुन्कर्मणि चतुर्थी।[३२७]

## १.१४० मुनये

तस्मै स मुनये रामः पूजां कृत्वा यथाविधि।
पृष्ट्वाऽनामयव्यग्रो रामः पृष्टोऽथ तेन सः॥

– अ०रा० ७.८.१५

मुनिमनुकूलयितुम् इति तुमुन्कर्मणि चतुर्थी क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन।

---

[३२४] तृन् (पा०सू० ३.२.१३५) इत्यनेन ताच्छील्ये ताद्धर्म्ये वा तृन् प्रत्ययः।

[३२५] कर्ता कटान्। वदिता जनापवादान् (का०वृ० २.३.६९) कर्ता लोकान् (वै०सि०कौ० ६२७) इतिवत्।

[३२६] यद्वा ऋत्यकः (पा०सू० ६.१.१२८) इत्यनेन शाकलप्रकृतिभावः।

[३२७] क्रियार्थोपपदस्य च कर्मणि स्थानिनः (पा०सू० २.३.१४) इत्यनेन।

॥ इत्युत्तरकाण्डीयप्रयोगाणां विमर्शः ॥

इत्यध्यात्मरामायणेऽपाणिनीयप्रयोगाणांविमर्शनामके शोधप्रबन्धे प्रथमाध्याये द्वितीयपरिच्छेदः।

इत्थं महीजारघुवीरलेखकः अध्यात्मरामायणमध्यवर्तिनः।
अपाणिनीयान् स्वधिया विमृश्य वै अध्यायमेतं प्रथमं व्यमर्शयम्॥

इत्यध्यात्मरामायणेऽपाणिनीयप्रयोगाणांविमर्शनामके शोधप्रबन्धे प्रथमोऽध्यायः।

# अथ द्वितीयोऽध्यायः

# कृत्तद्धितप्रकरणम्

नत्वा नीलाम्बुदश्यामं रामं तामरसाननम्।
शोधे गिरिधरः प्रेम्णा द्वितीयाध्यायमारभे॥

अथाध्यात्मरामायणे समागतान् कृत्तद्धितसम्बन्धिनोऽपाणिनीयान् प्रयोगाननुसन्दधे।

॥ अथ द्वितीयाध्याये प्रथमः परिच्छेदः ॥

॥ अथ बालकाण्डीयप्रयोगाणां विमर्शः ॥

### २.१ संविष्टम्

कैलासाग्रे कदाचिद्रविशतविमले मन्दिरे रत्नपीठे
संविष्टं ध्याननिष्ठं त्रिनयनमभयं सेवितं सिद्धसङ्घैः।
देवी वामाङ्कसंस्था गिरिवरतनया पार्वती भक्तिनम्रा
प्राहेदं देवमीशं सकलमलहरं वाक्यमानन्दकन्दम्॥

– अ०रा० १.१.६

अत्राध्यात्मरामायणस्य प्रारम्भस्थितिं प्रस्तौति।[१] कैलासगिरौ संविष्टं भगवन्तं शिवं पार्वती पृच्छति। अत्र सम्पूर्वकात् विश् धातोः (विशँ प्रवेशने धा०पा० १६३९) कर्तरि गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च (पा०सू० ३.४.७२) इत्यनेन क्त-प्रत्ययः। लशक्वतद्धिते (पा०सू० १.३.८) इत्यनेनेत्सञ्ज्ञायां लोपे[२] व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः (पा०सू० ८.२.३६) इत्यनेन षत्वे ष्टुना ष्टुः (पा०सू० ८.४.४१) इत्यनेन

[१] 'व्यासः' इति शेषः।
[२] तस्य लोपः (पा०सू० १.३.९) इत्यनेन

ष्ठुत्वे विभक्तिकार्ये संविष्टम् इति। सम्पूर्वकस्य विश् धातोः शयनमर्थः।[३] तर्ह्युपवेशनरूपोऽर्थः कथमिति चेत्। समुपविष्टम् इत्येवात्र। उपउपसर्गस्य लोपः।[४] अत एव संविष्टम् इत्यस्य हि समुपविष्टम् इत्यर्थः।[५]

## २.२ पुरा रामायणे रामः

पुरा रामायणे रामो रावणं देवकण्टकम्।
हत्वा रणे रणश्लाघी सपुत्रबलवाहनम्॥
सीतया सह सुग्रीवलक्ष्मणाभ्यां समन्वितः।
अयोध्यामगमद्रामो हनूमत्प्रमुखैर्वृतः॥

– अ०रा० १.१.२६-२७

अत्र भूतभावनो भगवान् शिवोऽध्यात्मरामायणकथायाः प्रस्तावं करोति यत् पुरा रामायणे श्रीरामो रावणं हत्वाऽयोध्यामगमत्। अत्र रामायणे इति हि कस्य विशेषणं किमभिप्रायकं वाऽत्र सप्तमी वा किन्निमित्तिका। यदि चेदाधारे सप्तमी तदा रामायणं पुस्तकमत्र रामनिरूपिताऽऽधारता कथं सम्भवा। यदि चेल्लक्षणया रामायणलक्षितस्तस्या मूलमन्वयानुपपत्तिस्तात्पर्यानुपपत्तिश्च।[६] यथा गङ्गायां घोषः इत्यत्र तात्पर्यानुपपत्तिः। यतो हि घोष आभीरपल्ली। सा च भगीरथरथखातावच्छिन्नजलप्रवाहे सम्भवा नहि। अतोऽन्वयानुपपत्तिरपि तात्पर्यानुपपत्तिश्चेति चेत्सामीप्यसम्बन्धेन गङ्गापदस्य गङ्गातीरे लक्षणा। तथैवेत्यत्रापि रामायणे तात्पर्यानुपपत्तेः रामायणपदस्य रामायणोपलक्षिते काले लक्षणा। इयं च जघन्या वृत्तिर्वैयाकरणमते। एतस्या अस्तित्वमपि नास्तीति चेच्छक्यतावच्छेदकारोप इति चेत्।[७] अलं गुरुगुरुकल्पनया। रामायणमस्त्यस्मिन् स रामायणः इति विग्रहे प्रथमान्ताद्रामायणशब्दात् अर्शआदिभ्योऽच् (पा०सू० ५.२.१२७)

---

[३] यथा – पश्चादग्नेरुदगग्रेषु दर्भेषु प्राक्शिराः संविशति (गो०गृ०सू० २.६.१०) क्रमेण सुप्तामनु संविवेश (र०वं० २.२४) चरमं संविशति या प्रथमं प्रतिबुध्यते (म०भा० २.८८.३६) आन्याय्यादुत्थानादान्याय्याच्च संवेशनादेषोऽद्यतनः कालः (का०वृ० १.२.५७) इत्यादिषु। अवलम्बः – चारुदेवशास्त्रिकृता उपसर्गार्थचन्द्रिका।

[४] विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इत्यनेन।

[५] अन्यत्रापि दृश्यते। जघनार्धेन च पशुरुच्च तिष्ठति सं च विशति (श०ब्रा० ८.२.४.२०, संविशति = निषीदति)। पयटेत्कीटवद्भूमिं वर्षास्वेकत्र संविशेत् (ल०वि०स्मृ० ४.५, संविशेत् = तिष्ठेत् = वसेत्)। अन्येनोत्थाप्यतेऽन्येन तथा संवेश्यते जरी (वि०पु० ६.५.३३, संवेश्यते = उपवेश्यते)। अवलम्बः – चारुदेवशास्त्रिकृता उपसर्गार्थचन्द्रिका।

[६] अन्वयाद्यनुपपत्तिप्रतिसन्धानञ्च लक्षणाबीजम्। वस्तुतस्तु तात्पर्यानुपपत्तिसन्धानमेव तद्बीजम् (प०ल०म० २३–२४)।

[७] तन्न। सति तात्पर्ये सर्वे सर्वार्थवाचका इति भाष्याल्लक्षणाया अभावाद्वृत्तिद्वयावच्छेदकद्वयकल्पने गौरवात्। जघन्यवृत्तिकल्पनाया अन्याय्यत्वाच्च (प०ल०म० २७)।

इत्यनेन अच् प्रत्यये यचि भम् (पा०सू० १.४.१८) इत्यनेन भसञ्ज्ञायां यस्येति च (पा०सू० ६.४.१४८) इत्यनेनाकारलोपे रामायणः तस्मिन् रामायणे इति साधु। अर्थाद्रामायणे काले।

## २.३ हनूमन्तम्

दृष्ट्वा तदा हनूमन्तं प्राञ्जलिं पुरतः स्थितम्।
कृतकार्यं निराकाङ्क्षं ज्ञानापेक्षं महामतिम्॥

– अ०रा० १.१.२९

ततो रामः स्वयं प्राह हनूमन्तमुपस्थितम्।
शृणु तत्त्वं प्रवक्ष्यामि ह्यात्मानात्मपरात्मनाम्॥

– अ०रा० १.१.४४

प्रशस्तो हनुर्यस्य स हनुमान् इति विग्रहे तदस्यास्त्यस्मिन्निति मतुप् (पा०सू० ५.२.९४) इत्यनेन मतुप्प्रत्यये विभक्तिकार्ये हनुमन्तम् इति पाणिनीयम्। हनूमन्तम् इति हि कथम्। ऊङुतः (पा०सू० ४.१.६६) इत्यनेनोङि कृते दीर्घे हनू इति।[८] ततो मतुप्प्रत्यये हनूमान् इति। विभक्तिकार्ये हनूमन्तम्। यद्वा अन्येषामपि दृश्यते (पा०सू० ६.३.१३८) इत्यनेन दीर्घे हनूमन्तम् इति।

## २.४ आनन्दम्

आनन्दं निर्मलं शान्तं निर्विकारं निरञ्जनम्।
सर्वव्यापिनमात्मानं स्वप्रकाशमकल्मषम्॥

– अ०रा० १.१.३३

अत्र आनन्दशब्दस्य आत्मानम् इत्यनेन सामानाधिकरण्यं कथम्। यतो ह्यात्माऽऽनन्दस्याधिकरणम्। तथा चात्र कथं न षष्ठीति चेत्। अद्वैतवेदान्तमत आत्मन आनन्दरूपत्वात्। न च आनन्दमयोऽभ्यासात् (ब्र०सू० १.१.१३) इति ब्रह्मसूत्र आनन्दस्वरूपत्वं न प्रत्यपादि। अथ कस्मिन्नर्थे मयट्। किं तस्य विकारः (पा०सू० ४.३.१३४) इत्यनेन विकारार्थे। नहि तावदात्मा निर्विकारः आनन्दं निर्मलं शान्तमविकारमकल्मषम् इत्यत्रैवोक्तत्वात् अविकार्योऽयमुच्यते (भ०गी० २.२५)

[८] छान्दसत्वाद्बाहुलकाद्वा नोपधादमनुष्यजातेरप्यूङित्यर्थः। अत्र वाचस्पत्यकाराः – हनु(नू) पुंस्त्री० हन-उन् स्त्रीत्वे वा ऊङ्। शब्दकल्पद्रुमकाराश्च – हनूः, स्त्री, हनु + पक्षे ऊञ्। हनुः। इत्यमरटीकायां भरतः। भाष्ये तु ऊङ्करणेऽप्राणिजातेश्चारज्वादीनाम् (वा० ४.१.६६) इति वार्त्तिकानन्तरं हनुशब्दो रज्वादिगणे पठितः। परन्तु दृश्यते हि हनूरूपमार्षग्रन्थेषु। यथा मूलरामायणे भरतस्यान्तिकं रामो हनूमन्तं व्यसर्जयत् (वा०रा० १.१.८५)। अत्र गोविन्दराजाश्च – हनूशब्द ऊकारान्तोऽप्यस्ति (वा०रा० भू०टी० १.१.८५)।

इति गीतायामप्युक्तत्वादिति चेत्। तत्प्रकृतवचने मयट् (पा०सू० ५.४.२१) इत्यनेन प्राचुर्यार्थे। अद्वैतवादिनां मते स्वरूपे। अतः सामानाधिकरण्यं प्राचुर्यार्थे मयटि। परमात्माऽऽनन्दस्य निलयमित्यपेक्षायाम् आनन्दोऽस्त्यस्मिन् इत्यर्शआद्यच्।[९] यद्वा आनन्द इवाऽचरतीत्यानन्दति।[१०] आनन्दतीत्यानन्दः।[११] कर्तरि क्विपि सर्वापहारिलोपे कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) इत्यनेन प्रातिपदिकसञ्ज्ञायां स्वौजसमौट्छष्टा-भ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (पा०सू० ४.१.२) इत्यनेन अमि विभक्तौ अमि पूर्वः (पा०सू० ६.१.१०७) इत्यनेन पूर्वरूपे आनन्दम् इति पाणिनीयमेव।

## २.५ अविकारिणि

साभासबुद्धेः कर्तृत्वमविच्छिन्नेऽविकारिणि।
साक्षिण्यारोप्यते भ्रान्त्या जीवत्वं च तथा बुधैः॥

– अ०रा० १.१.४७

अत्र न विकार इत्यविकारः। अविकारोऽस्त्यस्मिन्निति अविकारी इति विग्रहे अत इनिठनौ (पा०सू० ५.२.११५) इत्यनेन इनिप्रत्यये विभक्तिलोपे भसञ्ज्ञायां यस्येति च (पा०सू० ६.४.१४८) इत्यनेनाकारलोपे पुनः सप्तमीङिविभक्तौ लशक्वतद्धिते (पा०सू० १.३.८) इत्यनेन ङकारेत्सञ्ज्ञायामनुबन्धलोपे अट्कुप्वाङ्नुम्व्यवायेऽपि (पा०सू० ८.४.२) इत्यनेन णत्वे अविकारिणि। अत्र न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः[१२] इति वचनेन हि मत्वर्थीयनिषेधात् इनिः अपाणिनीय इति चेत्। अत्र कर्मधारयो नास्ति तदा कथमुक्त-नियमस्य प्रसरः। अत्र कर्मधारयः सकलसमासोपलक्षणमिति चेत्। अत्र न इनिः किन्तु न विकर्तुं तच्छीलः इति विग्रहे विपूर्वकात् कृधातोः (डुकृञ् करणे धा०पा० १४७२) सुप्यजातौ णिनिस्ताच्छील्ये (पा०सू० ३.२.७८) इत्यनेन णिनिः। णकारानुबन्धे कार्ये अचो

[९] अर्शआदिभ्योऽच् (पा०सू० ५.२.१२७) इत्यनेन।

[१०] आनन्द → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → आनन्द क्विँप् → आनन्द व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → आनन्द → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → आनन्द लट् → आनन्द तिप् → आनन्द ति → कर्तरि शप् (पा०सू० ३.१.६८) → आनन्द शप् ति → आनन्द अ ति → अतो गुणे (पा०सू० ६.१.९७) → आनन्द ति → आनन्दति।

[११] आनन्द → धातुसञ्ज्ञा (पूर्ववत्) → क्विप् च (पा०सू० ३.२.७६) → आनन्द क्विँप् → आनन्द व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → आनन्द → विभक्तिकार्यम् → आनन्दः। यद्वा नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन कर्तर्यचि। आनन्द → धातुसञ्ज्ञा (पूर्ववत्) → नन्दि-ग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) → आनन्द अच् → आनन्द अ → अतो गुणे (पा०सू० ६.१.९७) → आनन्द → विभक्तिकार्यम् → आनन्दः।

[१२] मूलं मृग्यम्।

ञ्णिति (पा०सू० ७.२.११५) इत्यनेन वृद्धौ रपरत्वे[१३] सप्तम्येकवचने णत्वे[१४] अविकारिणि इति पाणिनीयमेव।

## २.६ जगत्येन

मायया गुणमय्या त्वं सृजस्यवसि लुम्पसि।
जगत्येन न ते लेप आनन्दानुभवात्मनः॥

– अ०रा० १.२.१५

अत्र रावणकुकृत्यजन्यपादभारपीडितया वसुमत्या सह सकलदेवपुरःसरं क्षीरसागरं गतो ब्रह्मा भगवन्तं स्तुवन्नाह यत्त्रिगुणमय्या मायया हेतुभूतयोपलक्षितस्त्वं संसारं सृजसि पालयसि नाशयसि किन्तु त्वं जागतिकपदार्थेन न लिप्यसे। अत्र जागतिकेन इत्येव प्रयोक्तव्यं यतो हि जगति भवं जागतिकम् इति विग्रहे तत्र भवः (पा०सू० ४.३.५३) इत्यनेन ठक् प्रत्यये तद्धितेष्वचामादेः (पा०सू० ७.२.११७) इति वृद्धौ इसुसुक्तान्तात्कः (पा०सू० ७.३.५१) इत्यनेन कादेशे विभक्तिकार्ये जागत्केन इत्येव पाणिनीयम्। एवं जगत्येन इति विमृश्यते। तथा च आत्मनो जगदिच्छतीति जगत्यति इति विग्रहे सुप आत्मनः क्यच् (पा०सू० ३.१.८) इत्यनेन क्यच् प्रत्यये लशक्वतद्धिते (पा०सू० १.३.८) इत्यनेनेत्सञ्ज्ञायामनुबन्धलोपे वर्तमाने लट् (पा०सू० ३.२.१२३) इति लट्। ततः तिपि शपि जगत्यति।[१५] ततः जगत्यतीति जगत्यः इति विग्रहे नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन अच् प्रत्यये विभक्तिकार्ये तृतीयैकवचने टाविभक्तौ टाङसिङसामिनात्स्याः (पा०सू० ७.१.१२) इत्यनेनेनादेशे गुणे[१६] जगत्येन इति पाणिनीयमेव। यद्वा जगत्संसारं याति गच्छति इति विग्रहे जगदुपपदे याधातोः (या प्रापणे धा०पा० १०४९) आतोऽनुपसर्गे कः (पा०सू० ३.२.३) इत्यनेन कप्रत्यये ककारस्यानुबन्धकार्ये आतो धातोः (पा०सू० ६.४.१४०) इत्यनेनाऽकार-लोपेऽपदत्वाज्जश्त्वाभावे[१७] जगत्यः तेन जगत्येन। यद्वा जगदाचष्ट इति जगतयति।[१८]

---

[१३] उरण् रपरः (पा०सू० १.१.५१) इत्यनेन।

[१४] अट्कुप्वाङ्नुम्व्यवायेऽपि (पा०सू० ८.४.२) इत्यनेन।

[१५] जगत्यति इति भाष्ये तुग्यणेकादेशगुणवृद्ध्यौत्त्वदीर्घत्वेत्वमुमेत्त्वरीविधिभ्यः (वा० १.४.२) इति वार्तिक उदाहृतम्।

[१६] आद्गुणः (पा०सू० ६.१.८७) इत्यनेन।

[१७] पृषोदरादीनि यथोपदिष्टम् (पा०सू० ६.३.१०९) इति सूत्रेणापदत्वम्। यद्वा अयस्मयादीनि च्छन्दसि (पा०सू० १.४.२०) इति सूत्रेण छान्दसभत्वम्।

[१८] जगत् → तत्करोति तदाचष्टे (धा०पा० ग०सू०) → जगत् णिच् → जगत् इ → जगति → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लँट् (पा०सू० ३.२.१२३) → जगति लट् → जगति तिप् → कर्तरि शप् (पा०सू० ३.१.६८) → जगति शप् तिप् → जगति अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → जगते अ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → जगतय् अ ति → जगतयति।

जगतयतीति जगत् इत्याचक्षाणाण्णिजन्तात्क्विपि ककारस्य लशक्वतद्धिते (पा०सू० १.३.८) इत्यनेनेत्सञ्ज्ञायां तस्य लोपः (पा०सू० १.३.९) इत्यनेन लोप इकारस्य उपदेशेऽजनुनासिक इत् (पा०सू० १.३.२) इत्यनेनेत्सञ्ज्ञायां लोपे पकारस्य हलन्त्यम् (पा०सू० १.३.३) इत्यनेनेत्सञ्ज्ञायां लोपे वेरपृक्तस्य (पा०सू० ६.१.६७) इत्यनेन वकारलोपे णेरनिटि (पा०सू० ६.४.५१) इत्यनेन णिलोपे।[१९] पुनः यातीति यः।[२०] जगदेव य इति जगत्यः इति विग्रहे कर्मधारयसमासे जगत्यः। न च झलां जशोऽन्ते (पा०सू० ८.२.३९) इत्यनेन कथं न जश्त्वम्। पृषोदरादित्वात्[२१] तद्भावकल्पनेनादोषात्। पुनः तेन जगत्येन।

## २.७ सपत्निवत्

तवाङ्घ्रिपूजानिर्माल्यतुलसीमालया विभो।
स्पर्धते वक्षसि पदं लब्ध्वाऽपि श्रीः सपत्निवत्॥

– अ०रा० १.२.१९

अत्र सपत्न्या तुल्यम् इति विग्रहे तेन तुल्यं क्रिया चेद्वतिः (पा०सू० ५.१.११५) इत्यनेन वति प्रत्यये सपत्नीवत् ।[२२] सपत्निवत् इति कथम्। अत्र हि ङ्यापोः सञ्ज्ञाछन्दसोर्बहुलम् (पा०सू० ६.३.६३) इत्यनेन ह्रस्वः।[२३]

## २.८ अतिहर्षितः

इति ब्रुवन्तं ब्रह्माणं बभाषे भगवान् हरिः।
किं करोमीति तं वेधाः प्रत्युवाचातिहर्षितः॥

– अ०रा० १.२.२२

[१९] जगति → धातुसञ्ज्ञा (पूर्ववत्) → क्विप् च (पा०सू० ३.२.७६) → जगति क्विँप् → जगति व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → जगति → णेरनिटि (पा०सू० ६.४.५१) → जगत् → विभक्तिकार्यम् → जगत्।

[२०] या प्रापणे (धा०पा० १०४९) → या → अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) → या ड → या अ → डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) → य् अ → य → विभक्तिकार्यम् → यः।

[२१] पृषोदरादीनि यथोपदिष्टम् (पा०सू० ६.३.१०९) इत्यनेन। यद्वा अयस्मयादीनि च्छन्दसि (पा०सू० १.४.२०) इति सूत्रेण छान्दसभत्वम्।

[२२] समानः पतिरस्याः इति विग्रहे नित्यं सपत्न्यादिषु (पा०सू० ४.१.३५) इत्यनेन निपातनात्समानस्य सादेशे सपत्नीशब्दो व्युत्पन्नः।

[२३] अपि च वाल्मीकीयरामायणेऽयोध्याकाण्डे – साहं त्वदर्थे सम्प्राप्ता त्वं तु मां नावबुध्यसे। सपत्निवृद्धौ या मे त्वं प्रदेयं दातुमिच्छसि॥ (वा०रा० २.८.२६)। अत्र टीकाकाराः – ङ्यापोः सञ्ज्ञाछन्दसोर्बहुलम् (पा०सू० ६.३.६३) इत्यनेनार्षत्वेन वा ह्रस्वत्वम्। यथा – सपत्निवृद्धाविति 'ङ्यापोः' इति ह्रस्वः (वा०रा० भू०टी०)। सपत्न्याः वृद्धिः – सपत्निवृद्धिः 'ङ्यापोः' इति ह्रस्वः (वा०रा० क०टी०)। सपत्निवृद्धावित्यत्र ह्रस्व आर्षः (वा०रा० शि०टी०)। सपत्निवृद्धावित्यार्षो ह्रस्वः (वा०रा० ति०टी०)।

ब्रह्मणः स्तुतिं श्रुत्वाऽऽत्मानं प्रदर्श्य भगवान् बभाषे यत् किं करोमि इति। समाकर्ण्यातिहृष्टो ब्रह्मा प्रत्युवाच। अतिहृष्टः इति प्रयोगतन्त्रे अतिहर्षितः इत्यपाणिनीय इव प्रयुक्तः। यतो हि हृष् धातोः (हृषँ तुष्टौ धा०पा० १२२९) गत्यर्थाकर्मकश्लिषशीङ्स्थासवस-जनरुहजीर्यतिभ्यश्च (पा०सू० ३.४.७२) इत्यनेनाकर्मकधातोः कर्तरि क्तप्रत्यये ककारानुबन्ध-लोपे[२४] ष्टुत्वे[२५] विभक्तिकार्ये हृष्टः इत्येव हि पाणिनीयम्। हर्षितः इति प्रयोगोऽपि पाणिनीयः। यतो हि हर्षः सञ्जातोऽस्य इति विग्रहे तदस्य सञ्जातं तारकादिभ्य इतच् (पा०सू० ५.२.३६) इत्यनेन इतच् प्रत्ययेऽनुबन्धलोपे यचि भम् (पा०सू० १.४.१८) इत्यनेन भसञ्ज्ञायां यस्येति च (पा०सू० ६.४.१४८) इत्यनेनाकारलोपे विभक्तिकार्ये हर्षितः। यद्वा हर्षमितः इति विग्रहे द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः (पा०सू० २.१.२४) इत्यनेन द्वितीयातत्पुरुष-समासः। न च इतशब्दस्य श्रितादिबहिर्भूतत्वात्कथं समास इति वाच्यम्। द्वितीया इति योग-विभागेन द्वितीया समर्थेन सुबन्तेन समस्यत इत्यर्थकरणे द्वितीयातत्पुरुषो नैव दोषावहः। तेन गृहं यातो गृहयातः गृहमागतो गृहागतः इत्यादिप्रयोगा अपि सङ्गच्छन्ते। कालिदासोऽपि प्रयुङ्क्ते यथा –

सुरेन्द्रमात्राश्रितगर्भगौरवात्प्रयत्नमुक्तासनया गृहागतः।
तयोपचाराञ्जलिखिन्नहस्तया ननन्द पारिप्लवनेत्रया नृपः॥

– र०वं० ३.११

अत्र गृहमागतो गृहागतः इत्यसति योगविभागे कथं समासः सम्भवः। तस्मात् हर्षमितः इति विग्रहे द्वितीयातत्पुरुषे कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) इत्यनेन प्रातिपदिक-सञ्ज्ञायां सुपो धातुप्रातिपदिकयोः (पा०सू० २.४.७१) इत्यनेन विभक्तिलुकि पुनस्तामेव प्रातिपदिकसञ्ज्ञामाश्रित्य सौ विभक्तौ हर्षितः। न च सति विभक्तिलोपे हर्ष इत इति स्थिते गुणः स्यादिति चेत्। अत्राऽकृतिगणत्वात् शकन्ध्वादिषु पररूपं वाच्यम् (वा० ६.१.९४) इत्यनेन पररूपम्। कुत्र स्यात्कस्य वेति चेत्। तच्च टेः (वै०सि०कौ० ७९, ल०सि०कौ० ३९)। अर्थात्तत्पररूपं भसञ्ज्ञकस्य टेः स्थाने भवतु।[२६] असति च तस्मिन् शकघटकाकारस्य पर-रूपतया शक अन्धु इति स्थिते तयोर्दीर्घो दुर्वार एव। एवं मनस् ईषा इति स्थिते शकन्ध्वादिषु पररूपं वाच्यम् (वा० ६.१.९४) इत्यनेनाऽकृतिगणत्वात् मनीषा इत्यत्र टि इत्यस्य पररूपे मन् ई ईषा इति स्थिते ततो अज्झीनं वर्णपरेण संयोज्यम् (स्व०शि० ८.१५) इति वचनात् मनीषा इत्यत्र दीर्घः। अनिष्टः प्रयोगः स्यात्किन्तु पतत् अञ्जलौ इति। टि इत्यस्य पररूपे

[२४] लशक्वतद्धिते (पा०सू० १.३.८) तस्य लोपः (पा०सू० १.३.९) इत्याभ्याम्।
[२५] ष्टुना ष्टुः (पा०सू० ८.४.४१) इत्यनेन।
[२६] पूर्वपक्षोऽयम्।

दीर्घे पताञ्जलिः इत्यसङ्गतं स्यात्।[२७] अतः 'टेः' इति पञ्चम्यन्तम्। तदन्वचि परे पूर्वपरयोः पररूपम् इत्यस्मद्गुरुचरणाः।[२८] तथैवात्रापि पररूपं करणीयम्।

## २.९ मद्दत्तवरदर्पितः

भगवन् रावणो नाम पौलस्त्यतनयो महान्।
राक्षसानामधिपतिर्मद्दत्तवरदर्पितः॥

– अ०रा० १.२.२३

अत्र ब्रह्मा रावणस्योच्छृङ्खलतां वर्णयति। मद्दत्तवरदर्पितः इति। अत्र मया दत्तो वर इति मद्दत्तवरस्तेन दर्पितः इति विग्रहे दृप् धातोः (दृपँ हर्षमोहनयोः धा०पा० ११९६) अनिड्त्वात्[२९] दृप्तः इत्येव पाणिनीयं दर्पितः इति कथम्। दर्पः सञ्जातोऽस्य इति विग्रहे तारकादिगणे दर्पितशब्दस्य पाठात् इतच् प्रत्यये[३०] भत्वादकारलोपे[३१] दर्पितः। यद्वा दर्पमितः इति द्वितीयासमासे पररूपे[३२] दर्पितः इति।

## २.१० सहायम्

यूयं सृजध्वं सर्वेऽपि वानरेष्वंशसम्भवान्।
विष्णोः सहायं कुरुत यावत्स्थास्यति भूतले॥

– अ०रा० १.२.३०

अत्र भगवान् ब्रह्मा सर्वान् देवान् वानरशरीराणि स्रष्टुं प्रेरयति। विष्णोः सहायं कुरुत अत्र सहायम् इत्यपाणिनीयमिव। यतो हि अयँ गतौ (धा.पा. ४७४) इत्यस्मात्कर्तरि अच् प्रत्यये सहायः इति भवति[३३] किन्त्वत्र तु सर्वे सहायं कुरुत इति विवक्षायां सहाय-शब्दो भावसाधनः प्रतीयते। भावे च सहायस्य भावः साहाय्यम् इति विग्रहे गुणवचन-

---

[२७] यदि त्वादित्यधिकारादस्यैवेष्येत तर्हि मनीषा पतञ्जलिरिति न सिध्येत्। केचित्तु मनःपतच्छब्दयोः पृषोदरादित्वादन्त्यलोप अकारस्यैव पररूपमाहुः (त०बो० ७९)।

[२८] बालमनोरमायामपि – ततश्च शकादिशब्दानां टेरचि परे टेश्च परस्याचस्स्थाने पररूपमेकादेश इत्यर्थाल्लभ्यते। आदित्यनुवृत्तौ शकन्ध्वादिगणे 'सीमन्त' इति कतिपयरूपाणामसिद्धेः (बा०म० ७९)।

[२९] एकाच उपदेशेऽनुदात्तात् (पा०सू० ७.२.१०) इति सूत्रेण धातोरनिड्त्वम्। तद्बाधित्वा रधादिभ्यश्च (पा०सू० ७.२.४५) इत्यनेन वैकल्पिकेड्प्राप्तिः। परन्तु निष्ठायां यस्य विभाषा (पा०सू० ७.२.१५) इत्यनेनेडभावः।

[३०] तदस्य सञ्जातं तारकादिभ्य इतच् (पा०सू० ५.२.३६) इत्यनेन।

[३१] यचि भम् (पा०सू० १.४.१८) इत्यनेन भत्वम्। यस्येति च (पा०सू० ६.४.१४८) इत्यनेनाकारलोपः।

[३२] शकन्ध्वादिषु पररूपं वाच्यम् (वा० ६.१.९४) इत्यनेन।

[३३] सहायः, पुं०, (सह अयते इति। अय + अच्) इति शब्दकल्पद्रुमः।

ब्राह्मणादिभ्यः कर्मणि च (पा.सू. ५.१.१२४) इत्यनेन ष्यञ् प्रत्यये वृद्धौ भत्वादकारलोपे[३४] साहाय्यम्। अत्र सहायम् इति हि। पञ्चवट्यां निवासे भगवतः साह्यं कुर्वन्तु[३५] इति विवक्षायां सहायम् इति कथमिति चेत्। सहायम् इत्यत्र पृषोदरादित्वाद्वृद्ध्यभावे यकार-लोपे सहायम्। यद्वा सर्वे सहायं यथा स्यात्तथा कुर्वन्तु इति क्रियाविशेषणत्वाद्द्वितीया। यद्वा आत्मानं सहायं कुर्वन्तु इत्यध्याहारेऽप्यपाणिनीयतापरिहारः। यद्वा अयनम् अयः इति भावे एरच् (पा०सू० ३.३.५६) इत्यनेन इधातोः (इण् गतौ धा०पा० १०४५) अचि गुणेऽयादेशे विभक्तिकार्ये अयः। सह अयः सहायस्तं सहायम् इति साधनीयम्।[३६]

## २.११ सहायार्थम्

देवाश्च सर्वे हरिरूपधारिणः स्थिताः सहायार्थमितस्ततो हरेः।
महाबलाः पर्वतवृक्षयोधिनः प्रतीक्षमाणा भगवन्तमीश्वरम्॥

– अ०रा० १.२.३२

अत्र सहायार्थम् इति प्रयोगोऽपि तथैव। अत्र अयनमयः। भावे अच्।[३७] सह अयः सहायः।[३८] तस्मायिदम् सहायार्थम्।[३९] यद्वा भावेऽयं घञन्तः आयः।[४०] तेन सन्धौ कृते न दोषः। सह आयः सहायः। तस्मा इदं सहायार्थम्। एवं निष्पन्नसहायशब्दस्य चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः (पा०सू० २.१.३६) इत्यनेन अर्थेन नित्यसमासो विशेष्य-लिङ्गता चेति वक्तव्यम् (वा० २.१.३६) इतिवार्त्तिकबलेन नित्यसमासे सिद्धमिदम्। न च सहायाय इदम् इति लौकिकविग्रहे श्रूयते पश्चात् अर्थशब्देन सह समास इति चेत्। विग्रहो द्विधा स्वपदविग्रहोऽस्वपदविग्रहश्च। स्वपदविग्रहो नाम यत्र विग्रहे श्रुतानां पदानां समासः। यत्र विग्रहेऽश्रुतानामपि श्रुतार्थबोधसमर्थानां समासस्तत्रास्वपदविग्रहः। यथा प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (पा०सू० २.३.४६) इति सूत्रे। अत्र हि प्रातिपदिकार्थश्च लिङ्गञ्च परिमाणञ्च वचनञ्चेति प्रातिपदिकार्थलिङ्गपरिमाणवचनानि तान्येवेति प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रं तस्मिन् प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे। अत्र

---

[३४] तद्धितेष्वचामादेः (पा०सू० ७.२.११७) इत्यनेनादिवृद्धिः। यचि भम् (पा०सू० १.४.१८) इत्यनेन भत्वम्। यस्येति च (पा०सू० ६.४.१४८) इत्यनेनाकारलोपः।

[३५] साह्यम्, क्ली०, सहस्य भावः (सह + ष्यञ्) इति शब्दकल्पद्रुमः।

[३६] सह अयः सहायः इत्यत्र सह सुपा (पा०सू० २.१.४) इत्यनेन सुप्सुपासमासः। २८२तमे पृष्ठे २.४८ सहायं मे इति प्रयोगस्य विमर्शमपि पश्यन्तु। अनेन जानकिनाथ सहाय करैं जब कौन बिगाड़ करे नर तेरो इति मुक्तके सहाय करैं इति गोस्वामितुलसीदासकृतोऽवधीभाषाप्रयोगोऽपि व्याख्यातः।

[३७] इण् गतौ (धा०पा० १.१०४५) इति धातोः एरच् (पा०सू० ३.३.५६) इत्यनेन।

[३८] सुप्सुपासमासः।

[३९] अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम् (वा० २.१.३६) इत्यनेन नित्यसमासः।

[४०] अयँ गतौ (धा०पा० ४७४) इति धातोः भावे (पा०सू० ३.३.१८) इत्यनेन।

विग्रहे श्रुतस्तु एवशब्दः किन्त्वस्वपदविग्रहतया तदर्थवाचक आगतो मात्रशब्दः। स च प्रत्येकमन्वितः। यतो हि द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते। न च द्वन्द्वघटकोऽन्त्यशब्दस्तु वचनमिति तदेव प्रत्येकमभिसम्बध्यतामिति चेत्। अन्त्यशब्दस्य समीपार्थे लक्षणा। न च सा जघन्या वृत्तिर्वैयाकरणैरस्वीकृताऽपि।[४१] तथा च गङ्गायां घोषः इत्यत्राऽभीरपल्ल्यर्थवाचकस्य घोषशब्दस्य गङ्गापदाभिधेयभगीरथरथखातावच्छिन्नजलप्रवाहरूपे शक्यार्थेऽन्वयासम्भवात्तात्पर्यानुपपतेश्च। अत्र सामीप्यसम्बन्धेन गङ्गापदस्य गङ्गासमीपवर्तितटे लक्षणा। न च गङ्गायाम् इत्यत्र सप्तमी कथमिति चेत्। औपश्लेषिकस्याऽधारस्यात्र विवक्षा। औपश्लेषिको हि सम्बन्धः। उपश्लेषे भव औपश्लेषिकः इति तत्र जातः (पा०सू० ४.३.२५) इत्यनेन ठक्।[४२] उपश्लेषश्च सामीप्येन संयोगेन वा सम्बन्धः। संयोगे यथा कटे शेते। सामीप्ये यथा गुरौ वसति। न तु गुरुमभिसंयुज्य वसति अपि तु गुरोः समीपे वसति। तथैव गङ्गायां घोषः। न तु गङ्गामभिसंयुज्य घोषः अपि तु गङ्गासमीपे घोषः। ध्येयमेतत् – शक्यार्थे स्वीकृते गङ्गायां मीनः इत्यादौ कटे शेते इत्यादिवत् संयोगसम्बन्धरूप औपश्लेषिक आधारे सप्तमी किन्तु लक्ष्यार्थे गङ्गायां घोषः इत्यादौ सामीप्यसम्बन्ध औपश्लेषिक आधारे सप्तमी गुरौ वसति इत्यादिवत्। परञ्च गङ्गायां मीनघोषौ इत्यादौ लक्षणास्वीकारे दोषः। यतो हि मीनश्च घोषश्च मीनघोषौ इति द्वन्द्वः। स च साहित्यमपेक्षते। साहित्यं नामैकधर्मावच्छिन्नस्यैकधर्मावच्छिन्नसंसर्गेणैककर्मावच्छिन्नेऽन्वयः। यथा रामलक्ष्मणौ राक्षसान् हतः इत्यत्र रामलक्ष्मणौ इत्यस्य कर्तृत्वरूपसम्बन्धावच्छिन्नकर्तृत्वरूपधर्मेण हन्तृत्वरूपधर्मावच्छिन्ने हननकर्मण्यन्वयः। तथात्रासम्भवः। एकधर्मावच्छिन्नस्य मीनघोषौ इत्यस्यैकधर्मावच्छिन्नसंसर्गेण स्वनिष्ठत्वावच्छिन्नस्वनिष्ठत्वसंसर्गेण सत्तात्वावच्छिन्नसत्तापदार्थेऽन्वयः। परमत्र गङ्गायां मीनघोषौ इत्यत्र मीनपदार्थाय गङ्गापदस्य प्रवाहार्थो घोषकृते तीररूपो लक्ष्यार्थस्तर्हि कथमन्वय इति चेत्। अत्र लक्षणामनङ्गीकृत्य शक्यतावच्छेदकधर्मारोपः। तथा कृत उभयत्र प्रवाहरूपोऽर्थः समान एव। तस्मादत्र न लक्षणा। सामीप्ये षष्ठी च चेत् द्वन्द्वस्यान्तं द्वन्द्वान्तं द्वन्द्वसमीपान्तम् इत्यर्थः। सामीप्यषष्ठ्यर्थस्यास्मन्नयेऽस्वीकारात्प्रौढमनोरमाबृहच्छब्दरत्नलघुशब्दरत्नादौ साटोपं खण्डितत्वाच्च। तत्रेयं परिस्थितिर्यदावृत्तहलन्तमित्यत्रैव प्रौढमनोरमायां दीक्षितमहाभागैः पूर्वपक्षः प्रदर्शितो यत् हलित्येकदेशस्यैव

[४१] तन्न। सति तात्पर्ये सर्वे सर्वार्थवाचका इति भाष्याल्लक्षणाया अभावाद्वृत्तिद्वयावच्छेदकद्वयकल्पने गौरवात्। जघन्यवृत्तिकल्पनाया अन्याय्यत्वाच्च (प०ल०म० २७)।

[४२] उपश्लेष → तत्र जातः (पा०सू० ४.३.२५) → उपश्लेष ठक् → उपश्लेष ठ → ठस्येकः (पा०सू० ७.३.५०) → उपश्लेष इक → यचि भम् (पा०सू० १.४.१८) → भसञ्ज्ञा → किति च (पा०सू० ७.२.११८) → औपश्लेष इक → यस्येति च (पा०सू० ६.४.१४८) → औपश्लेष् इक → औपश्लेषिक → विभक्तिकार्यम् → औपश्लेषिकः।

तन्त्रावृत्त्येकशेषान्यतममस्तु (प्रौ०म० १)। हस्य ल् इति समासः करिष्यत एवं च षष्ठ्यर्थः सामीप्यं भविष्यति। तथा च अन्त्यशब्दो ल् शब्देन सहान्वेष्यते। तथा च हसमीप-वर्त्यन्त्यो लकार इत् इत्यर्थस्वीकारेऽन्योऽन्याश्रयदोषपरिहारः किन्तु स्वीकृतेऽस्मिन् विकल्पे षष्ठ्यर्थो हि सामीप्यम्। तस्य च सर्वथाऽसिद्धत्वम्। यतो हि सामीप्यरूपस्य षष्ठ्यर्थस्य लोकेऽप्रसिद्धिः। नहि नीलमम्बरं यस्य इत्युक्ते नीलाम्बरसमीपवर्तिभवनादिः प्रतीयते न वा चित्रा गावो यस्य इत्युक्ते चित्रगवीनां समीपवर्तिवृक्षादिः प्रतीयते। किं वा चित्रा गावोऽन्तरा समीपे वा यस्य इत्यर्थे बहुव्रीहिमत्वर्थीयमपि न भवति अन्तरा-शब्दस्य सामीप्यस्य च षष्ठ्यर्थस्वीकारे मानाभावात्। अत एव अन्तरेण न समासः इति भाष्योक्तिः।[४३] वस्तुतस्तु षष्ठ्यर्था यद्यप्येकशतम् एकशतं हि षष्ठ्यर्थाः (भा०पा०सू० १.१.४९) इति भाष्योक्तेः किन्तु सम्बन्धभेदेनार्थात्सम्बन्धवैचित्र्येण तदर्थवैविध्यम्। यतो हि सूत्र-कारोऽपि षष्ठ्याः सम्बन्धमेवार्थं कण्ठरवेण कथयति। षष्ठी शेषे (पा०सू० २.३.५०)। शेष-शब्दो हि शिष् धातोः (शिषॕँ विशेषणे धा०पा० १४५१) कर्तरि अच् प्रत्ययेन। शिनष्टि कारकादीनि प्रातिपदिकार्थञ्च विशिनष्टि स्वस्माद्व्यावर्तयतीति शेषः। पचादित्वादचि प्रत्यये[४४] पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) इत्यनेन गुणे विभक्तिकार्ये सिद्धः शेषः इति। यद्वा शिष्यते सर्वेभ्यः कारकप्रातिपदिकार्थेभ्यो व्यावर्तत इति शेषः इति अकर्तरि च कारके सञ्ज्ञायाम् (पा०सू० ३.३.१९) इत्यनेन कर्तृभिन्ने कर्मणि कारके घञि गुणे सिद्धम्। यद्वा शेषणं शेषः इति विग्रहे भावघञन्तः।[४५] सोऽस्त्यस्मिन्निति मत्वर्थीयोऽर्शआद्यच्।[४६] न च करणे घञ् इति चेत्। करणाधिकरणयोश्च (पा०सू० ३.३.११७) इत्यनेन विधीयमानल्युट्-प्रत्यनेन बाधोऽत एव। पुंसि सञ्ज्ञायां घः प्रायेण (पा०सू० ३.३.११८) इत्यनेन घः प्रत्ययः क्रियताम्। सञ्ज्ञाभावे कथमत्र। घः प्रायेण इति हि सञ्ज्ञायाम् इत्यस्य विशेषणमिति चेत्। प्रायेण इति विशेषणं न करणघञ्व्यवस्थापकम्। न ह्युपाधेरुपाधिर्भवति (भा०पा०सू० १.३.२, ५.१.१६) इति भाष्यकारेण निषिद्धत्वात्। अत एव हलश्च (पा०सू० ३.३.१२१) इति घञपि न यतो ह्ययं घविषयेऽपवादत्वात्प्रवर्तते। उत्सर्गापवादौ समानदेशौ भवतः[४७] इति नियमस्य सार्वत्रिकत्वात् घ एव बाध्यते तर्हि घञः का गतिः। अगतिकगतिस्तस्माद्भावघञन्त एव। पश्चात् अच् प्रत्यये शेषशब्दो निष्पाद्यते। इमा युक्तयः प्रौढमनोरमायाम् उपदेश-शब्दनिष्पत्तौ स्पष्टं निरूपिता दीक्षितमहाभागैर्यथा – यद्यपि उपदिश्यतेऽनेनेति करण-

[४३] स्त्र्यन्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवतीत्युच्यते न चान्तरेण समासं स्त्र्यन्तं प्रातिपदिकमुप-सर्जनमस्ति (भा०पा०सू० १.२.४८)।

[४४] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन।

[४५] भावे (पा०सू० ३.३.१८) इत्यनेन।

[४६] अर्शआदिभ्योऽच् पा०सू० ५.२.१२७) इत्यनेन।

[४७] मूलं मृग्यम्।

व्युत्पत्त्या शास्त्रमुपदेश इति भाष्यवृत्त्यादिषु व्याख्यातं तथाऽपि तत्प्रौढिवादमात्रं करणे घञो दुर्लभत्वाल्ल्युटा बाधात्। न च “घः” असञ्ज्ञत्वात्। प्रायेण सञ्ज्ञायामिति व्याख्यानस्य क्लिष्टत्वात्। न ह्युपाधेरुपाधिर्भवतीत्यादिना भाष्यकृतावहेलनाच्च। अत एव घापवादः “हलश्च” (पा०सू० ३.३.१२१) इति घञपीह न। बाहुलकं त्वगतिकगतिः। अत एव प्रक्रियन्ते शब्दा याभिरिति करणव्युत्पत्तिरपि परास्ता। तथा च वार्त्तिकं “अजब्भ्यां स्त्रीखलनाः” (वा० ३.३.१२६) “स्त्रियाः खलनौ विप्रतिषेधेन” (वा० ३.३.१२६) इति। अतो भाव एव प्रत्ययो न्याय्य इति भावः इति (प्रौ०म० ३)। किन्तु यन्निमित्तोपदेशप्रवृत्तावित्यादिषु स्थलेषु भाष्ये करणघञन्तस्य प्रतिपादितत्वात्सा सरणिरत्राप्यनुसर्तव्या। तथा च शिष्यन्ते कारक-प्रातिपदिकार्था अनेनेति शेषः। स सम्बन्धः। तथा च सिद्धान्तकौमुद्यां कारकप्रातिपदिकार्थ-व्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषस्तत्र षष्ठी स्यात् (वै०सि०कौ० ६०६)। एवं हि सम्बन्धः षष्ठ्यर्थ इति राद्धान्तः। सम्पूर्वकात् बन्ध् धातोः (बन्धँ बन्धने धा०पा० १५०८) सम्यग्बध्नाति प्रतियोग्यनुयोगिनौ यः स सम्बन्धः इति विग्रहे कर्तरि पचाद्यचि।[४८] तथा च सम्बन्धो हि द्विष्ठः सम्बन्धिभिन्न आश्रयतया विशिष्टबुद्धिनियामकश्चेति वैयाकरणसिद्धान्तः।[४९] सामीप्यं हि नैव द्विष्ठम्। अतः कथं सम्बन्धो भवेदिति ममापि मनीषा। एवं षष्ठ्यर्थो न सामीप्यम्। अतः षष्ठीबलेन सामीप्यार्थो नावगन्तुं शक्यते। तेन पदसमीपेऽन्तपदस्य लक्षणा। साऽस्वीकृतेति चेच्छक्यतावच्छेदकतारूपः। इत्थमुपबृंहणेन सिद्धमिदं यदस्वपद-विग्रह एव प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (पा०सू० २.३.४६) इति सूत्रे। मात्र-शब्दस्य मयूरव्यंसकादित्वात्समासः।[५०] तथैव सहायायेदं सहायार्थम् इत्यत्राप्यस्वपदविग्रहे अर्थशब्देन नित्यसमासः[५१] क्रियाविशेषणत्वाच्च द्वितीया। अथवा सहायार्थम् इति पदं भगवन्तम् इत्यस्य विशेषणम्। एवं हि हरिरूपधारिणः सर्वे देवा हरेरितस्ततः स्थिताः सहायार्थमीश्वरं भगवन्तं प्रतीक्षमाणाः इति योजनीयम्। एवं सहायानामर्थः सहायार्थः। सोऽस्त्यस्मिन्निति सहायार्थः। अर्शआद्यच्।[५२] तं सहायार्थम्। सहायप्रयोजनवन्तमिति भावः। सेवकेभ्यो गौरवं दातुं भगवाञ्छ्रीरामो रावणेन पराजितानपि देवान् स्वकीय-लीलोपकरणानि मत्वा तत्साहाय्यमभिलषति यथा श्रीमद्भागवते –

[४८] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन।

[४९] “सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सत्याश्रयतया विशिष्टबुद्धिनियामकः” इत्यभियुक्त-व्यवहारात् (प०ल०म० ११)।

[५०] मयूरव्यंसकादयश्च (पा०सू० २.१.७२) इत्यनेन।

[५१] अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम् (वा० २.१.३६) इत्यनेन।

[५२] अर्शआदिभ्योऽच् पा०सू० ५.२.१२७) इत्यनेन।

नेदं यशो रघुपतेः सुरयाञ्ञयाऽऽत्तलीलातनोरधिकसाम्यविमुक्तधाम्नः।
रक्षोवधो जलधिबन्धनमस्त्रपूगैः किं तस्य शत्रुहनने कपयः सहायाः॥

– भा०पु० ९.११.२०

यद्वा सहायान् कपीश्वरानर्थयतेऽभिलषत्यन्वेष्टि वेति सहायार्थस्तं सहायार्थम् इति विग्रहे णिजन्तअर्थ् धातोः (अर्थ उपयाञ्ञायाम् धा०पा० १९०६) कर्मण्यणि[५३] दीर्घे विभक्तिकार्ये सिद्धमिदम्।[५४]

## २.१२ पुत्रीयम्

गृहाण पायसं दिव्यं पुत्रीयं देवनिर्मितम्।
लप्स्यसे परमात्मानं पुत्रत्वेन न संशयः॥

– अ०रा० १.३.८

अत्र पुत्रे भवं पुत्रीयम् इति भवार्थे छप्रत्यये[५५] तस्य चेयादेशे[५६] विभक्तिकार्ये पुत्रीयम् इति। किन्तु भवार्थस्यानुपयोगादत्र पुत्राय हितम् इति विग्रहे छप्रत्यये[५७] शब्द-सिद्धिः। यद्वा आत्मनः पुत्रमिच्छति इति विग्रहे सुप आत्मनः क्यच् (पा०सू० ३.१.८) इत्यनेन क्यच् प्रत्यये क्यचि च (पा०सू० ७.४.३३) इत्यनेन दीर्घ ईकारे धातुसञ्ज्ञायां[५८] लटि तिपि शपि पुत्रीयति।[५९] पुत्रीयतीति पुत्रीयः इति विग्रहे पचादित्वादच्।[६०] तच्च भावे। एवं

---

[५३] कर्मण्यण् (पा०सू० ३.२.१) इत्यनेन।

[५४] अर्थ उपयाञ्ञायाम् (धा०पा० १९०६) → सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्ण-चुरादिभ्यो णिच् (पा०सू० ३.१.२५) → अर्थ णिच् → अर्थ इ → अतो लोपः (पा०सू० ६.४.४८) → अर्थ् इ → अर्थि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा। सहाय शस् अर्थि → कर्मण्यण् (पा०सू० ३.२.१) → सहाय शस् अर्थि अण् → सहाय शस् अर्थि अ → णेरनिटि (पा०सू० ६.४.५१) → सहाय शस् अर्थ् अ → सहाय शस् अर्थ → उपपदमतिङ् (पा०सू० २.२.१९) → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपदिकसञ्ज्ञा → सुपो धातुप्रातिपदिकयोः (पा०सू० २.४.७१) → सहाय अर्थ → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → सहायार्थ → विभक्तिकार्यम् → सहायार्थ अम् → अमि पूर्वः (पा०सू० ६.१.१०७) → सहायार्थम्।

[५५] तत्र भवः (पा०सू० ४.३.५३) इत्यनेन।

[५६] आयनेयीनीयियः फढखच्छघां प्रत्ययादीनाम् (पा०सू० ७.१.२) इत्यनेन।

[५७] तस्मै हितम् (पा०सू० ५.१.५) इत्यनेन।

[५८] सनाद्यन्ता धातवः (पा०सू० ३.१.३२) इत्यनेन।

[५९] यथा भट्टिकाव्ये – पुत्रीयता तेन वराङ्गनाभिरानायि विद्वान् क्रतुषु क्रियावान् (भ०का० १.१०) इत्यत्र शत्रन्तप्रयोगे।

[६०] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन।

तदस्त्यस्मिन्निति विग्रहेऽच्प्रत्यये[६१] पुत्रीयम्। अथवा पुत्री इति पृथक्पदम्।[६२] अग्निर्यज्ञ-स्थले प्रादुर्भूय महाराजं दशरथं कथयति यत् त्वं पुत्री दिव्यं पायसं गृहाण यं गृहीत्वा पुत्रत्वोपलक्षितं परमात्मानं लप्स्यसे।

## २.१३ इत्युक्ते

वृणीष्व वरमित्युक्ते त्वं मे पुत्रो भवामल।
इति त्वया याचितोऽसौ भगवान्भूतभावनः॥

– अ०रा० १.४.१६

अत्राध्यात्मरामायणे बालकाण्डे चतुर्थसर्गे विश्वामित्रो यज्ञरक्षार्थं श्रीरामं दशरथमयाचत्। तत्र पुत्रवात्सल्यधिया महीपतिना महामुनिः विश्वामित्रः प्रत्याख्यातः। पश्चाद्वसिष्ठो महाराजं प्रत्यबोधयद्यत्पुरा त्वया बहु तप्तं[६३] तदा वृणीष्व वरम् इति भगवत्युक्तवति त्वया भगवान् पुत्ररूपेण याचितः स एव परमात्मा श्रीरामरूपेण तव गृहेऽवातरत्। इह उक्ते इति भगवद्विशेषणम् उक्तवति इत्यभिप्रायकम्। प्रायो निष्ठा-सञ्ज्ञकौ द्वौ प्रत्ययौ क्तः क्तवतुश्च।[६४] क्तप्रत्ययः प्रायशः कर्मणि भावे च भवति।[६५] तथा च सूत्रम् तयोरेव कृत्यक्तखलर्थाः (पा०सू० ३.४.७०)। क्तवत्तुप्रत्ययः कर्तर्येव भवति।[६६] किन्त्वत्र उक्ते इति कथमिति चेत्। ब्रूधातोः (ब्रूञ् व्यक्तायां वाचि धा०पा० १०४४) भावे क्तप्रत्ययः।[६७] ब्रुवो वचिः (पा०सू० २.४.५३) इत्यनेन वच् आदेशे वचिस्वपियजादीनां किति (पा०सू० ६.१.१५) इत्यनेन सम्प्रसारणे चोः कुः (पा०सू० ८.२.३०) इत्यनेन ककारे विभक्तिकार्ये उक्तम्। तदस्त्यस्मिन्निति उक्तम्। अर्शआदित्वादच्।[६८] तस्मिन्नुक्ते। इत्थं मत्वर्थीयेनाच्प्रत्ययेन उक्तवति इत्यभिप्रायकः उक्ते इति शब्दोऽपि पाणिनीय एव। यद्वा उक्तमाचष्टे करोति वा इति विग्रहे तत्करोति तदाचष्टे (धा०पा० ग०सू० १८७) इति णिचि तिपि

[६१] अर्शआदिभ्योऽच् (पा०सू० ५.२.१२७) इत्यनेन।

[६२] यथा रामरक्षास्तोत्रे – स चिरायुः सुखी पुत्री विजयी विनयी भवेत् (रा०र०स्तो० १०)। पुत्र → अत इनिठनौ (पा०सू० ५.२.११५) → पुत्र इनिँ → पुत्र इन् → यचि भम् (पा०सू० १.४.१८) → भसञ्ज्ञा → यस्येति च (पा०सू० ६.४.१४८) → पुत्र् इन् → पुत्रिन् → विभक्तिकार्यम् → पुत्रिन् सुँ → पुत्रिन् स् → सौ च (पा०सू० ६.४.१३) → पुत्रीन् स् → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → पुत्रीन् → नलोपः प्रातिपदिकान्तस्य (पा०सू० ८.२.७) → पुत्री।

[६३] भवन्तौ तप उग्रं वै तेपाथे बहुवत्सरम् (अ०रा० १.४.१४)।

[६४] क्तक्तवतू निष्ठा (पा०सू० १.१.२६)।

[६५] अदिकर्मणि क्तः कर्तरि च (पा०सू० ३.४.७१) गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च (पा०सू० ३.४.७२) इत्याभ्यां कर्तर्यपि भवति।

[६६] कर्तरि कृत् (पा०सू० ३.४.६७) इत्यनेन।

[६७] नपुंसके भावे क्तः (पा०सू० ३.३.११४) इत्यनेन।

[६८] अर्शआदिभ्योऽच् पा०सू० ५.२.१२७) इत्यनेन।

शपि उक्तयति।[६९] उक्तयतीत्युक्तः। कर्तर्यच्।[७०] तस्मिन् उक्ते। यद्वा उक्ते इति कर्मण्येव प्रत्ययः। वृणीष्व वरमिति भगवतोक्ते त्वयि इति न दोषः।[७१] अथवा वाक्य उक्ते।[७२]

## २.१४ प्रमुदितान्तरः

वसिष्ठेनैवमुक्तस्तु राजा दशरथस्तदा।
कृतकृत्यमिवात्मानं मेने प्रमुदितान्तरः॥

– अ०रा० १.४.२१

श्रीरघुनाथस्याऽध्यात्मिकरहस्यं वसिष्ठमुखान्निशम्य महाराजो मुमुदे। अत्र प्रयोगो वर्तते प्रमुदितान्तरः। प्रमुदितमन्तरं यस्य स प्रमुदितान्तरः इति। प्रामोद्यत इति प्रमोदितम्। अयं भूतकालानुसारेण विग्रहः। णिचि पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) इत्यनेन गुणे धातुसञ्ज्ञायां क्तप्रत्यये सति आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) इत्यनेनेटि कृते णिलोपे विभक्तिकार्ये प्रमोदितम् इत्येव पाणिनीयम्।[७३] न च पुगन्तलघूपधस्य च इति गुणोऽत्र न प्रवर्त्स्यर्तीत्यतो नापाणिनीयता।[७४] यतो हि सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) इति सम्पूर्णस्य सूत्रस्यात्रानुवृत्तिस्तत्र च सप्तमी। एवं मिदेर्गुणः (पा०सू० ७.३.८२) इत्यतो गुणपदमनुवर्त्यते। तथा च इको गुणवृद्धी (पा०सू० १.१.३)

---

[६९] उक्त → तत्करोति तदाचष्टे (धा०पा० ग०सू० १८७) → उक्त णिच् → उक्त इ → णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरार्थम् (वा० ६.४.४८) → उक्त् इ → उक्ति → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → उक्ति लट् → उक्ति तिप् → उक्ति ति → कर्तरि शप् (पा०सू० ३.१.६८) → उक्ति शप् ति → उक्ति अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → उक्ते अ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → उक्तय् अ ति → उक्तयति।

[७०] उक्ति → पूर्ववद्धातुसञ्ज्ञा → नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) → उक्ति अच् → अनुबन्धलोपः → उक्ति अ → णेरनिटि (पा०सू० ६.४.५१) → णिलोपः → उक्त् अ → उक्त → विभक्तिकार्यम् → उक्तः।

[७१] त्वयि इत्यध्याहार्यमिति भावः।

[७२] वाक्ये इत्यध्याहार्यमिति भावः।

[७३] यथा अनुमोदितम् आमोदितम् इत्यादिषु। वाचस्पत्येऽपि – अनुमोदित। त्रि० अनु मुद-णिच्-कर्म्मणि क्तः। आमोदित। त्रि० आ मुद-णिच्-क्तः। मुदँ हर्षे (धा०पा० १६) → मुद् → हेतुमति च (पा०सू० ३.१.२६) → मुद् णिच् → मुद् इ → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → मोद् इ → मोदि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा। प्र मोदि → तयोरेव कृत्यक्तखलर्थाः (पा०सू० ३.४.७०) → निष्ठा (पा०सू० ३.२.१०२) → प्र मोदि क्त → प्र मोदि त → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → प्र मोदि इट् त → प्र मोदि इ त → निष्ठायां सेटि (पा०सू० ६.४.५२) → प्र मोद् इ त → प्रमोदित → विभक्तिकार्यम् → प्रमोदित सुँ → अतोऽम् (पा०सू० ७.१.२४) → प्रमोदित अम् → अमि पूर्वः (पा०सू० ६.१.१०७) → प्रमोदितम्।

[७४] प्रवर्त्स्यति इत्यत्र वृद्भ्यः स्यसनोः (पा०सू० १.३.९२) इत्यनेन परस्मैपदम्।

इति सूत्रेण षष्ठ्यन्तम् इकः इति पदमप्युपतिष्ठते। यतो हि षड्विधसूत्रेषु इको गुणवृद्धी इति सूत्रं परिभाषासूत्रम्। परिभाषा नामानियमे नियमकारिणी। अर्थाद्गुणः कुत्र भवेदित्यनियमे सतीयं नियमयति यदिक एव गुणः स्यात्। तथा हि सूत्रार्थः गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र 'इक' इति षष्ठ्यन्तं पदमुपतिष्ठते (वै०सि०कौ० ३४)। गुणवृद्धिशब्दाभ्याम् इत्यत्र हि पञ्चमी। सा च गुणवृद्धिशब्दावुच्चार्य इत्यर्थे। उच्चार्यरूपल्यबन्तकर्मणि गुणवृद्धिशब्दइत्यत्र ल्यब्लोपे कर्मण्यधिकरणे च (पा०सू० २.३.२८) इति वार्त्तिकेन श्वशुराज्जिह्रेति (वै०सि०कौ० ५९४) इतिवत्पञ्चमी। अर्थात् गुणवृद्धी उच्चार्य यत्र गुणवृद्धी विधीयेते तत्र इकः इति षष्ठ्यन्तमुपतिष्ठते। एवं गुणपदप्रयोज्यविधेयताश्रयभूते गुणे विधीयमाने तथा वृद्धिपदप्रयोज्यविधेयताश्रयभूतायां वृद्धौ विधीयमानायाम् इकः इति षष्ठ्यन्तं पदमुपतिष्ठत इति। अर्थात् मिदेर्गुणः (पा०सू० ७.३.८२) इतिसूत्रादनुवृत्तलघूपधगुणविधायकसूत्रस्थगुणपदप्रयोज्यविधेयताश्रयो गुणो विधीयतेऽतः षष्ठ्यन्तम् इकः इति पदमुपतिष्ठते। तस्य च लघूपधस्य इत्यनेनान्वये षष्ठीसमभिव्याहारादवयवावयविभावसम्बन्धः। एवं सार्वधातुकार्धधातुकाव्यवहितपूर्वत्वविशिष्टस्य पुगन्तलघूपधाङ्गावयवस्येकः स्थाने गुणः अयं हि परिष्कृतसूत्रार्थः। तथा चात्र णिच् इत्यार्धधातुकसञ्ज्ञः। आर्धधातुकं शेषः (पा०सू० ३.४.११४) इति सूत्रविहिता सा सञ्ज्ञा। तथा च प्रमुद् इ त[७५] इत्यत्र इक् मकारानन्तरमुकारः। किन्तु तदार्धधातुकाव्यवहितं नास्ति दकारस्य व्यवधानात्। अत एव गुणाप्राप्तौ प्रमुदित इति कामं पाणिनीय इति चेत्। येन नाव्यवधानं तद्व्यवहितेऽपि वचनप्रामाण्यात् (भा०पा०सू० ७.२.३, ७.३.४४, ७.३.५४, ७.४.१, ७.४.९३)। येन इति कर्तरि तृतीया। अर्थात् यत्कर्तृकमव्यवधानं न तेन व्यवहितेऽपि वचनप्रामाण्याद्गुणो भवेत्। यतो ह्ययं लघूपधगुणः। उपधात्वं नाम समुदायविशिष्टवर्णत्वम्।[७६] वैशिष्ट्यञ्च स्वघटकत्वस्वघटकान्त्यालवधिकपूर्वत्वविशिष्टत्वम् इति।[७७] एतदुभयसम्बन्धेन। तथा च सूत्रम् अलोऽन्त्यात्पूर्व उपधा (पा०सू० १.१.६५)। अन्त्यादलः पूर्वो वर्ण उपधासञ्ज्ञः स्यात् (वै०सि०कौ० २४९)। एवं लघ्व्युपधा लघूपधा पुगन्तञ्च लघूपधा चेति समाहारद्वन्द्वे तस्य च अङ्गस्य इत्यनेनावयवावयविभावसम्बन्धेनान्वय एवम् अङ्गावयवं सार्वधातुकार्धधातुकाव्यवहितपूर्वत्वविशिष्टं यत्पुगन्तं लघूपधञ्च तस्येको गुणः इति सुपरिष्कृतः सूत्रार्थः। तथा च लघूपधशब्दयोगेन वर्णमात्रव्यवधानं त्वनिवार्यमेव। तदभाव उपधा कुतः। यतो ह्यन्त्यादलः पूर्वस्यैव सा। अतः येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् (वै०सि०कौ० २१८९) इति प्रवर्तते। एवं च प्रमुद् इ त[७८] इत्यत्र दकारकर्तृकं

---

[७५] प्रमुद् णिच् क्त इति भावः।

[७६] समुदायविशिष्टवर्णत्वमुपधात्वम् (ल०शे०)।

[७७] वैशिष्ट्यञ्च स्वघटकत्वस्वघटकान्त्यालवधिकपूर्वत्वोभयसम्बन्धेन (ल०शे०)।

[७८] प्रमुद् णिच् क्त इति भावः।

व्यवधानं त्वनिवार्यम्। अत एकवर्णकर्तृकव्यवधानमत्र सोढव्यं येन इत्येकवचनप्रयोगात्। तेन भिनत्ति इत्यत्रानेकव्यवहित इकि न गुणः।[७९] भेत्ता इत्यादौ गुणः।[८०] इदं सर्वं सिद्धान्त-कौमुद्यां भ्वादिप्रकरणे प्रपञ्चितम्।[८१] अतोऽत्र गुणप्राप्तिर्दुर्वारेति। अत्रोच्यते। वस्तुतोऽयं न णिजन्तोऽपि तु शुद्धात् मुदँ हर्षे (धा०पा० १६) इति धातोः कर्तरि क्तान्तप्रयोगः।[८२] यद्वा नायं क्तान्तः प्रयोगोऽपि तु प्रमुद्यत इति प्रमुत्[८३] इति विग्रहे भावे क्विप् प्रत्यये[८४] सर्वापहारिलोपे सा सञ्जाताऽस्य इति सञ्जातार्थे आकृतिगणतया तारकादित्वात् इतच् प्रत्यये[८५] चकारानुबन्ध-कार्ये विभक्तिकार्ये प्रमुदितम् इति। यद्वा प्रमुदमितं प्रमुदितम् इति विग्रहे द्वितीया इति योगविभागेन द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः (पा०सू० २.१.२४) इत्यनेन समासे प्रमुदितम् इति पाणिनीयमेव। प्रमुदितमन्तरं यस्य प्रमुदितान्तरः इति साधनिकाप्रकारः।

---

[७९] अनेकव्यवहित इकि इत्यत्र यस्य च भावेन भावलक्षणम् (पा०सू० २.३.३७) इत्यनेन भावलक्षणा सप्तमी। अनेकव्यवहित इकि तस्येको न गुण इति भावः। भिदिँर् विदारणे (धा०पा० १४३९) → भिद् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → भिद् तिप् → भिद् ति → रुधादिभ्यः श्नम् (पा०सू० ३.१.७८) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → भि श्नम् द् ति → भि न द् ति → खरि च (पा०सू० ८.४.५५) → भि न त् ति → भिनत्ति।

[८०] भिदिँर् विदारणे (धा०पा० १४३९) → भिद् → ण्वुल्तृचौ (पा०सू० ३.१.१३३) → भिद् तृच् → भिद् तृ → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → भेद् तृ → खरि च (पा०सू० ८.४.५५) → भेत् तृ → भेत्तृ → विभक्तिकार्यम् → भेत्तृ सुँ → भेत्तृ स् → ऋदुशनस्पुरुदंसोऽनेहसां च (पा०सू० ७.१.९४) → भेत्त् अनँङ् स् → भेत्त् अन् स् → अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृ-पोतृप्रशास्तृणाम् (पा०सू० ६.४.११) → भेत्त् आन् स् → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → भेत्त् आन् → नलोपः प्रातिपदिकान्तस्य (पा०सू० ८.२.७) → भेत्त् आ → भेत्ता।

[८१] येन नाव्यवधानं तेन व्यवहितेऽपि। वचनप्रामाण्यात्। तेन भिनत्तीत्यादावनेकव्यवहितस्येको न गुणः (वै०सि०कौ० २१८९)।

[८२] गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च (पा०सू० ३.४.७२) इत्यनेन कर्तरि क्तः। हृष्टो मत्तस्तृप्तः प्रह्लन्नः प्रमुदितः प्रीतः (अ०को० ३.१.१०३) इत्यमरः। तत्रैव सुधाटीकायां प्रमुदितम्। प्रमोदते स्म (अ०को० व्या०सु० ३.१.१०३) इति भानुजिदीक्षिताः। कर्तरि पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) इत्यनेन गुणे प्राप्ते ग्क्ङिति च (पा०सू० १.१.५) इत्यनेन गुणनिषेधे प्रमुदितम् इत्येव। उदुपधाद्भावादि-कर्मणोरन्यतरस्याम् (पा०सू० १.२.२१) इत्यनेनाऽदिकर्मणि भावे च निष्ठाया वैकल्पिककित्त्वात् ग्क्ङिति च (पा०सू० १.१.५) इत्यनेन प्राप्तस्य गुणनिषेधस्यापि वैकल्पिकत्वात् प्रमुदितम् प्रमोदितम् इति रूपद्वयम्।

[८३] यद्वा मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः (अ०को० १.४.२४) इत्यमरकोशानुशासनात् प्रकृष्टा मुत् प्रमुत्। यथा भागवते – तदङ्गसङ्गप्रमुदाकुलेन्द्रियाः (भा०पु० १०.३३.१८)। अत्रान्वितार्थप्रकाशिका – तस्य भगवतः अङ्गसङ्गेन प्रकृष्टा या मुत् हर्षस्तया आकुलानि अवशानीन्द्रियाणी यासां ताः (भा०पु० अ०प्र०टी० १०.३३.१८)। एवमेव श्रीभार्गवराघवीये – वक्त्राणि मूर्ध्ना प्रमुदा वहन्ती (भा०रा० १३.९) निशम्य पौराः प्रमुदा समाययुः (भा०रा० १७.११) इत्यादौ।

[८४] सम्पदादिभ्यः क्विप् (वा० ३.३.१०८) इत्यनेन।

[८५] तदस्य सञ्जातं तारकादिभ्य इतच् (पा०सू० ५.२.३६) इत्यनेन।

## २.१५ क्षुत्क्षामादि

ददौ बलां चातिबलां विद्ये द्वे देवनिर्मिते।
ययोर्ग्रहणमात्रेण क्षुत्क्षामादि न जायते॥

– अ०रा० १.४.२५

अत्र विश्वामित्रो यज्ञरक्षार्थं सौमित्रिसहितं रणधीरं श्रीरघुवीरं सिद्धाश्रमं समानयन् सरयूतटे श्रीरामभद्राय बलामतिबलां चैव द्वे विद्ये प्रयच्छति स्म ययोर्ग्रहणमात्रेण क्षुत्पिपासे न लगतः।[८६] तत्र क्षुत्क्षामादि इति प्रयोगो वर्तते। क्षुच्च क्षामं चेति क्षुत्क्षामौ ते आदौ यस्य तत् इति। एवं क्षामशब्दो हि प्रायः कर्तरि[८७] तर्हि कथं पिपासावाचकः। अत्र क्षै क्षये (धा०पा० ९१३) इत्यस्माद्धातोर्भावे क्तप्रत्ययः।[८८] आदेच उपदेशेऽशिति (पा०सू० ६.१.४५) इत्यनेनाऽकारादेशे क्षायो मः (पा०सू० ८.२.५३) इत्यनेन मादेशे विभक्तिकार्ये क्षामम्।

## २.१६ क्रोधसम्मूर्च्छिता

तच्छ्रुत्वाऽसहमाना सा ताटका घोररूपिणी।
क्रोधसम्मूर्च्छिता राममभिदुद्राव मेघवत्॥

– अ०रा० १.४.२९

ताटकामवलोक्य श्रीरामभद्राय विश्वामित्र आदेशं ददौ। अग्नौ शलभ इव सा स्वयमेव क्रोधसम्मूर्च्छिता रघुनन्दनमभिदुद्राव। अत्र क्रोधेन सम्मूर्च्छिता इति प्रयोगोऽपाणिनीयो लगति। यतो हि मुर्छाँ मोहसमुच्छ्राययोः (धा०पा० २१२) इति धातोः कर्तरि क्तप्रत्यये

[८६] लगतः इत्यत्र लगेँ सङ्गे (धा०पा० ७८६) इति धातुः।

[८७] क्षै क्षये (धा०पा० ९१३) इत्यकर्मकधातोः गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च (पा०सू० ३.४.७२) इत्यनेन कर्तरि क्तप्रत्यये क्षामशब्दस्त्रिलिङ्गे। क्षाम इति। 'आदेचः' इत्यात्वम्। 'गत्यर्थाकर्मके'ति कर्तरि क्तः। क्षीण इत्यर्थः। अन्तर्भावितण्यर्थत्वे क्षपित इत्यर्थः (बा०म० ३०३२) इति बालमनोरमा। यथा वाल्मीकीयरामायणे – तां क्षामां सुविभक्ताङ्गीं विनाभरणशोभिनीम्। प्रहर्षमतुलं लेभे मारुतिः प्रेक्ष्य मैथिलीम्॥ (वा०रा० ५.१५.३०) इति पाठे। अत्रत्या तिलकटीका – क्षामां कृशाम् (वा०रा० ति०टी० ५.१५.३०)। क्षमाम् इति गोविन्दराजसम्मतः पाठः। एवमेव भागवते नातिक्षामं भगवतः स्निग्धापाङ्गावलोकनात् (भा०पु० ३.२१.४६) कालेन भूयसा क्षामां कर्शितां व्रतचर्यया (भा०पु० ३.२३.५१) इत्यनयोः। तथा च मेघदूते क्षामच्छायम् (मे०दू० २.१७) मध्ये क्षामा (मे०दू० २.१९) आधिक्षामाम् (मे०दू० २.२६) इत्यादिषु। प्रणेतृणां भृङ्गदूताभिधे दूतकाव्येऽपि श्यामां क्षामां क्षपितहृदिभूकुङ्कुमामश्रुधारा-सारैर्नित्यं नमितवदनाम्भोरुहां रुग्णचित्ताम्। सूर्येन्दुभ्यामिव विरहितां कौहवीं सान्ध्यवेलां सीतां भीतामिव हरिणिकां द्रक्ष्यसि त्वं शुनीषु॥ (भृ०दू० २.६१) याऽयोध्यायां जननिसविधे वाग्भिरत्युज्ज्वलाभिर्नैच्छद्वस्तुं क्षणमपि तदा साधु सीताऽनुनीता। दूरीभूता मृगमृगयुतः साम्प्रतं सा मृगाक्षी क्षामा श्यामा श्वसिति किमहो कोटिकूटे त्रिकूटे॥ (भृ०दू० २.१३७) इत्यनयोर्वृत्तयोः कर्तर्येव क्षामशब्दः।

[८८] नपुंसके भावे क्तः (पा०सू० ३.३.११४) इत्यनेन।

राल्लोपः (पा०सू० ६.४.२१) इत्यनेन रेफादङ्गस्य च्छस्य लोपे टापि मूर्ता इति पाणिनीयम्।[८९] मूर्च्छिता इति कथम्। मूर्च्छनं मूर्च्छा।[९०] मूर्च्छिता इति तु मूर्च्छाऽस्याः सञ्जाता सा मूर्च्छिता इति विग्रहे तदस्य सञ्जातं तारकादिभ्य इतच् (पा०सू० ५.२.३६) इत्यनेन इतच् प्रत्यये भत्वाट्टिलोपे[९१] टापि मूर्च्छिता। यद्वा मूर्च्छामिता मूर्च्छिता इति विग्रहे द्वितीयातत्पुरुषे शकन्ध्वादित्वात्पररूपे मूर्च्छिता इति।[९२]

## २.१७ प्रस्थिताः

तत्र कामाश्रमे रम्ये कानने मुनिसङ्कुले।
उषित्वा रजनीमेकां प्रभाते प्रस्थिताः शनैः॥

– अ०रा० १.५.१

कानने महर्षिविश्वामित्रमहाभागैरेकां रजनीमुषित्वा प्रभाते प्रास्थायि। अत्र प्रोपसर्गसंयोजनेन गतिनिवृत्त्यर्थकस्थाधातोः (ष्ठा गतिनिवृत्तौ धा०पा० ९२८) गत्यर्थकतयाऽकर्मकत्वाभावात्कर्तरि कथं क्तप्रत्ययः। एवं हि प्रस्थिताः इति स्थाधातोः कर्तरि क्तप्रत्यये घुमास्थागापाजहातिसां हलि (पा०सू० ६.४.६६) इत्यनेनाऽकारस्येकारे विभक्तिकार्ये प्रस्थिताः इति चेत्। कर्मणोऽविवक्षायां क्तप्रत्ययः।[९३] यद्वा गत्यर्थकतयाऽपि क्तप्रत्यय आपत्त्यभावः।[९४]

---

८९ मुर्छाँ मोहसमुच्छ्राययोः (धा०पा० २१२) → मुर्छ् → गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च (पा०सू० ३.४.७२) → मुर्छ् क्त → मुर्छ् त → राल्लोपः (पा०सू० ६.४.२१) → मुर् त → न ध्याख्यापॄमूर्छिमदाम् (पा०सू० ८.२.५७) → नकारादेशनिषेधः → आदितश्च (पा०सू० ७.२.१६) → इडागमनिषेधः → हलि च (पा०सू० ८.२.७७) → मूर् त → मूर्त → अजाद्यतष्टाप् (पा०सू० ४.१.४) → मूर्त टाप् → मूर्त आ → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → मूर्ता → विभक्तिकार्यम् → मूर्ता सुँ → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → मूर्ता।

९० मुर्छाँ मोहसमुच्छ्राययोः (धा०पा० २१२) → मुर्छ् → षिद्भिदादिभ्योऽङ् (पा०सू० ३.३.१०४) → मुर्छ् अङ् → मुर्छ् अ → उपधायां च (पा०सू० ८.२.७८) → मूर्छ् अ → अजाद्यतष्टाप् (पा०सू० ४.१.४) → मूर्छ् अ आ → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → मूर्छ् आ → मूर्छा → अचो रहाभ्यां द्वे (पा०सू० ८.४.४६) → मूर् छ् छा → खरि च (पा०सू० ८.४.५५) → मूर् च् छा → मूर्च्छा।

९१ यचि भम् (पा०सू० १.४.१८) इत्यनेन भत्वे यस्येति च (पा०सू० ६.४.१४८) इत्यनेनाऽलोपः।

९२ यद्वाऽत्र आदिकर्मणि क्तः कर्तरि च (पा०सू० ३.४.७१) इत्यनेनाऽदिकर्मणि कर्तरि क्तः। ततः विभाषा भावादिकर्मणोः (पा०सू० ७.२.१७) इत्यनेन पाक्षिकेण्निषेध इट्पक्षे टापि विभक्तिकार्ये मूर्च्छिता। अपि च घोररूपिणी इत्यत्र न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः इत्यनेन न पाणिनीयतेति न भ्रमितव्यम्। २८१तमे पृष्ठे २.४५ घोररूपिणः इति प्रयोगस्य विमर्शं पश्यन्तु।

९३ धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसङ्ग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥ (वा०प० ३.७.८८)। अकर्मकत्वात् गत्यर्थाकर्मकश्लिषशीङ्स्थाऽऽसवसजनरुहजीर्यतिभ्यश्च (पा०सू० ३.४.७२) इत्यनेन कर्तरि क्तः।

९४ सोऽपि गत्यर्थाकर्मकश्लिषशीङ्स्थाऽऽसवसजनरुहजीर्यतिभ्यश्च (पा०सू० ३.४.७२) इत्यनेन।

## २.१८ कुतः

दर्शयस्व महाभाग कुतस्तौ राक्षसाधमौ।
तथेत्युक्त्वा मुनिर्यष्टुमारेभे मुनिभिः सह॥

– अ०रा० १.५.४

अत्र श्रीरामभद्रो राक्षसयोः सुबाहुमारीचयोः स्थितिं जिज्ञासते। कुत्र तौ राक्षसाधमौ इति प्रष्टव्ये कुतः इति पृच्छति। कुतः इत्यत्र कस्मात् इति विग्रहे पञ्चम्यास्तसिल् (पा०सू० ५.३.७) इति तसिलन्तप्रयोगः। सा च पञ्चमी विश्लेषमूलिका। अत्र विश्लेषाभावेऽपि कथं पञ्चमीति चेत्। अत्र विवक्षाधीनानि कारकाणि भवन्ति[९५] इति वचनेन पञ्चम्यन्त-विवक्षया न दोषः। विवक्षाधीनानि कारकाणि भवन्ति इति वचने किं मानमिति चेत् कारके (पा०सू० १.४.२३) इति हि सूत्रम्। अत्र प्रथमार्थे सप्तमीति भाष्यनिर्देशात्[९६] सूत्रकारप्रयोग एव मानम्। अथवाऽवध्यवधिमतोः[९७] कुतः स्थानात्समीपं राक्षसाधमौ इत्यर्थेऽन्तिकशब्द-योगे पञ्चमी।[९८] अथवा कुं पृथ्वीं तनुतः कृशां कुरुत इति कुतः इति विग्रहः। कुउपपदे तन् - धातोः (तनुँ विस्तारे धा०पा० १४६३) औणादिके ड्विन् प्रत्यये[९९] डित्त्वसामर्थ्यादभस्यापि टेर्लोपे[१००] सर्वापहारिलोपे च कुत्। तस्य द्विवचनान्तं रूपं कुतौ। व्यत्ययो बहुलम् (पा०सू० ३.१.८५) इत्यनेन औविभक्तिस्थाने ङस् विभक्तौ कुतः इति छान्दसरूपम्।[१०१] अर्थात् वसुमतीं कृशयतो राक्षसाधमौ दर्शयस्व। यद्वाऽत्र नास्ति तसिल् अपि तु तसिप्रकरण आद्यादिभ्य उपसङ्ख्यानम् (वा० ५.४.४४) इत्यनेन सप्तमीतस्तसि प्रत्ययः।[१०२]

---

[९५] मूलं मृग्यम्। यद्वा कर्मादीनामविवक्षा शेषः (भा०पा०सू० २.३.५०, २.३.५२, २.३.६७) इत्यस्य तात्पर्यमिदम्।

[९६] किमिदं 'कारके' इति। सञ्ज्ञानिर्देशः (भा०पा०सू० १.४.२३)। अत्र कैयटः – सञ्ज्ञानिर्देश इति। सुपां सुपो भवन्तीति प्रथमायाः स्थाने सप्तमी कृतेति भावः (भा०प्र० पा०सू० १.४.२३)।

[९७] उत्तरादिभ्य एनब्वा स्यादवध्यवधिमतोः सामीप्ये पञ्चमीं विना (वै०सि०कौ० १९८४, ५.३.३५)।

[९८] दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् (पा०सू० २.३.३४) इत्यनेन पञ्चमी।

[९९] कार्याद्विद्यादनूबन्धम् (भा०पा०सू० ३.३.१) केचिदविहिता अप्यूह्याः (वै०सि०कौ० ३१६९) इत्यनुसारमूह्योऽत्राविहितो ड्विन् प्रत्ययः।

[१००] डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३)।

[१०१] सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च। व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिध्यति बाहुलकेन॥ (भा०पा०सू० ३.१.८५)। बहुलग्रहणं सर्वविधिव्यभिचारार्थम् (का०वृ० ३.१.८५)।

[१०२] तसेः सार्वविभक्तिकत्वं तदन्तानामाकृतिगणत्वं च ९४तमे पृष्ठे ८६तम्यां पादटिप्पण्यां स्पष्टीकृतम्।

## २.१९ त्वरितम्

कदाचिन्मुनिवेषेण गौतमे निर्गते गृहात्।
धर्षयित्वाऽथ निरगात्त्वरितं मुनिरप्यगात्॥

– अ०रा० १.५.२२

न चात्र तूर्णम् इति प्रयोक्तव्ये त्वरितम् इति प्रयुक्तम्।[१०३] अत्र आदितश्च (पा०सू० ७.२.१६) इत्यनेनेण्णिषेधे प्राप्ते रुष्यमत्वरसङ्घुषास्वनाम् (पा०सू० ७.२.२८) इत्यनेन निषेधविकल्पः। तस्मात् तूर्णम् त्वरितम् इति रूपद्वयम्।[१०४] यद्वा त्वरामाचष्टे त्वरयति[१०५] इत्यस्मात् त्वरितम्।[१०६] भावे क्तः।[१०७] क्रियाविशेषणत्वाद्द्वितीया। यद्वा त्वरयेतं यथा स्यात्तथा इति विग्रहे तृतीया तत्कृतार्थेन गुणवचनेन (पा०सू० २.१.३०) इत्यत्र तृतीया इति योगविभागेन समासः।[१०८]

॥ इति बालकाण्डीयप्रयोगाणां विमर्शः ॥

॥ अथायोध्याकाण्डीयप्रयोगाणां विमर्शः ॥

---

१०३ पूर्वपक्षोऽयम्।

१०४ ञित्वराँ सम्भ्रमे (धा०पा० ७७५) → तवर् → नपुंसके भावे क्तः (पा०सू० ३.३.११४) → त्वर् क्त → त्वर् त → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → इड्प्राप्तिः → आदितश्च (पा०सू० ७.२.१६) → इण्णिषेधः → रुष्यमत्वरसङ्घुषास्वनाम् (पा०सू० ७.२.२८) → वैकल्पिकेण्णिषेधः। निषेधपक्षे – त्वर् त → ज्वरत्वरश्रिव्यविमवामुपधायाश्च (पा०सू० ६.४.२०) → त् ऊठ् र् त → त् ऊ र् त → रदाभ्यां निष्ठातो नः पूर्वस्य च दः (पा०सू० ८.२.४२) → त् ऊ र् न → रषाभ्यां नो णः समानपदे (पा०सू० ८.४.१) → त् ऊ र् ण → तूर्ण → विभक्तिकार्यम् → तूर्णम्। इट्पक्षे – त्वर् इट् त → तवर् इ त → त्वरित → विभक्तिकार्यम् → त्वरितम्।

१०५ घटादयः षितः (धा०पा० ग०सू०) इत्यनेन त्वर् धातोः षित्त्वम्। त्वर् → षिद्भिदादिभ्योऽङ् (पा०सू० ३.३.१०४) → त्वर् अङ् → तवर् अ → अजाद्यतष्टाप् (पा०सू० ४.१.४) → त्वर् अ आ → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → त्वर् आ → त्वरा। त्वरा → तत्करोति तदाचष्टे (धा०पा० ग०सू०) → त्वरा णिच् → त्वरा इ → णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरार्थम् (वा० ६.४.४८) → त्वर् इ → त्वरि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → तवरि तिप् → त्वरि ति → कर्तरि शप् (पा०सू० ३.१.६८) → त्वरि शप् ति → त्वरि अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → त्वरे अ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → त्वरय् अ ति → त्वरयति।

१०६ त्वरि → धातुसञ्ज्ञा (पूर्ववत्) → नपुंसके भावे क्तः (पा०सू० ३.३.११४) → त्वरि क्त → त्वरि त → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → त्वरि इट् त → त्वरि इ त → निष्ठायां सेटि (पा०सू० ६.४.५२) → त्वर् इ त → त्वरित → विभक्तिकार्यम् → त्वरितम्।

१०७ नपुंसके भावे क्तः (पा०सू० ३.३.११४) इत्यनेन।

१०८ त्वरा इत इति स्थिते शकन्ध्वादिषु पररूपं वाच्यम् (वा० ६.१.९१) इत्यनेन शकन्ध्वादित्वात्पररूपे त्वरित इति शेषः।

## २.२० अतिविदूयता

हसन्ती मामुपायाति सा किं नैवाद्य दृश्यते।
इत्यात्मन्येव सञ्चिन्त्य मनसाऽतिविदूयता॥

– अ०रा० २.३.३

अत्राध्यात्मरामायणेऽयोध्याकाण्डे तृतीयसर्गे श्रीरामराज्याभिषेकसमाचारं श्रावयितुमिच्छुश्चक्रवर्ती दशरथः कैकेयिभवनं प्रविश्य तां दृष्ट्वा खिन्नेन मनसा पप्रच्छ। अत्र अतिविदूयता इति प्रयुक्तम्। अयं ह्यात्मनेपदीयो धातुः। तथा च दूङ् परितापे (धा०पा० ११३३) इत्यस्मात्।[१०९] यथा कालिदासोऽपि प्रयुङ्क्ते –

तया हीनं विधातर्मां कथं पश्यन्न दूयसे।
सिक्तं स्वयमिव स्नेहाद्वन्ध्यमाश्रमवृक्षकम्॥

– र०वं० १.७०

एवञ्च दूयत इति दूयमानं तेन दूयमानेन। आत्मनेपदीयत्वात् शानच् प्रत्यय एव सम्भवः। तथा च सूत्रम् – लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४)। अनेन लङ्कारस्य शतृशानचौ प्राप्तौ तदाऽग्रिमसूत्रेण शानच् प्रत्यय आत्मनेपद एव विधीयते तङानावात्मनेपदम् (पा०सू० १.४.१००) इत्यनेन। तर्हि विदूयता इति कथमिति चेत्। विदूयत इति विदूयः इति विग्रहे पचाद्यच्।[११०] विदूयस्य भावो विदूयता इति विग्रहे तस्य भावस्त्वतलौ (पा०सू० ५.१.११९) इत्यनेन तल् प्रत्यये टापि विदूयता। न च मनसाऽति-विदूयता इत्यनेन न सामानाधिकरण्यमेकत्र तृतीयान्ताऽपरत्र प्रथमान्तेति। सामानाधिकरण्ये नैव राजाज्ञा। मनसा इति तृतीया तु इत्थंभूतलक्षणे (पा०सू० २.३.२१) इत्यनेन। मनसोपलक्षिताऽतिविदूयता।

## २.२१ निवारयित्वा

निवारयित्वा तान्सर्वान्कैकेयी रोषमास्थिता।
ततः प्रभातसमये मध्यकक्षमुपस्थिताः॥

– अ०रा० २.३.३५

अत्र श्रीरामवनवासषड्यन्त्रं कार्यान्वितं चिकीर्षुः कैकेयी सर्वानपि

[१०९] अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) इत्यनेन धातोर्ङित्त्वादात्मनेपदमिति भावः।
[११०] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन।

मङ्गलोत्सवान्निवारयति। अत्र वारिधातोः[१११] समानकर्तृकयोः पूर्वकाले (पा०सू० ३.४.२१) इत्यनेन क्त्वा प्रत्यये सतीटि[११२] सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) इत्यनेन वारि इत्यस्य गुणेऽयादेशे निउपसर्गे निवारयित्वा इत्याशङ्क्य निपूर्वकात् वारिधातोर्निष्पन्नोऽयं शब्दः। तथा समासेऽनञ्पूर्वे क्त्वो ल्यप् (पा०सू० ७.१.३७) इत्यनेन ल्यप् प्रत्यये तथा च निवार्य इति पाणिनीयम्।[११३] निवारयित्वा इति कथम्। उच्यते। न चात्र समासो विकल्पो विवक्षाधीनो वाऽतः समासाभाव उक्तदोष एव नास्ति। कुगतिप्रादयः (पा०सू० २.२.१८) इत्यनेन हि नित्यसमासः। तर्हि नयतीति नीः इति विग्रहे क्विप्प्रत्यये[११४] सर्वापहारिलोपेऽर्थात् सर्वान् दुखं नयन्ती वारयित्वा।[११५] यद्वा निषिद्धं वारं निवारं करोतीति निवारयति[११६] इति विग्रह आचारणिजन्तात् निवारिधातोः क्त्वाप्रत्ययः।[११७] एवं च कैकय्यभिन्नैककर्तृक-पूर्वकालावच्छिन्ननिषिद्धभूतकवारणानुकूलो व्यापारः।[११८] इत्थं निवारिधातोः क्त्वाप्रत्यये नापाणिनीयता।[११९] अथवा निवारयतीति निवारयित्वा इति विग्रहे निपूर्वकवारिधातोः

---

[१११] वृञ् आवरणे (धा०पा० १८१३) → वृ → सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्ण-चुरादिभ्यो णिच् (पा०सू० ३.१.२५) → वृ णिच् → वृ इ → अचो ञ्णिति (पा०सू० ७.२.११५) → उरण् रपरः (पा०सू० १.१.५१) → वार् इ → वारि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा।

[११२] आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) इत्यनेनेडागमः।

[११३] ल्यपो वलादित्वाभावादिण्न। नि वारि ल्यप् → नि वारि य → णेरनिटि (पा०सू० ६.४.५१) → नि वार् य → निवार्य।

[११४] क्विप् च (पा०सू० ३.२.७६) इत्यनेन।

[११५] सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः (पा०सू० ७.१.३९) इत्यनेन नीप्रातिपदिकात्सोश्छान्दसो लुक्। पृषोदरादित्वाद्ध्रस्वः। नि इति पृथक्पदमिति भावः।

[११६] निवार → तत्करोति तदाचष्टे (धा०पा० ग०सू०) → निवार णिच् → निवार इ → णाविष्ठवत्प्राति-पदिकस्य पुंवद्भावरभावटिलोपयणादिपरार्थम् (वा० ६.४.४८) → निवार् इ → निवारि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → निवारि तिप् → निवारि ति → कर्तरि शप् (पा०सू० ३.१.६८) → निवारि शप् ति → निवारि अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → निवारे अ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → निवारय् अ ति → निवारयति।

[११७] निवारि → धातुसञ्ज्ञा (पूर्ववत्) → निवारि → समानकर्तृकयोः पूर्वकाले (पा०सू० ३.४.२१) → निवारि क्त्वा → निवारि त्वा → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → निवारि इट् त्वा → निवारि इ त्वा → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → नीवारे इ त्वा → एचोऽयवायावः (पा०सू० ६.१.७८) → निवारय् इ त्वा → निवारयित्वा।

[११८] निषिद्धभूतक इत्यत्र यज्ञेभ्य इतीयत्युच्यमाने य एव/एते सञ्ज्ञीभूतका यज्ञास्तत उत्पत्तिः स्यात् (भा०पा०सू० ४.३.६८, ५.१.९५) इत्यत्र सञ्ज्ञीभूतकाः इतिवत्समासान्ते कप् प्रत्ययः।

[११९] अन्यत्र च – निवारयित्वा सर्वान्स राजानमिदमब्रवीत् (ग०सं० १०.१६.५३) निवारयित्वा कृतवाल्लोँक-नाथो मरुद्गणान् (वाम०पु० ७२.६९)। अयं प्रयोगः प्रार्थयित्वा इतिवत्। यथा – तं प्रार्थयित्वा विधिवत्प्रसाद्य च विशेषतः (ब्रह्मा०पु० २.५४.२८) इति नीराजनं कृत्वा प्रार्थयित्वा निजेश्वरम् (ना०पु० ६६.१४) ततः कृष्णेन भीमेन प्रार्थयित्वा द्विजान्नृपान् (ग०सं० १०.५७.१) प्रार्थयित्वा द्विजान् भोज्य भुक्तिमुक्तिमवाप्नुयात् (अ०पु० १८४.८) उपेक्षितमशक्त्या वा प्रार्थयित्वा विरोधितम् (अ०शा० ८.५.२८) इत्यादिषु।

अन्येभ्योऽपि दृश्यन्ते (पा०सू० ३.२.७५) इत्यनेन वनिप् प्रत्ययः। पकारस्येत्सञ्ज्ञायां लोप इटि गुणेऽयादेशे ह्रस्वस्य पिति कृति तुक् (पा०सू० ६.१.७१) इत्यनेन तुगागमे विभक्तिकार्ये सर्वनामस्थाने चासम्बुद्धौ (पा०सू० ६.४.८) इत्यनेन दीर्घे सुलोपनलोपयोः निवारयित्वा इति सम्यक्पाणिनीयम्।[१२०] निवारणशीला कैकेयी सर्वान्प्रति रोषं प्रकटयन्ती मध्यकक्षमाश्रिता इति ग्रन्थान्वयप्रकारः।

## २.२२ भुञ्जन्

बुद्ध्यादिभ्यो बहिः सर्वमनुवर्तस्व मा खिदः।
भुञ्जन्प्रारब्धमखिलं सुखं वा दुःखमेव वा॥

– अ०रा० २.४.४१

अत्र श्रीरामो लक्ष्मणमुपदिशन् भुञ्जन् इति प्रयुङ्क्ते। भुजँ पालनाभ्यवहारयोः (धा०पा० १४५४) इत्यस्माद्धातोः भुङ्क्ते इति भुञ्जानः इत्येव रूपं सामान्यतः पाणिनीय-मते धातोरस्याभ्यवहारार्थ आत्मनेपदीयत्वात्।[१२१] भुङ्क्ते इति विग्रहे लङ्कारे कर्तरि लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) इत्यनेन शतृशानचौ प्राप्तौ। तङानावात्मनेपदम् (पा०सू० १.४.१००) इत्यनेन शानच् प्रत्यये कृते शकारस्यानुबन्ध-कार्ये चकारानुबन्धलोपे च भुञ्जानः इत्येव।[१२२] भुञ्जन् इति कथमिति चेत् भुङ्क्ते इति

[१२०] स्त्रीत्वस्याविवक्षेति शेषः। अन्यथा वनो र च (पा०सू० ४.१.७) इत्यनेन निवारयित्वरी इति स्यात्। निवारि → धातुसञ्ज्ञा पूर्ववत् → अन्येभ्योऽपि दृश्यन्ते (पा०सू० ३.२.७५) → निवारि वनिँप् → निवारि वन् → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → निवारि इट् वन् → निवारि इ वन् → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → निवारे इ वन् → एचोऽयवायावः (पा०सू० ६.१.७८) → निवारय् इ वन् → ह्रस्वस्य पिति कृति तुक् (पा०सू० ६.१.७१) → निवारय् इ तुँक् वन् → निवारय् इ त् वन् → निवारयित्वन् → विभक्तिकार्यम् → निवारयित्वन् सुँ → निवारयित्वन् स् → सर्वनामस्थाने चासम्बुद्धौ (पा०सू० ६.४.८) → निवारयित्वान् स् → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → निवारयित्वान् → नलोपः प्रातिपदिकान्तस्य (पा०सू० ८.२.७) → निवारयित्वा।

[१२१] भुजोऽनवने (पा०सू० १.३.६६) इत्यनेन।

[१२२] भुजँ पालनाभ्यवहारयोः (धा०पा० १४५४) → भुज् → भुजोऽनवने (पा०सू० १.३.६६) → वर्तमाने लट् (पा०सू० ३.२.१२३) → भुज् लट् → लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) → भुज् शानच् → सार्वधातुकमपित् (पा०सू० १.२.४) → शानचो ङित्त्वम् → भुज् आन → रुधादिभ्यः श्नम् → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → भु श्नम् ज् आन → भु न ज् आन → श्नसोरल्लोपः (पा०सू० ६.४.१११) → भु न् ज् आन → नश्चापदान्तस्य झलि (पा०सू० ८.३.२४) → भुं ज् आन → अनुस्वारस्य ययि परसवर्णः (पा०सू० ८.४.५८) → भुञ् ज् आन → भुञ्जान → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपदिकसञ्ज्ञा → विभक्तिकार्यम् → भुञ्जानः।

विग्रहे। भुञ्जानं वाऽचष्टे भुञ्जति[१२३] इति विग्रहे पुनः शतरि भुञ्जन्।[१२४] यद्वा भुजोऽनवने (पा०सू० १.३.६६) इति सूत्रेणात्मनेपदं तच्चावनभिन्नेऽर्थे अनवने इति पर्युदासात्। ध्येयं यत्पाणिनिसूत्रेषु निषेधस्य द्वे क्रिये प्रसिद्धे पर्युदासः प्रसज्यश्च। पर्युदासस्तदा भवति प्रायो यदा निषेधः समासगर्भे यथा स्थानिवदादेशोऽनल्विधौ (पा०सू० १.१.५६)। अत्र अनल्विधौ अर्थादल्विधिभिन्ने तत्सदृशे तथैवात्रापि। प्रसज्यस्तु यदा स्वतन्त्रो नञ्वाचको नकारो यथा न विभक्तौ तुस्माः (पा०सू० १.३.४)। अत्र नकारः क्रियान्वयी। लक्षणमित्थं करणीयम् – पाणिन्युच्चरितनिषेधार्थबोधकत्वे सति कारकान्वयित्वे सति समासगर्भनञ्धर्मवत्त्वं पर्युदासत्वम्। प्रसज्यत्वं तु पाणिन्युच्चरितनिषेधार्थबोधकत्वे सति क्रियान्वयित्वे सति नञ्धर्मतावच्छेदकतावत्त्वम्। तथा चोच्यते –

द्वौ नञर्थौ समाख्यातौ पर्युदासप्रसज्यकौ।
पर्युदासः सदृग्ग्राही प्रसज्यः प्रतिषेधकृत्॥

– इति गुरवः

अतोऽत्रापि अनवने इति पर्युदासः। अवनभिन्नेऽवनसदृशे। सादृश्यं चाऽत्र धातुवाच्यत्वेन। सदृशत्वं नाम तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। यथा चन्द्रमिव मुखं पश्यति

---

[१२३] अत्र इव इत्यर्थे वा। उपमायां विकल्पे वा (अ०को० ३.३.२४९) व वा यथा तथैवेवं साम्ये (अ०को० ३.४.९) इति कोषात्। भुञ्जान → तत्करोति तदाचष्टे (धा०पा० ग०सू० १८७) → भुञ्जान णिच् → भुञ्जान इ → णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरार्थम् (वा० ६.४.४८) → भुञ्जान् इ → भुञ्जानि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → क्विप् च (पा०सू० ३.२.७६) → भुञ्जानि क्विँप् → भुञ्जानि व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → भुञ्जानि → णेरनिटि (पा०सू० ६.४.५१) → भुञ्जान् → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → भुञ्जान् क्विँप् → भुञ्जान् व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → भुञ्जान् → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) → भुञ्जान् ड → भुञ्जान् अ → डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) → भुञ्ज् अ → भुञ्ज → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) भुञ्ज क्विँप् → भुञ्ज व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → भुञ्ज → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → भुञ्ज लट् → भुञ्ज तिप् → भुञ्ज ति → कर्तरि शप् (पा०सू० ३.१.६८) → भुञ्ज शप् ति → भुञ्ज अ ति → अतो गुणे (पा०सू० ६.१.९७) → भुञ्ज ति → भुञ्जति।

[१२४] भुञ्ज → पूर्ववद्धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → भुञ्ज लट् → लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) → भुञ्ज शतृँ → भुञ्ज अत् → कर्तरि शप् (पा०सू० ३.१.६८) → भुञ्ज शप् अत् → भुञ्ज अ अत् → अतो गुणे (पा०सू० ६.१.९७) → भुञ्ज अत् → अतो गुणे (पा०सू० ६.१.९७) → भुञ्जत् → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपदिकसञ्ज्ञा → विभक्तिकार्यम् → भुञ्जत् सुँ → उगिदचां सर्वनामस्थानेऽधातोः (पा०सू० ७.१.७०) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → भुञ्ज नुँम् त् सुँ → भुञ्ज न् त् सुँ → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → भुञ्जत् न् → संयोगान्तस्य लोपः (पा०सू० ८.२.२३) → भुञ्जन्।

(का०सू०वृ० ४.२.१३) इत्यत्र चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वमिति सदृशत्वम्। तथैव अवनभिन्नत्वे सत्यवनगतधातुवाचकत्वम्। एवमत्रावनार्थं प्रसृज्य भोजनार्थ आत्मनेपदम्। यतो हि भुज् धातोर्द्वयोरर्थयोः शक्तिर्भोजने पालने चैव। भुजँ पालनाभ्यवहारयोः (धा०पा० १४५४) इति पठितत्वात्। अतोऽवनभिन्नेऽर्थे आत्मनेपदं भवत्यवने तु परस्मैपदम्। तत्रैव शतृप्रत्ययः। अर्थात् भुनक्तीति भुञ्जन् इति विग्रहे भुज् धातोः वर्तमाने लट्लकारे लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) इत्यनेन शतृँप्रत्यये लशक्वतद्धिते (पा०सू० १.३.८) इत्यनेन शकारस्येत्सञ्ज्ञायां तस्य लोपः (पा०सू० १.३.९) इत्यनेन लोप ऋकारस्य च उपदेशेऽजनुनासिक इत् (पा०सू० १.३.२) इत्यनेनेत्सञ्ज्ञायां तेनैव सूत्रेण लोपे प्रातिपदिकसञ्ज्ञायां विभक्तिकार्ये सौ भुज् अत् सु इति स्थिते रुधादिभ्यः श्नम् (पा०सू० ३.१.७८) इत्यनेन श्नमि प्रत्यये मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) इत्यनेन जकारात्पूर्वं कृते शकारमकारयोरनुबन्धकार्ये श्नसोरल्लोपः (पा०सू० ६.४.१११) इत्यनेनालोपे उगिदचां सर्वनामस्थानेऽधातोः (पा०सू० ७.१.७०) इत्यनेन नुमि सोर्लोपे तकारलोपे च भुञ्जन्।[१२५] भगवतोऽयमभिप्रायो यत्त्वं प्रारब्धं मा भुङ्क्ष्व अपि तु भुङ्ग्धि। कारणमिदं यत्त्वं योगेश्वरोऽसि। योगेश्वरो भोगं न बुभुक्षतेऽपि तु योगमेव युयुक्षते। अतस्त्वं भुङ्ग्धि मर्यादानुसारं रक्ष पालय। यतो हि लक्ष्मण ईश्वररूपः। ईश्वरश्चक्रवर्तिदशरथस्य गृह आत्मानं चतुर्धा कृत्वा प्रकटयाम्बभूवेति रामायणपुराणादौ प्रसिद्धम्। यथा वाल्मीकीयरामायणे –

आदिदेवो महाबाहुर्हरिर्नारायणः प्रभुः।
साक्षाद्रामो रघुश्रेष्ठः शेषो लक्ष्मण उच्यते॥

– वा०रा० ६.१२८.१२०

एवं श्रीमद्भागवतेऽपि –

---

[१२५] भुजँ पालनाभ्यवहारयोः (धा०पा० १४५४) → भुज् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → भुज् लट् → लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) → भुज् शतृँ → भुज् अत् → रुधादिभ्यः श्नम् → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → भु श्नम् ज् अत् → भु न ज् अत् → श्नसोरल्लोपः (पा०सू० ६.४.१११) → भु न् ज् अत् → नश्चापदान्तस्य झलि (पा०सू० ८.३.२४) → भुं ज् अत् → अनुस्वारस्य ययि परसवर्णः (पा०सू० ८.४.५८) → भुञ् ज् अत् → भुञ्जत् → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपदिकसञ्ज्ञा → विभक्तिकार्यम् → भुञ्जत् सुँ → उगिदचां सर्वनामस्थानेऽधातोः (पा०सू० ७.१.७०) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → भुञ्ज नुँम् त् सुँ → भुञ्ज न् त् सुँ → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → भुञ्जत् न् → संयोगान्तस्य लोपः (पा०सू० ८.२.२३) → भुञ्जन्।

तस्यापि भगवानेष साक्षाद्ब्रह्ममयो हरिः।
अंशांशेन चतुर्धाऽगात्पुत्रत्वं प्रार्थितः सुरैः।
रामलक्ष्मणभरतशत्रुघ्ना इति सञ्ज्ञया॥

– भा०पु० ९.१०.२

एवमत्राप्यध्यात्मरामायणे शेषस्तु लक्ष्मणो राजन् (अ०रा० १.४.१७) इति बहुत्र सङ्कीर्तनात्। ईश्वरस्य कर्मविपाको न भवति। सूत्रेऽपि क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः (यो०सू० १.२४) इति। अत एव –

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते॥

– भ०गी० ४.१४

इति भगवद्गीतोक्तमपि सङ्गच्छेत। अतो लक्ष्मण ईश्वरः। न वा तस्य प्रारब्धो न वा कर्मबन्धनं न वा बुभुक्षामुमुक्षे। अत एवाऽचतुर्दशाब्दमरण्ये त्यक्तनिद्रानारीभोजनत्वमपि सङ्घटते। अतो भगवाञ्छ्रीरामः कथयति यत् त्वं प्रारब्धभोगाय न विवशोऽपि तु लोकसङ्ग्रहार्थमखिलं प्रारब्धं भुञ्जन्नवन् रक्षन्नित्यर्थस्तटस्थो भूत्वा वर्तस्व। इत्थं लक्ष्मणाभिन्नैककर्तृकप्रारब्धकर्मक-वर्तमानकालावच्छिन्नप्रारब्धपालनानुकूलव्यापाराश्रयो लक्ष्मण इति शाब्दबोधः।

## २.२३ उद्वीक्षयन्

श्रीरामः सह सीतया नृपपथे गच्छन् शनैः सानुजः
पौरान् जानपदान् कुतूहलदृशः सानन्दमुद्वीक्षयन्।
श्यामः कामसहस्रसुन्दरवपुः कान्त्या दिशो भासयन्
पादन्यासपवित्रिताखिलजगत्प्रापालयं तत्पितुः॥

– अ०रा० २.४.८७

अत्र ईक्ष् धातुर्दर्शने (ईक्षँ दर्शने धा०पा० ६१०) आत्मनेपदी। स च उद्वि- इत्युपसर्गद्वयपूर्वकः। तथा चाऽत्मनेपदित्वादत्र शानज्रूपम् उद्वीक्षमाणः इति पाणिनि-तन्त्रानुरूपम्। उद्वीक्षयन् अपि तथैव। अत्र स्वार्थे णिच्। उद्वीक्षते इत्यर्थे उद्वीक्षयति।[१२६] उद्वीक्षयतीत्युद्वीक्षयन्। यद्वा उद्वीक्ष्यत इत्युद्वीक्षा उद्विपूर्वकधातोर्भावे अः प्रत्ययः स्त्रियाम्।[१२७] उद्वीक्षां करोत्युद्वीक्षयति इति विग्रहे तत्करोति तदाचष्टे (धा०पा० ग०सू० १८७)

---

[१२६] स्वार्थे णिचि रामस्य सर्वद्रष्टृत्वात्क्रियाफलस्य परगामित्वात् णिचश्च (पा०सू० १.३.७४) इत्यस्याप्रवृत्तौ शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) इत्यनेन परस्मैपदम्।

[१२७] गुरोश्च हलः (पा०सू० ३.३.१०३) इत्यनेन। उद् वि ईक्ष् → गुरोश्च हलः (पा०सू० ३.३.१०३) → उद् वि ईक्ष् अ → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → उद् वीक्ष् अ → उद्वीक्ष → अजाद्यतष्टाप् (पा०सू० ४.१.४) → उद्वीक्ष टाप् → उद्वीक्ष आ → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → उद्वीक्षा।

इत्यनेन णिचि टिलोपादौ उद्वीक्षयति।[१२८] ततः शतरि विभक्तिकार्ये उद्वीक्षयन् । यद्वा पौराः श्रीराममुद्वीक्षन्ते रामस्तान् प्रेरयति इत्यर्थे रामः पौरानुद्वीक्षयति इति विग्रहे तत्प्रयोजको हेतुश्च (पा०सू० १.४.५५) इत्यनेन हेतुसञ्ज्ञायां हेतुमति च (पा०सू० ३.१.२६) इत्यनेन णिचि सनाद्यन्ता धातवः (पा०सू० ३.१.३२) इत्यनेन धातुसञ्ज्ञायां लटि तिपि शपि गुणेऽयादेशे उद्वीक्षयति। उद्वीक्षयतीत्युद्वीक्षयन् इति विग्रहे शतृप्रत्यये पूर्वोक्तसाधनप्रक्रियातः उद्वीक्षयन् इति पाणिनीयमेव। प्रथमपक्षे पौरजनकर्मकदर्शनानुकूलव्यापाराश्रयो रामः। द्वितीयकल्पे वर्तमानकालावच्छिन्नपौरजनकर्तृकरामकर्मकवीक्षणानुकूलव्यापारानुकूलव्यापाराश्रयो रामः इति शाब्दबोधः।

## २.२४ गच्छतीम्

यत्र रामः सभार्यश्च सानुजो गन्तुमिच्छति।
पश्यन्तु जानकीं सर्वे पादचारेण गच्छतीम्॥

– अ०रा० २.५.५

अत्र भगवतीं जनकनन्दिनीं सीतां वल्कलवस्त्रधारिणीं पादचारिणीं सौमित्रिसुखकारिणीं भक्तभयहारिणीमाप्तकामं श्रीराममनुगच्छन्तीं विलोक्य सशोकाः पौरलोकाः समालोचमाना निगदन्ति पश्यन्तु जानकीं सर्वे पादचारेण गच्छतीम् । अत्र गच्छन्तीम् इति हि पाणिनीयम्। यतो हि गच्छतीति गच्छन्ती ताम् इति विग्रहे गम् धातोः (गमॢँ गतौ धा०पा० ९८२) वर्तमानकाले लङ्कारे शतृप्रत्ययेऽनुबन्धकार्ये इषुगमियमां छः (पा०सू० ७.३.७७) इत्यनेन छान्तादेशे छे च (पा०सू० ६.१.७३) इत्यनेन तुगागमे श्चुत्वे

[१२८] उद्वीक्षा → तत्करोति तदाचष्टे (धा०पा० ग०सू० १८७) → उद्वीक्षा णिच् → उद्वीक्षा इ → णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरार्थम् (वा० ६.४.४८) → उद्वीक्ष् इ → उद्वीक्षि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → उद्वीक्षि लट् → उद्वीक्षि तिप् → उद्वीक्षि ति → कर्तरि शप् (पा०सू० ३.१.६८) → उद्वीक्षि शप् ति → उद्वीक्षि अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → उद्वीक्षे अ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → उद्वीक्षय् ति → उद्वीक्षयति।

उगितश्च (पा०सू० ४.१.६) इत्यनेन ङीपि नुम्यमि गच्छन्तीम्।[१२९] गच्छतीम् इति कथम्। अत्र हि पृषोदरादित्वान्नुमभावः। यद्वा आगमशास्त्रमनित्यम् (प०शे० ९३.३)। अतो नुमभावः कल्प्यताम्। यद्वाऽत्रौणादिकः तृँच् प्रत्ययः।[१३०] ततश्च उगितश्च (पा०सू० ४.१.६) इत्यनेन ङीप्। इत्थम् गच्छतीम् इति पाणिनीयम्। उणादयः पाणिनिसम्मता न वेति चैत्तत्रैव पाणिनिसूत्रम् उणादयो बहुलम् (पा०सू० ३.३.१)। तत्रैव कारिका –

सञ्ज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे।
कार्याद्विद्यादनूबन्धमेतच्छाशास्त्रमुणादिषु॥

– भा०पा०सू० ३.३.१

## २.२५ विजानती

रामस्तु वस्त्राण्युत्सृज्य वन्यचीराणि पर्यधात्।
लक्ष्मणोऽपि तथा चक्रे सीता तन्न विजानती॥

– अ०रा० २.५.३६

अत्रापि विजानाति इति विग्रहे शतृप्रत्यये ङीपि नुमि विजानन्ती इति।[१३१] परमत्र

---

[१२९] गमॢँ गतौ (धा०पा० ९८२) → गम् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → गम् लट् → लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) → गम् शतृँ → गम् अत् → इषुगमियमां छः (पा०सू० ७.३.७७) → गछ् अत् → छे च (पा०सू० ६.१.७३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → ग तुँक् छ् अत् → ग त् छ् अत् → स्तोः श्चुना श्चुः (पा०सू० ८.४.४०) → ग च् छ् अत् → गच्छ् अत् → कर्तरि शप् (पा०सू० ३.१.६८) → गच्छ् शप् अत् → गच्छ् अ अत् → अतो गुणे (पा०सू० ६.१.९७) → गच्छ् अत् → उगितश्च (पा०सू० ४.१.६) → गच्छ् अत् ङीप् → गच्छ् अत् ई → शप्श्यनोर्नित्यम् (पा०सू० ७.१.८१) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → गच्छ् अ नुँम् त् ई → गच्छ् अ न् त् ई → गच्छन्ती → विभक्तिकार्यम् → गच्छन्ती अम् → अमि पूर्वः (पा०सू० ६.१.१०७) → गच्छन्तीम्।

[१३०] नायं बहुलमन्यत्रापि (प०उ० २.९५) इति तृच्। स नोगित्। कार्याद्विद्यादनूबन्धम् (भा०पा०सू० ३.३.१) केचिदविहिता अप्यूह्याः (वै०सि०कौ० ३१६९) इत्यनुसारमूह्योऽयमविहित उगित्प्रत्ययः। तृँच् प्रत्यये चात्र शबागमोऽप्यूह्यः। नयतेः षुगागमः (प०उ० श्वे०वृ० २.९६) इतिवत्।

[१३१] पूर्वपक्षोऽयम्। यथा बलमात्मनि जानन्ती न मां शङ्कितुमर्हसि (वा०रा० २.१०.३५) जानन्ती बत दिष्ट्या मां वैदेहि परिपृच्छसि (वा०रा० ५.३५.६) साऽहमेतद्विजानन्ती तोषयिष्ये द्विजोत्तमम् (म०भा० ३.२८८.८) एतत्सर्वं विजानन्ती सा क्षमामन्वपद्यत (म०भा० ४.१९.६९) साऽहं धर्मं विजानन्ती धर्मनित्ये त्वयि स्थिते (म०भा० १२.३४७.१२) अजानन्त्या परं भावं तथाप्यस्त्वाभयाय मे (भा०पु० ३.२३.५४) कृतद्युतिरजानन्ती सपत्नीनामघं महत् (भा०पु० ६.१४.४४) द्वे ज्योतिषी अजानन्त्या निर्भिन्ने कण्टकेन वै (भा०पु० ९.३.७) वन इव पुरेऽपि विचरति पुरुषं त्वामेव जानन्ती (आ०स०श० ४६०) इत्यादिषु।

नुमभावः। श्नाभ्यस्तयोरातः (पा०सू० ६.४.११२) इति लोपेन।[१३२]

## २.२६ भाषतोः

गुहलक्ष्मणयोरेवं भाषतोर्विमलं नभः।
बभूव रामः सलिलं स्पृष्ट्वा प्रातः समाहितः॥

– अ०रा० २.६.१६

अत्र गुहलक्ष्मणयोर्भाषतोर्भाषमाणयो रात्रिर्व्यतीता। भाषतोः इत्यपाणिनीयमिव। यतो हि भाषणार्थको भाष् धातुः (भाषँ व्यक्तायां वाचि धा०पा० ६१२) आत्मनेपदी। ततश्च भाषेते इति भाषमाणौ तयोर्भाषमाणयोः इति पाणिनीयम्। किन्तु भाषेते इति भाषौ पचादित्वादच्।[१३३] पुनः भाषाविवाऽऽचरतो भाषतः।[१३४] आचारार्थे क्विप्। ततश्च धातुत्वाल्लटि तसि शपि। ततः भाषत इति भाषन्तौ[१३५] इति विग्रहे परस्मैपदधातोः शतृप्रत्यये भाषतोः षष्ठ्यन्तं सप्तम्यन्तं वा।[१३६] ज्ञात्वाऽपि श्रीरामतत्त्वं कथनोपकथन-

[१३२] नित्यत्वादन्तरङ्गत्वाच्च श्नाभ्यस्तयोरातः (पा०सू० ६.४.११२) इति लोपविधिः आच्छीनद्योर्नुम् (पा०सू० ७.१.८०) इत्यागमविधेर्बलीयानिति भावः। वि ज्ञा अवबोधने (धा०पा० १५०७) → वि ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → वि ज्ञा लट् → लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) → वि ज्ञा शतृँ → वि ज्ञा अत् → क्र्यादिभ्यः श्ना (पा०सू० ३.१.८१) → वि ज्ञा श्ना अत् → वि ज्ञा ना अत् → ज्ञाजनोर्जा (पा०सू० ७.३.७९) → वि जा ना अत् → श्नाभ्यस्तयोरातः (पा०सू० ६.४.११२) → वि जा न् अत् → उगितश्च (पा०सू० ४.१.६) → वि जा न् अत् ङीप् → वि जा न् अत् ई → विजानती → विभक्तिकार्यम् → विजानती सुँ → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → विजानती। कथं तर्हि १३१तम्यां टिप्पण्यामुद्धृतेषूदाहरणेषु नुम्भावः। आगमशास्त्रमनित्यम् (प०शे० ९३.२)। यद्वा धात्वन्तरः कल्प्यताम्।

[१३३] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन।

[१३४] भाष → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → भाष क्विँप् → भाष व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → भाष → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → भाष लट् → भाष तस् → कर्तरि शप् (पा०सू० ३.१.६८) → भाष शप् तस् → भाष अ तस् → अतो गुणे (पा०सू० ६.१.९७) → भाष तस् → ससजुषो रुः (पा०सू० ८.२.६६) → भाषतरुँ → खरवसानयोर्विसर्जनीयः (पा०सू० ८.३.१५) → भाषतः।

[१३५] भाष → धातुसञ्ज्ञा (पूर्ववत्) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → भाष लट् → लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) → भाष शतृँ → भाष अत् → अतो गुणे (पा०सू० ६.१.९७) → भाषत् → कृत्तद्धित-समासाश्च (पा०सू० १.२.४६) → प्रातिपदिकसञ्ज्ञा → विभक्तिकार्यम् → भाषत् औ → उगिदचां सर्वनामस्थानेऽधातोः (पा०सू० ७.१.७०) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → भाष नुँम् त् औ → भाष न् त् औ → भाषन्तौ।

[१३६] भाषत् → प्रातिपदिकसञ्ज्ञा (पूर्ववत्) → विभक्तिकार्यम् → भाषत् ओस् → भाषतोस् → ससजुषो रुः (पा०सू० ८.२.६६) → भाषतोरुँ → खरवसानयोर्विसर्जनीयः (पा०सू० ८.३.१५) → भाषतोः।

व्याजेन लोके श्रीरामतत्त्वाविश्चिकीर्षया भाषणमाचरतोरिवेति ग्रन्थतात्पर्यं प्रतिभाति। इदं ह्यध्यात्मरामायणम्। अत्र प्रत्यक्षरं निगूढदर्शनपीयूषनिर्भरम्। अतो व्याकरणप्रयोगा अपि विशेषमेव निगूढरहस्यात्मकं तत्त्वं वितन्वन्तो लक्ष्यन्ते। यतो हि लक्ष्मणः साक्षान्नारायणस्य भगवतः श्रीरामस्यांशः। दार्शनिकदृष्ट्या च चतस्रोऽवस्था जाग्रत्स्वप्नसुषुप्तितुरीयाः। चतसृणामपि चत्वारो विभवो विराड्हिरण्यगर्भसर्वज्ञब्रह्माख्याः। तत्राशेषविशेषातीतं ज्ञान-गीर्गोऽतीतं निर्गुणं ब्रह्म तुरीयं श्रीरामः। तदवस्था तुरीयावस्था श्रीसीता। तुरीयावस्था-ब्रह्मणोरिव सीतारामयोरप्यभेदः। सुषुप्त्यवस्था माण्डवी। तच्चैतन्याधिष्ठानदेवता सर्वज्ञ ईश्वरो भरतः। स्वप्नावस्था श्रुतकीर्तिः। तच्चैतन्याधिष्ठानं हिरण्यगर्भः शत्रुघ्नः। जागृतावस्थोर्मिला। तद्विभुर्विराट् श्रीलक्ष्मणः। अतस्तुलसीदासो गायति –

सुन्दरी सुन्दर बरनि सह सब एक मंडप राजहीं।
जनु जीव उर चारिउ अवस्था बिभुन सहित बिराजहीं॥[१३७]

– रा०च०मा० १.३२५.१४

एवमेवेमे चत्वारो रामभरतलक्ष्मणशत्रुघ्नाः क्रमशो मोक्षकामधर्मार्थरूपाः। धर्मादिष्वनियमः (वा० २.२.३४) इति वार्त्तिकेनात्राभिप्रायानुसारं क्रमव्यत्यासः। एवम् ओम् (ॐ) इत्यत्र हि चत्वारि पदानि – अ उ म् अर्धमात्रा च। तत्रार्धमात्रात्मको रामो मकारो भरतो वासुदेव उकारः शत्रुघ्नो विधिरूपोऽकारो लक्ष्मणः शिवरूपश्चेति कथ्यते[१३८] –

बेद तत्त्व नृप तव सुत चारी॥[१३९]

– रा०च०मा० १.१९८.१

इदं सर्वं कण्ठरवेण कथितं विस्तरभयान्न निरूप्यते। एवं लक्ष्मणः साक्षाद्भगवान्निषादश्च नित्यो भगवत्परिकरः किं तयोः किमप्यज्ञातम्।[१४०] केवलं लोकलीलार्थं प्रश्नं प्रश्नोत्तरं कुर्वन्ताविव लक्ष्येते। अतो भावतो विदितरामतत्त्वतयाऽभाषमाणयोरेव भाषणमाचक्षाणयोरिवानयोर्बाह्य-परिवेषः।

---

[१३७] एतद्रूपान्तरम्–सुरम्याः सुरम्यैर्वरैः सर्ववध्वो व्यराजन्नभिन्ने शुभे मण्डपे च। ध्रुवं जीवचित्तेऽब्धिसङ्ख्या अवस्थाः स्वकीयैरधीशैर्युताः संव्यराजन्॥ (मा०भा० १.३२५.१४)।

[१३८] अकाराक्षरसम्भूतः सौमित्रिर्विश्वभावनः। उकाराक्षरसम्भूतः शत्रुघ्नस्तैजसात्मकः॥ प्राज्ञात्मकस्तु भरतो मकाराक्षरसम्भवः। अर्धमात्रात्मको रामो ब्रह्मानन्दैकविग्रहः॥ (रा०उ०ता०उ० ३.१.२)

[१३९] एतद्रूपान्तरम्–चत्वारोऽपि सुता भूप वेदतत्त्वानि सन्ति ते (मा०भा० १.१९८.१)। दशरथं प्रति वसिष्ठस्य वचनमिदम्।

[१४०] तयोः इत्यत्र क्तस्य च वर्तमाने (पा०सू० २.३.६७) इत्यनेन षष्ठी। मतिबुद्धिपूजार्थेभ्यश्च (पा०सू० ३.२.१८८) इत्यनेन ज्ञानम् इत्यत्र बुद्ध्यर्थे वर्तमाने क्तः। बुद्धिर्ज्ञानम् (का०वृ० ३.२.१८८) इति काशिका।

## २.२७ निरहङ्कारिणः

निरहङ्कारिणः शान्ता ये रागद्वेषवर्जिताः।
समलोष्टाश्मकनकास्तेषां ते हृदयं गृहम्॥

– अ०रा० २.६.५७

अत्र प्राचेतसाश्रमं गत्वा मुनिवासस्थानं श्रीरामचन्द्रेण पृष्टो हृष्टो वाल्मीकिः प्रणिगदति निरहङ्कारिणः इति। यद्यप्यत्र द्वेधा समासः कर्तुं पार्यते तत्पुरुषो बहुव्रीहिश्च तत्पुरुषो यथा अहङ्कारान्निष्क्रान्ता निरहङ्काराः इति निरादयः क्रान्ताद्यर्थे पञ्चम्या (वा० २.२.१८) इति वचन-सहायेन कुगतिप्रादयः (पा०सू० २.२.१८) इति सूत्रेण प्रथमः समासो द्वितीयश्च प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपश्च (वा० २.२.२२) इत्यनेन बहुव्रीहिरपि निर्गतोऽहङ्कारो येषामिति निरहङ्काराः इत्थं द्वयोः समासयोः कृतयोरपि निरहङ्कारिणः इति विधाय तत्पुरुषं पुनर्मत्वर्थीय इनिः इति। न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः[१४१] इति पाणिनिसम्मतनियममुल्लङ्घ्य किमेतेन द्रविडप्राणायामेन। द्रविडप्राणायामप्रकारनिदर्शनं हि निर्गतोऽहङ्कारो निरहङ्कारः इत्यत्र कुगतिप्रादयः (पा०सू० २.२.१८) इत्यनेन तत्पुरुषसमासः पश्चात् निरहङ्कार एषां निरहङ्कारिणः इति चेत्।[१४२] उच्यते। यदि बहुव्रीहावभीष्टार्थलाभः स्यात्तदेदमनुधावनं न स्यात्। तदैव नियमोल्लङ्घनरूपाऽपाणिनीयता स्यात्। बहुव्रीहौ नित्य-निरहङ्काररूपेऽभीष्टेऽर्थे न प्राप्ते नित्ययोगविवक्षायामिनिरत एव न दोषः।[१४३] अतो गीतायामपि निरहङ्कारः इति प्रयुक्तं यथा –

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी॥

– भ०गी० १२.१३

अर्थान्निरहङ्कारस्तु मम प्रियः किन्तु निरहङ्कारिणो हृदये वसामीत्येवान्तरं बहुव्रीहि-मत्वर्थीययोः। एवं निरहङ्कारिणः इत्यत्र नित्यमहङ्काराभाव इति गूढमर्थं ध्वनयितुं तत्पुरुष-बहुव्रीहिवर्त्म विहाय विकटः पन्था आश्रितः। यद्वा अन्यमपि दर्शयामि। निरहं कर्तुं शीलं येषां ते निरहङ्कारिणः इति सुप्यजातौ णिनिस्ताच्छील्ये (पा०सू० ३.२.७८) इत्यनेन सूत्रेण णिनिविधाने निरहङ्कारिणः।

---

[१४१] मूलं मृग्यम्।

[१४२] अत इनिठनौ (पा०सू० ५.२.११५) इत्यनेनेनिः।

[१४३] नित्यं निरहङ्कार एषां निरहङ्कारिणः इति विग्रहप्रकारः।

## २.२८ प्रकाशन्तः

साक्षान्मया प्रकाशन्तो ज्वलनार्कसमप्रभाः।
तानन्वधावं लोभेन तेषां सर्वपरिच्छदान्॥

– अ०रा० २.६.६८

अत्र वाल्मीकिर्भगवन्तं श्रीरामं प्रति पूर्ववृत्तान्तवर्णनप्रसङ्गे सप्तर्षिवर्णनं प्रस्तौति। अत्र प्रकाशन्तः इति प्रयोगः। प्रपूर्वको काश् धातुर्दीप्त्यर्थः (काशृँ दीप्तौ धा०पा० ११६२) अकर्मक आत्मनेपदी च। अत्र शानचा भवितव्यं शत्रन्तप्रयोगो ह्यपाणिनीय इति चेत्। प्रकाशन्तः इत्थमाचारक्विबन्ताद्रूपसिद्धिः।[१४४] यद्वा अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) मत्वा परस्मैपदत्वाच्छतृप्रत्ययः।[१४५]

## २.२९ निश्चयः

वयं स्थास्यामहे तावदागमिष्यसि निश्चयः।
तथेत्युक्त्वा गृहं गत्वा मुनिभिर्यदुदीरितम्॥

– अ०रा० २.६.७३

अत्र सप्तर्षिकथितमेवानुवदति वाल्मीकिर्यत् तावद्वयमत्र स्थास्यामो यावत्त्वं कृतनिश्चय आगमिष्यसि। आगमिष्यसि निश्चयः इति वाक्यखण्डे निश्चयः इति हि युष्मत्पद-

---

[१४४] प्रकाशं कुर्वन्ति प्रकाशन्ति। प्रकाश → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → प्रकाश क्विँप् → प्रकाश व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → प्रकाश → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → प्रकाश लट् → प्रकाश झि → कर्तरि शप् (पा०सू० ३.१.६८) → प्रकाश शप् झि → प्रकाश अ झि → अतो गुणे (पा०सू० ६.१.९७) → प्रकाश झि → झोऽन्तः (पा०सू० ७.१.३) → प्रकाश अन्ति → अतो गुणे (पा०सू० ६.१.९७) → प्रकाशन्ति। प्रकाशन्तीति प्रकाशन्तः। प्रकाश → धातुसञ्ज्ञा (पूर्ववत्) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → प्रकाश लट् → लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) → प्रकाश शतृँ → प्रकाश अत् → अतो गुणे (पा०सू० ६.१.९७) → प्रकाशत् → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपादिकसञ्ज्ञा → विभक्तिकार्यम् → प्रकाशत् जस् → प्रकाशत् अस् → उगिदचां सर्वनामस्थानेऽधातोः (पा०सू० ७.१.७०) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → प्रकाश नुँम् त् अस् → प्रकाश न् त् अस् → प्रकाशन्तस् → ससजुषो रुः (पा०सू० ८.२.६६) → प्रकाशन्तरुँ → खरवसानयोर्विसर्जनीयः (पा०सू० ८.३.१५) → प्रकाशन्तः।

[१४५] प्र काशृँ दीप्तौ (धा०पा० ११६२) → प्र काश् → अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → प्र काश् लट् → लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) → प्र काश् शतृँ → प्र काश् अत् → प्रकाशत् → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपादिकसञ्ज्ञा। शेषा प्रक्रिया पूर्ववत्।

वाच्यवाल्मीकिरूपकर्तृविशेषणम्। त्वं निश्चयः सन् यावदागमिष्यसि तावद्वयं स्थास्यामः इति भावः। निश्चयशब्दः प्रायो भावेऽबन्तः।[१४६] भावप्रत्ययान्तशब्दः कथं कर्तृवाचकस्य विशेषणमसमानाधिकरणात्। असामानाधिकरण्ये कथं स्याद्विभक्तिः कथमन्वयश्च। सामानाधिकरण्याभावे आगमिष्यसि इति प्रयोगोऽपि नैव सम्भविष्यति। तथा च सूत्रम् युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः (पा०सू० १.४.१०५)। अस्यार्थः तिङ्वाच्य-कारकवाचिनि युष्मद्युपपदे समानाधिकरणे प्रयुज्यमानेऽप्रयुज्यमाने वा मध्यमः। न च क्वचिदसमानाधिकरणमपि विशेषणम्। विशेषणविशेष्ययोः सामानाधिकरण्ये नैव राजाज्ञा। भूतले घटः, राज्ञः पुरुषः इत्यादौ यथा सप्तम्यन्तषष्ठ्यन्तयोरपि विशेषणत्वदर्शनात्। सत्यम्। किन्त्वत्र समानाधिकरणत्वं नाम समानविभक्तिकत्वम्। समानविभक्तिकत्वं प्राय एकार्थवाचकयोर्विशेषणविशेष्ययोरेव भवति। यथा नीलमुत्पलम् अत्रोत्पल-शब्दोत्तरसुब्विभक्तिर्नीलपदोत्तरसुब्विभक्तिश्चोभे अप्येकमेवोत्पलरूपमर्थं नीलत्वविशिष्टं कथयतः। यतो हि नीलशब्दस्य उत्पलशब्देनाभेदसम्बन्धेनान्वयः। तथाऽपि व्युत्पत्तिवादे श्रीगदाधरभट्टा व्युत्पादयन्ति यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसङ्ख्याविरुद्ध-सङ्ख्याया अविवक्षितत्वं तत्रैव विशेष्यविशेषणवाचकपदयोः समानवचनकत्वनियमः (व्यु०वा० का०प्र०)। यथा सुन्दरो रामः इत्यत्र विशेष्यवाचकपदं रामः इति तदुत्तरविभक्तिः सु इति तत्तात्पर्यविषयसङ्ख्यैकत्वरूपा तद्विरुद्धसङ्ख्या द्वित्वत्रित्वादयस्तासां विशेष्यवाचक-सुन्दरपदोत्तरसुविभक्त्या न विवक्षितत्वमतोऽत्र समानवचनकत्वम्। इति मीमांसामात्रे आगमिष्यसि इत्यस्य समानाधिकरणः त्वम् इति। तस्य सामानाधिकरणं निश्चयः इति। अन्यथा कथं प्रथमाविभक्तिः क्रियेत। स च तदैव त्वम् इत्यस्य सामानाधिकरणो भविष्यति यदा तदर्थमेव भाषेत। भावे विहिताजन्तनिश्चयशब्दः कथं कर्त्रर्थमनुवदिष्यति। अस्यैकार्थ-वाचकत्वे कथमत्र समानवचनकत्वमिति महत्पङ्कमिति चेत्। अत्र निश्चिनोतीति निश्चयः इति विग्रहे पचादित्वादच्।[१४७] यद्वा निश्चयः इति भावेऽबन्त एव तथाऽपि निश्चयोऽस्त्यस्य इति विग्रहेऽर्शआदित्वान्मत्वर्थीयोऽच्।[१४८] निश्चयः इत्यस्य निश्चयवान् इत्यर्थः। अथवा पृथक्पदं वाक्यभेदश्च। यदाऽऽगमिष्यसि तदा निश्चयो भविष्यतीति व्यञ्जनया ध्वन्यते। काव्यस्यात्मा हि ध्वनिस्तथा च ध्वन्यालोकेऽभिनन्दयन्त्यानन्दवर्धनाचार्याः –

---

[१४६] निस् पूर्वकात् चिञ् चयने (धा०पा० १२५१) इति धातोः एरच् (पा०सू० ३.३.५६) इत्यनेन प्राप्तं अच् -प्रत्ययं बाधित्वा ग्रहवृदृनिश्चिगमश्च (पा०सू० ३.३.५८) इत्यनेन भावेऽकर्तरि च कारके सञ्ज्ञायाम् अप् प्रत्यये निश्चयशब्दो निष्पन्नः।

[१४७] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन।

[१४८] अर्शआदिभ्योऽच् (पा०सू० ५.२.१२७) इत्यनेन।

काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्व-
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।
केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं
तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम्॥

– ध्व० १.१

न च साहित्यिकमतेन वैयाकरणानां किमिति चेत्। आनन्दवर्धनाचार्यैरपि बुधशब्दे वैयाकरणानां ध्वनिस्वीकृतत्वप्रतिपादनात्। यथा बुधैर्वैयाकरणैः स एव ध्वनिः स्फोटरूपेण पूर्णसमाम्नातोऽभ्यस्तः। येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः (भा०प०)। न च काव्यात्मभूतध्वनिरत्र किमायातम्। अध्यात्मरामायणस्य सर्वत्र काव्यरूपेण चर्चितत्वात् यथा –

रामायणं जनमनोहरमादिकाव्यं
ब्रह्मादिभिः सुरवरैरपि संस्तुतं च।
श्रद्धान्वितः पठति यः शृणुयात्तु नित्यं
विष्णोः प्रयाति सदनं स विशुद्धदेहः॥

– अ०रा० ७.९.७३

इत्थं यदा आगमिष्यसि तदा निश्चयो भविष्यति इति न दोषः।

## २.३० स्थाप्य

बहिरेव रथं स्थाप्य राजानं द्रष्टुमाययौ।
जय शब्देन राजानं स्तुत्वा तं प्रणनाम ह॥

– अ०रा० २.७.२

सुमन्त्रः ससौमित्रिसीतं श्रीरामभद्रं रथेन गङ्गातटं यावत्प्रापय्य[१४९] तदाज्ञयाऽयोध्यां परावर्तमानो रथं बहिः स्थापयित्वा म्रियमाणं राजानं दशरथं ददर्श। अत्र बहिरेव रथं स्थाप्य इत्यपाणिनीयमिव। यतो हि ष्ठा गतिनिवृत्तौ (धा०पा० ९२८) इति धातोर्ण्यन्ते अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (पा०सू० ७.३.३६) इत्यनेन पुगागमे क्त्वाप्रत्यय इटि गुणेऽयादेशे

[१४९] प्रापय्य इत्यत्र विभाषाऽऽपः (पा०सू० ६.४.५७) इत्यनेन णेरयादेशे वैकल्पिके द्वियं रूपं सिद्धम्। पक्षे प्राप्य इति।

स्थापयित्वा इति हि वरम्।[१५०] रथं स्थाप्य इति कथम्। ल्यप् प्रत्ययस्तु समासमन्तरेण भवितुं शक्य एव नहि। तथा च सूत्रम् समासेऽनञ्पूर्वे क्त्वो ल्यप् (पा०सू० ७.१.३७)। इदं ह्यनञ्पूर्वके समासे सत्येव क्त्वाप्रत्ययस्य स्थाने ल्यपं विदधाति। अत्र समासोऽपि नास्ति। अतः स्थाप्य इति विमृश्यते। अत्र संस्थाप्य इति प्रयोग आसीत्। तदा सम्पूर्वक-णिजन्तस्थाधातोः क्त्वाप्रत्यये ल्यबादेशः। एवं विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इत्यनेन सम् उपसर्गस्य लोपः। न च समासे कृते कुतोऽत्र पदत्वम्। अन्तर्वर्तिनीं विभक्तिमाश्रित्यैवानेन वार्त्तिकेन लोपकरणात्।[१५१] सत्यभामा भामा (भा०प०, भा०पा०सू० १.१.४५) इत्यादावपि समस्तपदस्यैव लोपदर्शनात्। इत्थं सम् इत्यस्य लोपे सति प्रथमं स्थाप्य इति प्रामाणिक एव प्रयोगः। न च निमित्तापाये नैमित्तिकस्याप्यपायः इति परिभाषया निमित्तभूते समुपसर्गे लुप्ते नैमित्तिकस्य ल्यप् इत्यस्याप्यपायस्ततः स्थाप्य इत्यनिष्टं रूपमिति वाच्यम्। अस्याः परिभाषाया भाष्येऽदर्शनात्।[१५२] जातसंस्कारो न निवर्तते इति वचनबलेन लुप्तेऽपि समुपसर्गे तन्निमित्तकल्यपो न निवर्तनम्। यद्वा स्थापयितुं शक्यं योग्यं वेति स्थाप्यम् इति विग्रहे णिजन्तपुगन्तस्थाधातोः ऋहलोर्ण्यत् (पा०सू० ३.१.१२४) इत्यनेन ण्यत् प्रत्ययः। अर्थादशक्यत्वादेकं स्थापयितुं योग्यं राजानं ददर्श। साम्प्रतं हि राज्ञो गतिर्निवृत्ता बुद्धिरपि शान्ता प्रत्यवसानमप्यवरुद्धं शब्दोऽपि शिथिलोऽतः स्थाप्यशब्दः राजन् शब्दस्य विशेषणम्। तथा स्थाप्यश्चासौ राजा चेति स्थाप्यराजा तं स्थाप्यराजानम्। देवराजानम् (अ०रा० १.५.२६) इतिवट्टजभावः।[१५३]

---

[१५०] ष्ठा → धात्वादेः षः सः (पा०सू० ६.१.६४) → निमित्तापाये नैमित्तिकस्याप्यपायः → स्था → हेतुमति च (पा०सू० ३.१.२६) → स्था णिच् → स्था इ → अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (पा०सू० ७.३.३६) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → स्था पुँक् इ → स्था प् इ → स्थापि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → समानकर्तृकयोः पूर्वकाले (पा०सू० ३.४.२१) → स्थापि क्त्वा → स्थापि त्वा → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → स्थापि इट् त्वा → स्थापि इ त्वा → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → स्थापे इ त्वा → एचोऽयवायावः (पा०सू० ६.१.७८) → स्थापय् इ त्वा → स्थापयित्वा।

[१५१] प्राग्रीश्वरान्निपाताः (पा०सू० १.४.५६) इत्यस्याधिकारे पठितत्वात् प्रादयः (पा०सू० १.४.५८) इति सूत्रेण प्रादीनां निपातसञ्ज्ञायां जातायाम् उपसर्गाः क्रियायोगे (पा०सू० १.४.५९) इत्यनेन क्रियायोगे तेषामेव उपसर्गसञ्ज्ञायामुपसर्गाणां निपातत्वे सिद्धे स्वरादिनिपातमव्ययम् (पा०सू० १.१.३७) इत्यनेन निपातानाम् अव्ययसञ्ज्ञायां विहितायामुपसर्गाणामव्ययसञ्ज्ञायां सिद्धायाम् अव्ययादाप्सुपः (पा०सू० २.४.८२) इत्यनेनोपसर्गात्सुपां लुक्यपि प्रत्ययलोपे प्रत्ययलक्षणम् (पा०सू० १.१.६२) इति सूत्रबलेन सुप्तिङन्तं पदम् (पा०सू० १.४.१४) इत्युपसर्गाणां प्रत्ययलक्षणा पदसञ्ज्ञाऽक्षतैवेति भावः।

[१५२] तस्मादनित्या परिभाषेयमिति भावः।

[१५३] १४८तमे पृष्ठे १.२५ देवराजानम् इति प्रयोगस्य विमर्शं पश्यन्तु।

यद्वा स्थीयत इति स्था।[१५४] तथा च स्थयाऽऽप्तुं योग्यमिति स्थाप्यम् इत्थं भावसाधितस्थाशब्देनाऽप्यशब्दस्य समासः। आप्यशब्दोऽपि ण्यत्प्रत्ययान्त इति। तथा गतिनिवृत्त्याऽव्याप्तमिति तात्पर्यम्। अथवा म्रियमाणत्वाच्चितायां स्थापयितुं योग्यं राजानं ददर्श। न च स्थाप्यशब्दस्य राजन् शब्देन सह तत्पुरुषसमासे राजाऽहस्सखिभ्यष्टच् (पा०सू० ५.४.९१) इत्यनेन टच् प्रत्यये टिलोपे विभक्तिकार्येऽमि स्थाप्यराजम् स्यादिति वाच्यम् महाराजम् इतिवत्। समासान्तप्रत्ययप्रकरणं ह्यनित्यम्। प्रमाणं चात्र यचि भम् (पा०सू० १.४.१८) इति सूत्रम्। अत्र यश्चाच्च यच् इति समाहारद्वन्द्वः। इह द्वन्द्वाच्चुदषहान्तात्समाहारे (पा०सू० ५.४.१०६) इत्यनेन चान्तत्वाट्टच्प्रत्ययः प्रयोक्तव्य आसीत्। तस्मिन् प्रयुक्ते यचे भम् इति स्यात्। यतो न प्रयुक्तोऽतः समासान्तप्रत्ययस्यानित्यता ज्ञायते।[१५५] अतः स्थाप्यराजानम् अस्मिन्प्रयोगे नापाणिनीयता।

## २.३१ अवेक्षती

सीता चाश्रुपरीताक्षी मामाह नृपसत्तम।
दुःखगद्गदया वाचा रामं किञ्चिदवेक्षती॥

– अ०रा० २.७.१२

शोकाकुलदशरथं प्रति रामसन्देशं वर्णयित्वा सुमन्त्रः साम्प्रतं सीतामनोदशां प्रतिपादयति यदश्रुपरीतलोचना सीता निरीक्ष्य रामभद्रं किमपि समादिशत्। यदिह किञ्चिदवेक्षती अयं प्रयोगः अवेक्षमाणा इति प्रयोक्तव्ये अवेक्षती इति प्रयुक्तमत्रांशद्वयेऽपाणिनीयताभ्रान्तिः। अवपूर्वको हि ईक्ष् धातुः (ईक्षँ दर्शने धा०पा० ६१०) आत्मनेपदी। एवं तङानावात्मनेपदम् (पा०सू० १.४.१००) इत्यनेन विधीयमानः शानच् प्रत्ययोऽप्यात्मनेपदसञ्ज्ञकः। तथा च आने मुक् (पा०सू० ७.२.८२) इत्यनेन मुकि कृते अवेक्षमाणा इत्येव प्रयोगः प्रचलितः। एवं अवेक्षती इति विमृश्यते। प्रथमं त्वात्मनेपद-

[१५४] ष्ठा गतिनिवृत्तौ (धा०पा० ९२८) इति धातोः अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) इत्यनेन डे डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) इत्यनेन टिलोपे अजाद्यतष्टाप् (पा०सू० ४.१.४) इत्यनेन टापि। दृशिग्रहणादपिग्रहणाच्चानुपपदेऽपि। अपिशब्दः सर्वोपाधिव्यभिचारार्थः (का०वृ० ३.२.१०१, वै०सि०कौ० ३०११)। यद्वा अन्येभ्योऽपि दृश्यते (पा०सू० ३.२.१७८) इत्यनेन क्विपि। दृशिग्रहणाद्भावेऽपि। यद्वा भिदादिगणमाकृतिगणं मत्वा षिद्भिदादिभ्योऽङ् (पा०सू० ३.३.१०४) इत्यनेनाङि अजाद्यतष्टाप् (पा०सू० ४.१.४) इत्यनेन टापि। कथं तर्हि स्थितिः इति क्तिन्। अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेः (भा०शि०) इति भाष्यप्रयोगात्षिद्भिदादिभ्यो बाहुलकात्क्तिन्नपि। अन्यथा डुलभँष् प्राप्तौ (धा०पा० ९७५) इत्यस्य षित्त्वात्क्तिन्बाधो दुर्वारः।

[१५५] अन्यत्राप्येतज्ज्ञापितं भगवता पाणिनिना। प्रथमसूत्र एव वृद्धिरादैच् (पा०सू० १.१.१) इति प्रयुक्तम्। समासान्तप्रत्ययनित्यत्वे तु द्वन्द्वाच्चुदषहान्तात्समाहारे (पा०सू० ५.४.१०६) इत्यनेन चान्तत्वाट्टजन्तरूपेण वृद्धिरादैचम् इत्यनेन भवितव्यमासीत्। हलन्तप्रयोगोऽत्रापि समासान्तप्रत्ययानित्यत्वज्ञापनार्थम्।

प्रयुक्तधातोः परस्मैपदवद्व्यवहारः। सति परस्मैपदे प्रत्ययविचारस्तत्रैव नुमभावनिस्तारः। अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) इति वचनेन सति परस्मैपदे अवेक्षति इति विग्रहे शतृप्रत्ययान्तरूपम्। ननु अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) अत्र न किमपि प्रमाणमिति चेन्न। चक्षिँङ् व्यक्तायां वाचि (धा०पा० १०१७) इति हि धातुः। अयं चानुदात्तेन्ङिच्च। द्वयोरप्यनुबन्धयोरेकमेव फलमात्मनेपदम्। तत्र सूत्रम् अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) एव। अस्यैव फलस्य कृते द्वयोरनुबन्धकरणत्वं किमर्थम्। अनुदात्तेत्त्वकरणेनैवाऽत्मनेपदसिद्धिः। ङित्करणेन किं प्रयोजनम्। तदेव व्यर्थं सञ्ज्ञापयति यदनुदातेत्त्वलक्षणमात्मनेपदं तत्कार्यं चानित्यम्। अतस्तस्यानित्यत्वात्परस्मैपदशतृप्रयोगः। शतृप्रयोगे सति कथं नुमभावः इति चेत्। आगमशास्त्रस्यानित्यत्वात्।[१५६] यद्वाऽत्र न शतृप्रत्ययः। अत्र तृँच् प्रत्यय औणादिकः।[१५७] एवं नुमभावः। तथा च स्त्रीत्वविवक्षायां ङीप्प्रत्यये[१५८] अवेक्षती इति सिद्धम्।

## २.३२ रुदन्ती

ततो दुःखेन महता पुनरेवाहमागतः।
ततो रुदन्ती कौसल्या राजानमिदमब्रवीत्॥

– अ०रा० २.७.१५

भगवतः श्रीरामचन्द्रस्य वनवासे सत्ययोध्यामागते सुमन्त्रे निशम्य सकलं समाचारं विलपन्तं रघुनन्दं निरानन्दं म्रियमाणं राजानं विलोक्य रुदती कौशल्याऽब्रवीत्। अत्र रुदन्ती इति प्रयुक्तम्। तच्चासङ्गतमिव। यतो हि रुद् धातुः (रुदिँर् अश्रुविमोचने धा०पा० १०६७) अदादिगणपठितः। तत्र अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) इत्यनेन शपो लुग्भवति।

[१५६] आगमशास्त्रमनित्यम् (प०शे० ९३.२)। शाप्श्यनोर्नित्यम् (पा०सू० ७.१.८१) इत्यनेन शपि नुमागमस्य नित्यत्वादागमशास्त्रस्यानित्यत्वमाश्रितम्।

[१५७] नायं बहुलमन्यत्रापि (प०उ० २.९५) इति तृच्। स नोगित्। कार्याद्विद्यादनूबन्धम् (भा०पा०सू० ३.३.१) केचिदविहिता अप्यूह्याः (वै०सि०कौ० ३१६९) इत्यनुसारमूह्योऽयमविहित उगित्प्रत्ययः। तृँच् प्रत्यये चात्र शबागमोऽप्यूह्यः। नयतेः षुगागमः (प०उ० श्वे०वृ० २.९६) इतिवत्।

[१५८] उगितश्च (पा०सू० ४.१.६) इत्यनेन ङीप्।

ततश्च शतृप्रत्यये नुमभावः स्वत एव सिद्धः।[१५९] अत्र नुमपाणिनीय इति कृत्वा विमृश्यते। गणकार्यमनित्यम् (प०शे० ९३.३)। अतः शपो न लुक्। तथा च रुदतीति रुदन्ती इति विग्रहे नुम्। यद्वा रोदनं रुदः। भावेऽच्प्रत्ययः।[१६०] रुदमाचरतीति रुदति। आचारार्थे क्विप्। ततो धातुसञ्ज्ञातो लटि तिपि शपि रुदति।[१६१] अतः रुदतीति रुदन्ती इत्थं साधु।[१६२]

## २.३३ गृह्य

अतिवृद्धावन्धदृशौ क्षुत्पिपासार्दितौ निशि।
नायाति सलिलं गृह्य पुत्रः किं वात्र कारणम्॥

– अ०रा० २.७.३१

अत्र महाराजो दशरथः श्रमणकुमारात्सजलं कलशं गृहीत्वा वृद्धदम्पती गतः। सलिलं गृह्य पुत्रो नायाति अत्र किं वा कारणम् – इति तौ चिन्तितवन्तावास्ताम्। ल्यबन्तप्रयोगोऽयम् गृह्य। स च समस्तपदं विनाऽसम्भवः। इह कोऽपि समासो नहीति। मैवम्। प्रगृह्य इति पदम्। तस्य च प्रोपसर्गस्य विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इति वार्त्तिकेन लोपे तथा च जातसंस्कारो न निवर्तते इति परिभाषा-

[१५९] रुदिँर् अश्रुविमोचने धा०पा० १०६७) → रुद् → लक्षणहेत्वोः क्रियायाः (पा०सू० ३.२.१२६) → रुद् शतृँ → सार्वधातुकमपित् (पा०सू० १.२.४) → शतुर्ङिद्वत्त्वम् → रुद् अत् → कर्तरि शप् (पा०सू० ३.१.६८) → रुद् शप् अत् → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → रुद् अत् → क्ङिति च (पा०सू० १.१.५) → लघूपधगुणनिषेधः → रुद् अत् → रुदत् → उगितश्च (पा०सू० ४.१.६) → रुदत् ङीप् → रुदत् ई → रुदती → विभक्तिकार्यम् → रुदती सुँ → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → सुलोपः → रुदती। आच्छीनद्योर्नुम् (पा०सू० ७.१.८०) इति सूत्रेणावर्णान्तादङ्गादुत्तरस्य शतुः शीनद्योः परतः पाक्षिकनुमागमो भवति। शपो लुक्यङ्गस्य हलन्तत्वादेतत्सूत्रं न प्रवर्तते।

[१६०] अजपि सर्वधातुभ्यः (वा० ३.१.१३४) इत्यनेन। बाहुलकाद्भावे। यथा विरुदः इत्यत्र। विरुदशब्दो भावेऽपीत्याप्टेकोशः।

[१६१] रुद → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → रुद क्विँप् → रुद व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → रुद → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → रुद लट् → रुद तिप् → रुद ति → कर्तरि शप् (पा०सू० ३.१.६८) → रुद शप् ति → रुद अ ति → अतो गुणे (पा०सू० ६.१.९७) → रुद ति → रुदति।

[१६२] रुद → धातुसञ्ज्ञा (पूर्ववत्) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → रुद लट् → लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) → रुद शतृँ → रुद अत् → अतो गुणे (पा०सू० ६.१.९७) → रुदत् → उगितश्च (पा०सू० ४.१.६) → रुदत् ङीप् → रुदत् ई → शप्श्यनोर्नित्यम् (पा०सू० ७.१.८१) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → रुद नुँम् त् ई → रुद न् त् ई → रुदन्ती → विभक्तिकार्यम् → रुदन्ती सुँ → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → रुदन्ती। कर्तर्यच्यपि न दोषः। एवं तर्हि रुदतीति रुदः। रुद इवाऽचरतीति रुदति। रुदतीति रुदन्ती। प्रक्रिया पूर्ववत्।

बलेन ल्यबपि न निवृत्त इत्थं नापाणिनीयता। यद्वा गृह्यशब्दो हि क्यप्प्रत्ययान्तः।[१६३] कित्वात्सम्प्रसारणम्।[१६४] एवं गृह्यो ग्रहीतुं योग्यः पुत्रः सौम्यः इति तात्पर्यम्।[१६५] तथा च गृह्यश्चासौ पुत्रश्चेति गृह्यपुत्रः इति कर्मधारयः। आदाय इति चाध्याहार्यम्।[१६६]

## २.३४ क्रन्दमानौ

हाहेति क्रन्दमानौ तौ पुत्रपुत्रेत्यवोचताम्।
जलं देहीति पुत्रेति किमर्थं न ददास्यलम्॥

– अ०रा० २.७.४३

अत्र मुमूर्षुदम्पत्योर्दशां कौशल्यासमक्षं दशरथो वर्णयति हाहेति क्रन्दमानौ तौ। क्रन्द् धातुः (क्रदिँ आह्वाने रोदने च धा०पा० ७१) परस्मैपदी। इदितो नुम् धातोः (पा०सू० ७.१.५८) इत्यनेन नुम् । ततश्च क्रन्दत इति क्रन्दन्तौ अयमेव प्रयोगः सामान्यतः पाणिनीयः। क्रन्दमानौ इति कथमिति चेत्। कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेनात्रात्मनेपदम्। कर्मव्यतिहारो नाम कार्यपरिवर्तनम्। अन्यस्य योग्यं लवनमन्यः करोति व्यतिलुनीते (वै०सि०कौ० २६८०)। तथैवाऽत्र साधारणजीवाचरितं क्रन्दनं तपःपूतावपीमौ कुरुतः। अत आत्मनेपदम्। क्रन्देते इति क्रन्दमानौ। शानच्प्रत्यये शप्यनुबन्धकार्ये आने मुक् (पा०सू० ७.२.८२) इत्यनेन मुगागमे विभक्तिकार्ये क्रन्दमानौ। यद्वा क्रन्दतीति क्रन्दम् । क्रन्दनशीलम्। पचादित्वादच्।[१६७] क्रन्दं मानं शरीरदशा ययोस्तौ क्रन्दमानौ इति बहुव्रीहौ नापाणिनीयताशङ्कापङ्ककलङ्कावकाशः।

## २.३५ विलपितम्

असमर्प्यैव रामाय राज्ञे मां क्व गतोऽसि भोः।
इति विलपितं पुत्रं पतितं मुक्तमूर्धजम्॥

– अ०रा० २.७.६७

दशरथमरणानन्तरं वसिष्ठनिर्देशाद्धावकैरयोध्यां नीतो भरतः कैकयीतः सकल-वृत्तान्तं विज्ञायोपरतं पितरमुद्दिश्य विलपति। असमर्प्यैव इत्यादि। अत्र विलपितम् इति भरतस्य विशेषणं विलपितं पुत्रम् इति। क्तप्रत्ययस्य कर्मणि भावे च विधानात्

[१६३] पदास्वैरिबाह्यापक्ष्येषु च (पा०सू० ३.१.११९) इत्यनेन।
[१६४] ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च (पा०सू० ६.१.१६) इत्यनेन।
[१६५] अस्वैरीति भावः। गृह्यः, त्रि० (गृह्यते स्वाम्यादिभिरिति। ग्रह + क्यप्।), अस्वैरी। अस्वतन्त्रः। पक्षः। इति विश्वमेदिन्यौ इति शब्दकल्पद्रुमः।
[१६६] सलिलमादाय गृह्यपुत्रो नायाति अत्र किं वा कारणम् इति योजना।
[१६७] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन।

क्तवतुप्रत्ययस्य पारिशेष्यात्कर्तरि विधानात् विलपितवन्तं पुत्रम् इति प्रयोक्तव्यमासीत्। किन्त्वविवक्षातः कर्मणो धातुमिममकर्मकं मत्वा[१६८] गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च (पा०सू० ३.४.७२) इत्यनेन कर्तरि क्तप्रत्ययः। यद्वा भावे क्तप्रत्यये कृते[१६९] विलपितमस्त्यस्य इत्यर्शआद्यजन्तं विलपितम्।[१७०] अथवा विलपनं विलपः। पचाद्यच्।[१७१] विलपमितो विलपितस्तं विलपितम् इति द्वितीयान्तविलपशब्दस्य क्तान्त-इतइत्यनेन समासः। शकन्ध्वादित्वात्पूर्वोक्तदिशा पररूपे विलपितम्। यद्वा विलपशब्दं तारकादिगणे मत्वा विलपोऽस्य सञ्जातः इति विग्रहे तदस्य सञ्जातं तारकादिभ्य इतच् (पा०सू० ५.२.३६) इत्यनेनेतच्यनुबन्धकार्ये भसञ्ज्ञालोपयोर्विभक्तिकार्ये विलपितम्।[१७२] यद्वा विलपमाचष्टे विलपं करोति वा विलपयति।[१७३] विलपयतीति विलपितस्तं विलपितम्।[१७४] इत्थमाचक्षाणणिजन्तात्कर्तरि क्तप्रत्ययः।[१७५] श्रीराम एव स्वयं विलपित इव। वस्तुतस्तु तस्य हृदये भक्तिभावेन सदाऽपि श्रीरामः सन्निहित एव। केवलं भावुकेभ्यो भरतः प्रेमदिग्दर्शनं कारयति।

## २.३६ दूरे स्थाप्य

तीर्त्वा गङ्गां ययौ शीघ्रं भरद्वाजाश्रमं प्रति।
दूरे स्थाप्य महासैन्यं भरतः सानुजो ययौ॥

– अ०रा० २.८.४१

अत्र समस्तपदं विनाऽपि स्थाप्य इति ल्यबन्तप्रयोगः कथमिति चेत्। अत्र मयूर-

---

[१६८] धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसङ्ग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥ (वा०प० ३.७.८८)।

[१६९] नपुंसके भावे क्तः (पा०सू० ३.३.११४) इत्यनेन।

[१७०] अर्शआदिभ्योऽच् (पा०सू० ५.२.१२७) इत्यनेन।

[१७१] अजपि सर्वधातुभ्यः (वा० ३.१.१३४) इत्यनेन। बाहुलकाद्भावे।

[१७२] यचि भम् (पा०सू० १.४.१८) इत्यनेन भसञ्ज्ञा। यस्येति च (पा०सू० ६.४.१४८) इत्यनेनालोपः। अमि विभक्तौ अमि पूर्वः (पा०सू० ६.१.१०७) इत्यनेन पूर्वरूपम्।

[१७३] विलप → तत्करोति तदाचष्टे (धा०पा० ग०सू०) → विलप णिच् → विलप इ → णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरार्थम् (वा० ६.४.४८) → विलप् इ → विलपि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → विलपि तिप् → विलपि ति → कर्तरि शप् (पा०सू० ३.१.६८) → विलपि शप् ति → विलपि अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → विलपे अ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → विलपय् अ ति → विलपयति।

[१७४] विलपि → पूर्ववद्धातुसञ्ज्ञा → गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च (पा०सू० ३.४.७२) → विलपि क्त → विलपि त → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → विलपि इट् त → विलपि इ त → निष्ठायां सेटि (पा०सू० ६.४.५२) → विलप् इ त → विलपित → विभक्तिकार्यम् → विलपित अम् → अमि पूर्वः (पा०सू० ६.१.१०७) → विलपितम्।

[१७५] गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च (पा०सू० ३.४.७२) इत्यनेन कर्तरि क्तः।

व्यंसकादित्वात्समासः।[१७६] तथा च हलदन्तात्सप्तम्या सञ्ज्ञायाम् (पा०सू० ६.३.९) इत्यनेन सप्तम्या अलुक्ततो ल्यप्प्रत्यये[१७७] दूरेस्थाप्य इति। यद्वा दूरे इति सप्तमीप्रतिरूपकाव्ययं ततश्च सुविभक्तेरेव अव्ययादाप्सुपः (पा०सू० २.४.८२) इत्यनेन लुक्। इत्थं दूरेस्थाप्य इति साधु।[१७८]

॥ इत्ययोध्याकाण्डीयप्रयोगाणां विमर्शः ॥

इत्यध्यात्मरामायणेऽपाणिनीयप्रयोगाणांविमर्शनामके शोधप्रबन्धे द्वितीयाध्याये प्रथमपरिच्छेदः।

---

१७६ मयूरव्यंसकादयश्च (पा०सू० २.१.७२) इत्यनेन।

१७७ समासेऽनञ्पूर्वे क्त्वो ल्यप् (पा०सू० ७.१.३७) इत्यनेन क्त्वो ल्यबादेश इति भावः।

१७८ यद्वाऽत्र संस्थाप्य इति प्रयोगः। विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इत्यनेन सम् उपसर्गस्य लोपः।

॥ अथ द्वितीयाध्याये द्वितीयः परिच्छेदः ॥

॥ अथारण्यकाण्डीयप्रयोगाणां विमर्शः ॥

## २.३७ यातः

को वा दयालुः स्मृतकामधेनुरन्यो जगत्यां रघुनायकादहो।
स्मृतो मया नित्यमनन्यभाजा ज्ञात्वा स्मृतिं मे स्वयमेव यातः॥

– अ०रा० ३.२.८

अत्र आयातः इत्यर्थे यातः इति प्रयुक्तम्। यतो हि आङ्उपसर्गस्य लोपे सति[१७९] यः शिष्यते स लुप्यमानार्थाभिधायी[१८०] इत्यनेन तादृशार्थस्य बोधकत्वात्।

## २.३८ अरूपिणः

पश्यामि राम तव रूपमरूपिणोऽपि
मायाविडम्बनकृतं सुमनुष्यवेषम्।
कन्दर्पकोटिसुभगं कमनीयचाप-
बाणं दयार्द्रहृदयं स्मितचारुवक्त्रम्॥

– अ०रा० ३.२.३२

अत्र न रूपमरूपम्।[१८१] अरूपमस्त्यस्येत्यरूपी तस्यारूपिणः।[१८२] अत्र न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः[१८३] अयं नियमो जागरूकः। तस्मात् नास्ति रूपं यस्य सोऽरूपस्तस्यारूपस्य इति बहुव्रीहावेवार्थबोधे अरूपिणः इति कथमिति चेत्। अरूपिणः इत्यत्र बहुव्रीहेरीप्सितोऽर्थो न लभ्यते। यतो ह्यत्र प्राशस्त्ये भूमत्वे नित्ययोगे चेनिः।[१८४] भगवतो रूपस्य भूयस्त्वं प्रशस्तत्वञ्च नित्ययोगत्वमपि सिद्धमेव।

[१७९] विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इत्यनेन।

[१८०] मूलं मृग्यम्।

[१८१] नञ् (पा०सू० २.२.६) इत्यनेन नञ्तत्पुरुषसमासे नलोपो नञः (पा०सू० ६.३.७३) इत्यनेन नलोपे विभक्तिकार्ये सिद्धम्।

[१८२] अत इनिठनौ (पा०सू० ५.२.११५) इत्यनेन अरूपप्रातिपदिकान्मत्वर्थीये इनिप्रत्यये विभक्तिकार्ये सिद्धम्।

[१८३] मूलं मृग्यम्।

[१८४] भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने। सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः॥ (भा०पा०सू० ५.२.९४)।

तद्बहुव्रीहिणा कथमपि लब्धुमशक्यत्वात्।[१८५] अथवा अरूपयितुं तच्छील इत्यरूपी तस्यारूपिणः इति ताच्छील्ये णिनिः। सुप्यजातौ णिनिस्ताच्छील्ये (पा०सू० ३.२.७८) इति सूत्रेण।

## २.३९ मदुपासनात्

इत्येवं स्तुवस्तस्य रामः सुस्मितमब्रवीत्।
मुने जानामि ते चित्तं निर्मलं मदुपासनात्॥

– अ०रा० ३.२.३५

अत्र ण्यासश्रन्थो युच् (पा०सू० ३.३.१०७) इत्यनेन युच्कथं न। मदुपासनात् इत्यपाणिनीय इव।[१८६] अत्र ल्युट् च (पा०सू० ३.३.११५) इत्यनेन भावे नपुंसके ल्युट्।[१८७] लकारटकारयोरनुबन्धकार्ये युवोरनाकौ (पा०सू० ७.१.१) इत्यनेनानादेशे पञ्चम्येकवचने मदुपासनात्।[१८८]

## २.४० ध्यायमानः काङ्क्षमाणः

शीघ्रमानय भद्रं ते रामं मम हृदि स्थितम्।
तमेव ध्यायमानोऽहं काङ्क्षमाणोऽत्र संस्थितः॥

– अ०रा० ३.३.१०

प्रयोगाविमावध्यात्मरामायणेऽरण्यकाण्डस्य तृतीयसर्गीयौ। श्रीरामभद्रः सीता-लक्ष्मणसमेतः पावितमुनिजननिकेतोऽगस्त्यस्याश्रममुपतिष्ठमानः[१८९] सुतीक्ष्णेन सूचयति। रामागमनश्रवणसञ्जातहर्षोऽगस्त्यः प्रोवाच यत् राममानयाहं तमेव ध्यायमानस्तिष्ठामि। ध्यै धातुः (ध्यै चिन्तायाम् धा०पा० ९०८) परस्मैपदी। तथा सति लटि तिपि शपि गुणेऽयादेशे

[१८५] न भूमप्रशस्तनित्ययुक्तं रूपमस्येत्यरूपी तस्यारूपिणोऽपि तद्वद्रूपं पश्यामीति भावः। अस्मिन्नेव पद्ये सुमनुष्यवेषं कन्दर्पकोटिसुभगं कमनीयचापबाणं स्मितचारुवक्त्रम् इति प्राशस्त्यमुक्तम्। अन्यच्चास्मिन् ग्रन्थे रामश्चापधरो नित्यं तूणीबाणान्वितः प्रभुः (अ०रा० १.३.६२) इत्यत्र चापतूणीबाणसहितरूपस्य नित्ययोग उक्तः। अहल्यास्तुतौ च कार्यकारणकर्तृत्वफलसाधनभेदतः। एको विभासि राम त्वं मायया बहुरूपया॥ (अ०रा० १.५.५४) इत्यत्र श्रीरामभद्रस्य रूपभूमत्वं चोक्तम्।

[१८६] कर्तृभिन्नकारके युचि तु उपासना इति रूपम्। तस्मात् मदुपासनायाः इति पञ्चम्यन्तरूपम्। यथा योगसूत्रे भोजवृत्तौ उपासनायाः फलमाह (यो०सू० भो०वृ० १.२८) इति षष्ठ्यन्तरूपम्।

[१८७] एतेन उपासनम् इत्यपि पाणिनीयम्। वरिवस्या तु शुश्रूषा परिचर्याऽप्युपासनम् (अ०पु० ३६५.७) इत्यग्निपुराणप्रयोगादपि। अमरकोषे तु वरिवस्या तु शुश्रूषा परिचर्याऽप्युपासना (अ०को० २.६.३५) इति पाठः।

[१८८] यथा तत्रैव योगसूत्रे भोजवृत्तौ उपासनमाह (यो०सू० भो०वृ० १.२८) इति द्वितीयान्तरूपम्।

[१८९] उपतिष्ठमानः इत्यत्र उपाद्देवपूजासङ्गतकरणमित्रकरणपथिष्विति (वा० १.३.२४) इत्यनेन सङ्गतकरणे पथि वाऽऽत्मनेपदम्। यद्वा वा लिप्सायाम् (वा० १.३.२४) इत्यनेन।

ध्यायति। शतरि च ध्यायतीति ध्यायन् इत्येव प्रयोगः। ध्यायमानः इति कथम्। अत्र कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यात्मनेपदम्। यतो हि ध्यानस्य बुद्धिविषयत्वात्तदेव ध्यानमहंपदवाच्यप्रत्यग्भिन्नचैतन्य आत्मन्यारोप्यतेऽतः कर्मव्यतिहारतयाऽऽत्मनेपदम्। ततश्च ध्यायत इति ध्यायमानः इति विग्रहे ध्यै धातोर्लटि[१९०] तस्य शानजादेशे[१९१] शपि आने मुक् (पा०सू० ७.२.८२) इत्यनेन मुगागमे विभक्तिकार्ये ध्यायमानः। अथवा ध्यायम् ध्यायम् इत्याभीक्ष्ण्ये णमुल्।[१९२] प्रथमस्य ध्यायम् इत्यस्य लोपे आसमन्तादनितीत्यानः।[१९३] ततो वर्णसम्मेलने ध्यायमानः। एवमेव काङ्क्षमाणः इत्यत्रापि काङ्क्षति इति परस्मैपदी। तत्रापि कर्म-व्यतिहार आत्मनेपदं ततः शानच्।[१९४]

## २.४१ प्रतीक्षन्

त्वदागमनमेवाहं प्रतीक्षन्समवस्थितः।
यदा क्षीरसमुद्रान्ते ब्रह्मणा प्रार्थितः पुरा॥

– अ०रा० ३.३.१८

सीतालक्ष्मणसेव्यमानो निर्मानो भगवान् श्रीरामोऽगस्त्यदर्शनार्थमाश्रम-द्वार्युपस्थितः। तदागमनश्रवणसञ्जातकुतूहलो विह्वलोऽगस्त्यः प्रणिजगाद यत् अहमपि भगवत आगमनं प्रतीक्षे। अत्र प्रतिपूर्वकः ईक्ष् धातुः (ईक्षँ दर्शने धा०पा० ६१०) आत्मनेपदी दर्शनार्थः। ततश्च प्रतीक्षते इति विग्रहे शानच्प्रत्यये कृते[१९५] मुगागमे[१९६] विभक्तिकार्ये प्रतीक्षमाणः इति पाणिनीयः। आत्मनेपदीयत्वाद्दुर्गमः शतृप्रत्ययः। एवं प्रतीक्षन् इति कथमिति चेत्। उच्यते। अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) इति नियमेन परस्मैपदीयत्वाच्छतृप्रत्यये प्रतीक्षन्। यद्वा प्रतीक्षणं प्रतीक्षा इति विग्रहे भावे आङ्

---

[१९०] वर्तमाने लट् (पा०सू० ३.२.१२३) इत्यनेन।

[१९१] लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) इत्यनेन।

[१९२] आभीक्ष्ण्ये णमुल् च (पा०सू० ३.४.२२) इत्यनेन।

[१९३] आङ्उपसर्गपूर्वकात् अनँ प्राणने (धा०पा० १०७०) इति धातोः नन्दिग्रहपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन पचाद्यचि।

[१९४] काङ्क्षा तु सांसारिकाणां जनानां कृते। अगस्त्यश्चर्षिः। दिव्यदृष्ट्या भगवद्रूपद्रष्टर्षिर्भूत्वाऽपि लौकिकनेत्र-लाभार्थं भगवद्दर्शनकाङ्क्षामाचरतीति कर्मव्यतिहारविवक्षायामात्मनेपदम्। एवमेव न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च (भ०गी० १.३२) इत्यत्र। विजयराज्यसुखानामकाङ्क्षा न राजोचिता।

[१९५] लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) इत्यनेन।

[१९६] आने मुक् (पा०सू० ७.२.८२) इत्यनेन।

औणादिकप्रत्यये[१९७] प्रतीक्षां करोतीति प्रतीक्षयति।[१९८] प्रतीक्षयतीति प्रतीक्षः।[१९९] प्रतीक्ष इवाऽऽचरन्निति प्रतीक्षन्।[२००] एवं आचक्षाणणिजन्तान्तकर्तर्यच्। तत आचारे क्विप्प्रत्यये लटि शतरि शपि पररूपे विभक्तिकार्ये प्रतीक्षन्।

## २.४२ समीपतः

एकदा गौतमीतीरे पञ्चवट्यां समीपतः।
पद्मवज्राङ्कुशाङ्गानि पदानि जगतीपतेः॥

– अ०रा० ३.५.२

अत्र विश्लेषाभावात् ध्रुवमपायेऽपादानम् (पा०सू० १.४.२४) इत्यनेनापादानसञ्ज्ञा तु नैव विचारसहा। तदभावे पञ्चम्यास्तसिल् (पा०सू० ५.३.७) इत्यनेन तसिल्प्रत्ययोऽपि नोपयुक्तः। तथा च सामीप्यवाचकशब्दात्सप्तम्यर्थ एव तसिप्रकरण आद्यादिभ्य उपसङ्ख्यानम् (वा० ५.४.४४) इत्यनेन तसिप्रत्यये सिद्धमिदम्।[२०१] समीप एव समीपतः। न चात्र समीप-वाचकशब्दे कथं सप्तमीति चेत्। सप्तम्यधिकरणे च (पा०सू० २.३.३६) इत्यत्र चकारग्रहणेन

---

[१९७] गुरोश्च हलः (पा०सू० ३.३.१०३) इत्यनेन स्त्रियां भावे अप्रत्यये अजाद्यतष्टाप् (पा०सू० ४.१.४) इत्यनेन टापि वा। २६७तमे पृष्ठे २.३१ अवेक्षती इति प्रयोगस्य विमर्शं पश्यन्तु।

[१९८] प्रतीक्षा → तत्करोति तदाचष्टे (धा०पा० ग०सू० १८७) → प्रतीक्षा णिच् → प्रतीक्षा इ → णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरार्थम् (वा० ६.४.४८) → प्रतीक्ष् इ → प्रतीक्षि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → प्रतीक्षि लट् → प्रतीक्षि तिप् → कर्तरि शप् (पा०सू० ३.१.६८) → प्रतीक्षि शप् तिप् → प्रतीक्षि अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → गुणः → प्रतीक्षे अ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → प्रतीक्षय् अ ति → प्रतीक्षयति।

[१९९] प्रतीक्षि → पूर्ववद्धातुसञ्ज्ञा → नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) → प्रतीक्षि अच् → प्रतीक्षि अ → णेरनिटि (पा०सू० ६.४.५१) → प्रतीक्ष् अ → प्रतीक्ष → विभक्तिकार्यम् → प्रतीक्षः।

[२००] प्रतीक्ष → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → प्रतीक्ष क्विँप् → प्रतीक्ष व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → प्रतीक्ष → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → प्रतीक्ष लट् → लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) → प्रतीक्ष शतृँ → प्रतीक्ष अत् → कर्तरि शप् (पा०सू० ३.१.६८) → प्रतीक्ष शप् अत् → प्रतीक्ष अ अत् → अतो गुणे (पा०सू० ६.१.९७) → प्रतीक्ष अत् → अतो गुणे (पा०सू० ६.१.९७) → प्रतीक्षत् → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपदिकसञ्ज्ञा → विभक्तिकार्यम् → प्रतीक्षत् सुँ → उगिदचां सर्वनामस्थानेऽधातोः (पा०सू० ७.१.७०) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → प्रतीक्ष नुँम् त् सुँ → प्रतीक्ष न् त् सुँ → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → प्रतीक्ष न् त् → संयोगान्तस्य लोपः (पा०सू० ८.२.२३) → प्रतीक्षन्।

[२०१] तसेः सार्वविभक्तिकत्वं तदन्तानामाकृतिगणत्वं च ९४तमे पृष्ठे ८६तम्यां पादटिप्पण्यां स्पष्टीकृतम्।

दूरान्तिकार्थवाचकशब्देभ्यः सप्तमी।[२०२] समीपं ह्यन्तिकार्थवाचकं ततः सप्तमी।

## २.४३ कनीयान्

एषा मे सुन्दरी भार्या सीता जनकनन्दिनी।
स तु भ्राता कनीयान्मे लक्ष्मणोऽतीवसुन्दरः॥

– अ०रा० ३.५.९

अत्र श्रीरामो लक्ष्मणस्य परिचयं कारयति यत् स मे कनीयान् भ्राता। ईयसुन् प्रत्ययो हि यत्र द्वयोर्विभागः।[२०३] अत्र रामापेक्षया कनीयान् भरतः। कथं लक्ष्मणं कनीयांसं कथयतीति चेत्। अत्र रामलक्ष्मणयोर्द्वयोरेव विवक्षितत्वात्। भरतशत्रुघ्नावयोध्यायामरण्ये रामलक्ष्मणौ। अनयोर्द्वन्द्वः शाश्वतः शेषशेषिभावात्। लीलायामपि रामलक्ष्मणयोः संयोगः सर्वत्र प्रसिद्धः। अतः शब्दार्थसन्देहे विशेषस्मृतिहेतूनां परिगणनावसरे साहचर्य उदाहरणं रामलक्ष्मणौ।[२०४] यद्यपि लक्ष्मणशब्दस्य द्वावर्थौ लक्ष्मणो दाशरथिलक्ष्मणो दुर्योधनपुत्रश्च किन्तु रामसाहचर्यादत्र दाशरथिर्लक्ष्मण एवार्थबोधविषयो भवति। एवं रामशब्दस्य त्रयोऽर्था रामो जामदग्न्यो रामो दाशरथी रामो वासुदेवश्चेति। अत्रोच्चरिते रामशब्द उपस्थितेषु त्रिष्वर्थेषु को रामो गृह्यतामिति चेत् रामलक्ष्मणौ इति कथनेन दशरथपुत्रस्य ग्रहणं भवति। अध्यात्म-रामायणेऽपि –

लक्ष्मणो रामचन्द्रेण शत्रुघ्नो भरतेन च।
द्वन्द्वीभूय चरन्तौ तौ पायसांशानुसारतः॥

– अ०रा० १.३.४२

यद्वा मे इत्युच्चारण आत्मानं भ्रातृसमुदायात्पृथक्करोति। ज्येष्ठस्य भ्रातुः पितृवद्दायित्वं लोकप्रसिद्धम्।[२०५] अतस्ते सन्ति त्रयो भ्रातरः। षष्ठी पालकपाल्यभावसम्बन्धे। अहं त्रयाणां भ्रातृणां पालको ज्येष्ठत्वात्। उपरते पितरि मे मय्येव सर्वेषामुत्तरदायित्वम्। वाल्मीकीयेऽपि विभीषणं शरणागतं स्वीकुर्वञ्छ्रीरामभद्रो रावणहननाय त्रयाणां भ्रातृणां शपथं करोति। यथा –

---

[२०२] चकाराद्दूरान्तिकार्थेभ्यश्च … दूरान्तिकार्थेभ्यः खल्वपि। दूरे ग्रामस्य। अन्तिके ग्रामस्य। अभ्याशे ग्रामस्य (का०वृ० २.३.३६)। चकाराद्दूरान्तिकार्थेभ्यः (वै०सि०कौ० ६३३)।

[२०३] द्विवचनविभज्योपपदे तरबीयसुनौ (पा०सू० ५.३.५७) इत्यनेन।

[२०४] संसर्गो विप्रयोगश्च साहचर्यं विरोधिता। अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥ सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः। शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥ (वा०प० २.३१५-३१६)।

[२०५] पितेव पालयेत्पुत्रान् ज्येष्ठो भ्रातृन् यवीयसः। पुत्रवच्चापि वर्तेरन् ज्येष्ठे भ्रातरि धर्मतः॥ (म०स्मृ० ९.१०८)।

अहत्वा रावणं सङ्ख्ये सपुत्रबलवाहनम्।
अयोध्यां न प्रवेक्ष्यामि भ्रातृभिश्च त्रिभिः शपे॥

– वा०रा० ६.४१.७

इत्थं मम त्रिषु भ्रातृषु ज्येष्ठो भ्राता भरतोऽयोध्यामधितिष्ठति ततो लक्ष्मणः कनीयानिति श्रीरामचन्द्रस्य तात्पर्यं प्रतिभाति। अस्मादेव कारणात् स तु भ्राता कनीयान्मे इत्यत्र षष्ठी। अन्यथा पञ्चमी विभक्ते (पा०सू० २.३.४२) इति सूत्रेण विभज्यमाने पञ्चमी स्यात्। तथा च द्विवचनविभज्योपपदे तरबीयसुनौ (पा०सू० ५.३.५७) इत्यनेन द्विवचनविभज्यमान-वाचक उपपदे तरप् ईयसुन् च प्रत्ययो भवति। तत्र च पञ्चम्यनिवार्या। यथा रामाच्छ्यामो लघुतरः। रामाद्भरतः कनीयान्। अतः षष्ठीं दृष्ट्वाऽत्र रामस्य समुदायात्पृथग्भूतत्वं प्रतीयते। यद्वा भ्रियन्ते पुष्यन्त इति भ्रातरः।[२०६] तथा च रामः खलु निर्गुणो महा-विष्णू राम एव परब्रह्मेत्युत्तरतापनीयश्रुतेः।[२०७] एवं तस्य महाविष्णोर्भगवतः परात्परब्रह्मणः श्रीरामचन्द्रस्य त्रयोंऽशा ब्रह्मविष्णुमहेशाख्याः। ब्रह्मा खलु शत्रुघ्नो विष्णुर्भरतो लक्ष्मणः शिवः। कर्पूरगौरत्वाच्छिवस्य लक्ष्मणो गौरो विष्णोश्च श्यामतया भरतः श्यामो विष्णुत्वेन जनकत्वाद्ब्रह्मावतारः शत्रुघ्नो भरतं जनकमिवान्वञ्चति। अतस्तेषु पोष्यमाणेषु भ्रातृरूपेषु त्रिष्वंशेषु लक्ष्मणः कनीयान्। यद्वा –

---

[२०६] भ्रातृशब्दो भ्रातृपुत्रौ स्वसृदुहितृभ्याम् (पा०सू० १.२.६८) इति सूत्रकारप्रयोगादेव सिद्धः। नप्तृनेष्टृत्वष्टृ-होतृपोतृभ्रातृजामातृमातृपितृदुहितृ (प०उ० २.९५) इत्युणादिसूत्रपाठभेदेन तृनन्तस्तृजन्तो वा निपात्यते। अन्यत्र नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृ जामातृपितृदुहितृ (प०उ० २.९५) इति भ्रातृशब्दरहितः पाठः। कोशेषूणादि-सूत्रटीकासु विविधा व्युत्पत्तयः। भ्राज-तृच् पृषो० इति वाचस्पत्यम्। भ्राजते इति भ्राज + नप्तृनेष्टृत्वष्टृ-होत्रिति प०उ० २.९६ इति तृन्। निपात्यते च इति शब्दकल्पद्रुमः। भ्राजते। भ्राजृँ दीप्तौ (भ्वा०आ०से०)। 'नप्तृनेष्टृ-' इति साधु (अ०को० व्या०सु० २.६.३६) इति व्याख्यासुधा। भ्राजते दीप्यतेऽसौ भ्राता सोदर्यो वा (उ०को० २.९५) इति दयानन्दसरस्वती। भ्राजृँ दीप्तौ (पा०सू० १८१) इत्यस्मात् टुभ्राजृँ दीप्तौ (धा०पा० ८३३) इत्यस्माद्वा तृनि तृचि वा पृषोदरादित्वाज्जकारलोप इत्येषां भावः। 'भज सेवायाम्' इति भ्राता (प०उ० श्वे०वृ० २.९५) इति श्वेतवनवासिवृत्तिपाठभेदः। भजँ सेवायाम् (धा०पा० ९९८) इत्यस्मात्तृनि तृचि वा पृषोदरादित्वाज्जकारलोपो भ्रादेश्चेति भावः। अत्र प्रणेतारो भ्रियन्ते पुष्यन्त इति भ्रातरः इति। भृञ् भरणे (धा०पा० ८९८) इत्यस्माद्धातोः कर्मणि तृनि तृचि वा गुणे रपरत्वे पृषोदरादित्वात् भर् इत्यस्य भ्रा इत्यादेशे भ्रातृ इति भावः। न च कथं कर्मणि तृन्तृजौ कर्तरि कृत् (पा०सू० ३.४.६७) इत्यनेन कृतां कर्तर्येव विधानात्। ताभ्यामन्यत्रोणादयः (पा०सू० ३.४.७५) इत्यनेन कर्मण्यपीति दिक्। यद्वा उणादयो बहुलम् (धा०पा० ८९८) इत्यत्र बहुलग्रहणादुणादयः क्वचित्कर्मण्यपि।

[२०७] ॐ यो वै श्रीरामचन्द्रः स भगवान् य ॐ नमो भगवते वासुदेवाय महाविष्णुर्भूर्भुवःस्वस्तस्मै वै नमो नमः (रा०उ०ता०उ० ५.४४)।

स्थूलं चाष्टभुजं प्रोक्तं सूक्ष्मं चैव चतुर्भुजम्।
परं च द्विभुजं रूपं तस्मादेतत्त्रयं यजेत्॥

– आ०सं०[२०८]

द्वाभ्यां भुजाभ्यां भक्तस्य योगं क्षेमं च वहत्यथवा द्वाभ्यां भुजाभ्यां ज्ञानप्रधानांश्च भागवतान् भुनक्ति। त्रिपुरसुन्दरीतन्त्रे तस्य भगवतो महाविष्णोः श्रीरामभद्रस्येमे त्रयो विष्णव एवांशाः। तत्र क्षीरशायी भरतो वैकुण्ठाधीशो लक्ष्मणः।[२०९] वैकुण्ठाधीशस्य शुक्लवर्णता पुराणे प्रसिद्धा यथा –

केनोपयान चैतेषां दुःखनाशो भवेद्ध्रुवम्।
इति सञ्चिन्त्य मनसा विष्णुलोकं गतस्तदा॥
तत्र नारायणं देवं शुक्लवर्णं चतुर्भुजम्।
शङ्खचक्रगदापद्मवनमालाविभूषितम्॥

– स्क०पु० रे०ख० २३३.५,६

एवमेव लक्ष्मणस्याऽपि गौराङ्गता स्पष्टा। क्षीराब्धिस्वामी श्यामलो यथा –

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्॥

तथा क्षीराब्धिस्वामी भरतो वैकुण्ठविहारी विष्णुर्लक्ष्मणो भूमा शत्रुघ्नो रामः सनातनं ब्रह्म। तथा चोक्तं बृहद्ब्रह्मसंहितायां यत् –

क्षीराब्धीशस्तु भरतो वैकुण्ठेशस्तु लक्ष्मणः।
भूमा तु शत्रुघ्नो ज्ञेयो रामो ब्रह्म सनातनम्॥

– बृ०ब्र०सं०

अतो मे त्रयो भ्रातरोंऽशाः। तत्र क्षीरशायिभरतापेक्षया वैकुण्ठेशो लक्ष्मणः कनीयानित्येव हार्दं हरेः।

---

२०८ मूलं मृग्यम्। शिवसहायकृताया रामायणशिरोमण्याख्यायाष्टीकाया मङ्गलाचरणे एष श्लोक उद्धृतः। तत्र इत्यानन्दसंहितावचनं च इत्युक्तम्।

२०९ मूलं वैष्णवागमग्रन्थेषु मृग्यम्।

## २.४४ क्रन्दमाना

क्रन्दमाना पपाताग्रे खरस्य परुषाक्षरा।
किमेतदिति तामाह खरः खरतराक्षरः॥

– अ०रा० ३.५.२१

अत्र शूर्पणखापरिस्थितिं वर्णयति। क्रन्दमाना इति। आह्वाने रोदने च क्रन्द् - धातुः (क्रदिँ आह्वाने रोदने च धा०पा० ७१) परस्मैपदी। ततश्चात्र शत्रा भवितव्यम्। एवं क्रन्दतीति क्रन्दन्ती इत्येव पाणिनीयम्।[२१०] अत्र तु क्रन्दमाना इति।[२११] क्रन्दते इति कर्म-व्यतिहारादात्मनेपदम्।[२१२] क्रन्दत इति क्रन्दमाना इति शानचि शपि मुकि टापि च कृते सिद्धम्।[२१३] यद्वाऽत्र वैक्लव्ये क्रन्द् धातुः (क्रदिँ वैकल्ये धा०पा० ७७३) आत्मनेपदी। ततः शानचि टापि क्रन्दमाना। यद्वेममाकृतिगणत्वात्स्वरितेतं पठित्वा स्वरितञितः कर्त्रभिप्राये क्रियाफले (पा०सू० १.३.७२) इत्यनेनाऽत्मनेपदत्वाच्छानचि शपि मुकि टापि क्रन्दमाना।[२१४]

---

२१० यथा भागवते – गौर्भूत्वाऽश्रुमुखी खिन्ना क्रन्दन्ती करुणं विभोः (भा०पु० १०.१.१८)। अत्र रुदन्ती इत्यपि पाठः।

२११ एवमेव भारते शल्यपर्वणि – शोचन्त्यस्तत्र रुरुदुः क्रन्दमाना विशाम्पते (म०भा० ९.२९.७०)।

२१२ कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन।

२१३ क्रदिँ आह्वाने रोदने च (धा०पा० ७१) → क्रद् → इदितो नुम् धातोः (पा०सू० ७.१.५८) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → क्र नुँम् द् → क्र न् द् → नश्चापदान्तस्य झलि (पा०सू० ८.३.२४) → क्रंद् → अनुस्वारस्य ययि परसवर्णः (पा०सू० ८.४.५८) → क्रन्द् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → वर्तमाने लट् (पा०सू० ३.२.१२३) → क्रन्द् लट् → लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) → क्रन्द् शानच् → क्रन्द् आन → कर्तरि शप् (पा०सू० ३.१.६८) → क्रन्द् शप् आन → क्रन्द् अ आन → आने मुक् (पा०सू० ७.२.८२) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → क्रन्द् अ मुँक् आन → क्रन्द् अ म् आन → क्रन्दमान → अजाद्यतष्टाप् (पा०सू० ४.१.४) → क्रन्दमान टाप् → क्रन्दमान आ → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → क्रन्दमाना।

२१४ बहुलमेतन्निदर्शनम् (धा०पा० ग०सू० १९३८) आकृतिगणोऽयम् (धा०पा० ग०सू० १९९२) भूवादिष्वेतदन्तेषु दशगणीषु धातूनां पाठो निदर्शनाय तेन स्तम्भुप्रभृतयः सौत्राश्चुलुम्पादयो वाक्यकारीयाः प्रयोगसिद्धा विक्लवत्यादयश्च (मा०धा०वृ० १०.३२८) इत्यनुसारमाकृतिगणत्वाद्भ्वादिगण ऊह्योऽयं स्वरितेद्धातुः। तेन क्रन्दति क्रन्दते इति सिध्यतः। क्रन्दति यथा वामनपुराणे – सिंहाभिपन्नो विपिने यथैव मत्तो गजः क्रन्दति वेदनार्तः (वाम०पु० १०.४७) गरुडपुराणे च – गच्छन्वनानि रौद्राणि दृष्ट्वा क्रन्दति तत्र सः (ग०पु० २.१६.१३)। क्रन्दते यथा ब्रह्मपुराणे – यदैव क्रन्दते जन्तुर्दुःखार्तः पतितः क्वचित् (ब्र०पु० २१४.१००) गरुडपुराणे च – हाहेति क्रन्दते नित्यं कीदृशं तु मया कृतम् (ग०पु० २.१५.८५)। एतेन पूर्वोक्तभारतप्रयोगोऽपि व्याख्यातः।

## २.४५ घोररूपिणः

सीतां नीत्वा गुहां गत्वा तत्र तिष्ठ महाबल।
हन्तुमिच्छाम्यहं सर्वान् राक्षसान् घोररूपिणः॥

– अ०रा० ३.५.३०

खरदूषणौ दृष्ट्वा निर्वासितखरदूषणो निरस्तदूषणो रघुकुलभूषणः श्रीरामो लक्ष्मणं सतर्कयति यत्त्वं सीतां नीत्वा गुहां प्रविश तावदहमद्यैव घोररूपिणो राक्षसान् हन्तुमिच्छामि। अत्र घोररूपिणः इति प्रयोगः कथं न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः इति नियमस्य जागरूकत्वे घोरं च तद्रूपं चेति घोररूपं तदस्ति येषां ते घोररूपिणस्तान् घोर-रूपिणः इति चेत्। बहुव्रीहौ सतीप्सितार्थस्यानवगतावेष पन्था अनुगतः। घोरं रूपं येषां ते इत्यर्थे सति न किमप्यर्थवैलक्षण्यम्। मत्वर्थीय इनिर्निन्दायाम्।[२१५] इन् प्रत्ययविधानात् निन्दितघोररूपयुक्ताः इत्यर्थो ध्वन्यते। अथवा घोरं यथा स्यात्तथा रूपयितुं तच्छीलाः इति विग्रहे सुप्यजातौ णिनिस्ताच्छील्ये (पा०सू० ३.२.७८) इत्यनेन णिनिप्रत्यये समाधानम्।

## २.४६ शापितः

अत्र किञ्चिन्न वक्तव्यं शापितोऽसि ममोपरि।
तथेति सीतामादाय लक्ष्मणो गह्वरं ययौ॥

– अ०रा० ३.५.३१

शप् धातोः (शपँ आक्रोशे धा०पा० १०००, ११६८) कर्मणि क्तप्रत्ययेऽनिड्त्वात्[२१६] शप्तः इत्येव।[२१७] आगमशास्त्रमनित्यम् (प०शे० ९३.२) इति कृत्वेडागमेऽपि शपितः।[२१८] शापितः इति कथम्। अत्र स्वार्थे णिचि प्रत्यये ततः क्तान्तेन समाधानम्।[२१९]

---

[२१५] अत इनिठनौ (पा०सू० ५.२.११५) इत्यनेन। भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने। सम्बन्धेऽस्ति-विवक्षायां भवन्ति मतुबादयः॥ (भा०पा०सू० ५.२.९४)। भाष्यकारमते निन्दायामिनिरेव। यथा निन्दायाम्। ककुदावर्ती। सङ्घादकी (भा०पा०सू० ५.२.९४)।

[२१६] एकाच उपदेशेऽनुदात्तात् (पा०सू० ७.२.१०) इत्यनेनानिड्त्वम्।

[२१७] यथाऽस्मिन्नेव काण्डे दुर्वाससाऽकारणकोपमूर्तिना शप्तः पुरा सोऽद्य विमोचितस्त्वया (अ०रा० ३.१३८)।

[२१८] यथा भारते दाक्षिणात्यपाठे शकुन्तलां प्रति कण्वः – प्रतिवाक्यं न दद्यास्त्वं शपिता मम पादयोः (म०भा० १.९६.९)। एवमेव नान्दीपुराणे – मत्कृते येऽत्र शपिताः सावित्र्या ब्राह्मणाः सुराः (नान्दी०पु० २७.७)।

[२१९] शपँ आक्रोशे (धा०पा० १०००, ११६८) → शप् → स्वार्थे णिच् → शप् णिच् → शप् इ → अत उपधायाः (पा०सू० ७.२.११६) → शाप् इ → शापि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → तयोरेव कृत्यक्तखलर्थाः (पा०सू० ३.४.७०) → शापि क्त → शापि त → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → शापि इट् त → णेरनिटि (पा०सू० ६.४.५१) → शापि त → शापित → विभक्तिकार्यम् → शापितः।

## २.४७ समाधिविरमे

ध्यायन् हृदि परात्मानं निर्गुणं गुणभासकम्।
समाधिविरमेऽपश्यद्रावणं गृहमागतम्॥

– अ०रा० ३.६.३

सङ्ग्रामे श्रीरामेण स्वधामनीतेषु खरदूषणत्रिशीर्षेषु प्रतिशोधं चिकीर्षन् रावणः श्रीरामं ध्यायन्तं मारीचं प्रत्यगात्। तत्र समाधिविरामे मारीचो रावणमपश्यत्। तत्र समाधिविरमे इति प्रयोगस्तु विचारकोटावागच्छति। न च समाधेर्विरामः समाधिविरामस्तस्मिन् समाधिविरामे। विरमणं विरामः। भावे (पा०सू० ३.३.१८) इति घञ्। विरामोऽवसानम् (पा०सू० १.४.११०) इति सूत्रं प्रमाणम्। यद्वा विरमन्तेऽस्मिन्निति विरामः। हलश्च (पा०सू० ३.३.१२१) इति घञ्।[२२०] अच् प्रत्ययः कर्तरि। करणाधिकरणयोः सञ्ज्ञायाञ्चान्यप्रत्ययानां हलश्च (पा०सू० ३.३.१२१) इत्यनेन बाधः। अत्रोच्यते। विगता रमा यस्मात्तद्विरमम् । समाधौ हि भक्तिरूपिणी रमा। ब्रह्मानुभवत्वात्। तदभावे रमाया निर्गमः स्वभाविक एवातः। यद्वा रमाऽस्त्यस्मिन्निति रमम् । अर्शआदित्वादच्।[२२१] विगतं रममिति विरमम् ।[२२२] समाधेर्विरमं समाधिविरमं तस्मिन् समाधिविरमे।[२२३]

## २.४८ सहायं मे

त्वं तु तावत्सहायं मे कृत्वा स्थास्यसि पूर्ववत्।
इत्येवं भाषमाणं तं रावणं वीक्ष्य विस्मितः॥

– अ०रा० ३.६.१४

---

[२२०] स चाधिकरणे। हलश्च (पा०सू० ३.३.१२१) इत्यत्र करणाधिकरणयोश्च (पा०सू० ३.३.११७) इत्यस्यानुवृत्तेः।

[२२१] अर्शआदिभ्योऽच् (पा०सू० ५.२.१२७) इत्यनेन।

[२२२] कुगतिप्रादयः (पा०सू० २.२.१८) इत्यनेन प्रादिसमासः।

[२२३] यद्वा विरमणं विरमः इति विग्रहे विपूर्वकात् रम् धातोः (रमुँ क्रीडायाम् धा०पा० ८५३) अज्विधौ भयादीनामुपसंख्यानं नपुंसके क्तादिनिवृत्त्यर्थम् (वा० ३.३.५६) इत्यनेन अच् प्रत्यये विरमम्। अबन्तो विरमः (वि रम् अप्) शब्द इत्याप्टेकोशः। तस्मिन् विरमे। यथा सोऽहं नृणां क्षुल्लसुखाय दुःखं महद्गतानां विरमाय तस्य (भा०पु० ३.८.२) इति भागवते विरमाय इत्यत्र। अत्र विरमाय नाशाय (भा०पु० वी०रा०व्या० ३.८.२) विरमाय निवृत्तये (भा०पु० सि०प्र० ३.८.२, भा०पु० बा०प्र० ३.८.२) इति टीकाकाराः। एवमेव अथ धूमस्य विरमे द्वितीयं रूपदर्शनम् (म०भा० १२.२४२.१८) इति भारतप्रयोगेऽपि।

अत्र भावे ष्यञ् प्रत्यये साहाय्यम् इति तु पाणिनीयमेव।[२२४] किन्तु अयनम् अयः इति भावे एरच् (पा०सू० ३.३.५६) इत्यनेन इधातोः (इण् गतौ धा०पा० १०४५) अचि गुणेऽयादेशे विभक्तिकार्ये अयः। सह अयः सहायस्तं सहायम् इति पूर्वोक्तदिशा साधनीयम्।[२२५]

## २.४९ स्थाप्य

श्रुत्वा रामोदितं वाक्यं सापि तत्र तथाकरोत्।
मायासीतां बहिः स्थाप्य स्वयमन्तर्दधेऽनले॥

– अ०रा० ३.७.४

अत्र गतिनिवृत्त्यर्थकणिजन्तस्थाधातोः (ष्ठा गतिनिवृत्तौ धा०पा० ९२८) पुकि[२२६] ल्यबन्तमेवम्।[२२७] किन्त्विदं समासं विना कथं सम्भवमिति चेत्। अत्र साक्षात्प्रभृति-गणे बहिस् इत्यपि पठित्वा साक्षात्प्रभृतीनि च (पा०सू० १.४.७४) इत्यनेन गतिसञ्ज्ञायां समासः।[२२८] ततो समासेऽनञ्पूर्वे क्त्वो ल्यप् (पा०सू० ७.१.३७) इत्यनेन क्त्वास्थाने ल्यबादेशे बहिःस्थाप्य इति।

---

[२२४] सह अयते एति वेति सहायः। अयँ गतौ (धा०पा० ४७४) इत्यस्मात् इण् गतौ (धा०पा० १०४५) इत्यस्माद्वा नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन कर्तरि पचाद्यच्। ततः सह सुपा (पा०सू० २.१.४) इत्यनेन सुप्सुपासमासः। अनुप्लवः सहायश्चानुचरोऽभिसरः समाः (अ०को० २.८.७१) इत्यमरः। सहायशब्दात् गुणवचनब्राह्मणादिभ्यः कर्मणि च (पा०सू० ५.१.१२४) इत्यनेन भावे कर्मणि वा ष्यञ् प्रत्ययेऽनुबन्धलोपे तद्धितेष्वचामादेः (पा०सू० ७.२.११७) इत्यनेनादिवृद्धौ यचि भम् (पा०सू० १.४.१८) इत्यनेन भसञ्ज्ञायाम् यस्येति च (पा०सू० ६.४.१४८) इत्यनेनाकारलोपे विभक्तिकार्ये साहाय्यम् इति रूपम्। पक्षे सहायाद्वेति वक्तव्यम् (वा० ५.१.१३१) इत्यनेन भावे कर्मणि वा वुञ् प्रत्ययेऽनुबन्ध-लोपे तद्धितेष्वचामादेः (पा०सू० ७.२.११७) इत्यनेनादिवृद्धौ युवोरनाकौ (पा०सू० ७.१.१) इत्यनेनाकादेशे विभक्तिकार्ये साहायकम् इति रूपम्।

[२२५] २३८तमे पृष्ठे २.१० सहायम् इति प्रयोगस्य विमर्शं पश्यन्तु। सह अयः सहायः इत्यत्र सह सुपा (पा०सू० २.१.४) इत्यनेन सुप्सुपासमासः।

[२२६] अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ (पा०सू० ७.३.३६) इत्यनेन।

[२२७] ल्यपि च णेरनिटि (पा०सू० ६.४.५१) इत्यनेन णिलोपः।

[२२८] साक्षात्प्रभृतीनि च (पा०सू० १.४.७४) इत्यत्र क्वचिदेकदेशोऽप्यनुवर्तते (प०शे० १८) इति परिभाषया कृञि (पा०सू० १.४.७२) इत्यस्य मण्डूकप्लुत्या निवृत्तौ विभाषा (पा०सू० १.४.७२) इत्यस्यानुवृत्तौ कृञभावेऽपि साक्षात्प्रभृतीनां गतिसञ्ज्ञा क्वाचित्का। यद्वा चकारग्रहणात्कृञभावेऽपि गतिसञ्ज्ञा क्वाचित्का। सत्यां गतिसञ्ज्ञायां कुगतिप्रादयः (पा०सू० २.२.१८) इत्यनेन समास इति भावः।

## २.५० कानकम्

पश्य राम मृगं चित्रं कानकं रत्नभूषितम्।
विचित्रबिन्दुभिर्युक्तं चरन्तमकुतोभयम्।
बद्ध्वा देहि मम क्रीडामृगो भवतु सुन्दरः॥

– अ०रा० ३.७.६

कनकमृगं दृष्ट्वा मायासीता मायामनुष्यं रामं मायामृगं हन्तुं चोदयति यत् कानकं मृगं पश्य। अत्र विकारार्थे मयटि कृते[२२९] कनकमयम्। परन्तु मायामृगत्वात्कनक-विकाराभावे कनकस्यायं कानकस्तं कानकम्। तस्येदम् (पा०सू० ४.३.१२०) इत्यनेन अण्। वृद्धौ भत्वादल्लोपे विभक्तिकार्ये कानकम्।[२३०] यद्वा कनकानां समूहः कानकम्।[२३१] तदस्त्यस्मिन्निति कानकस्तं कानकम् इति समूहार्थाणन्तान्मत्वर्थीयेऽचि[२३२] विभक्तिकार्ये। न च तद्धितप्रत्ययान्तादत्र कथं तद्धितप्रत्ययः। तथा च कारिका –

शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थकः।
सरूपः प्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते॥

– भा०पा०सू० ३.१.७

इतिवचनाच्छैषिकाच्छैषिकः सरूपप्रत्ययो न मत्वर्थीयान्मत्वर्थीयो न। सरूपत्वं नाम समान-देशत्वे सति समानार्थबोधकत्वम्। अतो न दोषः।[२३३] यद्वा कनकमेव कानकस्तं कानकम् इति स्वार्थेऽण्।[२३४] यद्वा कनके भवः कानकस्तं कानकम्।[२३५] यद्वा कनके जातः कानकस्तं कानकम्।[२३६] कानकं मृगं बद्ध्वाऽऽनय इति भगवत्यादिशति।

---

२२९ मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः (पा०सू० ४.३.१४३) इत्यनेन।

२३० कनक → तस्येदम् (पा०सू० ४.३.१२०) → कनक अण् → कनक अ → तद्धितेष्वचामादेः (पा०सू० ७.२.११७) → कानक अ → यचि भम् (पा०सू० १.४.१८) → यस्येति च (पा०सू० ६.४.१४८) → कानक् अ → कानक → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपदिकसञ्ज्ञा → विभक्तिकार्यम् → कानक सुँ → अतोऽम् (पा०सू० ७.१.२४) → कानक अम् → अमि पूर्वः (पा०सू० ६.१.१०७) → कानकम्।

२३१ भिक्षादिभ्योऽण् (पा०सू० ४.२.३८) इत्यनेन अण्। प्रक्रिया पूर्ववत्।

२३२ अर्शआदिभ्योऽच् (पा०सू० ५.२.१२७) इत्यनेन अच्। भत्वादल्लोपः पूर्ववत्।

२३३ यतो ह्यत्र चातुरर्थिकतद्धितप्रत्ययान्मत्वर्थीयतद्धितप्रत्ययः। तौ न सरूपौ। भाष्येऽपि शाकल्यस्य च्छात्राः इत्यर्थे शाकलाः (भा०पा०सू० ४.१.१८) इत्युदाहरणेऽपत्यार्थकतद्धितप्रत्ययाच्छैषिकतद्धितप्रत्ययः।

२३४ प्रज्ञादिभ्यश्च (पा०सू० ५.४.३८) इत्यनेन। प्रक्रिया पूर्ववत्।

२३५ तत्र भवः (पा०सू० ४.३.५३) इत्यनेन अण्। प्रक्रिया पूर्ववत्।

२३६ तत्र जातः (पा०सू० ४.३.२५) इत्यनेन अण्। प्रक्रिया पूर्ववत्।

## २.५१ वध्यमाना

इत्युक्त्वा वध्यमाना सा स्वबाहुभ्यां रुरोद ह।
तच्छ्रुत्वा लक्ष्मणः कर्णौ पिधायातीव दुःखितः॥

– अ०रा० ३.७.३५

मायामृगस्य श्रीरामानुकारिस्वरं श्रुत्वा लक्ष्मणं गमयितुमिच्छन्ती यातुमनिच्छन्तं तं भर्त्सयित्वा बाहुभ्यां हृदयं ताडयन्ती रुरोद मायासीता। तत्र वध्यमाना इति प्रयुक्तम्। वध आदेशो हि हन् धातोः (हनँ हिंसागत्योः धा०पा० १०१२) लिङि लुङि चार्धधातुकप्रत्यये भवति। तथा च सूत्रद्वयम् – हनो वध लिङि (पा०सू० २.४.४२) लुङि च (पा०सू० २.४.४३)। अतः वध्यमाना अपाणिनीयमेव बाहुभ्यां हृदये हन्यते इति विग्रहे हन्यमाना इत्येव पाणिनीयमिति चेत्। हिंसार्थे वध् धातुरपि।[२३७] तस्य वध्यते इति कर्मवाच्ये सार्वधातुके यक् (पा०सू० ३.१.६७) इत्यनेन यकि ततश्च शानच्प्रत्यये मुगागमे टापि वध्यमाना।[२३८] यद्वा हननं वधः।[२३९] वधमाचरतीति वधति।[२४०] बाहू हृदये वधमाचरत इति वधतः[२४१] विग्रहेऽस्मिन् वध-

[२३७] स च जनिवध्योश्च (पा०सू० ७.३.३५) इति सूत्रेण ज्ञापितः। 'जनिवध्योश्च'। जनकः। 'वधँ हिंसायाम्'। वधकः (वै०सि०कौ० २८९५)। 'वधँ हिंसायामिति'। धात्वन्तरं भौवादिकम्। भ्वादेराकृतिगणत्वात् (बा०म० २८९५)।

[२३८] वध् → भावकर्मणोः (पा०सू० १.३.१३) → वर्तमाने लट् (पा०सू० ३.२.१२३) → लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) → वध् शानच् → वध् आन → सार्वधातुके यक् (पा०सू० ३.१.६७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → वध् यक् आन → वध् य आन → आने मुक् (पा०सू० ७.२.८२) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → वध् य मुँक् आन → वध् य म् आन → वध्यमान → अजाद्यतष्टाप् (पा०सू० ४.१.४) → वध्यमान टाप् → वध्यमान आ → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → वध्यमाना → विभक्तिकार्यम् → वध्यमाना।

[२३९] हनँ हिंसागत्योः (धा०पा० १०१२) → हन् → हनश्च वधः (पा०सू० ३.३.७६) → वध् अप् → वध् अ → वध → विभक्तिकार्यम् → वधः।

[२४०] वध → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → वध क्विँप् → वध व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → वध → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → वध लट् → वध तिप् → वध ति → कर्तरि शप् (पा०सू० ३.१.६८) → वध शप् ति → वध अ ति → अतो गुणे (पा०सू० ६.१.९७) → वध ति → वधति।

[२४१] वध → धातुसञ्ज्ञा (पूर्ववत्) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → वध लट् → वध तस् → कर्तरि शप् (पा०सू० ३.१.६८) → वध शप् तस् → वध अ तस् → अतो गुणे (पा०सू० ६.१.९७) → वध तस् → ससजुषो रुः (पा०सू० ८.२.६६) → वधतरुँ → खरवसानयोर्विसर्जनीयः (पा०सू० ८.३.१५) → वधतः।

शब्दादाचारक्विबन्तात्कर्मणि लकारे बाहुभ्यां हृदये वध्यते इति विग्रहे वध्यमाना।[२४२] अत आचारक्विबन्तवधधातोः कर्मवाच्ये शानचि कृते सिद्धं रूपमिदम्।

## २.५२ क्रोशमानाम्

वाक्शरेण हतस्त्वं मे क्षन्तुमर्हसि देवर।
इत्येवं क्रोशमानां तां रामागमनशङ्कया॥

– अ०रा० ३.७.६१

क्रुश् धातुः (क्रुशँ आह्वाने रोदने च धा०पा० ८५६) परस्मैपदी। ततः क्रोशति इति विग्रहे शतृप्रत्यये ङीपि नुमि क्रोशन्ती इति पाणिनीयप्रयोगः।[२४३] क्रोशमानाम् इत्यपि तथा हि कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यत्राऽत्मनेपदे। यतो हि सत्यपि वेदवती जानन्त्यपि रामपराक्रमं प्रवृत्तियोग्यं क्रोशनं रावणवधार्थं स्वयं करोति तत्राऽत्मनेपदम्। क्रोशत इति क्रोशमाना ताम् इति विग्रह आत्मनेपदीयत्वाच्छानचि प्रत्यये मुगागमे टापि विभक्तिकार्ये सुलोपे क्रोशमानाम् शब्दोऽपि पाणिनीयः।

## २.५३ विलप्यमाना

कृशातिदीना परिकर्मवर्जिता दुःखेन शुष्यद्वदनातिविह्वला।
हा राम रामेति विलप्यमाना सीता स्थिता राक्षसवृन्दमध्ये॥

– अ०रा० ३.७.६६

अत्र रावणनीतां सीतां वर्णयति ग्रन्थकृद्यत् विलप्यमाना इति। विपूर्वको लप्-धातुः (लपँ व्यक्तायां वाचि धा०पा० ४०२) परस्मैपदी। ततः शतृप्रत्यये विलपन्ती इति।[२४४] विलप्यमाना इति कथम्। अत्र[२४५] यक्प्रत्ययाभाव आत्मनेपदाभावश्च। न च कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेनाऽत्मनेपदं क्रियतां सीता साधारणविलापं करोतीत्यर्थ-

[२४२] वध → धातुसञ्ज्ञा (पूर्ववत्) → भावकर्मणोः (पा०सू० १.३.१३) → वर्तमाने लट् (पा०सू० ३.२.१२३) → लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) → वध शानच् → वध आन → सार्वधातुके यक् (पा०सू० ३.१.६७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → वध यक् आन → वध य आन → अतो लोपः (पा०सू० ६.४.४८) → वध् य आन → आने मुक् (पा०सू० ७.२.८२) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → वध् य मुँक् आन → वध् य म् आन → वध्यमान → अजाद्यतष्टाप् (पा०सू० ४.१.४) → वध्यमान टाप् → वध्यमान आ → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → वध्यमाना → विभक्तिकार्यम् → वध्यमाना।

[२४३] यथा क्रोशन्ती राम रामेति लक्ष्मणेति च विस्वरम् (वा०रा० ४.६.९) इति वाल्मीकिप्रयोगे। अस्मिन्नेव ग्रन्थे च – लङ्कां गत्वा सभामध्ये क्रोशन्ती पादसन्निधौ (अ०रा० ३.५.३८) क्रोशन्ती करुणं दीना जगाद दशकन्धरम् (अ०रा० ६.१०.२९)।

[२४४] यथा आदीप्य चानुमरणे विलपन्ती मनो दधे (भा०पु० ४.२८.५०) इति भागवतप्रयोगे।

[२४५] लप् धातोः कर्तरि शतरि प्रत्यये कृते।

स्वीकारे ग्रन्थगौरवपुरःसरं भावमाधुर्यमपीति चेत्। आत्मनेपदे सत्यपि यक् कुतः सीताया विलपनकर्तृत्वादिति चेत्।[२४६] विलप्यत इति विलप्यमानम् भावे शानचि भावकर्मणोः (पा०सू० १.३.१३) इत्यात्मनेपदत्वात् विलप्यमानमस्ति नित्यमस्यामिति विलप्यमाना।[२४७] अथवेमं दिवादिगणे मत्वा[२४८] दिवादित्वाच्छ्यन्यात्मनेपदे विलप्यमाना।

## २.५४ घातितः

रावणं तत्र युद्धं मे बभूवारिविमर्दन।
तस्य वाहान् रथं चापं छित्त्वाहं तेन घातितः॥

– अ०रा० ३.८.२८

अत्र जटायुसमीपं गत्वा श्रीरामभद्रस्तद्दशां विलोक्य तत्पराभवकारणमपृच्छत्। अत्र जटायुषा निगद्यते यत् तेनाहं घातितः। तत्र हन् धातोः (हनँ हिंसागत्योः धा०पा० १०१२) कर्मणि क्तप्रत्यये कृते हतः इत्यनेन भवितव्यम्। यतो रावणो मामहन् पुनः कर्मवाच्ये रावणेनाहमहन्ये इत्यर्थे रावणेनाहं हतः। किन्तु घातितः अयं प्रयोगो हि ण्यन्तक्तान्तस्येत्येवापाणिनीयः प्रतिभाति। यतो हि ण्यन्तप्रयोगास्तु प्रायः प्रेरककर्तृके भवन्ति। यथा रामो रावणं हन्ति विभीषणस्तं प्रेरयति इत्यर्थे विभीषणो रामेण रावणं घातयति। अत्र तु कश्चन प्रेरको नासीत्। अतः प्रयोजकाभावे हेतुमति च (पा०सू० ३.१.२६) इत्यनेन कथं

[२४६] यतो हि सार्वधातुके यक् (पा०सू० ३.१.६७) इति हि सूत्रं भावकर्मणोरेव प्रवर्तते। चिण् भावकर्मणोः (पा०सू० ३.१.६६) इत्यतो भावकर्मणोः इत्यस्यानुवृत्तेः।

[२४७] अर्शआदिभ्योऽच् (पा०सू० ५.२.१२७) इत्यनेनाचि यचि भम् (पा०सू० १.४.१८) इत्यनेन भसञ्ज्ञायां यस्येति च (पा०सू० ६.४.१४८) इत्यनेनालोपे अजाद्यतष्टाप् (पा०सू० ४.१.४) इत्यनेन टापि विभक्तिकार्ये। विग्रहे नित्यम् इति तु भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने। सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः॥ (भा०पा०सू० ५.२.९४) इत्यनुसारम्।

[२४८] बहुलमेतन्निदर्शनम् (धा०पा० ग०सू० १९३८) आकृतिगणोऽयम् (धा०पा० ग०सू० १९९२) भूवादिष्वेतदन्तेषु दशगणीषु धातूनां पाठो निदर्शनाय तेन स्तम्भुप्रभृतयः सौत्राश्चुलुम्पादयो वाक्यकारीयाः प्रयोगसिद्धा विक्लवत्यादयश्च (मा०धा०वृ० १०.३२८) इत्यनुसारमाकृतिगणत्वाद्दिवादिगण ऊह्योऽयमात्मनेपदी धातुरिति भावः।

णिजिति चेत्सत्यम्। रावणो खड्गेन जटायुषमघातयत्।[२४९] पुनः कर्मवाच्ये रावणेन खड्गेन जटायुरघात्यत[२५०] इत्यर्थे हिंसार्थकहन् धातोर्णिचि हनस्तोऽचिण्णलोः (पा०सू० ७.३.३२) इत्यनेन तान्तादेशे हो हन्तेर्ञ्णिन्नेषु (पा०सू० ७.३.५४) इत्यनेन घकारे अत उपधायाः (पा०सू० ७.२.११६) इत्यनेन वृद्धौ ततः समानकर्तृकयोः पूर्वकाले (पा०सू० ३.४.२१) इत्यनेन कर्मणि क्तप्रत्यये विभक्तिकार्ये घातितः इति।[२५१] यद्वाऽत्र स्वार्थे णिचि रावणेन जटायुरहन्यत इत्यर्थ एव रावणेन जटायुरघात्यत।[२५२] पुनरस्मिन्स्वार्थे क्तप्रत्यये घातितः।[२५३] यद्वा हननमेव घातः।[२५४] घातमितो घातितः।[२५५]

---

[२४९] हनँ हिंसागत्योः (धा०पा० १०१२) → हन् → हेतुमति च (पा०सू० ३.१.२६) → हन् णिच् → हन् इ → हनस्तोऽचिण्णलोः (पा०सू० ७.३.३२) → हत् इ → हो हन्तेर्ञ्णिन्नेषु (पा०सू० ७.३.५४) → घत् इ → अत उपधायाः (पा०सू० ७.२.११६) → घात् इ → घाति → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → अनद्यतने लङ् (पा०सू० ३.२.१११) → घाति लङ् → घाति तिप् → घाति ति → लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा०सू० ६.४.७१) → अट् घाति ति → अ घाति ति → कर्तरि शप् (पा०सू० ३.१.६८) → अ घाति शप् ति → अ घाति अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → अ घाते अ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → अ घातय् अ ति → इतश्च (पा०सू० ३.४.१००) → अ घातय् अ त् → अघातयत्।

[२५०] घाति → धातुसञ्ज्ञा (पूर्ववत्) → भावकर्मणोः (पा०सू० १.३.१३) → अनद्यतने लङ् (पा०सू० ३.२.१११) → घाति लङ् → घाति त → लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा०सू० ६.४.७१) → अट् घाति त → अ घाति त → सार्वधातुके यक् (पा०सू० ३.१.६७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → अ घाति यक् ति → अ घाति य त → णेरनिटि (पा०सू० ६.४.५१) → अ घात् य त् → अघात्यत।

[२५१] घाति → धातुसञ्ज्ञा पूर्ववत् → समानकर्तृकयोः पूर्वकाले (पा०सू० ३.४.२१) → घाति क्त → घाति त → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → घाति इट् त → घाति इ त → निष्ठायां सेटि (पा०सू० ६.४.५२) → घात् इ त → घातित → विभक्तिकार्यम् → घातितः।

[२५२] प्रक्रिया पूर्ववत्।

[२५३] प्रक्रिया पूर्ववत्।

[२५४] हनँ हिंसागत्योः (धा०पा० १०१२) → हन् → भावे (पा०सू० ३.३.१८) → हन् घञ् → हन् अ → हनस्तोऽचिण्णलोः (पा०सू० ७.३.३२) → हत् अ → हो हन्तेर्ञ्णिन्नेषु (पा०सू० ७.३.५४) → घत् अ → अत उपधायाः (पा०सू० ७.२.११६) → घात् अ → घात → विभक्तिकार्यम् → घातः। यथा चरेद्व्रतमहत्वाऽपि घातार्थं चेत्समागतः (या०स्मृ० ३.२५२) वियोगो मुग्धाक्ष्याः स खलु रिपुघातावधिरभूत् (उ०रा०च० ३.४४) यो हन्यात्तस्य पापं स्याच्छतब्राह्मणघातजम् (प०त० १.३१२) सदयहृदयदर्शित-पशुघातम् (गी०गो० १.९) इत्यादिप्रयोगेषु।

[२५५] द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः (पा०सू० २.१.२४) इत्यत्र द्वितीया इति योगविभागेन समासे घात इत इति स्थिते कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) इत्यनेन प्रातिपदिकसञ्ज्ञायां सुपो धातु-प्रातिपदिकयोः (पा०सू० २.४.७१) इत्यनेन विभक्तिलुकि शकन्ध्वादिषु पररूपं वाच्यम् (वा० ६.१.९४) इत्यनेन पररूपे विभक्तिकार्ये सिद्धम्।

## २.५५ स्मयन्

तथेति रामः पस्पर्श तदङ्गं पाणिना स्मयन्।
ततः प्राणान्परित्यज्य जटायुः पतितो भुवि॥

– अ०रा० ३.८.३६

जटायुषो वृत्तान्तं समाकर्ण्य राजीवलोचनो रामः स्मयमानस्तदङ्गं पस्पर्श। अत्र स्मयन् प्रयोगो ह्यपाणिनीय इव। यतो हीषद्धासार्थकः स्मिधातुः (ष्मिङ् ईषद्धसने धा०पा० ९४८) आत्मनेपदी। ततश्च स्मयत इति स्मयमानः इत्येव पाणिनीयः। किन्तु स्मयन् इत्यपि। तथा च स्मयत इति स्मयः। पचादित्वादच्।[२५६] स्मय इवाऽचरति इत्यर्थे क्विपि सर्वापहारिलोपे सनाद्यन्तत्वाद्धातुसञ्ज्ञायां लटि तिपि शपि पररूपे स्मयति।[२५७] स्मयतीति स्मयन् इत्यर्थे शतृप्रयोगे न दोषः।[२५८] श्रीराम ईषद्धासानुकूलव्यापार-सदृशाचरणानुकूलव्यापाराश्रयः इति शाब्दबोधः। यतो हि श्रीरामचन्द्रस्तु जटायुषं पितरं मन्यमानस्तन्म्रियमाणदशां दृष्ट्वा शोकातुर आसीत्। किन्तु मरणकाले जटायुषो मनसि व्यथा मा भूदिति कृत्वा स्मयमान इव प्रतीयते स्म। अतः स्मयन् इति सम्यक्पाणिनीयः। जटायुषं प्रति राघवेन्द्रस्य व्यथामत्रैव ग्रन्थकृत्स्पष्टयति यथा –

रामस्तमनुशोचित्वा बन्धुवत्साश्रुलोचनः।
लक्ष्मणेन समानाय्य काष्ठानि प्रददाह तम्॥

– अ०रा० ३.८.३७

अतः स्मयन् इत्याचारक्विबन्ताच्छतृप्रत्ययः कमपि निगूढं भावं व्यञ्जयति।

---

[२५६] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन।

[२५७] स्मय → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → स्मय क्विँप् → स्मय व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → स्मय → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → स्मय लट् → स्मय तिप् → स्मय ति → कर्तरि शप् (पा०सू० ३.१.६८) → स्मय शप् ति → स्मय अ ति → अतो गुणे (पा०सू० ६.१.९७) → स्मय ति → स्मयति।

[२५८] स्मय → धातुसञ्ज्ञा (पूर्ववत्) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → स्मय लट् → लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) → स्मय शतृँ → स्मय अत् → अतो गुणे (पा०सू० ६.१.९७) → स्मयत् → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपदिकसञ्ज्ञा → विभक्तिकार्यम् → स्मयत् सुँ → स्मयत् स् → उगिदचां सर्वनामस्थानेऽधातोः (पा०सू० ७.१.७०) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → स्मय नुँम् त् स् → स्मय न् त् स् → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → स्मय न् त् → संयोगान्तस्य लोपः (पा०सू० ८.२.२३) → स्मय न् त् स् → स्मयन्।

## २.५६ अनुशोचित्वा

रामस्तमनुशोचित्वा बन्धुवत्साश्रुलोचनः।
लक्ष्मणेन समानाय्य काष्ठानि प्रददाह तम्॥

– अ०रा० ३.८.३७

जटायुषो मृत्युं दृष्ट्वा भक्तवत्सलः श्रीरामस्तमनुशोच्य तद्दाहसंस्कारं चक्रे। अत्रानूपसर्गयोगेन समासेऽनञ्पूर्वे क्त्वो ल्यप् (पा०सू० ७.१.३७) इत्यनेन ल्यपि अनुशोच्य इत्येव पाणिनिसम्मतम्। अनुशोचित्वा अपि शोकार्थकात् शुच् धातोः (शुचँ शोके धा०पा० १८३) क्त्वा प्रत्यय इति कृते गुणे। न च कित्वाल्लघूपधगुणनिषेधः शङ्क्यः।[२५९] न क्त्वा सेट् (पा०सू० १.२.१८) इत्यनेन कित्वनिषेधे गुणे अनुशोचित्वा। न च समासे सति अनुशोच्य इति भविष्यति कथम् अनुशोचित्वा इति। अनु शब्दस्य शोचित्वा इत्यनेन सह न योगोऽपि तु तम् इत्यनेन सह। तथा च अनुर्लक्षणे (पा०सू० १.४.८४) इत्यनेन कर्मप्रवचनीयसञ्ज्ञायां कर्मप्रवचनीययुक्ते द्वितीया (पा०सू० २.३.८) इत्यनेन द्वितीया-विभक्तिः। अथ चानूपयोगाभावे क्त्वाप्रत्ययः निर्विवादः। यद्वा लक्षणेत्थम्भूताख्यानभाग-वीप्सासु प्रतिपर्यनवः (पा०सू० १.४.९०) इत्यनेन अनु शब्दस्य कर्मप्रवचनीयसञ्ज्ञायां द्वितीयायाञ्च सत्यां तमनु शोचित्वा इति साधु।

## २.५७ प्राणरिरक्षया

बाहुभ्यां वेष्टितावत्र तव प्राणरिरक्षया।
छिन्नौ तव भुजौ त्वं च को वा विकटरूपधृक्॥

– अ०रा० ३.९.१४

अत्र कबन्धः तव प्राणरिरक्षया इति प्रयुङ्क्ते। प्राणस्य रक्षितुमिच्छा इति प्राणरिरक्षा। किन्त्वत्र रिरक्षा इत्यपाणिनीयः। तथा हि रक्षितुमिच्छा इति विग्रहे रक्ष् धातोः (रक्षँ पालने धा०पा० ६५८) धातोः कर्मणः समानकर्तृकादिच्छायां वा (पा०सू० ३.१.७) इत्यनेन सन् प्रत्यय इटि षत्वे सन्यङोः (पा०सू० ६.१.९) इत्यनेन द्वित्वे पूर्वोऽभ्यासः (पा०सू० ६.१.४) इत्यनेनाभ्याससञ्ज्ञायामभ्यासकार्ये हलादिः शेषः (पा०सू० ७.४.६०) इत्यनेन रकारभावे शिष्टे सन्यतः (पा०सू० ७.४.७९) इत्यनेनेकारे अ प्रत्ययात् (पा०सू० ३.३.१०२) इत्यनेन

[२५९] ग्क्ङिति च (पा०सू० १.१.५) इत्यनेन कित्त्वे गुणनिषेधः प्राप्तः।

अप्रत्यये टापि रिरक्षिषा इत्येव।[२६०] अत्र अ प्रत्ययात् (पा०सू० ३.३.१०२) इत्यनेनाकारे पृषोदरादित्वात्सन्प्रत्ययस्य लोपे[२६१] टापि समासे तृतीयैकवचने प्राणरिरक्षया।[२६२] यद्वा प्राणस्यारयः प्राणारयः क्षुत्पिपासादयस्तेभ्यो रक्षेति प्राणरिरक्षा तया इति विग्रहे प्राणशब्दस्य अरिशब्देन समासे शकन्ध्वादित्वात्पररूपे पुनः प्राणरिशब्दस्य रक्षाशब्देन सह समासे तृतीयैकवचने प्राणरिरक्षया।[२६३]

## २.५८ आदृता

रामलक्ष्मणयोः सम्यक्पादौ प्रक्षाल्य भक्तितः।
तज्जलेनाभिषिच्याङ्गमथार्घ्यादिभिरादृता॥

– अ०रा० ३.१०.७

भक्तवत्सलः श्रीरामः शबरीमुद्दिधीर्षन् तया बहुमानितः। सा भगवतः श्रीचरणारविन्दं प्रक्षाल्यार्घ्यादिभिरादृता। आदृतवती इति प्रयोक्तव्ये आदृता इति प्रयुक्तम्। यद्यपि आपूर्वकात् दृधातोः (दृङ् आदरे धा०पा० १४११) सकर्मकतया तयोरेव कृत्यक्तखलर्थाः (पा०सू० ३.४.७०) इति सूत्रेण क्तप्रत्ययविधानं कर्मण्येव पाणिन्यनुकूलं तथाऽपि गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च (पा०सू० ३.४.७२) इत्यत्र चकारात्क्वचित्सकर्मकादपि। तेनात्र सकर्मकधातोः कर्तरि आदृता। यद्वा आदर एव आदृतम्। भावे क्तप्रत्ययः।[२६४] आदृतमस्त्यस्या इत्यादृता। अर्शआद्यजन्तः प्रयोगः।[२६५] यद्वा कर्मणोऽविवक्षायामकर्मकत्वात्[२६६] गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुह-

[२६०] यथा जगद्रिरक्षिषया (भा०पु० ५.१५.६) इत्यत्र। रक्षँ पालने (धा०पा० ६५८) → रक्ष् → धातोः कर्मणः समानकर्तृकादिच्छायां वा (पा०सू० ३.१.७) → रक्ष् सन् → रक्ष् स → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → रक्ष् इट् स → रक्ष् इ स → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → रक्ष् इ ष → रक्षिष → सन्यङोः (पा०सू० ६.१.९) → रक्ष् रक्षिष → हलादिः शेषः (पा०सू० ७.४.६०) → र रक्षिष → सन्यतः (पा०सू० ७.४.७९) → रि रक्षिष → रिरक्षिष → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातु-सञ्ज्ञा → अ प्रत्ययात् (पा०सू० ३.३.१०२) → रिरक्षिष अ → अतो लोपः (पा०सू० ६.४.४८) → रिरक्षिष् अ → रिरक्षिष → अजाद्यतष्टाप् (पा०सू० ४.१.४) → रिरक्षिष टाप् → रिरक्षिष आ → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → रिरक्षिषा।

[२६१] पृषोदरादीनि यथोपदिष्टम् (पा०सू० ६.३.१०९)। पृषोदरादित्वादिटोऽपि लोपो बोध्यः। विकल्पत्वात्पक्षे रिरक्षिषा इत्यपि यत्र न लोपकार्यौ।

[२६२] एवमेव एष साक्षाद्धरेरंशो जातो लोकरिरक्षया (भा०पु० ४.१५.६) इत्यत्रापि।

[२६३] एवमेव पुरोऽवतस्थे कृष्णस्य पुत्रप्राणरिरक्षया (भा०पु० १०.६३.२०) इत्यत्रापि।

[२६४] नपुंसके भावे क्तः (पा०सू० ३.३.११४) इत्यनेन।

[२६५] अर्शआदिभ्योऽच् (पा०सू० ५.२.१२७) इत्यनेन।

[२६६] धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसङ्ग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥ (वा०प० ३.७.८८)

जीर्यतिभ्यश्च (पा०सू० ३.४.७२) इत्यनेन कर्तरि क्तप्रत्यये टापि आदृता इति सम्यक्।[२६७]

## २.५९ विरागित्वम्

मद्भक्तेष्वधिका पूजा सर्वभूतेषु मन्मतिः।
बाह्यार्थेषु विरागित्वं शमादिसहितं तथा॥

– अ०रा० ३.१०.२६

विगतो रागो यस्य स विरागस्तस्य भावो विरागत्वम् इति बहुव्रीहिजन्यविरागशब्दात् त्वप्रत्यये[२६८] यद्यप्यर्थसिद्धिः किं न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः[२६९] इत्यस्य नियमस्योल्लङ्घनेन तथाऽपि विगतो रागो विरागः इत्यत्र प्रगत आचार्यः प्राचार्यः (भा०पा०सू० २.२.१८)[२७०] इतिवत् कुगतिप्रादयः (पा०सू० २.२.१८) इत्यनेन समासे विरागः प्रशस्तो नित्यो वाऽस्त्यस्मिन् इति बहुव्रीह्यलब्धविशिष्टार्थं बोधयितुं कर्मधारयादिनिः।[२७१] ततश्च तस्य भावस्त्वतलौ (पा०सू० ५.१.११९) इत्यनेन त्वप्रत्यये विभक्तिकार्ये विरागित्वम् ।

॥ इत्यरण्यकाण्डीयप्रयोगाणां विमर्शः ॥

॥ अथ किष्किन्धाकाण्डीयप्रयोगाणां विमर्शः ॥

---

[२६७] यथाऽऽह मनुः – सर्वेष्वेव व्रतेष्वेवं प्रायश्चित्तार्थमादृतः (म०स्मृ० ११.२२५)। अत्र टीकाकाराः – आदृतो यत्नवान् (म०स्मृ० मे०टी० ११.२२५) यत्नवान् (म०स्मृ० कु०टी० ११.२२५) आदृतः श्रद्धालुः (म०स्मृ० राघ०टी० ११.२२५)। एवमेव भागवते – यावद्ब्रह्म विजानीयान्मामेव गुरुमादृतः (भा०पु० ११.१८.३९)। अत्र वीरराघवटीका – तत्राऽऽदृत आदरयुक्तः (भा०पु० वी०रा०व्या० ११.१८.३९)। रघुवंशेऽपि कालिदासः – इत्यादृतेन कथितौ रघुनन्दनेन व्युत्क्रम्य लक्ष्मणमुभौ भरतो ववन्दे (र०वं० १३.७२)। अत्र सञ्जीविन्यां मल्लिनाथः – इत्यादृतेन आदरवता। कर्तरि क्तः (र०वं० स०व्या० १३.७२)। दर्पणटीकाकारो हेमाद्रिस्तु इत्यादरेण कथितौ रघुनन्दनेन (र०वं० द०टी० १३.७२) इति पाठं स्वीचक्रे। पञ्चतन्त्रे विष्णुशर्मा च – आत्मानमादृतो रक्षेत्प्रमादाद्धि विनश्यति (प०त० ३.२२९)। अत्राभिनवराजलक्ष्मी टीका – आदृतः सावधानः सन् (प०त० अ०टी० ३.२२९)।

[२६८] तस्य भावस्त्वतलौ (पा०सू० ५.१.११९) इत्यनेन।

[२६९] मूलं मृग्यम्।

[२७०] प्रगत आचार्यः प्राचार्यः इत्यत्र प्रादयः क्तार्थे (वा० २.२.१८) इत्यनेन प्रादयो गताद्यर्थे प्रथमया (वा० २.२.१८) इत्यनेन च समासो भाष्ये दर्शितः। उभे वार्तिके कुगतिप्रादयः (पा०सू० २.२.१८) इति सूत्रे पठिते।

[२७१] भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने। सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः॥ (भा०पा०सू० ५.२.९४)।

## २.६० दाशरथो रामः

अहं दाशरथो रामस्त्वयं मे लक्ष्मणोऽनुजः।
सीतया भार्यया सार्धं पितुर्वचनगौरवात्॥

– अ०रा० ४.१.१९

सीतामन्वीक्षमाणौ धनुर्बाणधरौ श्रीरामलक्ष्मणौ विलोक्य तदाशङ्कया सुग्रीवेण प्रेषितं वटुवेषधारिणं मारुतिं दृष्ट्वा तेन नामादिपरिचयं पृष्टः श्रीरामभद्रः सङ्क्षिप्य परिचयं प्रस्तौति दाशरथो रामः इति। अत्र दशरथस्यापत्यं पुमान् दाशरथिः इति विग्रहे तस्यापत्यम् (पा०सू० ४.१.९२) इति सूत्रार्थानुसारमपत्यार्थे षष्ठ्यन्तदशरथप्रातिपदिकात् अत इञ् (पा०सू० ४.१.९५) इत्यनेन इञ् प्रत्यये दाशरथिः इत्येव प्रसिद्धप्रयोगः दाशरथः इति कथमकारान्तात् इञ् प्रत्ययस्य दुर्निवारत्वात्। श्रीरामो वस्तुतो दशरथस्य नापत्यं तत्क्षेत्रजन्यव्यवहाराद्दाशरथिरित्युपचर्यते। अतो हनुमतः समक्षमपत्यरूपमर्थं न कथयन्नाह दाशरथः। दशरथस्यायं दाशरथः इति विग्रहे तस्येदम् (पा०सू० ४.३.१२०) इत्यनेन अण् - प्रत्यये भत्वादकारलोपे[२७२] दाशरथः। दशरथस्य स्वेन सह केवलं पाल्यपालकभावरूप-सम्बन्धस्यैव विवक्षा भक्तप्रवरहनुमतः सम्मुखे राघवेन्द्रस्य। यद्वा दशरथादागतो दाशरथः इति विग्रहे पञ्चम्यन्तदशरथशब्दात् तत आगतः (पा०सू० ४.३.७४) इति अण् प्रत्ययः। लोपादिकार्ये तद्धितेष्वचामादेः (पा०सू० ७.२.११७) इत्यनेन वृद्धौ दाशरथः। अर्थादण् पार्थक्ये। यतो हि दशरथस्य सकाशादहमागतः। अथवाऽपि विभाषा गुणेऽस्त्रियाम् (पा०सू० २.३.२५) इत्यनेन पञ्चमी। ततोऽण्। अनेन प्रदीयतां दाशरथाय मैथिली (वा०रा० ६.१४.३) इति वाल्मीकीयरामायणप्रयोगोऽपि व्याख्यातः।

## २.६१ अभिषेचनम्

तच्छ्रुत्वा दुःखिताः सर्वे मामनिच्छन्तमप्युत।
राज्येऽभिषेचनं चक्रुः सर्वे वानरमन्त्रिणः॥

– अ०रा० ४.१.५३

अत्र मामभिषेचनं चक्रुः इति सामानाधिकरण्यदर्शनात् अभिषेचनम् इत्यत्र प्रत्ययसन्देहपरं भवति माम्। तथा च भावे ल्युट्[२७३] चेत्कृद्योगे कर्तृकर्मणोः कृति (पा०सू० २.३.६५) इति सूत्रेण षष्ठ्यां ममाभिषेचनम् इति स्यात्। द्वितीयायां प्रत्यय-जिज्ञासा तदवस्थेति चेत्। अभिषिच्यत इत्यभिषेचनः इति कर्मणि कृत्यल्युटो बहुलम् (पा०सू० ३.३.११३) इत्यनेन ल्युट्। यद्वा सेचनम् इति भावल्युडन्तम्। अभितः सेचनं

[२७२] यचि भम् (पा०सू० १.४.१८) इत्यनेन भत्वम्। यस्येति च (पा०सू० ६.४.१४८) इत्यनेनाकारलोपः।
[२७३] ल्युट् च (पा०सू० ३.३.११५) इत्यनेन।

यस्य सोऽभिषेचनस्तमभिषेचनम् इति प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपश्च (वा० २.२.२२) इत्यनेन समासे अभिषेचनम् इति सिद्धम्।

## २.६२ बलवतां बली

सुग्रीवोऽप्याह राजेन्द्र वाली बलवतां बली।
कथं हनिष्यति भवान्देवैरपि दुरासदम्॥

– अ०रा० ४.१.६०

अत्र बहूनां निर्धारणतया तमप् प्रत्ययः इष्ठन् प्रत्ययो वा प्राप्तः[२७४] किन्त्वविवक्षणतया न।

## २.६३ चेतनम्

तदा मुहूर्त्तं निःसंज्ञो भूत्वा चेतनमाप सः।
ततो वाली ददर्शाग्रे रामं राजीवलोचनम्।
धनुरालम्ब्य वामेन हस्तेनान्येन सायकम्॥

– अ०रा० ४.२.४८

श्रीरामबाणभिन्नशरीरो भूमौ पतितो वाली चेतनां प्राप्तत्वान्। अत्र चेतनम् इति प्रयुक्तम्। चितीँ सञ्ज्ञाने (धा०पा० ३९) इति धातोः स्वार्थे णिचि[२७५] ततश्च चेत्यत इति चेतना[२७६] इति विग्रहे ण्यासश्रन्थो युच् (पा०सू० ३.३.१०७) इत्यनेन भावे युचि प्रत्ययेऽनादेशे स्त्रीत्वाट्टाप्प्रत्यये चेतना।[२७७] चेतनम् इत्यत्र हि शुद्धात् चेतति इत्यस्माद्भावे ल्युट्।[२७८] चेतनम् ।

## २.६४ भ्राजद्वनमालाविभूषितम्

बिभ्राणं चीरवसनं जटामुकुटधारिणम्।
विशालवक्षसं भ्राजद्वनमालाविभूषितम्॥

– अ०रा० ४.२.४९

---

[२७४] अतिशायने तमबिष्ठनौ (पा०सू० ५.३.५५) इत्यनेन।

[२७५] चितँ सञ्चेतने (धा०पा० १६७३) इत्यस्मात्स्वार्थे णिचि वा।

[२७६] चेति यक् त इति स्थिते णेरनिटि (पा०सू० ६.४.५१) इत्यनेन णिलोपे चेत्यते।

[२७७] यद्वा चितँ सञ्चेतने (धा०पा० १६७३) इत्यतः सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् (पा०सू० ३.१.२५) इत्यनेन स्वार्थे णिचि ण्यासश्रन्थो युच् (पा०सू० ३.३.१०७) इत्यनेन भावे युच्यनादेशे टापि चेतना।

[२७८] ल्युट् च (पा०सू० ३.३.११५) इत्यनेन।

भूमिपतितो वाली समरधीररघुवीरस्य भुवनमोहनसौन्दर्यं लोचनातिथीकरोति यच्छ्रीरामो वल्कलधरो विविधभूषणभूषितः। तत्र भ्राजद्वनमालाविभूषितम् इति शब्दघटिते भ्राजत् इत्यत्र शतृप्रयोगोऽनुचितः।[२७९] तथाऽप्यस्याऽत्मनेपदीयत्वं त्वौपचारिकमेव। अनुदात्तेत्त्वलक्षणस्याऽत्मनेपदस्यानित्यत्वात्।[२८०] भ्राजन्ती चासौ वनमाला चेति भ्राजद्वनमाला तया भूषितम् इति।

## २.६५ तिरोभूत्वा

राजधर्ममविज्ञाय गर्हितं कर्म ते कृतम्।
वृक्षखण्डे तिरोभूत्वा त्यजता मयि सायकम्॥

– अ०रा० ४.२.५२

वाली श्रीरामं भर्त्सयन्नाह यन्मां गुप्तवेषो हतवान्। अत्र तिरोभूत्वा इति प्रयुक्तम्। तिरस् शब्दस्य हि भूशब्देन समासे क्त्वो ल्यपि[२८१] तिरोभूय इत्येव। असति समासे तिरो इति पृथक्पदम्। कथं न तिरस् तर्हि। संहिताया विवक्षणात्। अतः समासाभावे तिरो भूत्वा इति न दोषः।

## २.६६ वानरम्

वानरं व्याधवद्धत्वा धर्मं कं लप्स्यसे वद।
अभक्ष्यं वानरं मांसं हत्वा मां किं करिष्यसि॥

– अ०रा० ४.२.५८

वाली कथयति यत् वानरं मांसं विगर्हितम्। अत्र वानरे भवमिति वानरीयम्। वृद्धाच्छः (पा०सू० ४.२.११४) इत्यनेन छप्रत्यये वानरीयम् इति पाणिनीयम्। वानरम् इति कथम्। नीलो घटः इतिवत् वानरं मांसम्। शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते (व्यु०वा० का०प्र०) इति व्युत्पत्तिवादप्रयोगात् वानराभिन्नं मांसम्। यद्वा वानरस्येदं वानरम् इति विग्रहे तस्येदम् (पा०सू० ४.३.१२०) इति अण् प्रत्ययः।

---

[२७९] भ्राजृँ दीप्तौ (पा०सू० १८१) टुभ्राजृँ दीप्तौ (धा०पा० ८२३) इत्यनयोरात्मनेपदीयत्वाच्छानचि भ्राजमान-वनमालाविभूषितम् इति वक्तव्यमिति भावः।

[२८०] अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४)।

[२८१] समासेऽनञ्पूर्वे क्त्वो ल्यप् (पा०सू० ७.१.३७) इत्यनेन।

## २.६७ बहु भाषन्तम्

इत्येवं बहु भाषन्तं वालिनं राघवोऽब्रवीत्।
धर्मस्य गोप्ता लोकेऽस्मिंश्चरामि सशरासनः॥

– अ०रा० ४.२.५९

पतितं वालिनं बहु भाषमाणं श्रीरामभद्रः प्रतिवक्ति। अत्र भाषमाणम् इत्यर्थे भाषन्तम् इति प्रयुक्तम्। यतो हि भाष् धातुः (भाषँ व्यक्तायां वाचि धा०पा० ६१२) आत्मनेपदीयस्तथा च भाषत इति भाषमाणस्तं भाषमाणम् इति शानचा भवितव्यमासीत्। किन्तु भाषत इति भाषः पचादित्वादच्।[२८२] भाष इवाऽचरति इति क्विपि लटि तिपि शपि पररूपे भाषति।[२८३] भाषतीति भाषन् तं भाषन्तम् इत्याचारक्विबन्तात् शतृप्रत्यये न दोषः।[२८४] वालिर्भाषते नह्यपि तु भाष इवाऽचरति इति परस्मैपदस्य तात्पर्यम्।

## २.६८ दापितम्

सुग्रीवं त्वं सुखं राज्यं दापितं वालिघातिना।
रामेण रुमया सार्धं भुङ्क्ष्व सापत्नवर्जितम्॥

– अ०रा० ४.३.११

अत्र दत्तम् इति न कथयित्वा दापितम् इति प्रयुक्तम्। स्वार्थे णिचि अर्तिह्रीव्लीरी-क्नूयीक्ष्माय्यातां पुङ्णौ (पा०सू० ७.३.३६) इत्यनेन पुकि क्तप्रत्यये दापितम् । अर्थात् रामेण राज्यमदाप्यत। यद्वा वाल्यददाद्रामः प्रेरयत् इत्यर्थे वालिना राज्यमदाप्यत कर्मवाच्ये वालि-घातिना वालिना राज्यमदाप्यत इत्यस्मिन्नर्थे क्तप्रत्ययः। अत्र हेतुमति च (पा०सू० ३.१.२६)

---

[२८२] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन।

[२८३] भाष → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → भाष क्विँप् → भाष व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → भाष → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → भाष लट् → भाष तिप् → भाष ति → कर्तरि शप् (पा०सू० ३.१.६८) → भाष शप् ति → भाष अ ति → अतो गुणे (पा०सू० ६.१.९७) → भाष ति → भाषति।

[२८४] भाष → धातुसञ्ज्ञा (पूर्ववत्) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → भाष लट् → लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) → भाष शतृँ → भाष अत् → अतो गुणे (पा०सू० ६.१.९७) → भाषत् → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपादिकसञ्ज्ञा → विभक्तिकार्यम् → भाषत् सुँ → भाषत् स् → उगिदचां सर्वनामस्थानेऽधातोः (पा०सू० ७.१.७०) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → भाष नुँम् त् स् → भाष न् त् स् → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → भाष न् त् → संयोगान्तस्य लोपः (पा०सू० ८.२.२३) → भाष न् त् स् → भाषन्। भाषत् → प्रातिपदिकसञ्ज्ञा (पूर्ववत्) → विभक्तिकार्यम् → भाषत् अम् → उगिदचां सर्वनामस्थानेऽधातोः (पा०सू० ७.१.७०) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → भाष नुँम् त् अम् → भाष न् त् अम् → भाषन्तम्।

इत्यनेन णिच्।

## २.६९ कुर्वन्ती

ध्यात्वा मद्रूपमनिशमालोच्य मयोदितम्।
प्रवाहपतितं कार्यं कुर्वन्त्यपि न लिप्यसे॥

– अ०रा० ४.३.३५

श्रीरामस्तारां प्रति कथयति कार्यं कुर्वत्यपि मत्कृपया न लिप्ता भविष्यसि। अत्र नुम् अपाणिनीय इव। करोतीति कुर्वती इति तनादित्वाच्छबभावे[285] नुम् कथमिति चेत्। गणकार्यमनित्यम् (प०शे० ९३.३) इत्यनेन शपि नुम् सङ्गत एव। यद्वा सौत्रधातव इवात्राप्याकृतिगणतया क्रियार्थः कुर्वँ धातुः भ्वादिगणे पठ्यतां[286] तथा च कुर्वतीति कुर्वन्ती इति शतृप्रत्यये नुम् साधुः।

## २.७० असहन्

रामस्तु पर्वतस्याग्रे मणिसानौ निशामुखे।
सीताविरहजं शोकमसहन्निदमब्रवीत्॥

– अ०रा० ४.५.१

षहँ मर्षणे (धा०पा० ८५२, १८०९) इत्यात्मनेपदीयधातुः। तत्र शानचि सहमानः इति पाणिनीयः। असहन् इति तु सहत इति सहो न सह इत्यसहः पचादित्वादच्[287] नञ्समासश्च।[288] असह इवाऽचरतीत्यसहति।[289] असहतीत्यसहन्। आचारक्विबन्ताच्छतृ-

[285] शाभावे श्यनभावे चेति बोध्यम्।

[286] बहुलमेतन्निदर्शनम् (धा०पा० ग०सू० १९३८) आकृतिगणोऽयम् (धा०पा० ग०सू० १९९२) भूवादिष्वेतदन्तेषु दशगणीषु धातूनां पाठो निदर्शनाय तेन स्तम्भुप्रभृतयः सौत्राश्चुलुम्पादयो वाक्यकारीयाः प्रयोगसिद्धा विक्लवत्यादयश्च (मा०धा०वृ० १०.३२८) इत्यनुसारमाकृतिगणत्वाद्भ्वादिगण ऊह्योऽयं धातुः।

[287] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन।

[288] नलोपो नञः (पा०सू० ६.३.७३) इत्यनेन नलोपः।

[289] असह → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → असह क्विँप् → असह व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → असह → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → असह लट् → असह तिप् → असह ति → कर्तरि शप् (पा०सू० ३.१.६८) → असह शप् ति → असह अ ति → अतो गुणे (पा०सू० ६.१.९७) → असह ति → असहति।

प्रत्ययः।[२९०] असहनशीलसमानमाचरणं करोति। वस्तुतस्तु तस्य क्व वियोग इत्येवाऽचार-क्विबन्ताच्छतृप्रत्ययस्याऽध्यात्मिकं तात्पर्यं प्रतिभाति।

## २.७१ विस्मृतः

कृतघ्नवत्त्वया नूनं विस्मृतः प्रतिभाति मे।
त्वत्कृते निहितो वाली वीरस्त्रैलोक्यसम्मतः॥

– अ०रा० ४.४.४५

रामकार्यार्थमनिशं जागर्ति न तु विस्मृतः।
आगताः परितः पश्य वानराः कोटिशः प्रभो॥

– अ०रा० ४.५.५५

सकर्मकस्मृधातोः (स्मृ आध्याने धा०पा० ८०७) विउपसर्गपूर्वकात्कर्तरि क्तवतुप्रत्यये विस्मृतवान् इति पाणिनीयः। किन्तु विस्मरणं विस्मृतम् इति भावक्तान्तविस्मृतशब्दात्[२९१] तदस्त्यस्येत्यर्शआद्यजन्तात्[२९२] विस्मृतः अपि पाणिनीयं कर्तृविशेषणं सदपि।[२९३]

## २.७२ गृह्य

इत्युक्त्वा लक्ष्मणं भक्त्या करे गृह्य स मारुतिः।
आनयामास नगरमध्याद्राजगृहं प्रति॥

– अ०रा० ४.५.३९

अत्रोपसर्गं विना कथं ल्यबिति चेत्। करे इत्यस्य साक्षाद्गणे पाठात् साक्षात्प्रभृतीनि

[२९०] असह → धातुसञ्ज्ञा (पूर्ववत्) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → असह लट् → लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) → असह शतृँ → असह अत् → अतो गुणे (पा०सू० ६.१.९७) → असहत् → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपादिकसञ्ज्ञा → विभक्तिकार्यम् → असहत् सुँ → असहत् स् → उगिदचां सर्वनामस्थानेऽधातोः (पा०सू० ७.१.७०) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → असह नुँम् त् स् → असह न् त् स् → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → असह न् त् → संयोगान्तस्य लोपः (पा०सू० ८.२.२३) → असह न् त् स् → असहन्।

[२९१] नपुंसके भावे क्तः (पा०सू० ३.३.११४) इत्यनेन भावक्तान्तशब्दः।

[२९२] अर्शआदिभ्योऽच् पा०सू० ५.२.१२७) इत्यनेन।

[२९३] विस्मृतमस्त्यस्येति विस्मृतः इति भावः। यद्वा कर्मणोऽविवक्षायामकर्मकत्वात् गत्यर्थाकर्मकश्लिष-शीङ्स्थासवसजनरुहजीर्यतिभ्यश्च (पा०सू० ३.४.७२) इत्यनेन कर्तरि क्तः।

च (पा०सू० १.४.७४) इत्यनेन गतिसञ्ज्ञायां समासे ल्यबादेशे न दोषः।[२९४] यद्वा प्रउपसर्ग आसीत्तस्य विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इति वार्त्तिकेन लोपः।

## २.७३ मारुतिः

इत्युक्त्वा लक्ष्मणं भक्त्या करे गृह्य स मारुतिः।
आनयामास नगरमध्याद्राजगृहं प्रति॥

– अ०रा० ४.५.३९

यद्यपि मरुतोऽयम् इति विग्रहे तु मारुतः।[२९५] अकारान्ताभावात् इञ् प्रत्ययस्याऽप्यभावः। किन्तु मरुदेव मारुतः।[२९६] प्रज्ञादित्वात्स्वार्थे अण्।[२९७] मारुतस्यापत्यं पुमान् मारुतिः इति अत इञ् (पा०सू० ४.१.९५) इत्यनेनेञ्प्रत्यये विभक्तिकार्ये मारुतिः।[२९८]

## २.७४ दशसाहस्राः

प्रेषिता दशसाहस्रा हरयो रघुसत्तम।
आनेतुं वानरान् दिग्भ्यो महापर्वतसन्निभान्॥

– अ०रा० ४.५.४६

दशसाहस्रमस्त्येषामिति दशसाहस्राः इत्यर्शआद्यजन्तम्।[२९९]

॥ इति किष्किन्धाकाण्डीयप्रयोगाणां विमर्शः ॥

॥ अथ सुन्दरकाण्डीयप्रयोगाणां विमर्शः ॥

---

[२९४] साक्षात्प्रभृतीनि च (पा०सू० १.४.७४) इत्यत्र क्वचिदेकदेशोऽप्यनुवर्तते (प०शे० १८) इति परिभाषया कृञि (पा०सू० १.४.७२) इत्यस्य मण्डूकप्लुत्या निवृत्तौ विभाषा (पा०सू० १.४.७२) इत्यस्यानुवृत्तौ कृञभावेऽपि साक्षात्प्रभृतीनां गतिसञ्ज्ञा क्वाचित्का। यद्वा चकारग्रहणात्कृञभावेऽपि गतिसञ्ज्ञा क्वाचित्का। सत्यां गतिसञ्ज्ञायां कुगतिप्रादयः (पा०सू० २.२.१८) इत्यनेन समास इति भावः।

[२९५] तस्येदम् (पा०सू० ४.३.१२०) इत्यनेन।

[२९६] समीरमारुतमरुज्जगत्प्राणसमीरणाः (अ०को० १.१.६२)

[२९७] मरुत् प्रातिपदिकात् प्रज्ञादिभ्यश्च (पा०सू० ५.४.३८) इत्यनेन अण् प्रत्यये तद्धितेष्वचामादेः (पा०सू० ७.२.११७) इत्यनेनाऽऽदिवृद्धौ विभक्तिकार्ये।

[२९८] यचि भम् (पा०सू० १.४.१८) इत्यनेन भत्वम्। यस्येति च (पा०सू० ६.४.१४८) इत्यनेनाकारलोपः।

[२९९] अर्शआदिभ्योऽच् पा०सू० ५.२.१२७) इत्यनेन। यचि भम् (पा०सू० १.४.१८) इत्यनेन भत्वम्। यस्येति च (पा०सू० ६.४.१४८) इत्यनेनाकारलोपः।

## २.७५ उद्वमती

हनूमानपि तां वाममुष्टिनाऽवज्ञयाऽहनत्।
तदैव पतिता भूमौ रक्तमुद्वमती भृशम्॥

– अ०रा० ५.१.४६

अत्र हनुमन्मुष्टिप्रहारेण रक्तमुद्वमन्ती लङ्किनी पपात। वम् धातोः (टुवमँ उद्गिरणे धा०पा० ९८४) भ्वादित्वात् नुम् प्रयोक्तव्यः।[300] किन्त्वत्र उद्वमति इति विग्रह उणादिः तृँच् प्रत्ययः।[301] ततो ङीपि[302] उद्वमती। यद्वा गणकार्यमनित्यम् (प०शे० ९३.३) इत्यनेन शबभावे नुमभावः।[303]

## २.७६ ऐन्द्रः

ऐन्द्रः काकस्तदागत्य नखैस्तुण्डेन चासकृत्।
मत्पादाङ्गुष्ठमारक्तं विददाराऽमिषाशया॥

– अ०रा० ५.३.५४

इन्द्रस्यापत्यं पुमान् इति विग्रहे अत इञ् (पा०सू० ४.१.९५) इत्यनेन इञ् प्रत्यये ऐन्द्रिः। किन्तु इन्द्रस्यायम् इति विग्रहे तस्येदम् (पा०सू० ४.३.१२०) इत्येन अण् प्रत्यये भत्वादकारलोपे[304] ऐन्द्रः। सीतापहाररूपगर्हितकर्मत्वादपत्यत्वकलङ्कधियाऽत्र तदपत्यत्वं न

[300] शाप्श्यनोर्नित्यम् (पा०सू० ७.१.८१) इत्यनेन नुम् नित्यमिति भावः।

[301] नायं बहुलमन्यत्रापि (प०उ० २.९५) इति तृच्। स नोगित्। कार्याद्विद्यादनूबन्धम् (भा०पा०सू० ३.३.१) केचिदविहिता अप्यूह्याः (वै०सि०कौ० ३१६९) इत्यनुसारमूह्योऽयमविहित उगित्प्रत्ययः। तृँच् प्रत्यये चात्र शबागमोऽप्यूह्यः। नयतेः षुगागमः (प०उ० श्वे०वृ० २.९६) इतिवत्।

[302] उगितश्च (पा०सू० ४.१.६) इत्यनेन।

[303] शतर्यैव शम्नुमभावे उद्वमती इति भावः। यद्वा आगमशास्त्रमनित्यम् (प०शे० ९३.२) इत्यनेन नुमभावः। उत् टुवमँ उद्गिरणे (धा०पा० ९८४) → उत् वम् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → उत् वम् लट् → लटः शतृशानचावप्रथमा-समानाधिकरणे (पा०सू० ३.२.१२४) → उत् वम् शतृँ → उत् वम् अत् → गणकार्यमनित्यम् (प०शे० ९३.३) → शबभावः → उत् वमत् → झलां जशोऽन्ते (पा०सू० ८.२.३९) → उद् वमत् → उद्वमत् → उगितश्च (पा०सू० ४.१.६) → उद्वमत् ङीप् → उद्वमत् ई → उद्वमती → कृत्तद्धित-समासाश्च (पा०सू० १.२.४६) → प्रातिपदिकसञ्ज्ञा → उद्वमती सुँ → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → उद्वमती। यद्वा उत् वम् अत् (पूर्ववत्) → कर्तरि शप् (पा०सू० ३.१.६८) → उत् वम् शप् अत् → उत् वम् अ अत् → अतो गुणे (पा०सू० ६.१.९७) → उत् वमत् → झलां जशोऽन्ते (पा०सू० ८.२.३९) → उद् वमत् → उद्वमत् → उगितश्च (पा०सू० ४.१.६) → उद्वमत् ङीप् → उद्वमत् ई → शाप्श्यनोर्नित्यम् (पा०सू० ७.१.८१) → नित्यनुम्प्राप्तिः → आगम-शास्त्रमनित्यम् (प०शे० ९३.२) → नुमभावः → उद्वमती → शेषं पूर्ववत्।

[304] यचि भम् (पा०सू० १.४.१८) इत्यनेन भत्वम्। यस्येति च (पा०सू० ६.४.१४८) इत्यनेनाकारलोपः।

विवक्षितम्।

## २.७७ ब्रह्मपाशतः

बद्ध्वाऽऽनेष्ये द्रुतं तात वानरं ब्रह्मपाशतः।
इत्युक्त्वा रथमारुह्य राक्षसैर्बहुभिर्वृतः॥

– अ०रा० ५.३.९२

अत्र ब्रह्मपाशतः इति ब्रह्मपाशेन विग्रहेऽस्मिन्तृतीयार्थे सार्वविभक्तिकस्तसिः।[३०५]

## २.७८ भेदयित्वा

भेदयित्वा ततो घोरं सिंहनादमथाकरोत्।
ततोऽतिहर्षाद्धनुमान स्तम्भमुद्यस्य वीर्यवान्॥

– अ०रा० ५.३.९६

भिदिँर विदारणे (धा०पा० १४३९) इत्यत्र स्वार्थिको णिच्।[३०६] ततो त्त्वाप्रत्यय इटि गुणेऽयादेशे भेदयित्वा।[३०७]

॥ इति सुन्दरकाण्डीयप्रयोगाणां विमर्शः ॥

॥ अथ युद्धकाण्डीयप्रयोगाणां विमर्शः ॥

---

[३०५] तसेः सार्वविभक्तिकत्वं तदन्तानामाकृतिगणत्वं च ९४तमे पृष्ठे ८६तम्यां पादटिप्पण्यां स्पष्टीकृतम्। ब्रह्मपाशतः इत्यत्र तृतीयायां तसिरिति भावः।

[३०६] निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजुच्यते (वा०प० ३.७.६०)।

[३०७] भिदिँर विदारणे (धा०पा० १४३९) → भिद् → स्वार्थे णिच् → भिद् णिच् → भिद् इ → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → भेद् इ → भेदि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → भेदि त्त्वा → समानकर्तृकयोः पूर्वकाले (पा०सू० ३.४.२१) → भेदि त्त्वा → भेदि त्वा → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → भेदि इट् त्वा → भेदि इ त्वा → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → भेदे इ त्वा → एचोऽयवायावः (पा०सू० ६.१.७८) → भेदय् इ त्वा → भेदयित्वा → तद्धितश्चासर्वविभक्तिः (पा०सू० १.१.३८) → अव्ययसञ्ज्ञा → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपदिकसञ्ज्ञा → विभक्तिकार्यम् → भेदयित्वा सुँ → अव्ययादाप्सुपः (पा०सू० २.४.८२) → भेदयित्वा। यद्वा भेदनं भेदः। भावे (पा०सू० ३.३.१८) इत्यनेन घञि। तत्करोति तदाचष्टे (धा०पा० ग०सू०) इत्यनेन णिचि लटि शपि तिपि भेदं करोति इत्यर्थे भेदयति। ततः भेदं कृत्वा इत्यर्थे भेदयित्वा। प्रकृतधातोरनिङ्कत्वाण्णिजभावे भित्त्वा इति रूपम्।

## २.७९ आरोहयन्तः

शैलानारोहयन्तश्च जग्मुर्मारुतवेगतः।
असङ्ख्याताश्च सर्वत्र वानराः परिपूरिताः॥

– अ०रा० ६.१.३९

आपूर्वकं रुह् धातुं (रुहँ बीजजन्मनि प्रादुर्भावे च धा०पा० ८५९) स्वार्थे णिजन्तं कृत्वा ततः शतरि शपि गुणेऽयादेशे प्रथमाबहुवचने आरोहयन्तः।[३०८]

## २.८० याचते

सकृदेव प्रपन्नाय तवास्मीति च याचते।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम॥

– अ०रा० ६.३.१२[३०९]

अत्र शरणागतं विभीषणं प्रति स्वस्वभावं प्रकटयन् रामभद्रः प्राह यत् प्रपन्नाय जनाय तवास्मीति याचमानायाहं सर्वप्राणिभ्योऽभयं ददामि। आत्मनेपदीयः याच् धातुः (टुयाचृँ याच्ञायाम् धा०पा० ८६३)।[३१०] तस्मात् याचते इति हि प्रयोगः।[३११] अस्माच्छानचि चतुर्थ्यैकवचने याचमानाय इति हि पाणिनीयम्। किन्तु याचत इति

[३०८] न्यग्भावना न्यग्भवनं रुहौ शुद्धे प्रतीयते। न्यग्भावना न्यग्भवनं ण्यन्तेऽपि प्रतिपद्यते॥ अवस्थां पञ्चमीमाहुर्ण्यन्ते तां कर्मकर्तरि। निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजुच्यते॥ (वा०प० ३.७.५९–६०)। रुहँ बीजजन्मनि प्रादुर्भावे च (धा०पा० ८५९) → रुह् → स्वार्थे णिच् → रुह् णिच् → रुह् इ → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → रोह् इ → रोहि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा। आङ् रोहि → आ रोहि → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → आ रोहि लट् → लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) → आ रोहि शतृँ → आ रोहि अत् → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → आ रोहे अत् → एचोऽयवायावः (पा०सू० ६.१.७८) → आ रोहय् अत् → आरोहयत् → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपदिकसञ्ज्ञा → विभक्तिकार्यम् → आरोहयत् जस् → आरोहयत् अस् → उगिदचां सर्वनामस्थानेऽधातोः (पा०सू० ७.१.७०) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → आरोहय नुँम् त् अस् → आरोहय न् त् अस् → आरोहयन्तस् → ससजुषो रुः (पा०सू० ८.२.६६) → आरोहयन्तरुँ → खरवसानयोर्विसर्जनीयः (पा०सू० ८.३.१५) → आरोहयन्तः।

[३०९] वाल्मीकीयरामायणे च – सकृदेव प्रपन्नाय तवास्मीति च याचते। अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम॥ (वा०रा० ६.१८.३३)।

[३१०] पूर्वपक्षोऽयम्।

[३११] यथा बलिं याचते वसुधाम् (वै०सि०कौ० ५३९, ल०सि०कौ० ८९५) इति प्रसिद्धोदाहरणे।

याचः।[३१२] याच इवाऽचरतीति याचति।[३१३] याचतीति याचन् ।[३१४] तस्मै याचते इत्याचारक्विबन्ताच्छतृप्रत्यये याचते।[३१५] याचकवदाचरणकारिणेऽप्यभयं ददामि तदा याचमानाय किं दद्यामिति स्वकारुण्यात्स्वयं ध्वनयितुं स्वयं निखिलनिगमार्णवो राघवो याचते इति प्रायुङ्क्त। अथवोभयपदी धातुरयम्। तथा च भगवान्पाणिनिः टुयाचृँ याञ्ञायाम् (धा०पा० ८६३)। स्वरितेदयम्। एष कर्त्रभिप्राये क्रियाफल आत्मनेपदी।[३१६] अन्याभिप्राये क्रियाफले परस्मैपदी।[३१७] भगवतोऽभिप्रायो यत् – यः स्वार्थं त्यक्त्वा प्रेमभक्तये मां प्रपन्नः तवास्मि इति वदन् मामभयं ब्रह्मैव याचति तस्मा अहं सर्वभूतेभ्योऽभयं ददामि। अतोऽत्र परस्मैपदं ततः शतृप्रत्ययः। तस्य चतुर्थ्येकवचनरूपं याचते। याचतीति याचन् तस्मै याचते।

## २.८१ अभिषेकम्

लङ्काराज्याधिपत्यार्थमभिषेकं रमापतिः।
कारयामास सचिवैर्लक्ष्मणेन विशेषतः॥

– अ०रा० ६.३.४५

अत्र नायं भावसाधनोऽपि तु पुंसि सञ्ज्ञायां घः प्रायेण (पा०सू० ३.३.११८) इत्यनेन घप्रत्ययः सञ्ज्ञायामित्यस्य प्रायिकत्वात्।

---

[३१२] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन कर्तरि पचाद्यच्।

[३१३] याच → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → याच क्विँप् → याच व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → याच → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → याच लट् → याच तिप् → याच ति → कर्तरि शप् (पा०सू० ३.१.६८) → याच शप् ति → याच अ ति → अतो गुणे (पा०सू० ६.१.९७) → याच ति → याचति।

[३१४] याच → धातुसञ्ज्ञा (पूर्ववत्) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → याच लट् → लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) → याच शतृँ → याच अत् → अतो गुणे (पा०सू० ६.१.९७) → याचत् → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपादिकसञ्ज्ञा → विभक्तिकार्यम् → याचत् सुँ → याचत् स् → उगिदचां सर्वनामस्थानेऽधातोः (पा०सू० ७.१.७०) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → याच नुँम् त् स् → याच न् त् स् → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → याच न् त् → संयोगान्तस्य लोपः (पा०सू० ८.२.२३) → याच न् त् स् → याचन्।

[३१५] याचत् → प्रातिपादिकसञ्ज्ञा (पूर्ववत्) → विभक्तिकार्यम् → याचत् ङे → याचत् ए → याचते।

[३१६] स्वरितञितः कर्त्रभिप्राये क्रियाफले (पा०सू० १.३.७२) इत्यनेन।

[३१७] शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) इत्यनेन।

## २.८२ शासिता

अनुजीव्य सुदुर्बुद्धे गुरुवद्भाषसे कथम्।
शासिताऽहं त्रिजगतां त्वं मां शिक्षन्न लज्जसे॥

– अ०रा० ६.५.२

अत्र शास्तीति शास्ता इत्यदादेर्धातोः (शासुँ अनुशिष्टौ धा०पा० १०७५) तु नेट्।[३१८] किन्तु आगमशास्त्रमनित्यम् (प०शे० ९३.२) इति कृत्वा सेट्।[३१९]

## २.८३ शिक्षन्

अनुजीव्य सुदुर्बुद्धे गुरुवद्भाषसे कथम्।
शासिताऽहं त्रिजगतां त्वं मां शिक्षन्न लज्जसे॥

– अ०रा० ६.५.२

शिक्ष् धातुः (शिक्षँ विद्योपादाने धा०पा० ६०५) आत्मनेपदी। स च शिक्षा-ग्रहणार्थको न तु शिक्षादानार्थकः।[३२०] अत्र शिक्षयन् इति पाणिनीयम्। किन्त्वन्तर्भावित-ण्यर्थत्वादनित्यमात्मनेपदम्। तस्मात् शिक्षन् प्रयोगोऽयं पाणिनीयोऽस्ति सर्वतः।

## २.८४ आप्लवन्तः

कोटिशतयुताश्चान्ये रुरुधुर्नगरं भृशम्।
आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः॥

– अ०रा० ६.५.५२

प्लु धातुः (प्लुङ् गतौ धा०पा० ९५८) आत्मनेपदी। अत्रापि शतृप्रत्यय आत्मनेपदस्यानित्यतास्वीकारेण।[३२१]

---

[३१८] तृंस्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ (प०उ० २.९४, द०उ० २.१)। शास्ता वरुणः। प्रशास्ता । शास्ता गुरुः (प०उ०श्वे०वृ० २.९४)। प्रशास्तीति प्रशास्ता। राजा गुरुर्वा (द०उ०वृ० २.१)।

[३१९] यथा मनुस्मृतौ – प्रशासितारं सर्वेषामणीयांसमणोरपि (म०स्मृ० १२.१२२)। शकुन्तलानाटकेऽपि – कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम् (अ०शा० १.२४)। यद्वाऽसञ्ज्ञायां तृंस्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ (प०उ० २.९४, द०उ० २.१) इत्यस्याप्रवृत्तौ ण्वुल्तृचौ (पा०सू० ३.१.१३३) इत्यनेन तृचि तृन् (पा०सू० ३.२.१३५) इत्यनेन तृनि वा आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) इत्यनेनेडागमे विभक्तिकार्ये शासिता।

[३२०] यथा शकुन्तलानाटकस्य मैथिलबङ्गीयपाठयोः – विवर्तितभ्रूरियमद्य शिक्षते भयादकामाऽपि हि दृष्टि-विभ्रमम् (अ०शा० १.२४)। रघुवंशे च – अशिक्षतास्त्रं पितुरेव मन्त्रवत् (र०वं० ३.३१)।

[३२१] व्यत्ययो बहुलम् (पा०सू० ३.१.८५) इत्यनेनात्मनेपदस्य छान्दसानित्यताया परस्मैपदमिति भावः। यद्वा अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) इतिवत् ङित्त्वलक्षणमात्मनेपदमप्यनित्यम्।

## २.८५ ग्रसन्ती

ततो ददर्श हनुमान् ग्रसन्तीं मकरीं रुषा।
दारयामास हस्ताभ्यां वदनं सा ममार हे॥

– अ०रा० ६.७.२३

ग्रस् धातुः (ग्रसुँ अदने धा०पा० ६३०) आत्मनेपदी। ग्रसमाना इति वक्तव्ये ग्रसन्ती इति शतृप्रत्ययान्तम् अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) स्वीकृत्योक्तम्।

## २.८६ शासयन्तम्

पादुके ते पुरस्कृत्य शासयन्तं वसुन्धराम्।
मन्त्रिभिः पौरमुख्यैश्च काषायाम्बरधारिभिः॥

– अ०रा० ६.१४.५३

अत्र शास् धातुं (शासुँ अनुशिष्टौ धा०पा० १०७५) स्वार्थे णिजन्तं मत्वा शतरि शपि गुणेऽयादेशे नुमि विभक्तिकार्ये च शासयन्तम् ।[३२२]

## २.८७ गायमानाः

पश्चाद्दुरात्मना राम रावणेनाभिविद्रुताः।
तमेव गायमानाश्च तदाराधनतत्पराः॥

– अ०रा० ६.१५.६९

गै धातुः (गै शब्दे धा०पा० ९१८) परस्मैपदी। गायन्तीति गायन्तः इति पाणिनीयम्। किन्तु कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यात्मनेपदे गायन्त इति गायमानाः। न च कर्मव्यतिहारद्योतकः शब्दो नास्तीति वाच्यम्। व्यतिगायन्ते इति प्रयोगः। विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इत्यनेन व्यति इत्यस्य लोपः। ततः शानचि गायमानाः। अयोग्यं गायं कुर्वाणाः इति भावः।

---

[३२२] शासुँ अनुशिष्टौ (धा०पा० १०७५) → शास् → स्वार्थे णिच् → शास् णिच् → शास् इ → शासि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → शासि लट् → लटः शतृशानचावप्रथमा-समानाधिकरणे (पा०सू० ३.२.१२४) → शासि शतृँ → शासि अत् → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → शासे अत् → एचोऽयवायावः (पा०सू० ६.१.७८) → शासय् अत् → शासयत् → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपदिकसञ्ज्ञा → विभक्तिकार्यम् → शासयत् अम् → उगिदचां सर्वनामस्थानेऽधातोः (पा०सू० ७.१.७०) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → शासय नुँम् त् अम् → शासय न् त् अम् → शासयन्तम्।

॥ इति युद्धकाण्डीयप्रयोगाणां विमर्शः ॥

॥ अथोत्तरकाण्डीयप्रयोगाणां विमर्शः ॥

## २.८८ पौत्रान्

सुमाली वरलब्धांस्ताञ्ज्ञात्वा पौत्रान् निशाचरान्।
पातालान्निर्भयः प्रायात्प्रहस्तादिभिरन्वितः॥

– अ०रा० ७.२.२४

पुत्र्या अपत्यानि पुमांसः इति विग्रहे स्त्रीभ्यो ढक् (पा०सू० ४.१.१२०) इत्यनेन ढक् प्रत्यये आयनेयीनीयियः फढखच्छघां प्रत्ययादीनाम् (पा०सू० ७.१.२) इत्यनेन एय् आदेशे किति च (पा०सू० ७.२.११८) इत्यनेन वृद्धौ विभक्तिकार्ये पौत्रेयान् इति पाणिनीयम्। किन्तु पुत्र्या इमे इति विग्रहे तस्येदम् (पा०सू० ४.३.१२०) इत्यनेन अण्। यस्येति च (पा०सू० ६.४.१४८) इत्यनेन भत्वादीकारलोपे विभक्तिकार्ये पौत्रान्।

## २.८९ विकल्पोज्झितः

राम त्वं परमेश्वरोऽसि सकलं जानासि विज्ञानदृग्
भूतं भव्यमिदं त्रिकालकलनासाक्षी विकल्पोज्झितः।
भक्तानामनुवर्तनाय सकलां कुर्वन् क्रियासंहतिं
त्वं शृण्वन्मनुजाकृतिर्मुनिवचो भासीश लोकार्चितः॥

– अ०रा० ७.४.१२

उज्झितो विकल्पो येन इति विकल्पे सप्तमीविशेषणे बहुव्रीहौ (पा०सू० २.२.३५) इत्यनेन विशेषणस्य पूर्वं प्रयोक्तव्ये विकल्पशब्दस्य प्रयोगो नापाणिनीयः। पूर्वनिपात-प्रकरणस्यानित्यत्वात्। समुद्राभ्राद्घः (पा०सू० ४.४.११८) इत्यत्र समुद्रशब्दस्य पूर्व-प्रयोगात्।[३२३]

[३२३] समुद्राभ्रात् इत्यत्र द्वन्द्वसमासे अल्पाच्तरम् (पा०सू० २.२.३४) इत्यनेन अभ्रशब्दस्य पूर्व-निपाते अभ्रसमुद्रात् इत्यनेन भवितव्यमासीत्। लक्षणहेत्वोः क्रियायाः (पा०सू० ३.२.१२६) इतिवदिदं सूत्रमपि पूर्वनिपातप्रकरणस्यानित्यत्वं ज्ञापयति। लक्षणहेत्वोरिति निर्देशः पूर्वनिपातव्यभिचारलिङ्गम् (का०वृ० ३.२.१२६)।

## २.९० पूज्य

तासां भावानुगं राम प्रसादं कर्तुमर्हसि।
श्रुत्वा वसिष्ठवचनं ताः समुत्थाप्य पूज्य च॥

– अ०रा० ७.९.१०

अत्र साकेतगमनाय कृतसङ्कल्पानां प्रजानां विषये वसिष्ठस्य प्रार्थनं[३२४] श्रुत्वा करुणा-वरुणालयो भगवाञ्छ्रीरामोऽनुगन्तुं ता आज्ञप्तवान्। अत्र पूज्य इति प्रयुक्तम्। ल्यप्प्रत्ययः समासं विना सम्भवो नहि अतः पूज्य इति कथं पाणिनीयमिति चेत्। सम्पूज्य इति प्रयोगः। अस्य च विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इति वार्त्तिकेन लोपे जात-संस्कारो न निवर्तते इति परिभाषया ल्यन्निवृत्त्यभावे पूज्य इति पाणिनीयमेव।

॥ इत्युत्तरकाण्डीयप्रयोगाणां विमर्शः ॥

इत्यध्यात्मरामायणेऽपाणिनीयप्रयोगाणांविमर्शनामके शोधप्रबन्धे द्वितीयाध्याये द्वितीयपरिच्छेदः।

इत्यध्यात्मरामायणेऽपाणिनीयप्रयोगाणांविमर्शनामके शोधप्रबन्धे द्वितीयोऽध्यायः।

---

[३२४] प्रार्थना प्रार्थनम् इति द्वावपि शब्दौ भावे। प्र अर्थँ उपयाञ्चायाम् (धा०पा० १९०५) → प्र अर्थ् → सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् (पा०सू० ३.१.२५) → प्र अर्थ् णिच् → प्र अर्थ् इ → प्र अर्थि → → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → ण्यासश्रन्थो युच् (पा०सू० ३.३.१०७) → प्र अर्थि युच् → प्र अर्थि यु → णेरनिटि (पा०सू० ६.४.५१) → प्र अर्थ् यु → युवोरनाकौ (पा०सू० ७.१.१) → प्र अर्थ् अन → अजाद्यतष्टाप् (पा०सू० ४.१.४) → प्र अर्थ् अन टाप् → प्र अर्थ् अन आ → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → प्र अर्थना → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → प्रार्थना → विभक्तिकार्यम् → प्रार्थना। प्र अर्थि (पूर्ववत्) → ल्युट् च (पा०सू० ३.३.११५) → प्र अर्थि ल्युट् → प्र अर्थि यु → णेरनिटि (पा०सू० ६.४.५१) → प्र अर्थ् यु → युवोरनाकौ (पा०सू० ७.१.१) → प्र अर्थ् अन → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → प्रार्थन → विभक्तिकार्यम् → प्रार्थनम्।

# अथ तृतीयोऽध्यायः

## धातुप्रकरणम्

प्रणम्य सीतापतिपादपद्मं गौरीं गिरीशं किल धातुशब्दान्।
अपाणिनीयांश्च विमर्शयेऽत्र[१] अध्यात्मरामायणमध्यगान्वै॥

### ॥ अथ तृतीयाध्याये प्रथमः परिच्छेदः ॥

### ॥ अथ बालकाण्डीयप्रयोगाणां विमर्शः ॥

### ३.१ पठन्ति श्रृण्वन्ति यान्ति

पठन्ति ये नित्यमनन्यचेतसः श्रृण्वन्ति चाध्यात्मिकसञ्ज्ञितं शुभम्।
रामायणं सर्वपुराणसम्मतं निर्धूतपापा हरिमेव यान्ति ते॥

– अ०रा० १.१.३

साम्प्रतमहं तृतीयाध्याये धातुसम्बन्धिनोऽपाणिनीयप्रयोगान् विमर्शये। प्रथमे सर्गे बालकाण्डस्य फलश्रुतिं वर्णयन्नाह ग्रन्थकृद्यद् य इमामध्यात्मरामायणसंहितां पठन्ति ते

[१] विमर्शये इत्यत्र स्वार्थे णिच्। निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजुच्यते (वा०प० ३.७.६०)। स्वान्तःसुखाय विमृशामीति कर्त्रभिप्रायं ध्वनयितुमात्मनेपदप्रयोगः। णिचश्च (पा०सू० १.३.७४) इत्यनेन। वि मृशँ आमर्शने (धा०पा० १४२५) → वि मृश् → स्वार्थे णिच् → वि मृश् णिच् → वि मृश् इ → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → उरण् रपरः (पा०सू० १.१.५१) → वि मर्श् इ → विमर्शि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → णिचश्च (पा०सू० १.३.७४) → वर्तमाने लट् (पा०सू० ३.२.१२३) → विमर्शि इट् → विमर्शि इ → कर्तरि शप् (पा०सू० ३.१.६८) → विमर्शि शप् इ → विमर्शि अ इ → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → विमर्शे अ इ → एचोऽयवायावः (पा०सू० ६.१.७८) → विमर्शय् अ इ → आद्गुणः (पा०सू० ६.१.८७) → विमर्शय् ए → विमर्शये। यद्वा विमर्शं कुर्वे इति विग्रहे विमर्शये। अत्रापि कर्त्रभिप्राये णिचश्च (पा०सू० १.३.७४) इत्यनेनाऽत्मनेपदम्। विमर्श → तत्करोति तदाचष्टे (धा०पा० ग०सू०) → विमर्श णिच् → विमर्श इ → णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरार्थम् (वा० ६.४.४८) → विमर्श् इ → विमर्शि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → णिचश्च (पा०सू० १.३.७४) → वर्तमाने लट् (पा०सू० ३.२.१२३) → विमर्शि इट् → शेषं पूर्ववत्।

निर्धूतपापा भगवन्तमेव प्राप्नुवन्ति। आरभ्यमाणग्रन्थस्य फलश्रुतिरियम्। पूर्णतामपि न गतेऽस्मिन् वर्तमानकालीनपाठः कथं सङ्गंस्यत इति चेत्। पठन्ति इति वर्तमानकालिक-प्रयोगो भविष्यत्तात्पर्यवाचकः।[२] एवं च वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन वर्तमानसमीपभविष्यत्काले विकल्पेन वर्तमानकालनिमित्तकार्याण्यर्थाद्वर्तमान-वद्भावः। यथा च पठिष्यन्ति[३] इत्यर्थे पठन्ति। एवं नानाकर्तृकाध्यात्मरामायणकर्मक-भविष्यत्कालावच्छिन्नवर्तमानकालाभासिक उच्चारणानुकूलो व्यापारः इति शाब्दबोधः। धातोः खलु व्यापार एव शक्तिरेवं तिङ् प्रत्ययस्याऽश्रये। व्यापारवाचकत्वे प्रधानतया व्यापारः प्रधानमेवं तिङर्थो विशेषणम्। अर्थाद्वैयाकरणा व्यापारमुख्यविशेष्यकं शाब्द-बोधमङ्गीकुर्वन्ति। यद्यपि मीमांसका अपि भावनामुख्यविशेष्यकं शाब्दबोधं मन्यन्ते किन्तु कुत्रचिदपसिद्धान्तितमपि तैः। नैयायिकाः प्रथमान्तमुख्यविशेष्यकं शाब्दबोधं मन्यन्ते। किन्तु पश्य मृगो धावति इत्यत्र भाष्यसम्मतैकवाक्यता भग्ना भवति प्रथमान्तमुख्यविशेष्यके शाब्दबोधे स्वीकृते।[४] धावनानुकूलकृतिमान् मृगः। मृगकर्तृकधावनकर्मकदर्शनानुकूल-कृतिमांस्त्वम् । अस्मन्मते तु मृगकर्तृकधावनानुकूलव्यापारकर्मकत्वत्कर्तृकदर्शनानुकूल-व्यापारः। इत्थं तिङर्थाश्चत्वारः कर्तृकर्मसङ्ख्याकालाः। कर्तुर्व्यापारेऽन्वयः कर्मणश्च फले सङ्ख्यायाश्च कर्मप्रत्यये कर्मणि कर्तृप्रत्यये च कर्तरि। कालस्य च व्यापारेऽन्वयः। वर्तमाने लट् (पा०सू० ३.२.१२३) इत्यादिसूत्रनिर्देशात्। इत्थं तत्र कारिका –

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्॥

– वै०सि०का० १.२

फलस्य व्यापारे स्वानुकूलत्वसम्बन्धाश्रयः। एवं भक्ताभिन्नैककर्तृकभविष्यत्कालावच्छिन्न-वर्तमानकालाभासिकस्पष्टोच्चारणानुकूलव्यापारः। प्राचीननवीनयोरिदमन्तरम्।

---

[२] पठँ व्यक्तायां वाचि (धा०पा० ३३०) → पठ् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → पठ् लट् → पठ् झि → झोऽन्तः (पा०सू० ७.१.३) → पठ् अन्ति → कर्तरि शप् (पा०सू० ३.१.६८) → पठ् शप् अन्ति → पठ् अ अन्ति → अतो गुणे (पा०सू० ६.१.९७) → पठ् अन्ति → पठन्ति।

[३] पठँ व्यक्तायां वाचि (धा०पा० ३३०) → पठ् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → पठ् लृट् → पठ् झि → झोऽन्तः (पा०सू० ७.१.३) → पठ् अन्ति → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → पठ् स्य अन्ति → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → पठ् इट् स्य अन्ति → पठ् इ स्य अन्ति → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → पठ् इ ष्य अन्ति → अतो गुणे (पा०सू० ६.१.९७) → पठ् इ ष्यन्ति → पठिष्यन्ति।

[४] क्रियाऽपि क्रिययेप्सिततमा भवति। कया क्रियया। सन्दर्शनक्रियया वा प्रार्थयतिक्रियया वाऽध्यवस्यतिक्रियया वा। इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति स बुद्ध्या तावत्कञ्चिदर्थं सम्पश्यति सन्दृष्टे प्रार्थना प्रार्थनायामध्यवसायोऽध्यवसाय आरम्भ आरम्भे निर्वृत्तिर्निर्वृत्तौ फलावाप्तिः। एवं क्रियाऽपि कृत्रिमं कर्म (भा०पा०सू० १.४.३२)।

प्राचीनास्तूभयत्र समानव्यवस्थां मन्यन्ते। नवीनास्तु कर्तृभाववाच्ययोः फलानुकूलव्यापार एवं कर्मवाच्ये व्यापारविशिष्टफलम्।[५] यथा रामेणायोध्या गम्यते – रामाभिन्नैककर्तृक-वर्तमानकालावच्छिन्नव्यापारजन्यं गृहनिष्ठोत्तरदेशसंयोगरूपं फलम् अयमत्र विवेकः।[६] किं फले व्यापारे च धातोः पृथक्शक्तिरुताहो समुदिता चेत्। अनुकूलत्वसम्बन्धेन फलस्य व्यापारेऽन्वयः। तदा पदार्थः पदार्थेनान्वेति न तु तदेकदेशेन इति नियमेन कथमत्रान्वयः। अतो विशिष्टे शक्तिः।[७] गुरुचरणास्त्वेकवृन्तावलम्बिफलद्वयवदेकस्मिन् धातावेव फलव्यापारयोः शक्तिः।[८] विस्तारभयाद्विरम्यते। एवं भक्ताभिन्नैककर्तृकभविष्यत्कालिक-वर्तमानकालाभासिकस्पष्टोच्चारणानुकूलव्यापारः इति शाब्दबोधः।[९]

---

[५] इति कथयन्ति इति शेषः।

[६] नवीनवैयाकरणशाब्दबोधोऽयम्।

[७] फलविशिष्टव्यापारे व्यापारविशिष्टफले च शक्तिरिति भावः। तस्मात्फलावच्छिन्ने व्यापारे व्यापारावच्छिन्ने फले च धातूनां शक्तिः कर्तृकर्मार्थकतत्तत्प्रत्ययसमभिव्याहारश्च तत्तद्बोधे नियामक इत्याहुः (प०ल०म० ४७)।

[८] मम त्वेकवृन्तावलम्बिफलद्वयवदुभयांश एका खण्डशश्शक्तिरिति न शक्तिद्वयकल्पनं न वा बोध-जनकत्वसम्बन्धद्वयकल्पनम् (प०ल०म० ज्यो०टी० ४७) इति प्रणेतृणां गुरुचरणाः कालिकाप्रसादशुक्लवर्याः परमलघुमञ्जूषाया ज्योत्स्नाटीकायाम्।

[९] एवमेव शृण्वन्ति इति प्रयोगः श्रोष्यन्ति इत्यर्थे यान्ति इति च यास्यन्ति इत्यर्थे। उभयत्र वर्तमानवद्भावः। श्रु श्रवणे (धा०पा० ९४२) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमान-सामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → श्रु लट् → श्रु झि → झोऽन्तः (पा०सू० ७.१.३) → श्रु अन्ति → श्रुवः शृ च (पा०सू० ३.१.७४) → शृ श्नु अन्ति → शृ नु अन्ति → सार्वधातुकमपित् (पा०सू० १.२.४) → ङित्त्वम् → क्ङिति च (पा०सू० १.१.५) → सार्वधातुकगुणनिषेधः → रषाभ्यां णत्व ऋकारग्रहणम् (वा० ८.४.१) → शृ णु अन्ति → हुश्नुवोः सार्वधातुके (पा०सू० ६.४.८७) → शृ ण्व् अन्ति → शृण्वन्ति। या प्रापणे (धा०पा० १०४९) → या → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → या लट् → या झि → झोऽन्तः (पा०सू० ७.१.३) → या अन्ति → कर्तरि शप् (पा०सू० ३.१.६८) → या शप् अन्ति → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → या अन्ति → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → यान्ति। श्रु श्रवणे (धा०पा० ९४२) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → श्रु लृट् → श्रु झि → झोऽन्तः (पा०सू० ७.१.३) → श्रु अन्ति → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → श्रु स्य अन्ति → एकाच उपदेशेऽनुदात्तात् (पा०सू० ७.२.१०) → इडागमनिषेधः → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → श्रो स्य अन्ति → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → श्रो ष्य अन्ति → अतो गुणे (पा०सू० ६.१.९७) → श्रो ष्यन्ति → श्रोष्यन्ति। या प्रापणे (धा०पा० १०४९) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → या लृट् → या झि → झोऽन्तः (पा०सू० ७.१.३) → या अन्ति → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → या स्य अन्ति → अतो गुणे (पा०सू० ६.१.९७) → या स्यन्ति → यास्यन्ति।

## ३.२ लभेत्

अध्यात्मरामायणमेव नित्यं पठेद्यदीच्छेद्भवबन्धमुक्तिम्।
गवां सहस्रायुतकोटिदानात्फलं लभेद्यः शृणुयात्स नित्यम्॥

– अ०रा० १.१.४

अत्र फलश्रुतावेव लभेत् इति हलन्तप्रयोगः। लभ् धातुः (डुलभँष् प्राप्तौ धा०पा० ९७५) आत्मनेपदी। विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (पा०सू० ३.३.१६१) इत्यनेन लिङ्लकारे लिङः सीयुट् (पा०सू० ३.४.१०२) इत्यनेन सीयुट्यनुबन्धलोपे सकारस्य च लोपे गुणे यकारलोपे लभेत इत्येव पाणिनीयम्।[10] लभेत् इति कथमिति चेत्। अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) इति वचनेनात्राऽत्मनेपदाभावे परस्मैपद उक्तं रूपम्।[11] यद्वा लभत इति लभः।[12] लभ इवाऽचरतीति लभति।[13] तत आचारक्विबन्ताल्लिङि तिपि शपि पररूपे यासुट् परस्मैपदेषूदात्तो ङिच्च (पा०सू० ३.४.१०३) इत्यनेन यासुटि कृते सुडागमे सकारद्वयलोपे अतो येयः (पा०सू० ७.२.८०) इत्यनेनेयादेशे गुणे यलोपे इतश्च (पा०सू० ३.४.१००)

[10] डुलभँष् प्राप्तौ (धा०पा० ९७५) → लभ् → अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) → विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (पा०सू० ३.३.१६१) → लभ् लिङ् → लभ् त → कर्तरि शप् (पा०सू० ३.१.६८) → लभ् शप् त → लभ् अ त → लिङः सीयुट् (पा०सू० ३.४.१०२) → लभ् अ सीयुँट् त → लभ् अ सीय् त → सुट् तिथोः (पा०सू० ३.४.१०७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → लभ् अ सीय् सुँट् त → लभ् अ सीय् स् त → लिङः सलोपोऽनन्त्यस्य (पा०सू० ७.२.७९) → लभ् अ ईय् त → लोपो व्योर्वलि (पा०सू० ६.१.६६) → लभ् अ ई त → आद्गुणः (पा०सू० ६.१.८७) → लभ् ए त → लभेत।

[11] डुलभँष् प्राप्तौ (धा०पा० ९७५) → लभ् → अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (पा०सू० ३.३.१६१) → लभ् लिङ् → लभ् तिप् → लभ् ति → कर्तरि शप् (पा०सू० ३.१.६८) → लभ् शप् ति → लभ् अ ति → यासुट् परस्मैपदेषूदात्तो ङिच्च (पा०सू० ३.४.१०३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → लभ् अ यासुँट् ति → लभ् अ यास् ति → सुट् तिथोः (पा०सू० ३.४.१०७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → लभ् अ यास् सुँट् ति → लभ् अ यास् स् ति → लिङः सलोपोऽनन्त्यस्य (पा०सू० ७.२.७९) → लभ् अ या ति → अतो येयः (पा०सू० ७.२.८०) → लभ् अ इय् ति → लोपो व्योर्वलि (पा०सू० ६.१.६६) → लभ् अ इ ति → आद्गुणः (पा०सू० ६.१.८७) → लभ् ए ति → इतश्च (पा०सू० ३.४.१००) → लभ् ए त् → लभेत्।

[12] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन कर्तरि पचाद्यच्।

[13] लभ → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → लभ क्विँप् → लभ व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → लभ → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → लभ लट् → लभ तिप् → लभ ति → कर्तरि शप् (पा०सू० ३.१.६८) → लभ शप् ति → लभ अ ति → अतो गुणे (पा०सू० ६.१.९७) → लभ ति → लभति।

इत्यनेनेकारलोपे लभेत्।[१४]

## ३.३ जानामि

ज्ञानं सविज्ञानमथानुभक्तिवैराग्ययुक्तं च मितं विभास्वत्।
जानाम्यहं योषिदपि त्वदुक्तं यथा तथा ब्रूहि तरन्ति येन॥

– अ०रा० १.१.९

अत्र भगवती पार्वती भगवन्तं शिवं प्रार्थयते यत् भक्तिवैराग्यसहितं ज्ञानं यथा जानीयां तथा कुर्वन्तु देवाः। अत्र जानीयाम्[१५] इति प्रयोक्तव्ये जानामि इति प्रयुक्तम्। वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन वर्तमानवद्भावः।[१६]

## ३.४ जानाति

वदन्ति केचित्परमोऽपि रामः स्वाविद्यया संवृतमात्मसञ्ज्ञम्।
जानाति नात्मानमतः परेण सम्बोधितो वेद परात्मतत्त्वम्॥

– अ०रा० १.१.१३

भगवती पार्वती श्रीरामलीलाविषयकं संशयं करोति यत् श्रीरामः स्वाविद्यया

[१४] लभ → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा (पूर्ववत्) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (पा०सू० ३.३.१६१) → लभ लिङ → लभ तिप् → लभ ति → कर्तरि शप् (पा०सू० ३.१.६८) → लभ शप् ति → लभ अ ति → अतो गुणे (पा०सू० ६.१.९७) → लभ ति → यासुट् परस्मैपदेषूदात्तो ङिच्च (पा०सू० ३.४.१०३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → लभ यासुँट् ति → लभ यास् ति → सुट् तिथोः (पा०सू० ३.४.१०७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → लभ यास् सुँट् ति → लभ यास् स् ति → लिङः सलोपोऽनन्त्यस्य (पा०सू० ७.२.७९) → लभ या ति → अतो येयः (पा०सू० ७.२.८०) → लभ इय् ति → लोपो व्योर्वलि (पा०सू० ६.१.६६) → लभ इ ति → आद्गुणः (पा०सू० ६.१.८७) → लभे ति → इतश्च (पा०सू० ३.४.१००) → लभे त् → लभेत्।

[१५] ज्ञा अवबोधने (धा०पा० १५०७) → ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (पा०सू० ३.३.१६१) → ज्ञा लिङ् → ज्ञा मिप् → ज्ञा मि → क्र्यादिभ्यः श्ना (पा०सू० ३.१.८१) → ज्ञा श्ना मि → ज्ञा ना मि → ज्ञाजनोर्जा (पा०सू० ७.३.७९) → जा ना मि → इतश्च (पा०सू० ३.४.१००) → जा ना म् → यासुट् परस्मैपदेषूदात्तो ङिच्च (पा०सू० ३.४.१०३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → जा ना यासुँट् म् → जा ना यास् म् → लिङः सलोपोऽनन्त्यस्य (पा०सू० ७.२.७९) → जा ना या म् → ई हल्यघोः (पा०सू० ६.४.११३) → जा नी या म् → जानीयाम्।

[१६] ज्ञा अवबोधने (धा०पा० १५०७) → ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → ज्ञा लट् → ज्ञा मिप् → ज्ञा मि → क्र्यादिभ्यः श्ना (पा०सू० ३.१.८१) → ज्ञा श्ना मि → ज्ञा ना मि → ज्ञाजनोर्जा (पा०सू० ७.३.७९) → जा ना मि → जानामि।

संवृतमात्मसञ्ज्ञं नाजानात्। अत्र भूतकालिकक्रियायां प्रयोक्तव्यायां जानाति इति वर्तमानकालिकक्रिया प्रयुक्ताऽपाणिनीयेव। किन्तु पुरा इत्यस्याध्याहारे पुरि लुङ् चास्मे (पा०सू० ३.२.१२२) इत्यनेन पुरायोगे लङ्लकारः। अर्थात् पुरा न जानाति।[१७] पूर्वं नाजानात् इत्यर्थः।[१८] ब्रह्मणा बोधितः सन् पश्चाद्यजानादिति पार्वत्यास्तात्पर्यम्। न च पुरा शब्दो दृश्यत इति वाच्यम्। गम्यमानः सः।

## ३.५ ब्रूत

अत्रोत्तरं किं विदितं भवद्भिस्तद्ब्रूत मे संशयभेदि वाक्यम्॥

– अ०रा० १.१.१५

भगवती पार्वती भगवन्तं शशाङ्कशेखरं पृच्छति तत्संशयभेदिवाक्यं ब्रूत। यूयं ब्रूत इत्यध्याहार्यम्। प्रथमपुरुषे प्रयोक्तव्ये[१९] मध्यमपुरुषप्रयोग अपाणिनीयः। एवं च भगवती भवानी पतिव्रताशिरोमणिः। सा च स्वकीयप्राणवल्लभाय मध्यमपुरुषस्य विशेषणं ददाति तत्रापि बहुवचनान्तमिति न परं प्रतिभाति। तथा च नियमः – एकत्वं न प्रयुञ्जीत गुरावात्मनि चेश्वरे। पार्वत्यास्तु भगवाञ्छिव एव गुरुः। ऐश्वर्ये त्रिभुवनगुरुत्वान्माधुर्ये प्राणवल्लभत्वाच्च पतिरेव गुरुः स्त्रीणाम् (म०भा० १४.१०८.६, ब्र०पु० ८०.४८, कू०पु० १२.४९, चा०नी० ५.१) इति वचनाच्च। अतो बहुवचनप्रयोगः। तथाऽपि कथं यूयं ब्रूत इति चेत्। अत्रोत्तरं किं विदितं भवद्भिः इत्यत्र भवद्भिः इति विशेषणं शिवस्य कृते दत्तम्। अतः यूयम् इति तत्सम्बन्धि-कर्तृविशेषणं नैव विचारसहम्। भवद्भिः इत्यस्य हि भवन्तः इत्यनेन सम्बन्धः स्यात्। यथा यदुत्तरं भवद्भिर्विदितं तद्भवन्तो वदन्तु। किन्तु प्रश्ने कृते शिवः समाधौ न्यलीयत। तं समाधिस्थं विलोक्य तस्य पञ्च वक्त्राण्युद्दिश्य कथयति यत् भोः पञ्चमुखानि यूयमेव संशय-भेदकं वाक्यं ब्रूत।[२०]

---

[१७] ज्ञा अवबोधने (धा०पा० १५०७) → ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → पुरि लुङ् चास्मे (पा०सू० ३.२.१२२) → ज्ञा लट् → ज्ञा तिप् → ज्ञा ति → क्र्यादिभ्यः श्ना (पा०सू० ३.१.८१) → ज्ञा श्ना ति → ज्ञा ना ति → ज्ञाजनोर्जा (पा०सू० ७.३.७९) → जा ना ति → जानाति।

[१८] ज्ञा अवबोधने (धा०पा० १५०७) → ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → अनद्यतने लङ् (पा०सू० ३.२.१११) → ज्ञा लङ् → ज्ञा तिप् → ज्ञा ति → लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा०सू० ६.४.७१) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → अट् ज्ञा ति → अ ज्ञा ति → क्र्यादिभ्यः श्ना (पा०सू० ३.१.८१) → अ ज्ञा श्ना ति → अ ज्ञा ना ति → ज्ञाजनोर्जा (पा०सू० ७.३.७९) → अ जा ना ति → इतश्च (पा०सू० ३.४.१००) → अ जा ना त् → अजानात्।

[१९] विदितं भवद्भिः इति समभिव्याहारेण प्रथमपुरुषः प्रयोक्तव्यः।

[२०] ब्रूञ् व्यक्तायां वाचि (धा०पा० १०४४) → ब्रू → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → ब्रू लोट् → ब्रू थस् → कर्तरि शप् (पा०सू० ३.१.६८) → ब्रू शप् थस् → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → ब्रू थस् → तस्थस्थमिपां तान्तन्तामः (पा०सू० ३.४.१०१) → ब्रू त → ब्रूत।

## ३.६ वक्ष्ये

त्वयाऽद्य भक्त्या परिनोदितोऽहं वक्ष्ये नमस्कृत्य रघूत्तमं ते।
रामः परात्मा प्रकृतेरनादिरानन्द एकः पुरुषोत्तमो हि॥

– अ०रा० १.१.१७

भगवतीपार्वतीप्रश्नं श्रुत्वा शिवः कथयति अहं भगवन्तं नमस्कृत्य वक्ष्ये। ब्रूधातोः (ब्रूञ् व्यक्तायां वाचि धा०पा० १०४४) भूवादयो धातवः (पा०सू० १.३.१) इत्यनेन धातु-सञ्ज्ञायां लृट् शेषे च (पा०सू० ३.३.१३) इत्यनेन लृड्लकार उत्तमपुरुषे तिप्तस्झिसिप्थस्थ-मिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् (पा०सू० ३.४.७८) इत्यनेन तङानावात्मने-पदम् (पा०सू० १.४.१००) इति सूत्रानुसारमिड्प्रत्यये स्यतासी लृलुटोः (पा०सू० ३.१.३३) इत्यनेन स्यप्रत्यये ब्रुवो वचिः (पा०सू० २.४.५३) इत्यनेन ब्रूधातोर्वचादेशे टित आत्मने-पदानां टेरे (पा०सू० ३.४.७९) इत्यनेनैकारादेशे अतो गुणे (पा०सू० ६.१.९७) इत्यनेन पररूपे पश्चाच्चकारस्य कुत्वे षत्वे वक्ष्ये इति। अत्र वक्ष्यामि इति कथं नेति चेत्।[२१] क्रिया-फलस्य कर्तृगामित्वात्।[२२] रामायणकथाप्रश्नेन पार्वत्यास्तु सन्देहो नष्टो भविष्यत्येव किन्तु तत्कथनेन वक्तुः शशाङ्कमौलेरपि स्वान्तःसुखमुत्पत्स्यते। भगवत्कथाप्रश्नो वक्तारं प्रश्नकर्तारं श्रोतारमिति त्रीनपि पुनाति। तथा चोक्तं भागवते –

वासुदेवकथाप्रश्नः पुरुषांस्त्रीन् पुनाति हि।
वक्तारं पृच्छकं श्रोतॄंस्तत्पादसलिलं यथा॥

– भा०पु० १०.१.१६

इयं हि गङ्गा। तथा चोक्तमत्रैव ग्रन्थे –

पुरारिगिरिसम्भूता श्रीरामार्णवसङ्गता।
अध्यात्मरामगङ्गेयं पुनाति भुवनत्रयम्॥

– अ०रा० १.१.५

[२१] ब्रूञ् व्यक्तायां वाचि (धा०पा० १०४४) → ब्रू → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → ब्रू लृट् → ब्रू मिप् → ब्रू मि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → ब्रू स्य मि → ब्रुवो वचिः (पा०सू० २.४.५३) → वच् स्य मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → वच् स्या मि → चोः कुः (पा०सू० ८.२.३०) → वक् स्या मि → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → वक् ष्या मि → वक्ष्यामि।

[२२] स्वरितञितः कर्त्रभिप्राये क्रियाफले (पा०सू० १.३.७२) इत्यनेन। ब्रूञ् व्यक्तायां वाचि (धा०पा० १०४४) → ब्रू → स्वरितञितः कर्त्रभिप्राये क्रियाफले (पा०सू० १.३.७२) → लृट् शेषे च (पा०सू० ३.३.१३) → ब्रू लृट् → ब्रू इट् → ब्रू इ → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → ब्रू स्य इ → ब्रुवो वचिः (पा०सू० २.४.५३) → वच् स्य इ → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → वच् स्य ए → अतो गुणे (पा०सू० ६.१.९७) → वच् स्ये → चोः कुः (पा०सू० ८.२.३०) → वक् स्ये → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → वक् ष्ये → वक्ष्ये।

अतो वक्ष्ये इति समूलमेव।

## ३.७ भ्रमतीव दृश्यते

यथा हि चाक्ष्णा भ्रमता गृहादिकं विनष्टदृष्टेर्भ्रमतीव दृश्यते।
तथैव देहेन्द्रियकर्तुरात्मनः कृते परेऽध्यस्य जनो विमुह्यति॥

– अ०रा० १.१.२२

अत्र भ्रम् धातुः (भ्रमुँ अनवस्थाने धा०पा० १२०४) दिवादिः। एवं दिवादिभ्यः श्यन् (पा०सू० ३.१.६९) इत्यनेन लटि तिपि श्यन्प्रत्यये कृते शामामष्टानां दीर्घः श्यनि (पा०सू० ७.३.७४) इत्यनेन दीर्घे भ्राम्यति इति पाणिनीयम्।[२३] भ्रमति इति कथमिति चेत्। वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः (पा०सू० ३.१.७०) इत्यनेन श्यनो विकल्पात् भ्रमति।[२४] यद्वा भ्रममाचरतीति भ्रमति अनेन प्रकारेण सिद्धम्।[२५] यद्वा गणकार्यमनित्यम् (प०शे० ९३.३) इत्यनेन श्यनभावे भ्वादित्वाच्छपि।[२६] यद्वा भ्रमति इति नास्ति क्रियाऽपि तु भ्रमती इव इति भ्रम् धातोरौणादिकतृच्प्रत्ययान्तो भ्रमती।[२७]

---

[२३] भ्रमुँ अनवस्थाने (धा०पा० १२०४) → भ्रम् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → भ्रम् लट् → भ्रम् तिप् → भ्रम् ति → दिवादिभ्यः श्यन् (पा०सू० ३.१.६९) → भ्रम् श्यन् ति → भ्रम् य ति → शामामष्टानां दीर्घः श्यनि (पा०सू० ७.३.६४) → भ्राम् य ति → भ्राम्यति।

[२४] भ्रमुँ अनवस्थाने (धा०पा० १२०४) → भ्रम् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → भ्रम् लट् → भ्रम् तिप् → भ्रम् ति → वा भ्राशभ्लाशभ्रमुक्रमु-क्लमुत्रसित्रुटिलषः (पा०सू० ३.१.७०) → भ्रम् शप् ति → भ्रम् अ ति → भ्रमति।

[२५] भ्रमणं भ्रमः। भावे (पा०सू० ३.३.१८) इत्यनेन भावे घञ्। भ्रम → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → भ्रम क्विँप् → भ्रम व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → भ्रम → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् → भ्रम लट् → भ्रम तिप् → भ्रम ति → कर्तरि शप् (पा०सू० ३.१.६८) → भ्रम शप् ति → भ्रम अ ति → अतो गुणे (पा०सू० ६.१.९७) → भ्रम ति → भ्रमति।

[२६] भ्रमुँ अनवस्थाने (धा०पा० १२०४) → भ्रम् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → भ्रम् लट् → भ्रम् तिप् → भ्रम् ति → गणकार्यमनित्यम् (प०शे० ९३.३) → कर्तरि शप् (पा०सू० ३.१.६८) → भ्रम् शप् ति → भ्रम् अ ति → भ्रमति।

[२७] अत्र तृँच् प्रत्यय इति भावः। नायं बहुलमन्यत्रापि (प०उ० २.९५) इति तृच्। स नोगित्। कार्याद्विद्यादनूबन्धम् (भा०पा०सू० ३.३.१) केचिदविहिता अप्यूह्याः (वै०सि०कौ० ३१६९) इत्यनुसारमूह्योऽ-यमविहित उगित्प्रत्ययः। तृँच् प्रत्यये चात्र शबागमोऽप्यूह्यः। नयतेः षुगागमः (प०उ० श्वे०वृ० २.९६) इतिवत्। भ्रमुँ अनवस्थाने (धा०पा० १२०४) → भ्रम् → उणादयो बहुलम् (पा०सू० ३.३.१) → भ्रम् तृँच् → भ्रम् शप् अत् → भ्रम् अ त् → भ्रमत् → उगितश्च (पा०सू० ४.१.६) → भ्रमत् ङीप् → भ्रमत् ई → भ्रमती → विभक्तिकार्यम् → भ्रमती सुँ → भ्रमती स् → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → भ्रमती।

## ३.८ आकाङ्क्षते

रामो न गच्छति न तिष्ठति नानुशोचत्याकाङ्क्षते त्यजति नो न करोति किञ्चित्।
आनन्दमूर्तिरचलः परिणामहीनो मायागुणाननुगतो हि तथा विभाति॥

– अ०रा० १.१.४३

अत्र सीता श्रीरामतत्त्वं वर्णयन्ती आकाङ्क्षते इति प्रयुङ्क्ते। यत् रामो नाऽऽकाङ्क्षते। काङ्क्ष् धातुः (काक्षिँ काङ्क्षायाम् धा०पा० ६६७) परस्मैपदी। एवं ततो लटि तिपि शपि आकाङ्क्षति।[२८] तथा च नहि प्रफुल्लं सहकारमेत्य वृक्षान्तरं काङ्क्षति षट्पदाली (र०वं० ६.६९) इति कालिदासोऽपि प्रायुङ्क्तेति चेत्कथमत्रात्मनेपदम्। अत्र विमृश्यते। कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेनाऽऽत्मनेपदम्।[२९] कर्मव्यतिहारो हि क्रियाविनिमयः। जीवस्याऽऽकाङ्क्षा भगवत्यारोपिता। तामेव निरस्यति नाकाङ्क्षते इति।

## ३.९ पठति

योऽतिभ्रष्टोऽतिपापी परधनपरदारेषु नित्योद्यतो वा
स्तेयी ब्रह्मघ्नमातापितृवधनिरतो योगिवृन्दापकारी।
यः सम्पूज्याभिरामं पठति च हृदयं रामचन्द्रस्य भक्त्या
योगीन्द्रैरप्यलभ्यं पदमिह लभते सर्वदेवैः स पूज्यम्॥

– अ०रा० १.१.५६

पठति इति भविष्यत्कालार्थे वर्तमानकालं प्रयुङ्क्त इति चेत्। वर्तमानसामीप्ये

[२८] आङ् काक्षिँ काङ्क्षायाम् (धा०पा० ६६७) → आ काक्ष् → इदितो नुम् धातोः (पा०सू० ७.१.५८) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → आ का नुँम् क्ष् → आ कान् क्ष् → नश्चापदान्तस्य झलि (पा०सू० ८.३.२४) → आ कांक्ष् → अनुस्वारस्य ययि परसवर्णः (पा०सू० ८.४.५८) → आ काङ्क्ष् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → आ काङ्क्ष् लट् → आ काङ्क्ष् तिप् → आ काङ्क्ष् ति → कर्तरि शप् (पा०सू० ३.१.६८) → आ काङ्क्ष् शप् ति → आ काङ्क्ष् अ ति → आकाङ्क्षति।

[२९] आ काङ्क्ष् (पूर्ववत्) → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → वर्तमाने लट् (पा०सू० ३.२.१२३) → आ काङ्क्ष् लट् → आ काङ्क्ष् त → कर्तरि शप् (पा०सू० ३.१.६८) → आ काङ्क्ष् शप् त → आ काङ्क्ष् अ त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → आ काङ्क्ष् अ ते → आकाङ्क्षते।

वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन वर्तमानकालः।[३०] एवमेव लभते इत्यत्रापि। अर्थात्त्वरितमेव फलसिद्धिर्भविष्यति।[३१]

## ३.१० मुच्यते

तदद्य कथयिष्यामि शृणु तापत्रयापहम्।
यच्छ्रुत्वा मुच्यते जन्तुरज्ञानोत्थमहाभयात्।
प्राप्नोति परमामृद्धिं दीर्घायुः पुत्रसन्ततिम्॥

– अ०रा० १.२.५

अत्र रामायणस्य शाश्वतत्वाद्वर्तमानकालः।[३२] वैयाकरणानां मते शब्दानां नित्यत्वात्। एवं भक्तानां मते भगवतस्तत्कथायाश्च नित्यत्वात्। अतो जीवानां दृष्टौ वर्तमानभूतभविष्यत्कालाः। त्रिकालाबाध्यत्वात्कालातीतत्वाच्चेश्वरस्य समक्षं निरन्तरं वर्तमानकालः।

---

[३०] पठँ व्यक्तायां वाचि (धा०पा० ३३०) → पठ् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → पठ् लट् → पठ् तिप् → पठ् ति → कर्तरि शप् (पा०सू० ३.१.६८) → पठ् शप् ति → पठ् अ ति → पठति। लृटि च पठिष्यति इति रूपम्। पठँ व्यक्तायां वाचि (धा०पा० ३३०) → पठ् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → पठ् लृट् → पठ् तिप् → पठ् ति → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → पठ् स्य ति → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → पठ् इट् स्य ति → पठ् इ स्य ति → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → पठ् इ ष्य ति → पठिष्यति।

[३१] डुलभँष् प्राप्तौ (धा०पा० ९७५) → अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → लभ् लट् → लभ् त → कर्तरि शप् (पा०सू० ३.१.६८) → लभ् शप् त → लभ् अ त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → लभ् अ ते → लभते। लृटि च लप्स्यते इति रूपम्। डुलभँष् प्राप्तौ (धा०पा० ९७५) → अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) → लृट् शेषे च (पा०सू० ३.३.१३) → लभ् लृट् → लभ् त → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → लभ् स्य त → एकाच उपदेशेऽनुदात्तात् (पा०सू० ७.२.१०) → इडागमनिषेधः → खरि च (पा०सू० ८.४.५५) → लप् स्य त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → लप् स्य ते → लप्स्यते।

[३२] रामायणस्य शाश्वतत्वं रामायण एवोक्तम् – यावत्स्थास्यन्ति गिरयः सरितः च महीतले॥ तावद्रामायणकथा लोकेषु प्रचरिष्यति। (वा०रा० १.२.३६-३७)। मुचॢँ मोक्षणे (धा०पा० १४३०) → मुच् → भावकर्मणोः (पा०सू० १.३.१३) → वर्तमाने लट् (पा०सू० ३.२.१२३) → मुच् लट् → मुच् त → सार्वधातुके यक् (पा०सू० ३.१.६७) → मुच् यक् त → मुच् य त → क्क्ङिति च (पा०सू० १.१.५) → लघूपधगुणनिषेधः → मुच् य त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → मुच् य ते → मुच्यते।

## ३.११ सृजामि

तस्याहं पुत्रतामेत्य कौसल्यायां शुभे दिने।
चतुर्धाऽऽत्मानमेवाहं सृजामीतरयोः पृथक्॥

– अ०रा० १.२.२७

अत्र भगवाञ्छ्रीरामभद्रोऽवतारकथां वर्णयन्नाह यत् कौशल्यायामितरयोश्चाऽत्मानं चतुर्धा सृजामि। अत्र स्रक्ष्यामि इति हि पाणिनीयम्।[३३] किन्तु वर्तमानसामीप्यात् सृजामि इति न दोषः।[३४]

## ३.१२ सृजध्वम्

यूयं सृजध्वं सर्वेऽपि वानरेष्वंशसम्भवान्।
विष्णोः सहायं कुरुत यावत्स्थास्यति भूतले॥

– अ०रा० १.२.३०

ब्रह्मा देवानादिशति यत् यूयं वानरेष्वात्मानं सृजध्वम्। रचयध्वमिति भावः। सृज्-धातुः (सृजँ विसर्गे धा०पा० १४१४) आत्मनेपदी न।[३५] कथमत्र सृजध्वम् इति चेत्। अत्र कर्मव्यतिहारादात्मनेपदम्।[३६] सर्जनं ब्रह्मणः कर्म तदेव देवेभ्यो दीयत इति क्रियाविनिमयः।

[३३] सृजँ विसर्गे (धा०पा० १४१४) → सृज् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → सृज् लृट् → सृज् मिप् → सृज् मि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → सृज् स्य मि → सृजिदृशोर्झल्यमकिति (पा०सू० ६.१.५८) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → सृ अम् ज् स्य मि → सृ अ ज् स्य मि → इको यणचि (पा०सू० ६.१.७७) → स्र् अ ज् स्य मि → व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः (पा०सू० ८.२.३६) → स्र् अ ष् स्य मि → षढोः कः सि (पा०सू० ८.२.४१) → स्र् अ क् स्य मि → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → स्र् अ क् ष्य मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → स्र् अ क् ष्या मि → स्रक्ष्यामि।

[३४] वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन। सृजँ विसर्गे (धा०पा० १४१४) → सृज् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → सृज् लट् → सृज् मिप् → सृज् मि → तुदादिभ्यः शः (पा०सू० ३.१.७७) → सृज् श मि → सृज् अ मि → सार्वधातुकमपित् (पा०सू० १.२.४) → ङित्त्वम् → क्ङिति च (पा०सू० १.१.५) → लघूपधगुणनिषेधः → सृज् अ मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → सृज् आ मि → सृजामि।

[३५] तस्माल्लोड्ळकारे मध्यमपुरुषे बहुवचने सृजथ इति रूपम्। यथा – यूयमप्यहह पूजनमस्या यन्निजैः सृजथ पादपयोजैः (नै०च० ५.९६) इति श्रीहर्षप्रयोगे। सृजँ विसर्गे (धा०पा० १४१४) → सृज् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → सृज् लोट् → सृज् थ → तुदादिभ्यः शः (पा०सू० ३.१.७७) → सृज् श थ → सृज् अ ध्वम् → सार्वधातुकमपित् (पा०सू० १.२.४) → ङित्त्वम् → क्ङिति च (पा०सू० १.१.५) → लघूपधगुणनिषेधः → सृज् अ थ → सृजथ।

[३६] कर्तरि कर्मव्यतिहारे पा०सू० १.३.१४) इत्यनेन।

आत्मनेपदे लोङ्लकारे ध्वमि शे सृजध्वम्।[३७]

## ३.१३ दर्शयस्व

उपसंहर विश्वात्मन्नदो रूपमलौकिकम्।
दर्शयस्व महानन्दबालभावं सुकोमलम्।
ललितालिङ्गनालापैस्तरिष्याम्युत्कटं तमः॥

– अ०रा० १.३.२९

अत्र भगवती कौशल्या स्वसमक्षं प्रकटं श्रीरामभद्रं प्रार्थयते यत् बालभावं दर्शयस्व। अत्र दृश् धातोः (दृशिँर् प्रेक्षणे धा०पा० ९८८) णिचि लघूपधगुणे रपरत्वे धातुसञ्ज्ञायां पुनर्लोङ्लकार आत्मनेपदे थास् प्रत्यये शपि गुणेऽयादेशे स्वादेशे दर्शयस्व।[३८] आत्मनेपदं यदा कर्तरि फलं दृश्येत। अत्र रामरूपे कर्तरि किं फलं श्रीरामस्य फलानपेक्षत्वादिति चेत्। भक्तानन्द एव तस्यापूर्वं फलम्। भक्तहितार्थमेव गृहीतजन्मत्वात्। यद्वा स्व इति सम्बोधनम्। हे स्व दर्शय बालभावम्।[३९] स्वशब्दस्य चत्वारोऽर्था आत्माऽऽत्मीयो ज्ञातिर्धनञ्च।[४०] अतः हे स्व हे मम आत्मन्मम धन इति निजं दर्शय। यद्वा स्व इति महानन्दम् इत्यस्य विशेषणम्। एवं च स्वेभ्य आत्मीयेभ्यो महानानन्दो यस्मात्स स्वमहानन्दः। स्वमहानन्दश्चासौ बालभावश्चेति स्वमहानन्दबालभावस्तं स्वमहानन्दबालभावम्।

---

[३७] सृजँ विसर्गे (धा०पा० १४१४) → सृज् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → लोट् च (पा०सू० ३.३.१६२) → सृज् लोट् → सृज् ध्वम् → तुदादिभ्यः शः (पा०सू० ३.१.७७) → सृज् श ध्वम् → सृज् अ ध्वम् → सार्वधातुकमपित् (पा०सू० १.२.४) → ङित्त्वम् → ग्क्ङिति च (पा०सू० १.१.५) → लघूपधगुणनिषेधः → सृज् अ ध्वम् → सृजध्वम्।

[३८] दृशिँर् प्रेक्षणे (धा०पा० ९८८) → दृश् → हेतुमति च (पा०सू० ३.१.२६) → दृश् णिच् → दृश् इ → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → दश् इ → उरण् रपरः (पा०सू० १.१.५१) → दर्श् इ → दर्शि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → णिचश्च (पा०सू० १.३.७४) → लोट् च (पा०सू० ३.३.१६२) → दर्शि लोट् → दर्शि थास् → कर्तरि शप् (पा०सू० ३.१.६८) → दर्शि शप् थास् → दर्शि अ थास् → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → दर्शे अ थास् → एचोऽयवायावः (पा०सू० ६.१.७८) → दर्शय् अ थास् → थासस्से (पा०सू० ३.४.८०) → दर्शय् अ से → सवाभ्यां वामौ (पा०सू० ३.४.९१) → दर्शय् अ स्व → दर्शयस्व।

[३९] दर्शि → धातुसञ्ज्ञा (पूर्ववत्) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → दर्शि लोट् → दर्शि सिप् → दर्शि सि → कर्तरि शप् (पा०सू० ३.१.६८) → दर्शि शप् सि → दर्शि अ सि → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → दर्शे अ सि → एचोऽयवायावः (पा०सू० ६.१.७८) → दर्शय् अ सि → सेर्ह्यपिच्च (पा०सू० ३.४.८७) → दर्शय् अ हि → अतो हेः (पा०सू० ६.४.१०५) → दर्शय् अ → दर्शय।

[४०] स्वे स्वाः। आत्मीया इत्यर्थः। आत्मान इति वा। ज्ञातिधनवाचिनस्तु स्वाः। ज्ञातयोऽर्था वा (वै०सि०कौ० २२०)।

## ३.१४ याति

संवादमावयोर्यस्तु पठेद्वा शृणुयादपि।
स याति मम सारूप्यं मरणे मत्स्मृतिं लभेत्॥

– अ०रा० १.३.३४

अत्र भगवाञ्छ्रीरामो मात्रा सह स्वकीयसंवादस्य फलश्रुतिं वर्णयति य आवयोः संवादं पठेच्छृणुयाद्वा स मम सारूप्यं यायात्। यायात्[४१] इति प्रयोक्तव्ये याति इति प्रयुक्तम्। वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन वर्तमानकालः।[४२] अर्थात् संवादमिममनुशील्य सद्य एव मम सारूप्यं प्राप्स्यति इति भगवतस्तात्पर्यम्।

## ३.१५ अहनत्

भोजनं देहि मे मातर्न श्रुतं कार्यसक्तया।
ततः क्रोधेन भाण्डानि लगुडेनाहनत्तदा॥

– अ०रा० १.३.५३

भगवाञ्छ्रीरामो बाललीलामाचरन्मातरं भोजनं याचमानोऽप्राप्य बालक्रोधं विडम्बयल्लँगुडेन भाण्डान्यचूर्णयत्। अत्र अहनत् इति प्रयोगः। वस्तुतस्तु हन् धातोः (हनँ हिंसागत्योः धा०पा० १०१२) धातुसञ्ज्ञायाम् अनद्यतने लङ् (पा०सू० ३.२.१११) इत्यनेन लङ्लकारे तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासाथान्ध्वमिड्वहिमहिङ् (पा०सू० ३.४.७८)

[४१] आशीर्वादार्थे लिङि यायात् इति रूपम्। या प्रापणे (धा०पा० १०४९) → या → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → आशिषि लिङ्लोटौ (पा०सू० ३.३.१७३) → या लिङ् → या तिप् → या ति → यासुट् परस्मैपदेषूदात्तो ङिच्च (पा०सू० ३.४.१०३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → या यासुँट् ति → या यास् ति → सुट् तिथोः (पा०सू० ३.४.१०७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → या यास् सुँट् ति → या यास् स् ति → स्कोः संयोगाद्योरन्ते च (पा०सू० ८.२.२९) → या या ति → इतश्च (पा०सू० ३.४.१००) → या या त् → यायात्। विध्यर्थे लिङ्यपि यायात् इत्येव रूपं प्रक्रिया तु भिन्ना। या प्रापणे (धा०पा० १०४९) → या → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (पा०सू० ३.३.१६१) → या लिङ् → या तिप् → या ति → कर्तरि शप् (पा०सू० ३.१.६८) → या शप् ति → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → या ति → यासुट् परस्मैपदेषूदात्तो ङिच्च (पा०सू० ३.४.१०३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → या यासुँट् ति → या यास् ति → सुट् तिथोः (पा०सू० ३.४.१०७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → या यास् सुँट् ति → या यास् स् ति → लिङः सलोपोऽनन्त्यस्य (पा०सू० ७.२.७९) → या या ति → इतश्च (पा०सू० ३.४.१००) → या या त् → यायात्।

[४२] या प्रापणे (धा०पा० १०४९) → या → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → या लट् → या तिप् → या ति → कर्तरि शप् (पा०सू० ३.१.६८) → या शप् ति → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → या ति → या ति → याति।

इत्यनेन तिप्प्रत्यये कर्तरि शप् (पा०सू० ३.१.६८) इत्यनेन शब्विकरणे अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) इत्यनेन शपो लुकि लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा०सू० ६.४.७१) इत्यनेनाडागमे इतश्च (पा०सू० ३.४.१००) इत्यनेनेकारलोपे हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) इत्यनेन तकारलोपे अहन् इति पाणिनीयम्।[४३] अहनत् इत्यत्र गणकार्यमनित्यम् (प०शे० ९३.३) इत्यनेन शब्लुगभावे हलन्तत्वाभावान्न तकारलोपः।[४४] यद्वा हन्तीति हनः इति विग्रहे पचादित्वादच्।[४५] हन इवाऽचरतीति हनति[४६] इति विग्रह आचारक्विबन्ताल्लङ्लकारे प्रथमपुरुष एकवचन एवम् अहनत्।[४७] श्रीरामो निर्लेपत्वादकर्तृत्वाच्च किमपि न करोति। रामो न गच्छति न तिष्ठति नानुशोचति इत्यादि रामहृदये सीतया स्पष्टं निगदितत्वात्। यथा –

रामो न गच्छति न तिष्ठति नानुशोचत्याकाङ्क्षते त्यजति नो न करोति किञ्च।
आनन्दमूर्तिरचलः परिणामहीनो मायागुणाननुगतो हि तथा विभाति॥

– अ०रा० १.१.५३

एवं रामाभिन्नैककर्तृकानद्यतनभूतकालावच्छिन्नभाण्डकर्मकहननानुकूलव्यापाराश्रयसदृश-व्यापारः इति शाब्दबोधः।

---

[४३] हनँ हिंसागत्योः (धा०पा० १०१२) → हन् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → अनद्यतने लङ् (पा०सू० ३.२.१११) → हन् लङ् → हन् तिप् → हन् ति → लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा०सू० ६.४.७१) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → अट् हन् ति → अ हन् ति → कर्तरि शप् (पा०सू० ३.१.६८) → अ हन् शप् ति → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → अ हन् ति → इतश्च (पा०सू० ३.४.१००) → अ हन् त् → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → अ हन् → अहन्।

[४४] हनँ हिंसागत्योः (धा०पा० १०१२) → हन् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → अनद्यतने लङ् (पा०सू० ३.२.१११) → हन् लङ् → हन् तिप् → हन् ति → लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा०सू० ६.४.७१) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → अट् हन् ति → अ हन् ति → कर्तरि शप् (पा०सू० ३.१.६८) → अ हन् शप् ति → गणकार्यमनित्यम् (प०शे० ९३.३) → शब्लुगभावः → अ हन् अ ति → इतश्च (पा०सू० ३.४.१००) → अ हन् अ त् → अहनत्।

[४५] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन कर्तरि।

[४६] हन → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → हन क्विँप् → हन व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → हन → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् → हन लट् → हन तिप् → हन ति → कर्तरि शप् (पा०सू० ३.१.६८) → हन शप् ति → हन अ ति → अतो गुणे (पा०सू० ६.१.९७) → हन ति → हनति।

[४७] हन → धातुसञ्ज्ञा (पूर्ववत्) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → अनद्यतने लङ् (पा०सू० ३.२.१११) → हन् लङ् → हन् तिप् → हन् ति → लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा०सू० ६.४.७१) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → अट् हन् ति → अ हन् ति → कर्तरि शप् (पा०सू० ३.१.६८) → अ हन शप् ति → अ हन अ ति → अतो गुणे (पा०सू० ६.१.९७) → अ हन ति → इतश्च (पा०सू० ३.४.१००) → अ हन त् → अहनत्।

## ३.१६ चक्रे

एवं परात्मा मनुजावतारो मनुष्यलोकाननुसृत्य सर्वम्।
चक्रेऽविकारी परिणामहीनो विचार्यमाणे न करोति किञ्चित्॥

– अ०रा० १.३.६६

अत्र भगवतः स्वरूपं वर्णयति अकर्ता सन् सर्वं चकार विचार्यमाणे सति किमपि नाकरोत् । अत्र चकार इति हि पाणिनीयः।[४८] तच्चरित्रेण भक्तेष्वानन्दजननात्क्रिया-फलस्य परनिष्ठत्वात्। किन्तु कर्मव्यतिहारेणात्राऽत्मनेपदम्।[४९] साङ्ख्यदृष्ट्या भगवति प्रकृति-गतकर्तव्यमारोपितम्। रामहृदये श्रीसीतया स्पष्टं प्रतिपादितत्वात्। वेदान्तदृष्ट्याऽपि जीवगतकर्तृत्वं भगवत्यारोपितम्। अत आत्मनेपदम्। तथा च कृधातोः (डुकृञ् करणे धा०पा० १४७२) लिङ्कारे परोक्षे लिट् (पा०सू० ३.२.११५) इत्यनेन तप्रत्यये लिटस्तझयोरेशिरेच् (पा०सू० ३.४.८१) इत्यनेन एश् आदेशे लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) इत्यनेन द्वित्वे पूर्वोऽभ्यासः (पा०सू० ६.१.४) इत्यनेनाभ्याससञ्ज्ञायां उरत् (पा०सू० ७.४.६६) इत्यनेनर्कारस्याकारे उरण् रपरः (पा०सू० १.१.५१) इत्यनेन रपरत्वे हलादिः शेषः (पा०सू० ७.४.०) इत्यनेन रलोपे कुहोश्चुः (पा०सू० ७.४.६२) इत्यनेन चुत्वे इको यणचि (पा०सू० ६.१.७७) इत्यनेन यणि चक्रे।[५०] एवं करोति इत्यपि भूतकाले प्रयोक्तव्ये वर्तमाने प्रयुक्तं रूपम्। अत्र लट् स्मे (पा०सू० ३.२.११८) इत्यनेन स्मयोगे लङ्कारो भूतकालेऽपि।[५१] न चाऽत्र स्म इति न दृश्यते। विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः

[४८] डुकृञ् करणे (धा०पा० १४७२) → कृ → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → परोक्षे लिट् (पा०सू० ३.२.११५) → कृ लिट् → कृ तिप् → कृ ति → परस्मैपदानां णलतुसुस्थलथुस-णल्वमाः (पा०सू० ३.४.८२) → कृ णल् → कृ अ → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → कृ कृ अ → उरत् (पा०सू० ७.४.६६) → उरण् रपरः (पा०सू० १.१.५१) → कर् कृ अ → हलादिः शेषः (पा०सू० ७.४.६०) → क कृ अ → कुहोश्चुः (पा०सू० ७.४.६२) → च कृ अ → अचो ञ्णिति (पा०सू० ७.२.११५) → उरण् रपरः (पा०सू० १.१.५१) → च कार् अ → चकार।

[४९] कर्तरि कर्मव्यतिहारे पा०सू० १.३.१४) इत्यनेन।

[५०] डुकृञ् करणे (धा०पा० १४७२) → कृ → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → परोक्षे लिट् (पा०सू० ३.२.११५) → कृ लिट् → कृ त → लिटस्तझयोरेशिरेच् (पा०सू० ३.४.८१) → कृ एश् → कृ ए → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → कृ कृ ए → उरत् (पा०सू० ७.४.६६) → उरण् रपरः (पा०सू० १.१.५१) → कर् कृ ए → हलादिः शेषः (पा०सू० ७.४.६०) → क कृ ए → कुहोश्चुः (पा०सू० ७.४.६२) → च कृ ए → असंयोगाल्लिट् कित् (पा०सू० १.२.५) → कित्त्वम् → ग्क्ङिति च (पा०सू० १.१.५) → गुणनिषेधः → इको यणचि (पा०सू० ६.१.७७) → च क्र ए → चक्रे।

[५१] डुकृञ् करणे (धा०पा० १४७२) → कृ → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लट् स्मे (पा०सू० ३.२.११८) → कृ लट् → कृ तिप् → कृ ति → तनादिकृञ्भ्य उः (पा०सू० ३.१.७९) → कृ उ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → उरण् रपरः (पा०सू० १.१.५१) → कर् उ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → कर् ओ ति → करोति।

(वा० ५.३.८३) इत्यनेन लोपात्।

## ३.१७ करोमि

त्वद्विधा यद्गृहं यान्ति तत्रैवाऽयान्ति सम्पदः।
यदर्थमागतोऽसि त्वं ब्रूहि सत्यं करोमि तत्॥

– अ०रा० १.४.४

अत्र करिष्यामि[५२] इति प्रयोक्तव्ये वर्तमानसामीप्यलकारात् करोमि।[५३]

## ३.१८ किं करोमि

किं करोमि गुरो रामं त्यक्तुं नोत्सहते मनः।
बहुवर्षसहस्रान्ते कष्टेनोत्पादिताः सुताः॥

– अ०रा० १.४.९

अत्र किंवृत्ते लिप्सायाम् (पा०सू० ३.३.६) इत्यनेन लट्।[५४]

## ३.१९ न जीवामि

चत्वारोऽमरतुल्यास्ते तेषां रामोऽतिवल्लभः।
रामस्त्वितो गच्छति चेन्न जीवामि कथञ्चन॥

– अ०रा० १.४.१०

[५२] डुकृञ् करणे (धा०पा० १४७२) → कृ → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → कृ लृट् → कृ मिप् → कृ मि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → कृ स्य मि → ऋद्धनोः स्ये (पा०सू० ७.२.७०) → कृ इट् स्य मि → कृ इ स्य मि → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → उरण् रपरः (पा०सू० १.१.५१) → कर् इ स्य मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → कर् इ स्या मि → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → कर् इ ष्या मि → करिष्यामि।

[५३] वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन। डुकृञ् करणे (धा०पा० १४७२) → कृ → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → कृ लट् → कृ मिप् → कृ मि → तनादिकृञ्भ्य उः (पा०सू० ३.१.७९) → कृ उ मि → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → उरण् रपरः (पा०सू० १.१.५१) → कर् उ मि → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → कर् ओ मि → करोमि।

[५४] डुकृञ् करणे (धा०पा० १४७२) → कृ → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → किंवृत्ते लिप्सायाम् (पा०सू० ३.३.६) → कृ लट् → कृ मिप् → कृ मि → तनादिकृञ्भ्य उः (पा०सू० ३.१.७९) → कृ उ मि → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → उरण् रपरः (पा०सू० १.१.५१) → कर् उ मि → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → कर् ओ मि → करोमि।

न जीवामि इति वर्तमानसामीप्याल्लट्।[५५] सद्यो मरिष्यामि इति दशरथस्य तात्पर्यम्।

## ३.२० तेपाथे

त्वं तु प्रजापतिः पूर्वं कश्यपो ब्रह्मणः सुतः।
कौसल्या चादितिर्देवमाता पूर्वं यशस्विनी।
भवन्तौ तप उग्रं वै तेपाथे बहुवत्सरम्॥

– अ०रा० १.४.१४

अत्र वसिष्ठो दशरथस्य पूर्वजन्म स्मारयति। अत्र तप् धातुः (तपँ दाहे ऐश्वर्ये वा धा०पा० ११५९) दिवादिरात्मनेपदीयो न तु भ्वादिः परस्मैपदी (तपँ सन्तापे धा०पा० ९८५)।[५६] तस्माल्लिटि आथाम् प्रत्यये द्वित्वेऽभ्यासकार्ये अत एकहल्मध्येऽनादेशादेर्लिटि (पा०सू० ६.४.१२०) इत्यनेनाभ्यासलोप एकार एत्वे च तेपाथे इति साधु।[५७]

---

[५५] वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन। जीवँ प्राणधारणे (धा०पा० ५६२) → जीव् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → जीव् लट् → जीव् मिप् → जीव् मि → कर्तरि शप् (पा०सू० ३.१.६८) → जीव् शप् मि → जीव् अ मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → जीव् आ मि → जीवामि।

[५६] भौवादिकाद्धातोस्तु तेपथुः इति रूपम्। तपँ सन्तापे (धा०पा० ९८५) → तप् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → परोक्षे लिट् (पा०सू० ३.२.११५) → तप् लिट् → तप् थस् → परस्मैपदानां णलतुसुस्थलथुसणल्वमाः (पा०सू० ३.४.८२) → तप् अथुस् → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → तप् तप् अथुस् → हलादिः शेषः (पा०सू० ७.४.६०) → त तप् अथुस् → अत एकहल्मध्येऽनादेशादेर्लिटि (पा०सू० ६.४.१२०) → तेप् अथुस् → तेपथुः।

[५७] तपँ दाहे ऐश्वर्ये वा (धा०पा० ११५९) → तप् → अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) → परोक्षे लिट् (पा०सू० ३.२.११५) → तप् लिट् → तप् आथाम् → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → तप् तप् आथाम् → हलादिः शेषः (पा०सू० ७.४.६०) → त तप् आथाम् → अत एकहल्मध्येऽनादेशादेर्लिटि (पा०सू० ६.४.१२०) → तेप् आथाम् → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → तेप् आथे → तेपाथे। न चात्र तप् धातुश्चुरादिराधृषीय उभयपदी (तपँ दाहे धा०पा० १८१९)। तस्माल्लिटि परस्मैपदे णिच्पक्षे तापयाञ्चक्रथुः तापयाम्बभूवथुः तापयामासथुः इति रूपाणि णिजभावपक्षे तेपथुः इति रूपमात्मनेपदे च णिच्पक्षे तापयाञ्चक्राथे इति रूपं णिजभावपक्षे तेपाथे इति रूपम्। अत्र क्रियाफलं रामावतरणम्। तन्नादितिकश्यपकर्तृगाम्यपि तु परगामि। सकलसंसारकल्याणकारित्वात्। रामावतारेण साधूनां परित्राणं दुष्कृतानां विनाशो धर्मस्य संस्थापना च। तेन स्वरितञितः कर्त्रभिप्राये क्रियाफले (पा०सू० १.३.७२) इत्यस्याप्रवृत्तिरत्र। विस्तारभिया प्रक्रिया न दीयन्ते।

## ३.२१ प्रेषयस्व

अतः प्रीतेन मनसा पूजयित्वाथ कौशिकम्।
प्रेषयस्व रमानाथं राघवं सहलक्ष्मणम्॥

– अ०रा० १.४.२०

वसिष्ठोऽनुजानाति यत् रमानाथं श्रीरामभद्रं विश्वामित्राय प्रयच्छ। अत्र प्रेषयस्व इति प्रयुक्तं प्रेषय इति प्रयोक्तव्यम्।[५८] यतो हि णिचश्च (पा०सू० १.३.७४) इत्यात्मनेपदम्।[५९] तदपि क्रियाफले कर्तृगामिनि सति। राघवप्रेषणेन त्वामपि यशोरूपं फलं मिलिष्यति इति तात्पर्यादत्राऽत्मनेपदम्। यद्वा स्व इति सम्बोधनम्। हे स्व आत्मीय रमानाथं रामं प्रेषय इति नापाणिनीयता।

## ३.२२ दर्शयस्व

दर्शयस्व महाभाग कुतस्तौ राक्षसाधमौ।
तथेत्युक्त्वा मुनिर्यष्टुमारेभे मुनिभिः सह॥

– अ०रा० १.५.४

श्रीरामो राक्षसौ प्रति पृच्छन् दर्शयस्व इति प्रयुङ्क्ते। अत्र राक्षसनिधनेन दर्शनकारयितरि विश्वामित्रे फलमिति क्रियाफलस्य कर्तृगामित्वादात्मनेपदम्।[६०]

---

[५८] प्रेषृँ गतौ (धा०पा० ६१९) → प्रेष् → हेतुमति च (पा०सू० ३.१.२६) → प्रेष् णिच् → प्रेष् इ → प्रेषि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → प्रेषि लोट् → प्रेषि सिप् → प्रेषि सि → कर्तरि शप् (पा०सू० ३.१.६८) → प्रेषि शप् सि → प्रेषि अ सि → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → प्रेषे अ सि → एचोऽयवायावः (पा०सू० ६.१.७८) → प्रेषय् अ सि → सेर्ह्यपिच्च (पा०सू० ३.४.८७) → प्रेषय् अ हि → अतो हेः (पा०सू० ६.४.१०५) → प्रेषय् अ → प्रेषय।

[५९] प्रेषृँ गतौ (धा०पा० ६१९) → प्रेष् → हेतुमति च (पा०सू० ३.१.२६) → प्रेष् णिच् → प्रेष् इ → प्रेषि → धातुसञ्ज्ञा → णिचश्च (पा०सू० १.३.७४) → लोट् च (पा०सू० ३.३.१६२) → प्रेषि लोट् → प्रेषि थास् → कर्तरि शप् (पा०सू० ३.१.६८) → प्रेषि शप् थास् → प्रेषि अ थास् → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → प्रेषे अ थास् → एचोऽयवायावः (पा०सू० ६.१.७८) → प्रेषय् अ थास् → थासस्से (पा०सू० ३.४.८०) → प्रेषय् अ से → सवाभ्यां वामौ (पा०सू० ३.४.९१) → प्रेषय् अ स्व → प्रेषयस्व।

[६०] णिचश्च (पा०सू० १.३.७४) इत्यनेन। दृशिँर् प्रेक्षणे (धा०पा० ९८८) → दृश् → हेतुमति च (पा०सू० ३.१.२६) → दृश् णिच् → दृश् इ → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → उरण् रपरः (पा०सू० १.१.५१) → दर्श् इ → दर्शि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → णिचश्च (पा०सू० १.३.७४) → लोट् च (पा०सू० ३.३.१६२) → दर्शि लोट् → दर्शि थास् → कर्तरि शप् (पा०सू० ३.१.६८) → दर्शि शप् थास् → दर्शि अ थास् → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → दर्शे अ थास् → एचोऽयवायावः (पा०सू० ६.१.७८) → दर्शय् अ थास् → थासस्से (पा०सू० ३.४.८०) → दर्शय् अ से → सवाभ्यां वामौ (पा०सू० ३.४.९१) → दर्शय् अ स्व → दर्शयस्व।

## ३.२३ ददृशाते

मध्याह्ने ददृशाते तौ राक्षसौ कामरूपिणौ।
मारीचश्च सुबाहुश्च वर्षन्तौ रुधिरास्थिनी॥

– अ०रा० १.५.५

ददृशाते इति कर्मवाच्यप्रयोगः।[६१] रामलक्ष्मणाभ्याम् इति शेषः। अत्र परोक्षे लिट् (पा०सू० ३.२.११५) इत्यनेन लिङ्लकारः। प्रथमपुरुषद्विवचने रूपम्। परोक्षत्वं नाम साक्षात्करोमीति क्रियाशालिज्ञानाविषयतावच्छेदकत्वम् ।[६२]

## ३.२४ गच्छामहे

चतुर्थेऽहनि संप्राप्ते कौशिको राममब्रवीत्।
राम राम महायज्ञं द्रष्टुं गच्छामहे वयम्॥

– अ०रा० १.५.१२

ताटकामारीचसुबाहून् व्यापाद्य यज्ञरक्षां विधाय दिनत्रयं यावत्तत्र प्रोष्यायोध्यां प्रति गन्तुकामं लक्ष्मणाभिरामं श्रीरामं विश्वामित्रो मिथिलां प्रस्थातुं समामन्त्रयत्। तत्रैव प्रयुक्तम् गच्छामहे। इदं कथम्। गमॢँधातुः (गमॢँ गतौ धा०पा० ९८२) परस्मैपदी। ततो लटि मसि शपि अतो दीर्घो यञि (पा०सू० ७.३.१०१) इत्यनेन दीर्घे इषुगमियमां छः (पा०सू० ७.३.७७) इत्यनेन छत्वे छे च (पा०सू० ६.१.७३) इत्यनेन तुकि स्तोः श्चुना श्चुः (पा०सू० ८.४.४०) इत्यनेन श्चुत्वे विसर्गे गच्छामः इति पाणिनीयम्।[६३] गच्छामहे इति सम् उपसर्गसंयोजने समो गम्यृच्छिभ्याम् (पा०सू० १.३.२९) इत्यात्मनेपदे महिङ् प्रत्यये ङकारानुबन्धकार्ये

[६१] अत्र कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन कर्तर्यात्मनेपदं न वेत्याशङ्कां परिहर्तुं विमर्शः प्रारब्धः। दृशिँर् प्रेक्षणे (धा०पा० ९८८) → दृश् → भावकर्मणोः (पा०सू० १.३.१३) → परोक्षे लिट् (पा०सू० ३.२.११५) → दृश् लिट् → दृश् आताम् → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → दृश् दृश् आताम् → उरत् (पा०सू० ७.४.६६) → उरण् रपरः (पा०सू० १.१.५१) → दर्श् दृश् आताम् → हलादिः शेषः (पा०सू० ७.४.६०) → द दृश् आताम् → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → द दृश् आते → असंयोगाल्लिट् कित् (पा०सू० १.२.५) → कित्त्वम् → ग्क्ङिति च (पा०सू० १.१.५) → गुणनिषेधः → ददृशाते।

[६२] परोक्षत्वं च साक्षात्करोमीत्येतादृशविषयताशालिज्ञानाविषयत्वम् (वै०भू०सा० २२)।

[६३] गमॢँ गतौ (धा०पा० ९८२) → गम् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → गम् लट् → गम् मस् → कर्तरि शप् (पा०सू० ३.१.६८) → गम् शप् मस् → गम् अ मस् → इषुगमियमां छः (पा०सू० ७.३.७७) → गछ् अ मस् → छे च (पा०सू० ६.१.७३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → गतुँक् छ् अ मस् → गत् छ् अ मस् → स्तोः श्चुना श्चुः (पा०सू० ८.४.४०) → गच् छ् अ मस् → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → गच् छ् आ मस् → ससजुषो रुः (पा०सू० ८.२.६६) → गच् छ् आ मरुँ → खरवसानयोर्विसर्जनीयः (पा०सू० ८.३.१५) → गच् छ् आ मः → गच्छामः।

टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) इत्यनेन चैत्वे सङ्गच्छामहे।[६४] यज्ञं द्रष्टुं सङ्गता भवामः। वर्तमानसामीप्याल्लट्।[६५] उपसर्गलोपस्तु विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इति वचनात्। यद्वा हे इति पृथक्पदम्। गच्छाम पदं लोड्लकारोत्तमपुरुषस्य बहुवचनस्य।[६६] हे राम हे राम महायज्ञं द्रष्टुं वयं गच्छामेतीच्छामः इत्थमन्वये इच्छार्थेषु लिङ्लोटौ (पा०सू० ३.३.१५७) इत्यनेन इच्छामः इत्युपपदे लोड्लकारे कृते मस्प्रत्यये आडुत्तमस्य पिच्च (पा०सू० ३.४.९२) इत्यनेनाऽऽडागमे लोटो लङ्वत् (पा०सू० ३.४.८५) इत्यनेन लङ्वद्भावे नित्यं ङितः (पा०सू० ३.४.९९) इत्यनेन सकारलोपे गच्छाम हे। हे राम, इच्छामो यन्महायज्ञं द्रष्टुं गच्छाम इति योजना।[६७]

## ३.२५ पूज्यसे

द्रक्ष्यसि त्वं महासत्त्वं पूज्यसे जनकेन च।
इत्युक्त्वा मुनिभिस्ताभ्यां ययौ गङ्गासमीपगम्॥

– अ०रा० १.५.१४

---

[६४] सम् गमॢँ गतौ (धा०पा० ९८२) → सम् गम् → समो गम्यृच्छिभ्याम् (पा०सू० १.३.२९) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → सम् गम् लट् → सम् गम् महिङ् → सम् गम् महि → कर्तरि शप् (पा०सू० ३.१.६८) → सम् गम् शप् महि → सम् गम् अ महि → इषुगमियमां छः (पा०सू० ७.३.७७) → सम् गछ् अ महि → छे च (पा०सू० ६.१.७३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → सम् गतुँक् छ् अ महि → सम् गत् छ् अ महि → स्तोः श्चुना श्चुः (पा०सू० ८.४.४०) → सम् गच् छ् अ महि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → सम् गच् छ् आ महि → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → सम् गच् छ् आ महे → मोऽनुस्वारः (पा०सू० ८.३.२३) → सं गच् छ् आ महे → वा पदान्तस्य (पा०सू० ८.४.५९) → सङ् गच् छ् आ महे → सङ्गच्छामहे।

[६५] वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन।

[६६] गमॢँ गतौ (धा०पा० ९८२) → गम् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → इच्छार्थेषु लिङ्लोटौ (पा०सू० ३.३.१५७) → गम् लोट् → गम् मस् → कर्तरि शप् (पा०सू० ३.१.६८) → गम् शप् मस् → गम् अ मस् → इषुगमियमां छः (पा०सू० ७.३.७७) → गछ् अ मस् → छे च (पा०सू० ६.१.७३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → गतुँक् छ् अ मस् → गत् छ् अ मस् → स्तोः श्चुना श्चुः (पा०सू० ८.४.४०) → गच् छ् अ मस् → आडुत्तमस्य पिच्च (पा०सू० ३.४.९२) → गच् छ् अ आट् मस् → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → गच् छ् आ मस् → लोटो लङ्वत् (पा०सू० ३.४.८५) → ङिद्वत्त्वम् → नित्यं ङितः (पा०सू० ३.४.९९) → गच् छ् आ म → गच्छाम।

[६७] इच्छामः इत्यध्याहार्यमिति भावः। ततः इच्छार्थेषु लिङ्लोटौ (पा०सू० ३.३.१५७) इत्यनेन सर्वलकारापवादेन लोट्।

द्रक्ष्यसि इति समभिव्याहारेण पूजयिष्यसे[६८] इति हि पाणिनीयप्रयोगः स्याच्चेत्सङ्गतिः स्यात्। किन्तु पूज्यसे इति प्रयोगे त्वसङ्गतिरेकत्र द्रक्ष्यसि इति भविष्यत्प्रयोगोऽपरत्र पूज्यसे इति वर्तमानकालिक इति चेत्। वर्तमानसामीप्याद्भविष्यत्काले लटि नासङ्गतिः।[६९] किमर्थमिदमिति चेत्। त्वं यदा महासत्त्वं द्रक्ष्यसि ततो धनुषि भग्ने शीघ्रमेव जनकेन पूजयिष्यसे इति शीघ्रतां ध्वनयितुं भविष्यति वर्तमानवत्कार्यम्।

## ३.२६ आगमिष्यति

एवं वर्षसहस्रेषु ह्यनेकेषु गतेषु च।
रामो दाशरथिः श्रीमानागमिष्यति सानुजः॥

– अ०रा० १.५.३०

अत्र यद्यप्यनद्यतनत्वाल्लुङ्कारः[७०] अनद्यतने लुट् (पा०सू० ३.३.१५) इति सूत्रानुशासनात्किन्तु सामान्यसमयतोऽनिश्चितभविष्यद्विवक्षायां लृडेव।[७१] अतो न दोषः।

---

[६८] पूजँ पूजायाम् (धा०पा० १६४२) → पूज् → सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् (पा०सू० ३.१.२५) → पूज् णिच् → पूज् इ → पूजि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → भावकर्मणोः (पा०सू० १.३.१३) → लृट् शेषे च (पा०सू० ३.३.१३) → पूजि लृट् → पूजि थास् → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → पूजि स्य थास् → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → पूजि इट् स्य थास् → पूजि इ स्य थास् → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → पूजे इ स्य थास् → एचोऽयवायावः (पा०सू० ६.१.७८) → पूजय् इ स्य थास् → थासस्से (पा०सू० ३.४.८०) → पूजय् इ स्य से → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → पूजय् इ ष्य से → पूजयिष्यसे।

[६९] वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन। पूजि → धातुसञ्ज्ञा (पूर्ववत्) → भावकर्मणोः (पा०सू० १.३.१३) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → पूजि लट् → पूजि थास् → सार्वधातुके यक् (पा०सू० ३.१.६७) → पूजि यक् थास् → पूजि य थास् → णेरनिटि (पा०सू० ६.४.५१) → पूज् य थास् → थासस्से (पा०सू० ३.४.८०) → पूज् य से → पूज्यसे।

[७०] लुटि आगन्ता इति रूपम्। आङ् गमॢँ गतौ (धा०पा० ९८२) → आ गम् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → अनद्यतने लुट् (पा०सू० ३.३.१५) → आ गम् → आ गम् लुट् → आ गम् तिप् → आ गम् ति → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → आ गम् तास् ति → लुटः प्रथमस्य डारौरसः (पा०सू० २.४.८५) → आ गम् तास् डा → आ गम् तास् आ → डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) → आ गम् त् आ → मोऽनुस्वारः (पा०सू० ८.३.२३) → आ गं त् आ → अनुस्वारस्य ययि परसवर्णः (पा०सू० ८.४.५८) → आ गन् त् आ → आगन्ता।

[७१] आङ् गमॢँ गतौ (धा०पा० ९८२) → आ गम् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → आ गम् लृँट् → आ गम् तिप् → आ गम् ति → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → आ गम् स्य ति → गमेरिट् परस्मैपदेषु (पा०सू० ७.२.५८) → आ गम् इट् स्य ति → आ गम् इ स्य ति → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → आ गम् इ ष्य ति → आगमिष्यति।

## ३.२७ काङ्क्षते

तव पादरजःस्पर्शं काङ्क्षते पवनाशना।
आस्तेऽद्यापि रघुश्रेष्ठ तपो दुष्करमास्थिता॥

– अ०रा० १.५.३४

विश्वामित्रः श्रीरामं प्रति वेदयति यत् अहल्या भवच्चरणधूलिं वाञ्छति। तत्र काङ्क्षते इति प्रयुक्तम्। अत्र कर्मव्यतिहार आत्मनेपदम्।[७२] अन्यस्य योग्यं कार्यमन्यः करोति यदा तदा कर्मव्यतिहारः। तव पादरजो योग्यतया श्रीर्वाञ्छति। यथा श्रीमद्भागवते –

श्रीर्यत्पदाम्बुजरजश्चकमे तुलस्या लब्ध्वाऽपि वक्षसि पदं किल भृत्यजुष्टम्।
यस्याः स्ववीक्षणकृतेऽन्यसुरप्रयासस्तद्वद्वयं च तव पादरजःप्रपन्नाः॥

– भा०पु० १०.२९.३७

अर्थात्साक्षान्महालक्ष्मीर्भगवती त्वत्पादरजोऽधिकारिणी किन्तु परमपातककारिणी व्यभिचारिणी सत्यपीयं रजोगुणनाशाय तव चरणधूलिं काङ्क्षतीत्यन्ययोग्यकाङ्क्षण आत्मनेपदम्। अहल्याऽऽत्मनः पराभवमूलं कामं तदुद्भवं च रजोगुणं मन्यमाना तं च रजोगुणं मुकुन्दश्रीरामभद्रचरणारविन्दरजसा परिमार्ष्टुमिच्छतीति कौशिकहार्दम्। कामो रजोगुणोद्भव इति गीतायां निर्दिष्टं यथा –

काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥

– भ०गी० ३.३७

यद्वा ब्राह्मणी सत्यपि क्षत्रियस्य ते चरणारविन्दरजः काङ्क्षत्यतो दयस्वेत्यन्ययोगकाङ्क्षणरूपे कर्मव्यतिहार आत्मनेपदे काङ्क्षते।

## ३.२८ पावयस्व

पावयस्व मुनेर्भार्यामहल्यां ब्रह्मणः सुताम्।
इत्युक्त्वा राघवं हस्ते गृहीत्वा मुनिपुङ्गवः॥

– अ०रा० १.५.३५

---

[७२] कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन। काक्षिँ काङ्क्षायाम् (धा०पा० ६६७) → काक्ष् → इदितो नुम् धातोः (पा०सू० ७.१.५८) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → का नुँम् क्ष् → कान् क्ष् → नश्चापदान्तस्य झलि (पा०सू० ८.३.२४) → कांक्ष् → अनुस्वारस्य ययि परसवर्णः (पा०सू० ८.४.५८) → काङ्क्ष् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → वर्तमाने लट् (पा०सू० ३.२.१२३) → काङ्क्ष् लट् → काङ्क्ष् त → कर्तरि शप् (पा०सू० ३.१.६८) → काङ्क्ष् शप् त → काङ्क्ष् अ त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → काङ्क्ष् अ ते → काङ्क्षते।

विश्वामित्रः कथयति यत् भगवन्नहल्यां पुनीहि। अत्र पावय इति प्रयोक्तव्यम्।[७३] पावयस्व इति पावनरूपं फलं त्वय्येव स्थास्यति तव भक्तवात्सल्यं पतितपावनत्वं वा दिगन्ते प्रसरिष्यत्यत आत्मनेपदम्।[७४] यद्वा हे स्व अर्थात् हे आत्मीय हे आत्मन् हे धन पावय इत्यन्वये परिहारः। स्वमज्ञातिधनाख्यायाम् (पा०सू० १.१.३५) इति सूत्रस्य भाष्ये स्वशब्दस्य चत्वारोऽर्थाः सङ्केतेन कथिताः – आत्माऽऽत्मीयो ज्ञातिर्धनमिति।[७५] अत्र चत्वारोऽप्यर्था अनुसन्धेयाः। विश्वामित्रः कथयति यत्त्वमात्मा त्वमात्मीयस्त्वमेवास्मज्ज्ञातिर्ब्रह्मण्यदेवत्वात्त्वमेवास्मद्धनमाराध्यत्वात्। अतः हे स्व पावय इति सम्यक्पाणिनीयता।

## ३.२९ किं वर्ण्यते

यत्पादपङ्कजपरागपवित्रगात्रा भागीरथी भवविरिञ्चिमुखान्पुनाति।
साक्षात्स एव मम दृग्विषयो यदास्ते किं वर्ण्यते मम पुराकृतभागधेयम्॥

– अ०रा० १.५.४५

अहल्या स्वकीयं भाग्यं प्रशंसति। किं वर्ण्यते इति। अत्र वर्णयितुं शक्यते इति

[७३] पूञ् पवने (धा०पा० १४८२) → पू → हेतुमति च (पा०सू० ३.१.२६) (यद्वा स्वार्थे णिच्) → पू णिच् → पू इ → अचो ञ्णिति (पा०सू० ७.२.११५) → पौ इ → एचोऽयवायावः (पा०सू० ६.१.७८) → पाव् इ → पावि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → पावि लोट् → पावि सिप् → पावि सि → कर्तरि शप् (पा०सू० ३.१.६८) → पावि शप् सि → पावि अ सि → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → पावे अ सि → एचोऽयवायावः (पा०सू० ६.१.७८) → पावय् अ सि → सेर्ह्यपिच्च (पा०सू० ३.४.८७) → पावय् अ हि → अतो हेः (पा०सू० ६.४.१०५) → पावय् अ → पावय।

[७४] पावि → धातुसञ्ज्ञा (पूर्ववत्) → णिचश्च (पा०सू० १.३.७४) → लोट् च (पा०सू० ३.३.१६२) → पावि लोट् → पावि थास् → कर्तरि शप् (पा०सू० ३.१.६८) → पावि शप् थास् → पावि अ थास् → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → पावे अ थास् → एचोऽयवायावः (पा०सू० ६.१.७८) → पावय् अ थास् → थासस्से (पा०सू० ३.४.८०) → पावय् अ से → सवाभ्यां वामौ (पा०सू० ३.४.९१) → पावय् अ स्व → पावयस्व।

[७५] आख्याग्रहणं किमर्थम्। ज्ञातिधनपर्यायवाची यः स्वशब्दस्तस्य यथा स्यात्। इह मा भूत् – स्वे पुत्राः स्वाः पुत्राः स्वे गावः स्वाः गावः (भा०पा०सू० १.१.३५)। स्वे स्वाः। आत्मीया इत्यर्थः। आत्मान इति वा। ज्ञातिधनवाचिनस्तु स्वाः। ज्ञातयोऽर्था वा (वै०सि०कौ० २२०, १.१.३५)।

वर्तमानसामीप्याल्लट्।[७६]

## ३.३० अधिगच्छति

अहल्यया कृतं स्तोत्रं यः पठेद्भक्तिसंयुतः।
स मुच्यतेऽखिलैः पापैः परं ब्रह्माधिगच्छति॥

– अ॰रा॰ १.५.६२

अत्र वर्तमानसामीप्याल्लट्।[७७] अहल्याकृतस्तोत्रं पठित्वा सद्यः परं ब्रह्माधिगमिष्यति इति ध्वनयितुं वर्तमानप्रत्ययः। अत्र कर्मकर्तृप्रयोगः। यदा कार्यसौकर्यातिशयं बोधयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि कर्तृसञ्ज्ञां लभन्ते स्वव्यापारे स्वतन्त्रत्वात्। यथा सीता कन्दमूलं पचति। सीतया किं कन्दमूलं स्वयमेव पच्यते तथैवात्रापि। स ब्रह्माधिगच्छति। तेन किं परब्रह्म स्वयमेवाधिगम्यते। अधिगच्छति शास्त्रार्थः (वै॰सि॰कौ॰ २७६६) इतिवत्।

## ३.३१ क्षालयामि

क्षालयामि तव पादपङ्कजं नाथ दारुदृषदोः किमन्तरम्।
मानुषीकरणचूर्णमस्ति ते पादयोरिति कथा प्रथीयसी॥

– अ॰रा॰ १.६.३

[७६] वर्तमानसामीप्ये वर्तमानवद्वा (पा॰सू॰ ३.३.१३१) इत्यनेन। वर्ण वर्णक्रियाविस्तारगुणवचनेषु (धा॰पा॰ १९३९) → वर्ण → सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् (पा॰सू॰ ३.१.२५) → वर्ण णिच् → वर्ण इ → णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादि-परार्थम् (वा॰ ६.४.४८) → वर्ण् इ → वर्णि → धातुसञ्ज्ञा → भावकर्मणोः (पा॰सू॰ १.३.१३) → वर्तमानसामीप्ये वर्तमानवद्वा (पा॰सू॰ ३.३.१३१) → वर्तमाने लट् (पा॰सू॰ ३.२.१२३) → वर्णि लट् → वर्णि त → वर्णि त → सार्वधातुके यक् (पा॰सू॰ ३.१.६७) → वर्णि यक् त → वर्णि य त → णेरनिटि (पा॰सू॰ ६.४.५१) → वर्ण् य त → टित आत्मनेपदानां टेरे (पा॰सू॰ ३.४.७९) → वर्ण् य ते → वर्ण्यते।

[७७] वर्तमानसामीप्ये वर्तमानवद्वा (पा॰सू॰ ३.३.१३१) इत्यनेन। अधि गमॢँ गतौ (धा॰पा॰ ९८२) → अधि गम् → शेषात्कर्तरि परस्मैपदम् (पा॰सू॰ १.३.७८) → वर्तमानसामीप्ये वर्तमानवद्वा (पा॰सू॰ ३.३.१३१) → वर्तमाने लट् (पा॰सू॰ ३.२.१२३) → अधि गम् लट् → अधि गम् तिप् → अधि गम् ति → कर्तरि शप् (पा॰सू॰ ३.१.६८) → अधि गम् शप् ति → अधि गम् अ ति → इषुगमियमां छः (पा॰सू॰ ७.३.७७) → अधि गछ् अ ति → छे च (पा॰सू॰ ६.१.७३) → आद्यन्तौ टकितौ (पा॰सू॰ १.१.४६) → अधि गतुँक् छ् अ ति → अधि गत् छ् अ ति → स्तोः श्चुना श्चुः (पा॰सू॰ ८.४.४०) → अधि गच् छ् अ ति → अधिगच्छति।

अत्र वर्तमानसामीप्याल्लट्।[७८]

## ३.३२ अनुशुश्रुवे

पूजितं राजभिः सर्वैर्दृष्टमित्यनुशुश्रुवे।
अतो दर्शय राजेन्द्र शैवं चापमनुत्तमम्।
दृष्ट्वाऽयोध्यां जिगमिषुः पितरं द्रष्टुमिच्छति॥

– अ०रा० १.६.१६

अत्र विश्वामित्रो लिङ्कारक्रियां प्रयुङ्क्ते। तस्य कथं पारोक्ष्यं त्रिकालदर्शित्वात्। वस्तुतस्त्वपरोक्षानुभूतेः सरूपं सगुणं ब्रह्म श्रीरामं दर्शं दर्शं विस्मृतसकलव्यापारतया भावातिरेके प्रेमसिन्धौ ज्ञानप्लवस्य मग्नतां सूचयितुं परोक्षप्रयोगः। बहु जगद पुरस्तात्तस्य मत्ता किलाहम् (शि० ११.३९) इति प्रयोग इव।

## ३.३३ आकर्षयामास

ईषदाकर्षयामास पाणिना दक्षिणेन सः।
बभञ्जाखिलहृत्सारो दिशः शब्देन पूरयन्॥

– अ०रा० १.६.२५

[७८] वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन। क्षलँ शौचकर्मणि (धा०पा० १५९७) → क्षल् → सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् (पा०सू० ३.१.२५) → क्षल् णिच् → क्षल् इ → अत उपधायाः (पा०सू० ७.२.११६) → क्षाल् इ → क्षालि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → क्षालि लट् → क्षालि मिप् → क्षालि मि → कर्तरि शप् (पा०सू० ३.१.६८) → क्षालि शप् मि → क्षालि अ मि → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → क्षाले अ मि → एचोऽयवायावः (पा०सू० ६.१.७८) → क्षालय् अ मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → क्षालय् आ मि → क्षालयामि।

अत्र स्वार्थे णिजन्तत्वात् आकर्षयामास इति।[७९]

## ३.३४ आनयामास

ततः शुभे दिने लग्ने सुमुहूर्ते रघूत्तमम्।
आनयामास धर्मज्ञो रामं सभ्रातृकं तदा॥

– अ०रा० १.६.४५

आङ् पूर्वकः णीञ् प्रापणे (धा०पा० ९०१) इति धातुः। णो नः (पा०सू० ६.१.६५) इत्यनेन नकारः। अत्र परोक्षे लिङ्लकारः। परस्मैपदानां णलतुसुस्थलथुसणल्वमाः (पा०सू० ३.४.८२) इत्यनेन णलादेशे वृद्धौ द्वित्वेऽभ्यासलोपेऽयादेशे आनिनाय इत्येव।[८०] आनयामास इति कथम्। उच्यते। आनयतीत्यानया भावे अच् प्रत्यये गुणेऽयादेशे

---

[७९] कृषँ विलेखने (धा०पा० ९९०) → कृष् → स्वार्थे णिच् → कृष् णिच् → कृष् इ → पुगन्त-लघूपधस्य च (पा०सू० ७.३.८६) → उरण् रपरः (पा०सू० १.१.५१) → कर्ष् इ → कर्षि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा। आङ् कर्षि → आ कर्षि → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → परोक्षे लिट् (पा०सू० ३.२.११५) → आ कर्षि लिट् → आ कर्षि तिप् → परस्मैपदानां णलतुसुस्थलथुसणल्वमाः (पा०सू० ३.४.८२) → आ कर्षि ण → आ कर्षि अ → कास्यनेकाचश्चुलुम्पाद्यर्थम् (वा० ३.३.३५) → आ कर्षि आम् अ → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → आ कर्षे आम् अ → एचोऽयवायावः (पा०सू० ६.१.७८) → आ कर्षय् आम् अ → आमः (पा०सू० २.४.८१) → आ कर्षय् आम् → कृञ्चानुप्रयुज्यते लिटि (पा०सू० ३.१.४०) → आ कर्षय् आम् अस् लिट् → आ कर्षय् आम् अस् तिप् → परस्मैपदानां णलतुसुस्थलथुसणल्वमाः (पा०सू० ३.४.८२) → आ कर्षय् आम् अस् ण → आ कर्षय् आम् अस् अ → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → आ कर्षय् आम् अस् अस् अ → हलादिः शेषः (पा०सू० ७.४.६०) → आ कर्षय् आम् अ अस् अ → अत आदेः (पा०सू० ७.४.७०) → आ कर्षय् आम् आ अस् अ → अत उपधायाः (पा०सू० ७.२.११६) → आ कर्षय् आम् आ आस् अ → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → आ कर्षय् आम् आस् अ → आकर्षयामास। यद्वा आकर्षणमाकर्षः। भावे (पा०सू० ३.३.१८) इत्यनेन भावे घञ्। ततः तत्करोति तदाचष्टे (धा०पा० ग०सू० १८७) इत्यनेन णिचि गुणे रपरत्वे आकर्षि इति धातुसञ्ज्ञायां लिटि तिप्यामि लुकि अस् धात्वनुप्रयोगे पूर्वोक्तदिशा आकर्षयामास।

[८०] आङ् णीञ् प्रापणे (धा०पा० ९०१) → आ नी → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → परोक्षे लिट् (पा०सू० ३.२.११५) → आ नी लिट् → आ नी तिप् → आ नी ति → परस्मैपदानां णलतुसुस्थलथुसणल्वमाः (पा०सू० ३.४.८२) → आ नी ण → आ नी अ → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → आ नी नी अ → ह्रस्वः (पा०सू० ७.४.५९) → आ नि नी अ → अचो ञ्णिति (पा०सू० ७.२.११५) → आ नि नै अ → एचोऽयवायावः (पा०सू० ६.१.७८) → आ नि नाय् अ → आनिनाय।

टापि।[८१] आनयाम् । क्रियाविशेषणत्वाद्द्वितीया। आस बभूवेति।[८२]

## ३.३५ मुमोद

मुमोद जनको लक्ष्मीं क्षीराब्धिरिव विष्णवे।
ऊर्मिलां चौरसीं कन्यां लक्ष्मणाय ददौ मुदा॥

– अ०रा० १.६.५५

अत्र मुद् धातुः (मुदँ हर्षे धा०पा० १६) आत्मनेपदी। एवं तत्र लिटि लकारे मुमुदे

[८१] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन। बाहुलकाद्भावे स्त्रियाम्।

[८२] बभूव इत्यर्थे आस इति बहुधा शिष्टप्रयोगेषु पुराणेषु च दृश्यते। यथा लघुत्रय्याम् – लावण्य उत्पाद्य इवास यत्नः (कु०स० १.३५) निष्प्रभश्च रिपुरास भूभृताम् (र०वं० ११.८१) तेनास लोकः पितृमान्विनेत्रा (र०वं० १४.२३)। अत्र मल्लिनाथः – आसेति बभूवार्थे "तिङन्तप्रतिरूपकमव्ययम्" इत्याह शाकटायनः। वल्लभस्तु "न तिङन्तप्रतिरूपकमव्ययम् 'अस्तेर्भूः' इति भ्वादेशनियमात्ताद्दक्तिङन्तस्यैवाभावात्। किन्तु कवीनामयं प्रामादिकः प्रयोगः" इत्याह। वामनस्तु "अस गतिदीप्त्यादानेष्विति धातोर्लिटि रूपमिदम्" इत्याह। अस इत्यनुदात्तेद्दीप्त्यर्थे। आस दिदीपे। प्रवृत्त इत्यर्थः। भागवते च – मैत्रेयेणास सङ्गमः (भा०पु० ३.१.३) भगवानेक आसेदम् (भा०पु० ३.५.२३) निष्कामति निर्विशती द्विधाऽऽस सा (भा०पु० ४.४.१) असन्नपि क्लेशद आस देहः (भा०पु० ५.५.४) न यदिदमग्र आस न भविष्यदतो निधनात् (भा०पु० १०.८७.३७)। यद्वा अस् धातोर्लिटि छान्दसवैकल्पिकप्रयोगोऽयम्। तथा च बहुलं छन्दसि (पा०सू० २.४.७३) इति सूत्रे मण्डूकप्लुत्या अस्तेर्भूः (पा०सू० २.४.५२) इति सूत्रं चाप्यनुवर्तनीयम्। तेन क्वचिदादेशाप्रवृत्तिः। यथा – तस्य ह नचिकेता नाम पुत्र आस (क०उ० १.१.१) इत्यत्र श्रीराघवकृपा-भाष्ये ग्रन्थप्रणेतारः – आस बभूव। अत्र 'बहुलं छन्दसि' (पा०सू० २.४.७३) इत्यप्रवृत्तिलक्षणबाहुलकेन 'अस्तेर्भूः' (पा०सू० २.४.५२) इत्यस्याप्रवृत्तौ 'आस' इति छान्दसप्रयोगः (क०उ० रा०कृ०भा० १.१.१)। असँ भुवि (धा०पा० १०६५) → अस् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → परोक्षे लिट् (पा०सू० ३.२.११५) → अस् लिट् → अस् तिप् → परस्मैपदानां णलतुसुस्थलथुसणल्वमाः (पा०सू० ३.४.८२) → अस् णल् → अस् अ → बहुलं छन्दसि (पा०सू० २.४.७३) → भ्वादेशाप्रवृत्तिः → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → अस् अस् अ → हलादिः शेषः (पा०सू० ७.४.६०) → अ अस् अ → अत आदेः (पा०सू० ७.४.७०) → आ अस् अ → अत उपधायाः (पा०सू० ७.२.११६) → आ आस् अ → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → आस् अ → आस। छन्दसि द्वयोरपि रूपयोः प्रयोगः। दक्षाय्यो यो दम आस नित्यः (ऋ०वे०सं० ७.१.२) इत्यत्र आस। अरान्न नेमिः परि ता बभूव (ऋ०वे०सं० १.३२.१५) इत्यत्र बभूव च।

इति पाणिनीयम्।[८३] मुमोद इत्यपि। मोदनं मोदः। भावे घञ्।[८४] मोदं करोति मोदयति।[८५] मोदयतीति मोद्।[८६] मोदिवाऽचरति मोदति।[८७] ततो लिटि लकारे णल्प्रत्यये द्वित्वेऽभ्यास-कार्ये ह्रस्वे मुमोद।[८८]

---

[८३] मुदँ हर्षे (धा०पा० १६) → मुद् → अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) → परोक्षे लिट् (पा०सू० ३.२.११५) → मुद् लिट् → मुद् त → लिटस्तझयोरेशिरेच् (पा०सू० ३.४.८१) → मुद् एश् → मुद् ए → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → मुद् मुद् ए → हलादिः शेषः → मु मुद् ए → असंयोगाल्लिट् कित् (पा०सू० १.२.५) → कित्त्वम् → ग्क्ङिति च (पा०सू० १.१.५) → लघूपधगुणनिषेधः → मु मुद् ए → मुमुदे।

[८४] भावे (पा०सू० ३.३.१८) इत्यनेन।

[८५] मोद → तत्करोति तदाचष्टे (धा०पा० ग०सू० १८७) → मोद णिच् → मोद इ → णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरार्थम् (वा० ६.४.४८) → मोद् इ → मोदि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → मोदि लट् → मोदि तिप् → मोदि ति → कर्तरि शप् (पा०सू० ३.१.६८) → मोदि शप् ति → मोदि अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → मोदे अ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → मोदय् अ ति → मोदयति।

[८६] मोदि → धातुसञ्ज्ञा (पूर्ववत्) → क्विप् च (पा०सू० ३.२.७६) → मोदि क्विँप् → मोदि व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → मोदि → णेरनिटि (पा०सू० ६.४.५१) → मोद् → विभक्तिकार्यम् → मोद् सुँ → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → मोद् → वाऽवसाने (पा०सू० ८.४.५६) → मोद्, मोत्।

[८७] मोद् → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → मोद् क्विँप् → मोद् व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → मोद् → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → मोद् लट् → मोद् तिप् → मोद् ति → कर्तरि शप् (पा०सू० ३.१.६८) → मोद् शप् ति → मोद् अ ति → मोदति।

[८८] मोद् → धातुसञ्ज्ञा (पूर्ववत्) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → परोक्षे लिट् (पा०सू० ३.२.११५) → मोद् लिट् → मोद् तिप् → मोद् ति → परस्मैपदानां णलतुसुस्थलथुसणल्वमाः (पा०सू० ३.४.८२) → मोद् ण → मोद् अ → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → मोद् मोद् अ → हलादिः शेषः → मो मोद् अ → ह्रस्वः (पा०सू० ७.४.५९) → एच इग्घ्रस्वादेशे (पा०सू० १.१.४८) → मु मोद् अ → मुमोद। मोदयितेवाऽचचारेति मुमोद। वस्तुतस्तु जनको योगिराजस्तस्य कुतो मोद इति भावः। यद्वा अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) इत्यपि समाधानम्। मुदँ हर्षे (धा०पा० १६) → मुद् → अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → परोक्षे लिट् (पा०सू० ३.२.११५) → मुद् लिट् → मुद् तिप् → मुद् ति → परस्मैपदानां णलतुसुस्थलथुसणल्वमाः (पा०सू० ३.४.८२) → मुद् ण → मुद् अ → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → मुद् मुद् अ → हलादिः शेषः → मु मुद् अ → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → मु मोद् अ → मुमोद।

## ३.३६ दीयते

तदारभ्य मया सीता विष्णोर्लक्ष्मीर्विभाव्यते।
कथं मया राघवाय दीयते जानकी शुभा॥

– अ०रा० १.६.६७

अत्र कथं मया दीयते इति। दीयताम्[८९] इति लोट् च (पा०सू० ३.३.१६२) इत्यनेन प्रश्नार्थे[९०] लोट्। यद्वा दीयेत[९१] इति आशंसावचने लिङ् (पा०सू० ३.३.१३४) इत्यनेन लिङ् प्रयोक्तव्यमासीत्। किन्तु धातुसम्बन्धे प्रत्ययाः (पा०सू० ३.४.१) इत्यनेन लङ्कारः।[९२]

## ३.३७ त्राहि त्राहि

तं दृष्ट्वा भयसन्त्रस्तो राजा दशरथस्तदा।
अर्घ्यादिपूजां विस्मृत्य त्राहि त्राहीति चाब्रवीत्॥

– अ०रा० १.७.९

विवाहं कृत्वा परावर्तमानो दशरथः सपरिकरः परशुरामं दृष्ट्वा त्राहि त्राहि इति ब्रवीति। त्रै धातोस्तु (त्रैङ् पालने धा०पा० ९६५) लोटि मध्यमपुरुष एकवचने गुणेऽयादेशे त्रायस्व इति

---

[८९] डुदाञ् दाने (धा०पा० १०९१) → दा → भावकर्मणोः (पा०सू० १.३.१३) → लोट् च (पा०सू० ३.३.१६२) → दा लोट् → दा त → सार्वधातुके यक् (पा०सू० ३.१.६७) → दा यक् त → दा य त → घुमास्थागापाजहातिसां हलि (पा०सू० ६.४.६६) → दी य त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → दी य ते → आमेतः (पा०सू० ३.४.९०) → दी य ताम् → दीयताम्।

[९०] सम्प्रश्नार्थ इति भावः। विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (पा०सू० ३.३.१६१) इत्यत्र सम्प्रश्न इत्युपादानेन।

[९१] डुदाञ् दाने (धा०पा० १०९१) → दा → भावकर्मणोः (पा०सू० १.३.१३) → आशंसावचने लिङ् (पा०सू० ३.३.१३४) → दा लिङ् → दा त → सार्वधातुके यक् (पा०सू० ३.१.६७) → दा यक् त → दा य त → घुमास्थागापाजहातिसां हलि (पा०सू० ६.४.६६) → दी य त → लिङः सीयुट् (पा०सू० ३.४.१०२) → दी य सीयुँट् त → दी य सीय् त → सुट् तिथोः (पा०सू० ३.४.१०७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → दी य सीय् सुँट् त → दी य सीय् स् त → लिङः सलोपोऽनन्त्यस्य (पा०सू० ७.२.७९) → दी य ईय् त → लोपो व्योर्वलि (पा०सू० ६.१.६६) → दी य ई त → आद्गुणः (पा०सू० ६.१.८७) → दी ये त → दीयेत।

[९२] डुदाञ् दाने (धा०पा० १०९१) → दा → भावकर्मणोः (पा०सू० १.३.१३) → धातुसम्बन्धे प्रत्ययाः (पा०सू० ३.४.१) → दा लट् → दा त → सार्वधातुके यक् (पा०सू० ३.१.६७) → दा यक् त → दा य त → घुमास्थागापाजहातिसां हलि (पा०सू० ६.४.६६) → दी य त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → दी य ते → दीयते।

पाणिनीयम्।[९३] त्राहि इति कथम्। आकृतिगणत्वाददादिगणे पा (पा रक्षणे धा॰पा॰ १०५६) रा (रा दाने धा॰पा॰ १०५७) प्रा (प्रा पूरणे धा॰पा॰ १०६१) इत्यादिवद्रक्षणार्थः त्रा इति पठितव्यः। ततश्च सेर्ह्यपिच्च (पा॰सू॰ ३.४.८७) इत्यनेन हि आदेशे त्राहि इति पाणिनीय एव।[९४]

## ३.३८ भूयात्

जडस्य चित्समायोगाच्चित्त्वं भूयाच्चितेस्तथा।
जडसङ्गाज्जडत्वं हि जलाग्न्योर्मेलनं यथा॥

– अ॰रा॰ १.७.३७

देव यद्यत्कृतं पुण्यं मया लोकजिगीषया।
तत्सर्वं तव बाणाय भूयाद्राम नमोऽस्तु ते॥

– अ॰रा॰ १.७.४५

यद्यपि सत्तार्थकभूधातोः (भू सत्तायाम् धा॰पा॰ १) लिङ्लकारे तु भवेत्[९५] इति

---

[९३] त्रैङ् पालने (धा॰पा॰ ९६५) → त्रै → अनुदात्तङित आत्मनेपदम् (पा॰सू॰ १.३.१२) → लोट् च (पा॰सू॰ ३.३.१६२) → त्रै लोट् → त्रै थास् → कर्तरि शप् (पा॰सू॰ ३.१.६८) → त्रै शप् थास् → त्रै अ थास् → एचोऽयवायावः (पा॰सू॰ ६.१.७८) → त्राय् अ थास् → थासस्से (पा॰सू॰ ३.४.८०) → त्राय् अ से → सवाभ्यां वामौ (पा॰सू॰ ३.४.९१) → त्राय् अ स्व → त्रायस्व।

[९४] भूवादिष्वेतदन्तेषु दशगणीषु धातूनां पाठो निदर्शनाय तेन स्तम्भुप्रभृतयः सौत्राश्चुलुम्पादयो वाक्यकारीयाः प्रयोगसिद्धा विक्लवत्यादयश्च (मा॰धा॰वृ॰ १०.३२८) इत्यनुसारमाकृतिगणत्वाददादिगण ऊह्योऽयं त्राधातु रक्षण इति भावः। त्रा रक्षणे (अदादिगण ऊह्यः) → शेषात्कर्तरि परस्मैपदम् (पा॰सू॰ १.३.७८) → लोट् च (पा॰सू॰ ३.३.१६२) → त्रा लोट् → त्रा सिप् → त्रा सि → कर्तरि शप् (पा॰सू॰ ३.१.६८) → त्रा शप् सि → अदिप्रभृतिभ्यः शपः (पा॰सू॰ २.४.७२) → त्रा सि → सेर्ह्यपिच्च (पा॰सू॰ ३.४.८७) → त्रा हि → त्राहि।

[९५] भू सत्तायाम् (धा॰पा॰ १) → भू → शेषात्कर्तरि परस्मैपदम् (पा॰सू॰ १.३.७८) → विधि-निमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (पा॰सू॰ ३.३.१६१) → भू लिङ् → भू तिप् → भू ति → कर्तरि शप् (पा॰सू॰ ३.१.६८) → भू शप् ति → भू अ ति → सार्वधातुकार्धधातुकयोः (पा॰सू॰ ७.३.८४) → भो अ ति → एचोऽयवायावः (पा॰सू॰ ६.१.७८) → भव् अ ति → यासुट् परस्मैपदेषूदात्तो ङिच्च (पा॰सू॰ ३.४.१०३) → आद्यन्तौ टकितौ (पा॰सू॰ १.१.४६) → भव् अ यासुँट् ति → भव् अ यास् ति → सुट् तिथोः (पा॰सू॰ ३.४.१०७) → आद्यन्तौ टकितौ (पा॰सू॰ १.१.४६) → भव् अ यास् सुँट् ति → भव् अ यास् स् ति → लिङः सलोपोऽनन्त्यस्य (पा॰सू॰ ७.२.७९) → भव् अ या ति → अतो येयः (पा॰सू॰ ७.२.८०) → भव् अ इय् ति → लोपो व्योर्वलि (पा॰सू॰ ६.१.६६) → भव् अ इ ति → आद्गुणः (पा॰सू॰ ६.१.८७) → भव् ए ति → इतश्च (पा॰सू॰ ३.४.१००) → भव् ए त् → भवेत्।

प्रयोग एवं लङ्कारे च भवति[९६] इति प्रयोगः पाणिनीयः। भूयात् इति प्रयोग आशिषि।[९७] आशिषि लिङ्लोटौ (पा०सू० ३.३.१७३) इत्यनेन। किन्तु यु (यु मिश्रणेऽमिश्रणे च धा०पा० १०३३) णु (णु स्तुतौ धा०पा० १०३५) इत्यादिवद्भूधातुरप्यदादिस्तस्यैव लिङ्लकारे भूयात्।[९८] आशंसावचने लिङ् (पा०सू० ३.३.१३४) इत्यनेन।

॥ इति बालकाण्डीयप्रयोगाणां विमर्शः ॥

॥ अथायोध्याकाण्डीयप्रयोगाणां विमर्शः ॥

## ३.३९ मोहयस्व

अहं त्वद्भक्तभक्तानां तद्भक्तानां च किङ्करः।
अतो मामनुगृह्णीष्व मोहयस्व न मां प्रभो॥

– अ०रा० २.१.३०

---

[९६] भू सत्तायाम् (धा०पा० १) → भू → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → भू लट् → भू तिप् → भू ति → कर्तरि शप् (पा०सू० ३.१.६८) → भू शप् ति → भू अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → भो अ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → भव् अ ति → भवति।

[९७] भू सत्तायाम् (धा०पा० १) → भू → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → आशिषि लिङ्लोटौ (पा०सू० ३.३.१७३) → भू लिङ् → भू तिप् → भू ति → लिङाशिषि (पा०सू० ३.४.११६) → शबभावः → यासुट् परस्मैपदेषूदात्तो ङिच्च (पा०सू० ३.४.१०३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → भू यासुँट् ति → भू यास् ति → सुट् तिथोः (पा०सू० ३.४.१०७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → भू यास् सुँट् ति → भू यास् स् ति → किदाशिषि (पा०सू० ३.४.१०४) → कित्त्वम् → ग्क्ङिति च (पा०सू० १.१.५) → गुणनिषेधः → इतश्च (पा०सू० ३.४.१००) → भू यास् स् त → स्कोः संयोगाद्योरन्ते च (पा०सू० ८.२.२९) → भू या त् → भूयात्।

[९८] भूवादिष्वेतदन्तेषु दशगणीषु धातूनां पाठो निदर्शनाय तेन स्तम्भुप्रभृतयः सौत्राश्चुलुम्पादयो वाक्यकारीयाः प्रयोगसिद्धा विक्लवत्यादयश्च (मा०धा०वृ० १०.३२८) इत्यनुसारमाकृतिगणत्वाददादिगण ऊह्योऽयं भूधातुः सत्तायामिति भावः। भू सत्तायाम् (अदादिगण ऊह्यः) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → आशंसावचने लिङ् (पा०सू० ३.३.१३४) → भू लिङ् → भू ति → कर्तरि शप् (पा०सू० ३.१.६८) → भू शप् ति → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → भू ति → यासुट् परस्मैपदेषूदात्तो ङिच्च (पा०सू० ३.४.१०३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → भू यासुँट् ति → भू यास् ति → सुट् तिथोः (पा०सू० ३.४.१०७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → भू यास् सुँट् ति → भू यास् स् ति → ग्क्ङिति च (पा०सू० १.१.५) → गुणनिषेधः → इतश्च (पा०सू० ३.४.१००) → भू यास् स् त् → स्कोः संयोगाद्योरन्ते च (पा०सू० ८.२.२९) → भू या त् → भूयात्।

नारदः कथयति मां मा मोहयस्व। अत्र मोहय इति समीचीनं प्रतीयते।[९९] किन्तु स्व इति पृथगुपादानेन हे स्व हे आत्मीय मां मा मोहय इति परिहारः।

## ३.४० नाशयामि

सीतामिषेण तं दुष्टं सकुलं नाशयाम्यहम्।
एवं रामे प्रतिज्ञाते नारदः प्रमुमोद ह॥

– अ०रा० २.१.३९

अत्र वर्तमानसामीप्ये लट्।[१००] यद्वा नाशमाचष्ट इति नाशयति।[१०१] नाशयतीति नाश्।[१०२] क्विप्कर्तरि। अयस्मयादीनि च्छन्दसि (पा०सू० १.४.२०) इत्यनेन छान्दस-

[९९] मुहँ वैचित्ये (धा०पा० ११९८) → मुह् → हेतुमति च (पा०सू० ३.१.२६) → मुह् णिच् → मुह् इ → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → मोह् इ → मोहि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → मोहि लोट् → मोहि सिप् → मोहि सि → कर्तरि शप् (पा०सू० ३.१.६८) → मोहि शप् सि → मोहि अ सि → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → मोहे अ सि → एचोऽयवायावः (पा०सू० ६.१.७८) → मोहय् अ सि → सेर्ह्यपिच्च (पा०सू० ३.४.८७) → मोहय् अ हि → अतो हेः (पा०सू० ६.४.१०५) → मोहय् अ → मोहय।

[१००] णशँ अदर्शने (धा०पा० ११९४) → णश् → णो नः (पा०सू० ६.१.६५) → नश् → हेतुमति च (पा०सू० ३.१.२६) → नश् णिच् → नश् इ → अत उपधायाः (पा०सू० ७.२.११६) → नाश् इ → नाशि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → बुधयुधनशजनेङ्प्रुद्रु-स्रुभ्यो णेः (पा०सू० १.३.८६) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → नाशि लट् → नाशि मिप् → नाशि मि → कर्तरि शप् (पा०सू० ३.१.६८) → नाशि शप् मि → नाशि अ मि → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → नाशे अ मि → एचोऽयवायावः (पा०सू० ६.१.७८) → नाशय् अ मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → नाशय् आ मि → नाशयामि।

[१०१] नाश → तत्करोति तदाचष्टे (धा०पा० ग०सू० १८७) → नाश णिच् → नाश इ → णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरार्थम् (वा० ६.४.४८) → नाश् इ → नाशि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → नाशि लट् → नाशि तिप् → नाशि ति → कर्तरि शप् (पा०सू० ३.१.६८) → नाशि शप् ति → नाशि अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → नाशे अ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → नाशय् अ ति → नाशयति।

[१०२] नाशि → धातुसञ्ज्ञा (पूर्ववत्) → क्विप् च (पा०सू० ३.२.७६) → नाशि क्विँप् → नाशि व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → नाशि → णेरनिटि (पा०सू० ६.४.५१) → नाश् → विभक्तिकार्यम् → नाश् सुँ → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → नाश् → अयस्मयादीनि च्छन्दसि (पा०सू० १.४.२०) → षत्वाभावः → जश्त्वाभावः → नाश्।

भत्वात्षत्वाभावो[१०३] जश्त्वाभावश्च।[१०४] अहमेव नाश् रावणनाशयिता अयामि[१०५] अरण्यं व्रजामि।

## ३.४१ अभिषेक्ष्यामि

आज्ञापयति यद्यत्त्वां मुनिस्तत्तत्समानय।
यौवराज्येऽभिषेक्ष्यामि श्वोभूते रघुनन्दनम्॥

– अ०रा० २.२.७

यद्यपि श्वोभूते इति पदसमभिव्याहारेण लुङ्कारः प्राप्नोति[१०६] तथा च स्पष्टं लकारार्थ-निर्णये भूषणे –

वर्तमाने परोक्षे श्वोभाविन्यर्थे भविष्यति।
विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः॥

– वै०सि०का० २२

तथाऽप्यनद्यतनत्वस्याविवक्षया लृट्।[१०७]

---

[१०३] व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः (पा०सू० ८.२.३६) इत्यस्याप्रवृत्तेः।

[१०४] झलां जशोऽन्ते (पा०सू० ८.२.३९) इत्यस्याप्रवृत्तेः।

[१०५] कटी गतौ (धा०पा० ३२०) इत्यत्रेकारप्रश्लेषपक्षे गतौ इधातुरपि। इ इति चतुर्थधातुवादिनाम् – अयति (मा०धा०वृ० १.२१५)। इ गतौ (धा०पा० ३२०) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → इ लट् → इ मिप् → इ मि → कर्तरि शप् (पा०सू० ३.१.६८) → इ शप् मि → इ अ मि → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → ए अ मि → एचोऽयवायावः (पा०सू० ६.१.७८) → अय् अ मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → अय् आ मि → अयामि। यद्वा अयत इत्ययः। अयँ गतौ (धा०पा० ४७४) इति धातोः नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन कर्तरि पचाद्यचि विभक्तिकार्ये। ततः अय इवाऽचरामीत्ययामि। अय → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → अय क्विँप् → अय व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → अय → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → अय लट् → अय मिप् → अय मि → कर्तरि शप् (पा०सू० ३.१.६८) → अय शप् मि → अय अ मि → अतो गुणे (पा०सू० ६.१.९७) → अय मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → अया मि → अयामि।

[१०६] अनद्यतने लुट् (पा०सू० ३.३.१५) इत्यनेन।

[१०७] अभि षिचँ क्षरणे (धा०पा० १४३४) → अभि षिच् → धात्वादेः षः सः (पा०सू० ६.१.६४) → अभि सिच् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → अभि सिच् लृट् → अभि सिच् मिप् → अभि सिच् मि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → अभि सिच् स्य मि → एकाच उपदेशेऽनुदात्तात् (पा०सू० ७.२.१०) → इडागमनिषेधः → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → अभि सेच् स्य मि → चोः कुः (पा०सू० ८.२.३०) → अभि सेक् स्य मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → अभि सेक् स्या मि → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → अभि षेक् ष्या मि → अभिषेक्ष्यामि।

## ३.४२ प्रविशास्व

रामाभिषेकविघ्नार्थं यतस्व ब्रह्मवाक्यतः।
मन्थरां प्रविशास्वादौ कैकेयीं च ततः परम्॥

– अ०रा० २.२.४५

अत्र देवाः सरस्वतीं प्रार्थयन्ते यत् त्वं मन्थरां प्रविशास्व। प्रपूर्वको विश् धातुः (विशँ प्रवेशने धा०पा० १४२४) परस्मैपदी। तत्र लोङ्लकारे प्रविश इति पाणिनीयम्।[१०८] प्रविशास्व इति तु कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन क्रियाविनिमय आत्मनेपदे सति प्रविशस्व।[१०९] यद्वा प्रवेशनं प्रविश्।[११०] अयस्मयादीनि च्छन्दसि (पा०सू० १.४.२०) इत्यनेन छान्दसभत्वात्षत्वाभावो[१११] जश्त्वाभावश्च।[११२] प्रविशामस्वेनाऽत्मभिन्नेन

---

[१०८] प्र विशँ प्रवेशने (धा०पा० १४२४) → प्र विश् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → प्र विश् लोट् → प्र विश् सिप् → प्र विश् सि → तुदादिभ्यः शः (पा०सू० ३.१.७७) → प्र विश् श सि → प्र विश् अ सि → सार्वधातुकमपित् (पा०सू० १.२.४) → ङित्त्वम् → ग्क्ङिति च (पा०सू० १.१.५) → लघूपधगुणनिषेधः → सेर्ह्यपिच्च (पा०सू० ३.४.८७) → प्र विश् अ हि → अतो हेः (पा०सू० ६.४.१०५) → प्रविश।

[१०९] प्र विशँ प्रवेशने (धा०पा० १४२४) → प्र विश् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → लोट् च (पा०सू० ३.३.१६२) → प्र विश् लोट् → प्र विश् थास् → प्र विश् थास् → तुदादिभ्यः शः (पा०सू० ३.१.७७) → प्र विश् श थास् → प्र विश् अ थास् → सार्वधातुकमपित् (पा०सू० १.२.४) → ङित्त्वम् → ग्क्ङिति च (पा०सू० १.१.५) → लघूपधगुणनिषेधः → थासस्से (पा०सू० ३.४.८०) → प्र विश् अ से → सवाभ्यां वामौ (पा०सू० ३.४.९१) → प्र विश् अ स्व → प्रविशस्व।

[११०] स्त्रियां भावे क्विप्। प्र विशँ प्रवेशने (धा०पा० १४२४) → प्र विश् → सम्पदादिभ्यः क्विप् (वा० ३.३.१०८) → प्र विश् क्विँप् → प्र विश् व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → प्र विश् → ग्क्ङिति च (पा०सू० १.१.५) → लघूपधगुणनिषेधः → प्रविश् → विभक्तिकार्यम् → प्रविश् सुँ → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → अयस्मयादीनि च्छन्दसि (पा०सू० १.४.२०) → षत्वाभावः → जश्त्वाभावः → प्रविश्।

[१११] व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः (पा०सू० ८.२.३६) इत्यस्याप्रवृत्तेः।

[११२] झलां जशोऽन्ते (पा०सू० ८.२.३९) इत्यस्याप्रवृत्तेः।

कपटेनाऽतिक्रामतीति प्रविशस्वयति।[११३] प्रविशस्वयतीति प्रविशस्वः।[११४] प्रविशस्व इवाऽचरतीति प्रविशस्वति।[११५] इत्थमाचक्षाणणिजन्तात्पचाद्यच्पुनराचारक्विप्तो लोण्मध्यमपुरुष एकवचने प्रविशस्व।[११६]

## ३.४३ चक्रे

ततो विघ्ने समुत्पन्ने पुनरेहि दिविं शुभे।
तथेत्युक्त्वा तथा चक्रे प्रविवेशाथ मन्थराम्॥

– अ०रा० २.२.४६

[११३] अस्वमात्मभिन्नं कपटम्। अस्वेन कपटेनातिक्रामतीति अस्वयति। अस्व → तेनातिक्रामति (धा०पा० ग०सू० १८८) → अस्व णिच् → अस्व इ → णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरार्थम् (वा० ६.४.४८) → अस्व् इ → अस्वि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → अस्वि लट् → अस्वि तिप् → अस्वि ति → कर्तरि शप् (पा०सू० ३.१.६८) → अस्वि शप् ति → अस्वि अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → अस्वे अ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → अस्वय् अ ति → अस्वयति। प्रविशम् अस्वयति इति स्थिते सह सुपा (पा०सू० २.१.४) इत्यत्र सह इति योगविभागात्सुबन्तस्य तिङन्तेन समासे प्रविशस्वयति। पर्यभूषयत् (वै०सि०कौ० ९३९) इतिवत्। तत्रत्या बालमनोरमा च – 'पर्यभूषयदिति॥' 'सह सुपा' इत्यत्र सहेति योगविभागात् परीति सुबन्तस्य तिङन्तेन समासः (बा०म० ९३९)।

[११४] अस्वयतीत्यस्वः। अस्विनामधातोः नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन कर्तरि पचाद्यचि। प्रविशि अस्वः इति प्रविशस्वः। सप्तमी शौण्डैः (पा०सू० २.१.४०) इत्यत्र सप्तमी इति योगविभागात्समासः। यद्वा सह सुपा (पा०सू० २.१.४) इत्यनेन सुप्सुपासमासः।

[११५] प्रविशस्व → सर्वप्रातिपतिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → प्रविशस्व क्विप् → प्रविशस्व व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → प्रविशस्व → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → प्रविशस्व लट् → प्रविशस्व तिप् → प्रविशस्व ति → कर्तरि शप् (पा०सू० ३.१.६८) → प्रविशस्व शप् ति → प्रविशस्व अ ति → अतो गुणे (पा०सू० ६.१.९७) → प्रविशस्व ति → प्रविशस्वति।

[११६] प्रविशस्व → धातुसञ्ज्ञा (पूर्ववत्) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → प्रविशस्व लोट् → प्रविशस्व सिप् → प्रविशस्व सि → कर्तरि शप् (पा०सू० ३.१.६८) → प्रविशस्व शप् सि → प्रविशस्व अ सि → अतो गुणे (पा०सू० ६.१.९७) → प्रविशस्व सि → सेर्ह्यपिच्च (पा०सू० ३.४.८७) → प्रविशस्व हि → अतो हेः (पा०सू० ६.४.१०५) → प्रविशस्व।

क्रियाफलस्य कर्तृभूतायां सरस्वत्यां गामित्वादात्मनेपदम्।[११७] क्रियाफलं हि लीला-साहाय्येन भगवदानुकूल्यरूपम्।

## ३.४४ विवास्यते

भरतो राघवस्याग्रे किङ्करो वा भविष्यति।
विवास्यते वा नगरात्प्राणैर्वा हायतेऽचिरात्॥

– अ०रा० २.२.६२

अत्रापि विवासयिष्यते[११८] इति प्रयोक्तव्ये विवास्यते[११९] इति वर्तमानसामीप्ये लट्।[१२०]

## ३.४५ भूयात्

त्वय्येव तिष्ठतु चिरं न्यासभूतं ममानघ।
यदा मेऽवसरो भूयात्तदा देहि वरद्वयम्॥

– अ०रा० २.२.७२

अत्र पूर्वोक्तमेव समाधानम्।[१२१]

[११७] स्वरितञितः कर्त्रभिप्राये क्रियाफले (पा०सू० १.३.७२) इत्यनेन। डुकृञ् करणे (धा०पा० १४७२) → कृ → स्वरितञितः कर्त्रभिप्राये क्रियाफले (पा०सू० १.३.७२) → परोक्षे लिट् (पा०सू० ३.२.११५) → कृ लिट् → कृ इट् → कृ इ → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → कृ कृ इ → उरत् (पा०सू० ७.४.६६) → उरण् रपरः (पा०सू० १.१.५१) → कर् कृ ए → हलादिः शेषः (पा०सू० ७.४.६०) → क कृ ए → कुहोश्चुः (पा०सू० ७.४.६२) → च कृ ए → असंयोगाल्लिट् कित् (पा०सू० १.२.५) → कित्त्वम् → ग्क्ङिति च (पा०सू० १.१.५) → गुणनिषेधः → इको यणचि (पा०सू० ६.१.७७) → च क्र ए → चक्रे।

[११८] वसँ निवासे (धा०पा० १००५) → वस् → हेतुमति च (पा०सू० ३.१.२६) → वस् णिच् → वस् इ → अत उपधायाः (पा०सू० ७.२.११६) → वास् इ → वासि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा। वि वासि → भावकर्मणोः (पा०सू० १.३.१३) → लृट् शेषे च (पा०सू० ३.३.१३) → वि वासि लृट् → वि वासि त → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → वि वासि स्य त → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → वि वासि इट् स्य त → वि वासि इ स्य त → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → वि वासे इ स्य त → एचोऽयवायावः (पा०सू० ६.१.७८) → वि वासय् इ स्य त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → वि वासय् इ स्य ते → आदेश-प्रत्यययोः (पा०सू० ८.३.५९) → वि वासय् इ ष्य ते → विवासयिष्यते।

[११९] वि वासि (पूर्ववत्) → भावकर्मणोः (पा०सू० १.३.१३) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → वि वासि लट् → वि वासि त → सार्वधातुके यक् (पा०सू० ३.१.६७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → वि वासि यक् त → वि वासि य त → णेरनिटि (पा०सू० ६.४.५१) → वि वास् य त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → वि वास् य ते → विवास्यते।

[१२०] वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन।

[१२१] ३३८तमे पृष्ठे ३.३८ भूयात् इति प्रयोगस्य विमर्शं पश्यन्तु।

## ३.४६ न जाने

एवं त्वां बुद्धिसम्पन्नां न जाने वक्रसुन्दरि।
भरतो यदि राजा मे भविष्यति सुतः प्रियः॥

– अ०रा० २.२.७७

मन्थरां कैकेयी प्रशंसति यत्पूर्वं त्वां बुद्धिसम्पन्नां न जाने। न चात्र न अजाने इत्येव लङ्प्रयोगः।[१२२] अड्कथं न श्रूयत इति चेत्पररूपत्वात् विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इत्यनेन लोपाद्वा।[१२३] तथाऽप्याकारलोपस्तु दुर्वार एव।[१२४] उच्यते। अत्र स्मयोगे लट्।[१२५] यद्वा पुरायोगे लट् पुरि लुङ् चास्मे (पा०सू० ३.२.१२२) इत्यनेन।[१२६] पुरा त्वामीदृशीं बुद्धिमतीं न जाने।

## ३.४७ त्यक्ष्ये

प्राणांस्त्यक्ष्येऽथ वा वक्रे शयिष्ये तावदेव हि।
निश्चयं कुरु कल्याणि कल्याणं ते भविष्यति॥

– अ०रा० २.२.८१

त्यज् धातुः (त्यजँ हानौ धा०पा० ९८६) आत्मनेपदी न। अत्र इट् प्रत्ययस्य सम्भावना

---

१२२ पूर्वपक्षोऽयम्।

१२३ अयमपि पूर्वपक्षः।

१२४ उत्तरपक्षोऽयम्। श्नाभ्यस्तयोरातः (पा०सू० ६.४.११२) इत्यनेनाकारलोपे अजानि इति रूपम्। ज्ञा अवबोधने (धा०पा० १५०७) → ज्ञा → अनुपसर्गाज्ज्ञः (पा०सू० १.३.७६) → अनद्यतने लङ् (पा०सू० ३.२.१११) → ज्ञा लङ् → ज्ञा इट् → ज्ञा इ → लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा०सू० ६.४.७१) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → अट् ज्ञा इ → अ ज्ञा इ → क्र्यादिभ्यः श्ना (पा०सू० ३.१.८१) → अ ज्ञा श्ना इ → अ ज्ञा ना इ → ज्ञाजनोर्जा (पा०सू० ७.३.७९) → अ जा ना इ → श्नाभ्यस्तयोरातः (पा०सू० ६.४.११२) → अ जा न् इ → अजानि।

१२५ स्म इत्यध्याहार्यमिति भावः। ज्ञा अवबोधने (धा०पा० १५०७) → ज्ञा → अनुपसर्गाज्ज्ञः (पा०सू० १.३.७६) → लट् स्मे (पा०सू० ३.२.११८) → ज्ञा लट् → ज्ञा इट् → ज्ञा इ → क्र्यादिभ्यः श्ना (पा०सू० ३.१.८१) → ज्ञा श्ना इ → ज्ञा ना इ → ज्ञाजनोर्जा (पा०सू० ७.३.७९) → जा ना इ → श्नाभ्यस्तयोरातः (पा०सू० ६.४.११२) → जा न् इ → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → जा न् ए → जाने।

१२६ पुरा इत्यध्याहार्यमिति भावः। सिद्धिः पूर्ववत्।

कथम्। अत्रापि कर्मव्यतिहारादात्मनेपदम्।[१२७]

## ३.४८ शयिष्ये

प्राणांस्त्यक्ष्येऽथ वा वक्रे शयिष्ये तावदेव हि।
निश्चयं कुरु कल्याणि कल्याणं ते भविष्यति॥

– अ०रा० २.२.८१

न च शीङ्धातुः (शीङ् स्वप्ने धा०पा० १०३२) अदादिरनिट्।[१२८] यथा शेष्ये इति वाल्मीकिः।[१२९] शयिष्ये इति कथम्।[१३०] अत्र शयनं शयः।[१३१] शयमाचरतीति शयते[१३२] पुनर्लृङ्लकार उत्तमपुरुष एकवचने शयिष्ये।[१३३] यद्वा शय् इति हलन्तं क्रियाविशेषणम्। शयनं

---

[१२७] कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन। त्यजँ हानौ (धा०पा० ९८६) → त्यज् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → लृट् शेषे च (पा०सू० ३.३.१३) → त्यज् लृट् → त्यज् इट् → त्यज् इ → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → त्यज् स्य इ → चोः कुः (पा०सू० ८.२.३०) → त्यक् स्य इ → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → त्यक् स्य ए → अतो गुणे (पा०सू० ६.१.९७) → त्यक् स्ये → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → तयक् ष्ये → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → त्यक्ष्ये।

[१२८] पूर्वपक्षोऽयम्।

[१२९] शेष्ये पुरस्ताच्छालाया यावन्न प्रतियास्यति (वा०रा० २.१०३.१४) इति गोविन्दराजीयटीकापाठः।

[१३०] अयमपि पूर्वपक्ष इति बोध्यम्।

[१३१] एरच् (पा०सू० ३.३.५६) इत्यनेन अच् प्रत्यये। शीङ् स्वप्ने (धा०पा० १०३२) → शी → एरच् (पा०सू० ३.३.५६) → शी अच् → शी अ → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → शे अ → एचोऽयवायावः (पा०सू० ६.१.७८) → शय् अ → शय → विभक्तिकार्यम् → शयः। शयशब्दः शय्यायामपि। शयः शय्याहिपाणिषु (मे०को० २६.५७) इति मेदिनी। तत्र घप्रत्ययः। शीङ् स्वप्ने (धा०पा० १०३२) → पुंसि संज्ञायां घः प्रायेण (पा०सू० ३.३.११८) → शी घ → शी अ → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → शे अ → एचोऽयवायावः (पा०सू० ६.१.७८) → शय् अ → शय → विभक्तिकार्यम् → शयः।

[१३२] शय → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → शय क्विँप् → शय व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → शय → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → वर्तमाने लट् (पा०सू० ३.२.१२३) → शय लट् → शय त → कर्तरि शप् (पा०सू० ३.१.६८) → शय शप् त → शय अ त → अतो गुणे (पा०सू० ६.१.९७) → शय त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → शय ते → शयते।

[१३३] शय → धातुसञ्ज्ञा (पूर्ववत्) → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → लृट् शेषे च (पा०सू० ३.३.१३) → शय लृट् → शय इट् → शय इ → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → शय स्य इ → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → शय इट् स्य इ → शय इ स्य ति → अतो लोपः (पा०सू० ६.४.४८) → शय् इ स्य इ → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → शय् इ स्य ए → अतो गुणे (पा०सू० ६.१.९७) → शय् इ स्ये → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → शय् इ ष्ये → शयिष्ये।

कुर्वतीष्टास्मीति इष्ये।[१३४] इषुधातोः (इषुँ इच्छायाम् धा०पा० १३५१) कर्मवाच्ये वर्तमान-काल उत्तमपुरुष एकवचने रूपम्।[१३५] वस्तुतस्तु शीङ्धातुः (शीङ् स्वप्ने धा०पा० १०३२) सेडेव। यथा तत्रैव शयित्वा।[१३६] शेष्ये इत्यत्र त्विडभावोऽनित्यत्वात्।[१३७]

## ३.४९ उपायाति

हसन्ती मामुपायाति सा किं नैवाद्य दृश्यते।
इत्यात्मन्येव सञ्चिन्त्य मनसाऽतिविदूयता॥

– अ०रा० २.३.३

उपायात्[१३८] इति प्रयोक्तव्ये उपायाति इति हि स्मशब्दयोगे।[१३९] तथा च लट् स्मे (पा०सू० ३.२.११८) इत्यनेन लङ्कारः।[१४०] लोपत्वात् स्म इत्यस्य श्रवणं न।[१४१]

---

[१३४] इषुँ इच्छायाम् धा०पा० १३५१) → इष् → भावकर्मणोः (पा०सू० १.३.१३) → वर्तमाने लट् (पा०सू० ३.२.१२३) → इष् लट् → इष् इट् → इष् इ → सार्वधातुके यक् (पा०सू० ३.१.६७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) इष् यक् इ → इष् य इ → क्ङिति च (पा०सू० १.१.५) → लघूपध-गुणनिषेधः → इष् य इ → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → इष् य ए → अतो गुणे (पा०सू० ६.१.९७) → इष् ये → इष्ये।

[१३५] पूर्वपक्षं मत्वैवैते द्वे समाधाने उक्ते।

[१३६] शयित्वा पुरुषव्याघ्रः कथं शेते महीतले (वा०रा० २.८८.४)।

[१३७] आगमशास्त्रमनित्यम् (प०शे० ९३.२)। शेष्ये (वा०रा० २.१०३.१४) इत्यत्र भूषणकारा गोविन्द-राजाश्च – शेष्ये शयिष्ये। इडभाव आर्षः (वा०रा० भू०टी० २.१०३.१४)।

[१३८] उप आङ् या प्रापणे (धा०पा० १०४९) → उप आ या → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → अनद्यतने लङ् (पा०सू० ३.२.१११) → उप आ या लङ् → उप आ या तिप् → उप आ या ति → लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा०सू० ६.४.७१) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → उप आ अट् या ति → उप आ अ या ति → कर्तरि शप् (पा०सू० ३.१.६८) → उप आ अ या शप् ति → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → उप आ अ या ति → इतश्च (पा०सू० ३.४.१००) → उप आ अ या त् → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → उपा अ या त् → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → उपा या त → उपायात्।

[१३९] स्म इत्यध्याहार्यमिति भावः।

[१४०] उप आङ् या प्रापणे (धा०पा० १०४९) → उप आ या → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लट् स्मे (पा०सू० ३.२.११८) → उप आ या लट् → उप आ या तिप् → उप आ या ति → कर्तरि शप् (पा०सू० ३.१.६८) → उप आ या शप् ति → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → उप आ या ति → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → उपा या ति → उपायाति।

[१४१] विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इत्यनेन।

## ३.५० विद्महे

ता ऊचुः क्रोधभवनं प्रविष्टा नैव विद्महे।
कारणं तत्र देव त्वं गच्छ निश्चेतुमर्हसि॥

– अ०रा० २.३.५

विद्महे इत्यत्र हे इति पृथक्पदम्। हे देव कारणं नैव विद्म इत्यन्वयः करणीयः। किमिदं विद्म। न चात्र वेदितुं वयं न शक्नुमह इत्यर्थे शकि लिङ् च (पा०सू० ३.३.१७२) इत्यनेन यद्वा कारणं वेदितुं वयं नार्हाः इत्यर्थे अर्हे कृत्यतृचश्च (पा०सू० ३.३.१६९) इत्यनेन लिङ् लोड्वा।[१४२] तत्र विद्याम[१४३] वेदाम[१४४] इति रूपे। अत्र विदो लटो वा (पा०सू० ३.४.८३) इत्यनेन लटि मसो मादेशे विद्म।[१४५] यद्वा कर्मव्यतिहार आत्मनेपदम्।[१४६] ततो लङ्कार उत्तमपुरुषे बहुवचने महिङ् प्रत्ययः।[१४७]

---

[१४२] विद्म इत्यत्राडभावान्न लुङ्लङ्लृङो विसर्गाभावान्न लङ्कित्वाभावान्न लिट्स्यतास्यभावाच्च न लृलुटावित्याशङ्क्य पूर्वपक्षोऽयम्।

[१४३] विदँ ज्ञाने (धा०पा० १०६४) → विद् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → शकि लिङ् च (पा०सू० ३.३.१७२) → विद् लिङ् → विद् मस् → कर्तरि शप् (पा०सू० ३.१.६८) → विद् शप् मस् → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → विद् मस् → यासुट् परस्मैपदेषूदात्तो ङिच्च (पा०सू० ३.४.१०३) → विद् यासुँट् मस् → विद् यास् मस् → क्ङिति च (पा०सू० १.१.५) → पुगन्त-लघूपधगुणनिषेधः → लिङः सलोपोऽनन्त्यस्य (पा०सू० ७.२.७९) → विद् या मस् → नित्यं ङितः → विद् या म → विद्याम।

[१४४] विदँ ज्ञाने (धा०पा० १०६४) → विद् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → अर्हे कृत्यतृचश्च (पा०सू० ३.३.१६९) → विद् लोट् → विद् मस् → कर्तरि शप् (पा०सू० ३.१.६८) → विद् शप् मस् → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → विद् मस् → आडुत्तमस्य पिच्च (पा०सू० ३.४.९२) → विद् आट् मस् → विद् आ मस् → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → वेद् आ मस् → लोटो लङ्वत् (पा०सू० ३.४.८५) → ङिद्वत्त्वम् → नित्यं ङितः → वेद् आ म → वेदाम।

[१४५] हे इति पृथक्पदमिति भावः। विदँ ज्ञाने (धा०पा० १०६४) → विद् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → विद् लट् → विद् मस् → विदो लटो वा (पा०सू० ३.४.८३) → विद् म → कर्तरि शप् (पा०सू० ३.१.६८) → विद् शप् म → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → विद् म → विद्म।

[१४६] कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन।

[१४७] विदँ ज्ञाने (धा०पा० १०६४) → विद् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → वर्तमाने लट् (पा०सू० ३.२.१२३) → विद् लट् → विद् महिङ् → विद् महि → कर्तरि शप् (पा०सू० ३.१.६८) → विद् शप् महि → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → विद् महि → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → विद् महे → विद्महे।

## ३.५१ वधिष्यामि

ब्रूहि किं वा वधिष्यामि वधार्हो वा विमोक्ष्यसे।
किमत्र बहुनोक्तेन प्राणान्दास्यामि ते प्रिये॥

– अ०रा० २.३.१३

अत्र महाराजो दशरथः हनिष्यामि[१४८] इत्यर्थे वधिष्यामि इति प्रयोगं करोति। वध् - धातुश्चुरादिः।[१४९] ततो णिजभावे[१५०] वधिष्यामि इति पाणिनीयः।[१५१] यद्वा वधमाचरतीति वधति[१५२] इति विग्रह आचारक्विबन्ताल्लृङ्कारे वधिष्यामि।[१५३] इति नापाणिनीयः।[१५४]

---

[१४८] हनँ हिंसागत्योः (धा०पा० १०१२) → हन् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → हन् लृट् → हन् मिप् → हन् मि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → हन् स्य मि → ऋद्धनोः स्ये (पा०सू० ७.२.७०) → हन् इट् स्य मि → हन् इ स्य मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → हन् इ स्या मि → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → हन् इ ष्या मि → हनिष्यामि।

[१४९] बहुलमेतन्निदर्शनम् (धा०पा० ग०सू० १९३८) आकृतिगणोऽयम् (धा०पा० ग०सू० १९९२) भूवादिष्वेतदन्तेषु दशगणीषु धातूनां पाठो निदर्शनाय तेन स्तम्भुप्रभृतयः सौत्राश्चुलुम्पादयो वाक्यकारीयाः प्रयोगसिद्धा विक्लवत्यादयश्च (मा०धा०वृ० १०.३२८) इत्यनुसारमाकृतिगणत्वाच्चुरादिगण ऊह्योऽयमाधृषीयो धातुर्हिंसायाम्।

[१५०] आ धृषाद्वा (धा०पा० ग०सू० १८०६) इत्यनेन वैकल्पिको णिच्। तेनात्र णिजभावः।

[१५१] वध् → आ धृषाद्वा (धा०पा० ग०सू० १८०६) → णिजभावः → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → वध् लृट् → वध् मिप् → वध् मि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → वध् स्य मि → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → वध् इट् स्य मि → वध् इ स्य मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → वध् इ स्या मि → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → वध् इ ष्या मि → वधिष्यामि।

[१५२] वध → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → वध क्विँप् → वध व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → वध → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → वध लट् → वध तिप् → वध ति → कर्तरि शप् (पा०सू० ३.१.६८) → वध शप् ति → वध अ ति → अतो गुणे (पा०सू० ६.१.९७) → वध ति → वधति।

[१५३] वध → धातुसञ्ज्ञा (पूर्ववत्) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → वध लृट् → वध मिप् → वध मि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → वध स्य मि → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → वध इट् स्य मि → वध इ स्य मि → अतो लोपः (पा०सू० ६.४.४८) → वध् इ स्य मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → वध् इ स्या मि → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → वध् इ ष्या मि → वधिष्यामि।

[१५४] ३८६तमे पृष्ठे ३.१०७ वधयिष्यति इति प्रयोगस्य विमर्शमपि पश्यन्तु।

## ३.५२ मरिष्ये

वनं न गच्छेद्यदि रामचन्द्रः प्रभातकालेऽजिनचीरयुक्तः।
उद्बन्धनं वा विषभक्षणं वा कृत्वा मरिष्ये पुरतस्तवाहम्॥

– अ०रा० २.३.३१

कैकेयी कथयति यद् यदि राघवो वनं न गमिष्यति तदाऽहं मरिष्यामि।[१५५] अत्र म्रियतेर्लुङ्लिङोः शिति चैवाऽत्मनेपदविधानात् मरिष्ये इति कथम्। म्रियतेर्लुङ्लिङोश्च (पा०सू० १.३.६१) इति हि सूत्रं लृटि नैवात्मनेपदं करोतीति चेत्। मरणं मरः।[१५६] मरमाचरतीति मरते आचारक्विबन्तात्कर्मव्यतिहार आत्मनेपदम्।[१५७] लृङ्लकार उत्तम-पुरुष एकवचने मरिष्ये।[१५८] यद्वा मरं मरणं गच्छतीति मरिष्यति[१५९] तस्यैव कर्मव्यतिहार

[१५५] मृङ् प्राणत्यागे (धा०पा० १४०३) → मृ → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → मृ लृट् → मृ मिप् → मृ मि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → मृ स्य मि → ऋद्धनोः स्ये (पा०सू० ७.२.७०) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → मृ इट् स्य मि → मृ इ स्य मि → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → म इ स्य मि → उरण् रपरः (पा०सू० १.१.५१) → मर् इ स्य मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → मर् इ स्या मि → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → मर् इ ष्या मि → मरिष्यामि।

[१५६] कृत्यल्युटो बहुलम् (पा०सू० ३.३.११३) इत्यनेन मृधातोः अप् प्रत्ययः। मरणं मरः। 'कृत्यल्युटो बहुलम्' (पा०सू० ३.३.११३) इत्यप्। तेनायमपि पूर्ववदाद्युदात्तः (का०वि०प० ६.२.११४) इति जिनेन्द्र-बुद्धिः। यद्वा नञो जरमरमित्रमृताः (पा०सू० ६.२.११६) इत्यत्र निपातनात्सिद्धम्। जरणं जरः 'ऋदोरप्' (पा०सू० ३.३.५७)। मरणं मरः। अमरम्। अस्मादेव निपातनादप् (त०बो० ३८५०, ६.२.११६) इति ज्ञानेन्द्रसरस्वती च।

[१५७] मर → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → मर क्विँप् → मर व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → मर → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → वर्तमाने लट् (पा०सू० ३.२.१२३) → मर लट् → मर त → कर्तरि शप् (पा०सू० ३.१.६८) → मर शप् त → मर अ त → अतो गुणे (पा०सू० ६.१.९७) → मर त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → मर ते → मरते।

[१५८] मर → धातुसञ्ज्ञा (पूर्ववत्) → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → लृट् शेषे च (पा०सू० ३.३.१३) → मर लृट् → मर इट् → मर इ → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → मर स्य इ → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → मर इट् स्य इ → मर इ स्य इ → अतो लोपः (पा०सू० ६.४.४८) → मर् इ स्य इ → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → मर् इ स्य ए → अतो गुणे (पा०सू० ६.१.९७) → मर् इ स्ये → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → मर् इ ष्ये → मरिष्ये।

[१५९] इषँ गतौ (धा०पा० ११२७) → इष् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमान-सामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → इष् लट् → इष् तिप् → इष् ति → दिवादिभ्यः श्यन् (पा०सू० ३.१.६९) → इष् श्यन् ति → इष् य ति → इष्यति। मरम् इष्यति इति स्थिते शकन्ध्वादिषु पररूपं वाच्यम् (वा. ६.१.९१) इत्यनेन पररूपे मरिष्यति।

आत्मनेपदत्वात्[१६०] मरिष्ये इति लङ्कार एवोत्तमपुरुष एकवचने।[१६१]

## ३.५३ द्रक्ष्यामहे

स्त्रियो बालाश्च वृद्धाश्च रात्रौ निद्रां न लेभिरे।
कदा द्रक्ष्यामहे रामं पीतकौशेयवाससम्॥

– अ०रा० २.३.३८

अत्र कर्मव्यतिहार आत्मनेपदम्।[१६२] ततो लृङ्कारे महिङ् प्रत्यये दीर्घे एत्वे द्रक्ष्यामहे।[१६३]

## ३.५४ समपृच्छत

वर्धयन् जयशब्देन प्रणमञ्छिरसा नृपम्।
अतिखिन्नं नृपं दृष्ट्वा कैकेयीं समपृच्छत॥

– अ०रा० २.३.४३

[१६०] कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन।

[१६१] इषँ गतौ (धा०पा० ११२७) → इष् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → इष् लट् → इष् इट् → इष् इ → दिवादिभ्यः श्यन् (पा०सू० ३.१.६९) → इष् श्यन् इ → इष् य इ → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → इष् य ए → अतो गुणे (पा०सू० ६.१.९७) → इष् ये → इष्ये। मरम् इष्ये इति स्थिते शकन्ध्वादिषु पररूपं वाच्यम् (वा. ६.१.९१) इत्यनेन पररूपे मरिष्ये।

[१६२] कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन।

[१६३] दृशिँर् प्रेक्षणे (धा०पा० ९८८) → दृश् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → लृट् शेषे च (पा०सू० ३.३.१३) → दृश् लृट् → दृश् महिङ् → दृश् महि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → दृश् स्य महि → सृजिदृशोर्झल्यमकिति (पा०सू० ६.१.५८) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → दृ अम् श् स्य महि → दृ अ श् स्य महि → इको यणचि (पा०सू० ६.१.७७) → द्र् अ श् स्य महि → व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः (पा०सू० ८.२.३६) → द्र् अ ष् स्य महि → षढोः कः सि (पा०सू० ८.२.४१) → द्र् अ क् स्य महि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → द्र् अ क् स्या महि → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → द्र् अ क् स्या महे → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → द्र् अ क् ष्या महे → द्रक्ष्यामहे।

अत्र कर्मव्यतिहार आत्मनेपदम्।[१६४]

## ३.५५ शासतु

आश्वासयामास नृपं शनैः स नयकोविदः।
किमत्र दुःखेन विभो राज्यं शासतु मेऽनुजः॥

– अ०रा० २.३.७३

अत्र गणकार्यमनित्यम् (प०शे० ९३.३) इति नियमाल्लोङ्लकारे तिपि शपि एरुः (पा०सू० ३.४.८६) इत्यनेनोकारे शासतु।[१६५]

## ३.५६ यास्ये

मातरं समनुश्वास्य अनुनीय च जानकीम्।
आगत्य पादौ वन्दित्वा तव यास्ये सुखं वनम्॥

– अ०रा० २.३.७७

श्रीरामः कैकेयीं प्रति कथयति यत् अहं तव पादं वन्दित्वा वनं यास्यामि। यास्यामि[१६६]

---

[१६४] कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन। सम् प्रच्छँ ज्ञीप्सायाम् (धा०पा० १४१३) → सम् प्रच्छ् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → अनद्यतने लङ् (पा०सू० ३.२.१११) → सम् प्रच्छ् लङ् → सम् प्रच्छ् त → तुदादिभ्यः शः (पा०सू० ३.१.७७) → सम् प्रच्छ् श त → प्रच्छ् अ थास् → सार्वधातुकमपित् (पा०सू० १.२.४) → ङिद्वत्त्वम् → ग्रहिज्यावयिव्यधिवष्टिविचति-वृश्चतिपृच्छतिभृज्जतीनां ङिति च (पा०सू० ६.१.१६) → सम् पृ अ च्छ् अ त → सम्प्रसारणाच्च (पा०सू० ६.१.१०८) → सम् पृ च्छ् अ त → सम् पृ च्छ् अ त → समपृच्छत। विदिप्रच्छि-स्वरतीनामुपसङ्ख्यानम् इत्युपसङ्ख्यानस्याकर्मकाधिकारादत्राप्रवृत्तिः। यद्वा अतिखिन्नं नृपं कैकेयीं च दृष्ट्वा इत्यन्वयेन कर्मणोऽविवक्षायामकर्मकत्वादात्मनेपदम्। अनेनैवोपसङ्ख्यानेन।

[१६५] शासुँ अनुशिष्टौ (धा०पा० १०७४) इति धातोर्लोङ्लकारे प्रथमपुरुष एकवचने शास्तु इति रूपम्। यथा त्वया परिगृहीतोऽयमङ्गदः शास्तु मेदिनीम् (वा०रा० ४.२१.९) इति वाल्मीकिप्रयोगे। शासुँ → शास् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → शास् लोट् → शास् तिप् → शास् ति → कर्तरि शप् (पा०सू० ३.१.६८) → शास् शप् ति → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → शब्लुक् → शास् ति → एरुः (पा०सू० ३.४.८६) → शास् तु → शास्तु। गण-कार्यमनित्यम् (प०शे० ९३.३) इति परिभाषयाऽत्र अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) इत्यस्याप्रवृत्तौ शब्लुगभावे शास् शप् ति → शास् अ ति → एरुः (पा०सू० ३.४.८६) → शास् अ तु → शासतु इति सिद्धम्।

[१६६] या प्रापणे (धा०पा० १०४९) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → या लृट् → या मिप् → या मि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → या स्य मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → या स्या मि → यास्यामि।

इति प्रयोक्तव्ये यास्ये इति प्रयुज्यते। अत्रापि कर्मव्यतिहारः।[१६७] यतो हि वनगमनं तु वृद्धानां कृते। तथा चोक्तम् –

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्॥

– र०वं० १.८

अतो वृद्धानां कर्म वनगमनं युवको भूत्वा श्रीराम आचरति तस्मादत्र यास्ये इत्येव प्रयोगः साधु। श्रीरामचरितमानसे कौसल्याऽपि कथयति –

अंतहुँ उचित नृपहि बनबासू। बय बिलोकि हिय होइ हरासू॥[१६८]

– रा०च०मा० २.५६.४

तस्मात् यास्ये। वृद्धोचितमपि गमनं त्वत्सन्तोषार्थं करिष्यामीत्येव राजीवलोचनस्य विवक्षितोऽर्थ इङ्गत्ययेन ध्वन्यते। न च न गतिहिंसार्थेभ्यः (पा०सू० १.३.१५) इत्यनेन कर्मव्यतिहार आत्मनेपदनिषेधः। मण्डूकप्लुत्या नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् (पा०सू० १.२.६९) इत्यतः अन्यतरस्याम् इत्यनुवर्तनीयम्।

## ३.५७ कुरुते

इत्युक्त्वा तु परिक्रम्य मातरं द्रष्टुमाययौ।
कौसल्याऽपि हरेः पूजां कुरुते रामकारणात्॥

– अ०रा० २.३.७८

अत्र अकुरुत[१६९] इति प्रयोक्तव्यम्। कुरुते इति प्रयुक्तम्। स्मयोगे लट् स्मे

[१६७] तस्मात् कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेनाऽत्मनेपदमिति भावः। या प्रापणे (धा०पा० १०४९) → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → लृट् शेषे च (पा०सू० ३.३.१३) → या लृट् → या इट् → या इ → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → या स्य इ → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → या स्य ए → अतो गुणे (पा०सू० ६.१.९७) → या स्ये → यास्ये।

[१६८] एतद्रूपान्तरम्–अन्ते निवासो विपिने समीचीनो महीपतेः। किन्तु दृष्ट्वा तवावस्थां दुःखं मे मनसि स्थितम्॥ (मा०भा० २.५६.४)।

[१६९] डुकृञ् करणे (धा०पा० १४७२) → कृ → स्वरितञितः कर्त्रभिप्राये क्रियाफले (पा०सू० १.३.७२) → अनद्यतने लङ् (पा०सू० ३.२.१११) → कृ लङ् → कृ त → लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा०सू० ६.४.७१) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → अट् कृ त → अ कृ त → तनादिकृञ्भ्य उः (पा०सू० ३.१.७९) → अ कृ उ त → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → उरण् रपरः (पा०सू० १.१.५१) → अ क् अर् उ त → अत उत्सार्वधातुके (पा०सू० ६.४.११०) → अ क् उर् उ त → अकुरुत।

(पा०सू० ३.२.११८) इत्यनेन लङ्कारविधानात्सम्यक्।[१७०]

## ३.५८ ध्यायते

होमं च कारयामास ब्राह्मणेभ्यो ददौ धनम्।
ध्यायते विष्णुमेकाग्रमनसा मौनमास्थिता॥

– अ०रा० २.३.७९

अत्रापि कर्मव्यतिहारादेवाऽऽत्मनेपदम्।[१७१] यतो हि महाविष्णुस्तु तस्याः पुत्रः। अंशिनि महाविष्णौ श्रीरामभद्रे पुत्ररूपेण वर्तमानेऽप्यंशं विष्णुं वामनावतारे तन्माताऽदितिः सत्यपि प्राकृतनारीव ध्यायतीत्येव कर्मव्यतिहारस्य सङ्गतिः। वर्तमानकालोऽपि पूर्वोक्तदिशा।[१७२]

## ३.५९ आगमिष्ये

चतुर्दश समास्तत्र ह्युषित्वा मुनिवेषधृक्।
आगमिष्ये पुनः शीघ्रं न चिन्तां कर्तुमर्हसि॥

– अ०रा० २.४.६

श्रीरामः कथयति वनवासान्ते आगमिष्ये। अत्र आगमिष्यामि इति हि पाणिनीयम्।[१७३] समुपसर्गाध्याहार आत्मनेपदम् समो गम्यृच्छिभ्याम् (पा०सू० १.३.२९) इत्यनेन। न च आङ्उपसर्गस्यैव गम् धातुनाऽन्वय इति चेत्। व्यवहिते इति वक्तव्यम्।

---

[१७०] स्म इत्यध्याहार्यमिति भावः। डुकृञ् करणे (धा०पा० १४७२) → कृ → स्वरितञितः कर्त्रभिप्राये क्रियाफले (पा०सू० १.३.७२) → लट् स्मे (पा०सू० ३.२.११८) → कृ लट् → कृ त → तनादिकृञ्भ्य उः (पा०सू० ३.१.७९) → कृ उ त → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → उरण् रपरः (पा०सू० १.१.५१) → क् अर् उ त → अत उत्सार्वधातुके (पा०सू० ६.४.११०) → क् उर् उ त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → क् उर् उ ते → कुरुते।

[१७१] कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन।

[१७२] लट् स्मे (पा०सू० ३.२.११८) इत्यनेन। स्म इत्यध्याहार्यमिति भावः। ध्यै चिन्तायाम् (धा०पा० ९०८) → ध्यै → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → लट् स्मे (पा०सू० ३.२.११८) → ध्यै लट् → ध्यै त → कर्तरि शप् (पा०सू० ३.१.६८) → ध्यै शप् त → ध्यै अ त → एचोऽयवायावः (पा०सू० ६.१.७८) → ध्याय् अ त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → ध्याय् अ ते → ध्यायते।

[१७३] आङ् गमॢँ गतौ (धा०पा० ९८२) → आ गम् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → आ गम् लृँट् → आ गम् मिप् → आ गम् मि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → आ गम् स्य मि → गमेरिट् परस्मैपदेषु (पा०सू० ७.२.५८) → आ गम् इट् स्य मि → आ गम् इ स्य मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → आ गम् इ स्या मि → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → आ गम् इ ष्या ति → आगमिष्यामि।

न च सत्यप्यात्मनेपद इट् कथं गमेरिट् परस्मैपदेषु (पा०सू० ७.२.५८) इति सूत्रेण परस्मैपद एवेड्विधानादिति चेत्सत्यम्। उच्यते। आगच्छतीत्यागम् आचारे क्विप्तश्च सर्वापहारिलोपे।[१७४] इष् धातोः कर्मव्यतिहार आत्मनेपदे इष्ये।[१७५] आगम् इष्ये इति आगमिष्ये।

## ३.६० जायते

यथा प्रवाहपतितप्लवानां सरितां तथा।
चतुर्दशसमासङ्ख्या क्षणार्द्धमिव जायते॥

– अ०रा० २.४.४६

सामीप्याभिप्रायेणैव क्षणार्द्धमिव इति वाक्यखण्डप्रयोगेण च शीघ्रतां द्योतयितुं वर्तमानसमीपे लटं प्रयुङ्क्ते। वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन।[१७६]

## ३.६१ नेष्ये

तामाह राघवः प्रीतः स्वप्रियां प्रियवादिनीम्।
कथं वनं त्वां नेष्येऽहं बहुव्याघ्रमृगाकुलम्॥

– अ०रा० २.४.६४

णीञ् प्रापणे (धा०पा० ९०१) इति धातुरकर्त्रभिप्राये क्रियाफले परस्मैपदी। तथा

---

[१७४] आङ् गमॢँ गतौ (धा०पा० ९८२) → क्विप् च (पा०सू० ३.२.७६) → आ गम् क्विँप् → आ गम् व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → आ गम् → आगम् → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपदिकसञ्ज्ञा → विभक्तिकार्यम् → आगम् सुँ → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → आगम्।

[१७५] इषँ गतौ (धा०पा० ११२७) → इष् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → इष् लट् → इष् इट् → इष् इ → दिवादिभ्यः श्यन् (पा०सू० ३.१.६९) → इष् श्यन् इ → इष् य इ → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → इष् य ए → अतो गुणे (पा०सू० ६.१.९७) → इष् ये → इष्ये।

[१७६] जनीँ प्रादुर्भावे (धा०पा० ११४९) → अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) → वर्तमान-सामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → जन् लट् → जन् त → दिवादिभ्यः श्यन् (पा०सू० ३.१.६९) → जन् श्यन् त → जन् य त → ज्ञाजनोर्जा (पा०सू० ७.३.७९) → जा य त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → जा य ते → जायते।

च नेष्यामि इति प्रयोक्तव्यम्।[१७७] अत्र उपनेष्ये इति हि पदम्।[१७८] कथमुपनेष्ये इत्यर्थे सम्मानन आत्मनेपदम्।[१७९] कथं सम्मानितं करिष्यामि इति भावः। यद्वा व्यये। कथं दिनानि यापयिष्यामि। यद्वोत्सञ्जने। अत्र सूत्रं सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः (पा०सू० १.३.३६)।

## ३.६२ हास्यसे

पादचारेण गन्तव्यं शीतवातातपादिमत्।
राक्षसादीन्वने दृष्ट्वा जीवितं हास्यसेऽचिरात्॥

– अ०रा० २.४.६९

अत्र हास्यसि[१८०] इति प्रयोक्तव्यं किन्तु कर्मव्यतिहार आत्मनेपदम्।[१८१] यद्वा जीवितम् इति क्रियाविशेषणम् उपेक्ष्य इति वाऽध्याहार्यम्। एवं जीवितमुपेक्ष्य त्वं प्राणैः हास्यसे इति

[१७७] णीञ् प्रापणे (धा०पा० ९०१) → णी → णो नः (पा०सू० ६.१.६५) → नी → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → नी लृट् → नी मिप् → नी मि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → नी स्य मि → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → ने स्य मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → ने स्या मि → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → ने ष्या मि → नेष्यामि।

[१७८] उपउपसर्गस्य लोप इति भावः।

[१७९] उप णीञ् प्रापणे (धा०पा० ९०१) → उप णी → णो नः (पा०सू० ६.१.६५) → उप नी → सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः (पा०सू० १.३.३६) → लृट् शेषे च (पा०सू० ३.३.१३) → उप नी लृट् → उप नी इट् → उप नी इ → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → उप नी स्य इ → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → उप ने स्य इ → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → उप ने स्य ए → अतो गुणे (पा०सू० ६.१.९७) → उप ने स्ये → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → उप ने ष्ये → विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) → ने ष्ये → नेष्ये।

[१८०] ओँहाक् त्यागे (धा०पा० १०९०) → हा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → हा लृट् → हा सिप् → हा सि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → हा स्य सि → हास्यसि।

[१८१] कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन। ओँहाक् त्यागे (धा०पा० १०९०) → हा → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → लृट् शेषे च (पा०सू० ३.३.१३) → हा लृट् → हा थास् → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → हा स्य थास् → थासस्से (पा०सू० ३.४.८०) → हा स्य से → हास्यसे।

कर्मवाच्य आत्मनेपदम्।[१८२]

## ३.६३ इच्छसे

प्रत्युवाच स्फुरद्वक्त्रा किञ्चित्कोपसमन्विता।
कथं मामिच्छसे त्यक्तुं धर्मपत्नीं पतिव्रताम्॥

– अ०रा० २.४.७१

अत्रापि कर्मव्यतिहार आत्मनेपदम्।[१८३]

## ३.६४ रमामि

फलमूलादिकं यद्यत्तव भुक्तावशेषितम्।
तदेवामृततुल्यं मे तेन तुष्टा रमाम्यहम्॥

– अ०रा० २.४.७३

अत्र रमुँ क्रीडायाम् (धा०पा० ८५३) इत्यात्मनेपदी धातुः। एवं भविष्यत्काले रंस्ये इति हि युक्तं पाणिनीयमपि।[१८४] अत्र रमामि इत्यत्र द्वावंशावयुक्ताविव। परस्मैपदप्रयोगः कालव्यत्ययश्च। कालव्यत्यये तु भविष्यत्कालेऽपि लट् स्मे (पा०सू० ३.२.११८) इत्यनेन स्मशब्दयोगे वर्तमानवत्कार्यम्।[१८५] आरमामि इत्यत्र व्याङ्परिभ्यो रमः (पा०सू० १.३.८३)

[१८२] ओँहाक् त्यागे (धा०पा० १०९०) इति धातोः कर्मणि लृटि मध्यमपुरुष एकवचने हास्यसे हायिष्यसे इति रूपद्वयम्। अचिण्वद्भाव इडभावे हास्यसे इति रूपम्। हा → भावकर्मणोः (पा०सू० १.३.१३) → लृट् शेषे च (पा०सू० ३.३.१३) → हा लृट् → हा थास् → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → हा स्य थास् → थासस्से (पा०सू० ३.४.८०) → हा स्य से → हास्यसे। पक्षे चिण्वद्भाव इडागमे हायिष्यसे इति रूपम्। हा → भावकर्मणोः (पा०सू० १.३.१३) → लृट् शेषे च (पा०सू० ३.३.१३) → हा लृट् → हा थास् → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → हा स्य थास् → स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च (पा०सू० ६.४.६२) → हा इट् स्य थास् → हा इ स्य थास् → आतो युक् चिण्कृतोः (पा०सू० ७.३.३३) → हा युँक् इ स्य थास् → हा य् इ स्य थास् → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → हा य् इ ष्य थास् → थासस्से (पा०सू० ३.४.८०) → हा य् इ ष्य से → हायिष्यसे।

[१८३] कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन। इषँ इच्छायाम् (धा०पा० १३५१) → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → वर्तमाने लट् → इष् लट् → इष् थास् → तुदादिभ्यः शः (पा०सू० ३.१.७७) → इष् श थास् → इष् अ थास् → इषुगमियमां छः (पा०सू० ७.३.७७) → इछ् अ थास् → छे च (पा०सू० ६.१.७३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → इतुँक् छ् अ थास् → इत् छ् अ थास् → स्तोः श्चुना श्चुः (पा०सू० ८.४.४०) → इच् छ् अ थास् → थासस्से (पा०सू० ३.४.८०) → इच् छ् अ से → इच्छसे।

[१८४] रमुँ क्रीडायाम् (धा०पा० ८५३) → रम् → अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) → लृट् शेषे च (पा०सू० ३.३.१३) → रम् लृट् → रम् इट् → रम् इ → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → रम् स्य इ → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → रम् स्य ए → अतो गुणे (पा०सू० ६.१.९७) → रम् स्ये → मोऽनुस्वारः (पा०सू० ८.३.२३) → रं स्ये → रंस्ये।

[१८५] स्म इत्यध्याहार्यमिति भावः।

इत्यनेन परस्मैपदम्।[१८६] आङ् इत्यस्य विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इत्यनेन लोपः। यद्वा तुष्टा आरमामि इति स्थिते अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) इत्यनेन दीर्घैकादेशे तुष्टाऽऽरमामि इति।[१८७]

## ३.६५ द्रक्ष्यथ

रामोऽपि पादचारेण गजाश्वादिविवर्जितः।
गच्छति द्रक्ष्यथ विभुं सर्वलोकैकसुन्दरम्॥

– अ०रा० २.५.७

अत्र पश्यत इति प्रयोक्तव्ये द्रक्ष्यथ इति प्रयुक्तम्। द्रक्ष् इति स्वतन्त्रो धातुः।[१८८] तस्य लटि मध्यमपुरुषबहुवचनम् द्रक्ष्यथ।[१८९] यद्वा अभिज्ञावचने लृट् (पा०सू० ३.२.११२)।[१९०] स्मरथ किमीदृशं द्रक्ष्यथ रामं पूर्वम्। अतो नापाणिनीयम्।

---

[१८६] आङ् रम् → आ रम् → व्याङ्परिभ्यो रमः (पा०सू० १.३.८३) → लट् स्मे (पा०सू० ३.२.११८) → आ रम् लट् → आ रम् मिप् → आ रम् मि → कर्तरि शप् (पा०सू० ३.१.६८) → आ रम् शप् मि → आ रम् अ मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → आ रम् आ मि → आरमामि।

[१८७] यद्वा अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) इत्यपि समाधानम्। रमुँ क्रीडायाम् (धा०पा० ८५३) → रम् → अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लट् स्मे (पा०सू० ३.२.११८) → रम् लट् → रम् मिप् → रम् मि → कर्तरि शप् (पा०सू० ३.१.६८) → रम् शप् मि → रम् अ मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → रम् आ मि → रमामि।

[१८८] बहुलमेतन्निदर्शनम् (धा०पा० ग०सू० १९३८) भूवादिष्वेतदन्तेषु दशगणीषु धातूनां पाठो निदर्शनाय तेन स्तम्भुप्रभृतयः सौत्राश्चुलुम्पादयो वाक्यकारीयाः प्रयोगसिद्धा विक्लवत्यादयश्च (मा०धा०वृ० १०.३२८) इत्यनुसारं दिवादिगण ऊह्योऽयं द्रक्ष् धातुर्दर्शने।

[१८९] द्रक्ष् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → द्रक्ष् लट् → द्रक्ष् थ → दिवादिभ्यः श्यन् (पा०सू० ३.१.६९) → द्रक्ष् श्यन् थ → द्रक्ष् य थ → द्रक्ष्यथ।

[१९०] दृशिँर् प्रेक्षणे (धा०पा० ९८८) → दृश् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → अभिज्ञा-वचने लृट् (पा०सू० ३.२.११२) → दृश् लृट् → दृश् थ → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → दृश् स्य थ → सृजिदृशोर्झल्यमकिति (पा०सू० ६.१.५८) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → दृ अम् श् स्य थ → दृ अ श् स्य थ → इको यणचि (पा०सू० ६.१.७७) → द्र् अ श् स्य थ → व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः (पा०सू० ८.२.३६) → द्र् अ ष् स्य थ → षढोः कः सि (पा०सू० ८.२.४१) → द्र् अ क् स्य थ → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → द्र् अ क् ष्य थ → द्रक्ष्यथ।

## ३.६६ जीवामि

किञ्चित्कालं भवेत्तत्र जीवनं दुःखितस्य मे।
अत ऊर्ध्वं न जीवामि चिरं रामं विना कृतः॥

– अ०रा० २.५.४९

अत्र वर्तमानसामीप्ये लट्।[१९१]

## ३.६७ गच्छामहे

पौराः सर्वे समागत्य स्थितास्तस्याविदूरतः।
शक्ता रामं पुरं नेतुं नोचेद्गच्छामहे वनम्॥

– अ०रा० २.५.५३

हे पौरा वनं गच्छाम इत्यन्वये शक्यार्थे लोट्।[१९२] वनं गन्तुं शक्ताः इति भावः।

## ३.६८ बभूव

बभूव परमानदः स्पृष्ट्वा तेऽङ्गं रघूत्तम।
नैषादराज्यमेतत्ते किङ्करस्य रघूत्तम॥

– अ०रा० २.५.६५

इह प्रेमातिशयात्प्रभुं प्रत्यक्षं मत्वा सर्वं परोक्षं मनुते निषादः। अतो बभूव इति क्रियां

---

[१९१] वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन। जीवँ प्राणधारणे (धा०पा० ५६२) → जीव् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → जीव् लट् → जीव् मिप् → जीव् मि → कर्तरि शप् (पा०सू० ३.१.६८) → जीव् शप् मि → जीव् अ मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → जीव् आ मि → जीवामि।

[१९२] शकि लिङ् च (पा०सू० ३.३.१७२) इत्यत्र मण्डूकप्लुत्या स्मे लोट् (पा०सू० ३.३.१६५) इत्यतः लोट् इत्यनुवर्तनीयमिति भावः। गमॢँ गतौ (धा०पा० ९८२) → गम् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → शकि लिङ् च (पा०सू० ३.३.१७२) → गम् लोट् → गम् मस् → कर्तरि शप् (पा०सू० ३.१.६८) → गम् शप् मस् → गम् अ मस् → इषुगमियमां छः (पा०सू० ७.३.७७) → गछ् अ मस् → छे च (पा०सू० ६.१.७३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → गतुँक् छ् अ मस् → गत् छ् अ मस् → स्तोः श्चुना श्चुः (पा०सू० ८.४.४०) → गच् छ् अ मस् → आडुत्तमस्य पिच्च (पा०सू० ३.४.९२) → गच् छ् अ आट् मस् → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → गच् छ् आ मस् → लोटो लङ्वत् (पा०सू० ३.४.८५) → ङिद्वत्त्वम् → नित्यं ङितः → गच् छ् आ म → गच्छाम।

प्रयुङ्क्ते।[१९३]

## ३.६९ शेते

शयानं कुशपत्रौघसंस्तरे सीतया सह।
यः शेते स्वर्णपर्यङ्के स्वास्तीर्णे भवनोत्तमे॥

– अ०रा० २.६.२

भूतकालविवक्षया अशेत[१९४] इति प्रयोक्तव्ये शेते इति प्रयुक्तम्। अत्र पुरि लुङ् चास्मे (पा०सू० ३.२.१२२) इति सूत्रेण वर्तमानवद्व्यवहारः।[१९५]

## ३.७० प्रार्थयामास

गुहस्तान्वाहयामास ज्ञातिभिः सहितः स्वयम्।
गङ्गामध्ये गतां गङ्गां प्रार्थयामास जानकी॥

– अ०रा० २.६.२१

अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यमत एव प्रार्थयामास।[१९६]

---

[१९३] भू सत्तायाम् (धा०पा० १) → भू → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → परोक्षे लिट् (पा०सू० ३.२.११५) → भू लिट् → भू तिप् → परस्मैपदानां णलतुसुस्थलथुसणल्वमाः (पा०सू० ३.४.८२) → भू ण → भू अ → भुवो वुग्लुङ्लिटोः (पा०सू० ६.४.८८) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → भूवुँक् अ → भूव् अ → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → भूव् भूव् अ → हलादिः शेषः (पा०सू० ७.४.६०) → भू भूव् अ → ह्रस्वः (पा०सू० ७.४.५९) → भु भूव् अ → भवतेरः (पा०सू० ७.४.७३) → भ भूव् अ → अभ्यासे चर्च (पा०सू० ८.४.५४) → ब भूव् अ → बभूव।

[१९४] शीङ् स्वप्ने (धा०पा० १०३२) → शी → अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) → अनद्यतने लङ् (पा०सू० ३.२.१११) → शी लङ् → शी त → लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा०सू० ६.४.७१) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → अट् शी त → अ शी त → कर्तरि शप् (पा०सू० ३.१.६८) → अ शी शप् त → शीङः सार्वधातुके गुणः (पा०सू० ७.४.२१) → अ शे शप् त → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → अ शे त → अशेत।

[१९५] पुरा इत्यध्याहार्यमिति भावः। शीङ् स्वप्ने (धा०पा० १०३२) → शी → अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) → पुरि लुङ् चास्मे (पा०सू० ३.२.१२२) → शी लट् → शी त → कर्तरि शप् (पा०सू० ३.१.६८) → शी शप् त → शीङः सार्वधातुके गुणः (पा०सू० ७.४.२१) → शे शप् त → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → शे त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → शे ते → शेते।

[१९६] ३६३तमे पृष्ठे ३.७७ प्रार्थय इति प्रयोगस्य ४०३तमे पृष्ठे ३.१३३ प्रार्थयामि इति प्रयोगस्य च विमर्शमपि पश्यन्तु।

## ३.७१ वदस्व

भवन्तो यदि जानन्ति किं वक्ष्यामोऽत्र कारणम्।
यत्र मे सुखवासाय भवेत्स्थानं वदस्व तत्॥

– अ०रा० २.६.५०

भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः (पा०सू० १.३.४७) इत्यनेन भासन आत्मनेपदम्। भासमानो वद इति तात्पर्यम्।[१९७]

## ३.७२ स्थास्यामहे

वयं स्थास्यामहे तावदागमिष्यसि निश्चयः।
तथेत्युक्त्वा गृहं गत्वा मुनिभिर्यदुदीरितम्॥

– अ०रा० २.६.७३

अकर्मकाच्च (पा०सू० १.३.२६) इत्यनेन आत्मनेपदम्।[१९८] यद्वा प्रकाशनस्थेयाख्ययोश्च (पा०सू० १.३.२३) इत्यनेन स्थेयाख्यायामात्मनेपदम्।[१९९]

## ३.७३ तिष्ठन्ति

तच्छ्रुत्वा जातनिर्वेदो विचार्य पुनरागमम्।
मुनयो यत्र तिष्ठन्ति करुणापूर्णमानसाः॥

– अ०रा० २.६.७५

अत्र तिष्ठन्ति स्म इति प्रयोगः। अतः लट् स्मे (पा०सू० ३.२.११८) इत्यनेन

[१९७] वदँ व्यक्तायां वाचि (धा०पा० १००९) → वद् → भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः (पा०सू० १.३.४७) → लोट् च (पा०सू० ३.३.१६२) → वद् लोट् → वद् थास् → कर्तरि शप् (पा०सू० ३.१.६८) → वद् शप् थास् → वद् अ थास् → थासस्से (पा०सू० ३.४.८०) → वद् अ से → सवाभ्यां वामौ (पा०सू० ३.४.९१) → वद् अ स् व → वदस्व।

[१९८] उपउपसर्गस्य लोप इति भावः। उप ष्ठा गतिनिवृत्तौ (धा०पा० ९२८) → उप ष्ठा → धात्वादेः षः सः (पा०सू० ६.१.६४) → निमित्तापाये नैमित्तिकस्याप्यपायः → उप स्था → अकर्मकाच्च (पा०सू० १.३.२६) → लृट् शेषे च (पा०सू० ३.३.१३) → उप स्था लृट् → उप स्था महिङ् → उप स्था महि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → उप स्था स्य महि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → उप स्था स्या महि → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → उप स्था स्या महे → उप स्थास्यामहे → विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) → स्थास्यामहे।

[१९९] प्रक्रिया पूर्ववत्। ष्ठा गतिनिवृत्तौ (धा०पा० ९२८) → स्था (पूर्ववत्) → प्रकाशनस्थेयाख्ययोश्च (पा०सू० १.३.२३) → लृट् शेषे च (पा०सू० ३.३.१३) → स्था लृट् → स्था महिङ् → स्था महि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → स्था स्य महि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → स्था स्या महि → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → स्था स्या महे → स्थास्यामहे।

लङ्लकारः।[२००]

## ३.७४ अस्मि

मुनीनां दर्शनादेव शुद्धान्तःकरणोऽभवम्।
धनुरादीन्परित्यज्य दण्डवत्पतितोऽस्म्यहम्॥

– अ०रा० २.६.७६

अत्रापि स्मयोगे वर्तमानो भावः।[२०१] अथवा अस्मि इत्यव्ययम्।[२०२]

## ३.७५ रक्षध्वम्

रक्षध्वं मां मुनिश्रेष्ठा गच्छन्तं निरयार्णवम्।
इत्यग्रे पतितं दृष्ट्वा मामूचुर्मुनिसत्तमाः॥

– अ०रा० २.६.७७

इह परस्मैपदीयरक्ष् धातोः (रक्षँ पालने धा०पा० ६५७) आत्मनेपदप्रयोगस्तु कर्म-व्यतिहारे।[२०३] यद्वा रक्षस इव अध्वा यस्य[२०४] इति बहुव्रीहिसमासे पृषोदरादित्वाट्टचि

---

[२००] स्म इत्यध्याहार्यमिति भावः। ष्ठा गतिनिवृत्तौ (धा०पा० ९२८) → ष्ठा → धात्वादेः षः सः (पा०सू० ६.१.६४) → निमित्तापाये नैमित्तिकस्याप्यपायः → स्था → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लट् स्मे (पा०सू० ३.२.११८) → स्था लट् → स्था झि → कर्तरि शप् (पा०सू० ३.१.६८) → स्था शप् झि → स्था अ झि → पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्र-धमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः (पा०सू० ७.३.७८) → तिष्ठ अ झि → झोऽन्तः (पा०सू० ७.१.३) → तिष्ठ अ न्ति → तिष्ठन्ति।

[२०१] स्म इत्यध्याहार्यमिति भावः। असँ भुवि (धा०पा० १०६५) → अस् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लट् स्मे (पा०सू० ३.२.११८) → अस् लट् → अस् मिप् → अस् मि → कर्तरि शप् (पा०सू० ३.१.६८) → अस् शप् मि → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → अस् मि → अस्मि।

[२०२] तथा च वाचस्पत्ये – अस्मि। अव्य० अस्–मिन्। अहमर्थे, 'त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति' सा०द०। 'अस्मिता'। 'उडुपेनास्मि सागरम्' रघुः। 'ब्रह्मैवास्मि न शोकभाक्।' योगसूत्रे च – अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः (यो०सू० २.३)।

[२०३] कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन। रक्षँ पालने (धा०पा० ६५७) → रक्ष् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → लोट् च (पा०सू० ३.३.१६२) → रक्ष् लोट् → रक्ष् ध्वम् → कर्तरि शप् (पा०सू० ३.१.६८) → रक्ष् शप् ध्वम् → रक्ष् अ ध्वम् → रक्षध्वम्।

[२०४] रक्षः इत्यस्य राक्षस इत्यर्थः। यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी (अ०को० १.१.६०) इत्यमरः।

शकन्ध्वादित्वात्पररूपे विभक्तिकार्ये रक्षध्वः।[२०५] तं रक्षध्वम्।[२०६] रक्षध्वं मां पात इति तात्पर्यम्।[२०७]

## ३.७६ निष्क्रमस्व

ततो युगसहस्रान्ते ऋषयः पुनरागमन्।
मामूचुर्निष्क्रमस्वेति तच्छ्रुत्वा तूर्णमुत्थितः॥

– अ०रा० २.६.८४

अस्मिन् प्रयोगे वृत्तिसर्गतायनेषु क्रमः (पा०सू० १.३.३८) इत्यनेनाऽत्मनेपदम्। वर्धमानो निष्क्रमस्व इति तायने थास्।[२०८]

## ३.७७ प्रार्थय

मा भैषीरिति मां प्राह ब्रह्महत्याभयं न ते।
मत्पित्रोः सलिलं दत्त्वा नत्वा प्रार्थय जीवितम्॥

– अ०रा० २.७.३९

---

[२०५] रक्षस् ङस् अध्वन् सुँ → अनेकमन्यपदार्थे (पा०सू० २.२.२४) → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपदिकसञ्ज्ञा → सुपो धातुप्रातिपदिकयोः (पा०सू० २.४.७१) → रक्षस् अध्वन् सुँ → शकन्ध्वादिषु पररूपं वाच्यम् (वा० ६.१.९४) → रक्षध्वन् सुँ → पृषोदरादीनि यथोपदिष्टम् (पा०सू० ६.३.१०९) → टज्भावः → रक्षध्वन् सुँ → रक्षध्वन् टच् सुँ → रक्षध्वन् अ सुँ → नस्तद्धिते (पा०सू० ६.४.१४४) → रक्षध्व् अ सुँ → रक्षध्व सुँ → रक्षध्वस् → ससजुषो रुः (पा०सू० ८.२.६६) → रक्षध्वरुँ → खरवसानयोर्विसर्जनीयः (पा०सू० ८.३.१५) → रक्षध्वः।

[२०६] रक्षध्व अम् → अमि पूर्वः (पा०सू० ६.१.१०७) → रक्षध्वम्।

[२०७] पात (=रक्षत) इत्यध्याहार्यमिति भावः।

[२०८] निस् क्रमुँ पादविक्षेपे (धा०पा० १९०५) → निस् क्रम् → वृत्तिसर्गतायनेषु क्रमः (पा०सू० १.३.३८) → लोट् च (पा०सू० ३.३.१६२) → निस् क्रम् लोट् → निस् क्रम् थास् → कर्तरि शप् (पा०सू० ३.१.६८) → निस् क्रम् शप् थास् → निस् क्रम् अ थास् → थासस्से (पा०सू० ३.४.८०) → निस् क्रम् अ से → सवाभ्यां वामौ (पा०सू० ३.४.९१) → निस् क्रम् अ स्व → नुम्विसर्जनीयशर्व्यवायेऽपि (पा०सू० ८.३.५८) → निष् क्रम् अ स्व → निष्क्रमस्व।

प्रार्थयस्व[२०९] इति प्रयोक्तव्ये प्रार्थय इति प्रयोग आत्मनेपदस्यानित्यत्वात्।[२१०] यद्वा

२०९ प्र अर्थँ उपयाच्ञायाम् (धा०पा० १९०५) → प्र अर्थ् → सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् (पा०सू० ३.१.२५) → प्र अर्थ् णिच् → प्र अर्थ् इ → प्र अर्थि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → आगर्वादात्मनेपदिनः (धा०पा० ग०सू०) → लोट् च (पा०सू० ३.३.१६२) → प्र अर्थि लोट् → प्र अर्थि थास् → कर्तरि शप् (पा०सू० ३.१.६८) → प्र अर्थि शप् थास् → प्र अर्थि अ थास् → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → प्र अर्थे अ थास् → एचोऽयवायावः (पा०सू० ६.१.७८) → प्र अर्थय् अ थास् → थासस्से (पा०सू० ३.४.८०) → प्र अर्थय् अ से → सवाभ्यां वामौ (पा०सू० ३.४.९१) → प्र अर्थय् अ स्व → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → प्रार्थय् अ स्व → प्रार्थयस्व।

२१० 'अनुदात्तेत्त्वप्रयुक्तमात्मनेपदमनित्यम्' इति ज्ञापनार्थोऽयं ङकारः। तेन 'तालैः शिञ्जद्वलयसुभगैः' 'तृष्णे जृम्भसि' 'प्रार्थयन्ति शयनोत्थितं प्रियाः' इत्यादयः प्रयोगा उपपद्यन्ते (मा०धा०वृ० २.९)। प्र अर्थि → धातुसञ्ज्ञा (पूर्ववत्) → अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → प्र अर्थि लोट् → प्र अर्थि सिप् → प्र अर्थि सि → कर्तरि शप् (पा०सू० ३.१.६८) → प्र अर्थि शप् सि → प्र अर्थि अ सि → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → प्र अर्थे अ सि → एचोऽयवायावः (पा०सू० ६.१.७८) → प्र अर्थय् अ से → सेर्ह्यपिच्च (पा०सू० ३.४.८७) → प्र अर्थय् अ हि → अतो हेः (पा०सू० ६.४.१०५) → प्र अर्थय् अ → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → प्रार्थय् अ → प्रार्थय।

प्रार्थयत इति प्रार्थयः।[२११] प्रार्थय इवाऽचर इति प्रार्थय।[२१२] आचारक्विबन्तप्रत्ययः।[२१३]

## ३.७८ पृच्छसे

तथाऽपि पृच्छसे किञ्चित्तदनुग्रह एव मे।
कैकेय्या मत्कृतं कर्म रामराज्यविघातनम्॥

– अ०रा० २.८.४६

---

[२११] प्रार्थि धातोरौणादिके अयच् प्रत्यये। कार्याद्विद्यादनूबन्धम् (भा०पा०सू० ३.३.१) केचिदविहिता अप्यूह्याः (वै०सि०कौ० ३१६९) इत्यनुसारमूह्योऽत्राविहितो अयच् प्रत्ययः। अटच् (प०उ० ४.११४, द०उ० १०.१५) अतच् (प०उ० ३.१०३–१०५, द०उ० ६.१४–१६) अभच् (प०उ० ३.११६–१२०, द०उ० ७.१८–२२) अमच् (प०उ० ५.७३–७४, द०उ० ५.७३–७४) अलच् (प०उ० ५.८१, द०उ० ५.८१) असच् (प०उ० ३.१११–११४, द०उ० ९.४४–४७) इतिवत्। प्र अर्थि → धातुसञ्ज्ञा (पूर्ववत्) → उणादयो बहुलम् (पा०सू० ३.३.१) → प्र अर्थि अयच् → प्र अर्थि अय → णेरनिटि (पा०सू० ६.४.५१) → प्र अर्थ् अय → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → प्रार्थ् अय → प्रार्थय → विभक्ति-कार्यम् → प्रार्थय सुँ → प्रार्थय स् → ससजुषो रुः (पा०सू० ८.२.६६) → प्रार्थयरुँ → प्रार्थयर् → खरवसानयोर्विसर्जनीयः (पा०सू० ८.३.१५) → प्रार्थयः।

[२१२] प्रार्थय → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → प्रार्थय क्विँप् → प्रार्थय व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → प्रार्थय → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → प्रार्थय लोट् → प्रार्थय सिप् → प्रार्थय सि → कर्तरि शप् (पा०सू० ३.१.६८) → प्रार्थय शप् सि → प्रार्थय अ सि → अतो गुणे (पा०सू० ६.१.९७) → प्रार्थय सि → सेर्ह्यपिच्च (पा०सू० ३.४.८७) → प्रार्थय हि → अतो हेः (पा०सू० ६.४.१०५) → प्रार्थय।

[२१३] यद्वा निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजुच्यते (वा०प० ३.७.६०) इत्यनुसारं प्राकृतेऽर्थे णावन्याभिप्राये क्रियाफले परस्मैपदे लोटि सिपि शपि हौ हेर्लुकि प्रार्थय। यथा निवृत्तप्रेषणाद्धातोर्हेतुमण्णौ शुद्धेन तुल्योऽर्थः। तेन 'प्रार्थयन्ति शयनोत्थितं प्रियाः' इत्यादि सिद्धम्। एवं सकर्मकेषु सर्वमूह्यम् (ल०सि०कौ० २६०७)। यद्वा प्रार्थनं प्रार्थस्तं कुरु इति विग्रह आचारणिजन्ताद्धातोर्लोटि सिपि शपि हौ हेर्लुकि प्रार्थय। यथा प्रार्थनं प्रार्थस्तत्करोति णौ 'प्रार्थयति' इति (मा०धा०वृ० २.९) 'प्रार्थयन्ति शयनोत्थितं प्रियाः' इत्यादि कृदन्तात्तत्करोतीति णिचि नेयम् (मा०धा०वृ० १०.२८७)। यत्तु तत्त्वबोधिन्यां केचित्तु परस्मैपद-सिद्ध्यर्थं प्रार्थनं प्रार्थस्तं कुर्वन्ति प्रार्थयन्तीति व्याचक्षते तदसत्। धातुसंज्ञाप्रयोजकप्रत्यये चिकीर्षित उपसर्गाणां पृथक्करणस्य वक्ष्यमाणतया 'अर्थवेदे'त्यापुगागमस्य दुर्वारत्वात्। तच्चिन्त्यम्। प्रार्थयित्वा अप्रार्थयत् इत्यादीनां शिष्टप्रयुक्तत्वात् यथा अप्रार्थयत्कामधेनुम् (अ०पु० ४.१६) प्रार्थयित्वा द्विजान् भोज्य (अ०पु० १८४.८) प्रार्थयित्वा विरोधितम् (अ०शा० ८.५.२८) प्रार्थयित्वा द्विजान्नृपान् (ग०सं० १०.५७.१) प्रार्थयित्वा निजेश्वरम् (ना०पु० ६६.१४) तं प्रार्थयित्वा विधिवत् (ब्रह्मा०पु० २.५४.२८) इत्यादिषु। प्रार्थाप्य अप्रार्थापयत् इत्यादिप्रयोगाणामनुपलब्धेश्च। ४०३तमे पृष्ठे ३.१३३ प्रार्थयामि इति प्रयोगस्य विमर्शमपि पश्यन्तु।

अत्रापि कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेनैवाऽत्मनेपदम्।[२१४] यतो हि ज्ञात्वाऽपि सर्वं त्वं प्राकृत इव प्रश्नं करोषि इति तात्पर्यम्।

## ३.७९ नेष्ये

अभिषेक्ष्ये वसिष्ठाद्यैः पौरजानपदैः सह।
नेष्येऽयोध्यां रमानाथं दासः सेवेऽतिनीचवत्॥

– अ०रा० २.८.५१

अस्मिन्प्रयोगे सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः (पा०सू० १.३.३६) इत्यादिनोत्सञ्जनार्थमात्मनेपदम्।[२१५] सेवे इत्यत्र च वर्तमानसामीप्ये[२१६] यद्वा स्म इति योगे भविष्यत्काले लट्।[२१७]

## ३.८० भाषयेत्

सर्वं देवकृतं नोचेदेवं सा भाषयेत्कथम्।
तस्मात्त्यजाग्रहं तात रामस्य विनिवर्तने॥

– अ०रा० २.९.४६

[२१४] प्रच्छँ ज्ञीप्सायाम् (धा०पा० १४१३) → प्रच्छ् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → वर्तमाने लट् (पा०सू० ३.२.१२३) → प्रच्छ् लट् → प्रच्छ् थास् → तुदादिभ्यः शः (पा०सू० ३.१.७७) → प्रच्छ् श थास् → प्रच्छ् अ थास् → सार्वधातुकमपित् (पा०सू० १.२.४) → ङिद्वत्त्वम् → ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च (पा०सू० ६.१.१६) → पृ अ च्छ् अ थास् → सम्प्रसारणाच्च (पा०सू० ६.१.१०८) → पृ च्छ् अ थास् → थासस्से (पा०सू० ३.४.८०) → पृ च्छ् अ से → पृच्छसे।

[२१५] ञित्त्वात्कर्त्रभिप्राये क्रियाफले तु सिद्धमेवात्मनेपदम्। परन्त्वत्र कर्त्रभिप्रायो न। क्रियाफलं त्वत्र राममेवाभिप्रैति न कर्तारं मामिति भक्तशिरोमणेर्भरतस्य भावात्। अकर्त्रभिप्राये कथमात्मनेपदमित्याशङ्क्याहुः समाधानम्। णीञ् प्रापणे (धा०पा० ९०१) → णी → णो नः (पा०सू० ६.१.६५) → नी → सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः (पा०सू० १.३.३६) → लृट् शेषे च (पा०सू० ३.३.१३) → नी लृट् → नी इट् → नी इ → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → नी स्य इ → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → ने स्य इ → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → ने स्य ए → अतो गुणे (पा०सू० ६.१.९७) → ने स्ये → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → ने ष्ये → नेष्ये।

[२१६] वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन। षेवृँ सेवने (धा०पा० ५०१) → षेव् → धात्वादेः षः सः (पा०सू० ६.१.६४) → सेव् → अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) → लट् स्मे (पा०सू० ३.२.११८) → सेव् लट् → सेव् इट् → सेव् इ → कर्तरि शप् (पा०सू० ३.१.६८) → सेव् शप् इ → सेव् अ इ → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → सेव् ए → अतो गुणे (पा०सू० ६.१.९७) → सेवे।

[२१७] स्म इत्यध्याहार्यमिति भावः। प्रक्रिया पूर्ववत्।

इह स्वार्थे णिचि परस्मैपदम्।[२१८]

## ३.८१ त्यक्ष्यते

अङ्गरागं च सीतायै ददौ दिव्यं शुभानना।
न त्यक्ष्यतेऽङ्गरागेण शोभा त्वां कमलानने॥

– अ०रा० २.९.८९

चित्रकूटं परित्यज्य दण्डकारण्यं गन्तुकामः श्रीरामोऽत्रिदर्शनं करोति। तत्रानुसूया सीताया अङ्गरागं प्रयच्छति। इह त्यक्ष्यते इति प्रयोगो विमृश्यते। त्यज् धातुः (त्यजँ हानौ धा०पा० ९८६) परस्मैपदीयः। अत्र कर्मव्यतिहार आत्मनेपदम्।[२१९] यद्वा कर्मकर्तृकप्रयोगे त्वामधिश्रित्य शोभा स्वयमेव न त्यक्ष्यते त्वया किम् इत्यात्मनेपदम्।[२२०]

---

[२१८] भाषँ व्यक्तायां वाचि (धा०पा० ६१२) → भाष् → स्वार्थे णिच् → भाष् णिच् → भाष् इ → भाषि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (पा०सू० ३.३.१६१) → भाषि लिङ् → भाषि तिप् → भाषि ति → कर्तरि शप् (पा०सू० ३.१.६८) → भाषि शप् ति → भाषि अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → भाषे अ ति → यासुट् परस्मैपदेषूदात्तो ङिच्च (पा०सू० ३.४.१०३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → भाषे अ यासुँट् ति → भाषे अ यास् ति → सुट् तिथोः (पा०सू० ३.४.१०७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → भाषे अ यास् सुँट् ति → भाषे अ यास् स् ति → लिङः सलोपोऽनन्त्यस्य (पा०सू० ७.२.७९) → भाषे अ या ति →अतो येयः (पा०सू० ७.२.८०) → भाषे अ इय् ति → लोपो व्योर्वलि (पा०सू० ६.१.६६) → भाषे अ इ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → भाषय् अ इ ति → आद्गुणः (पा०सू० ६.१.८७) → भाषय् ए ति → इतश्च (पा०सू० ३.४.१००) → भाषय् ए त् → भाषयेत्। न च चुरादिगणे पाठाभावात्स्वार्थे न णिच्। शिष्टप्रयोगेषु दृश्यते। यथा भारते वनपर्वणि भीमं प्रति नवव्याकरणार्थवेत्ता हनुमान् – दशवर्षसहस्राणि दशवर्षशतानि च। राज्यं कारितवान् रामस्ततः स्वभवनं गतः॥ (म०भा० ३.१४८.१९) । अत्र नीलकण्ठोऽपि – कारितवान् कृतवान्। स्वार्थे णिच् (म०भा० भा०दी० ३.१४८.१९)।

[२१९] त्यज् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → लृट् शेषे च (पा०सू० ३.३.१३) → त्यज् लृट् → त्यज् त → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → त्यज् स्य त → चोः कुः (पा०सू० ८.२.३०) → त्यक् स्य त → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → त्यक् ष्य त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → त्यक्ष्यते। सामान्यतस्तु त्यक्ष्यति इति रूपम्। यथा सोऽपि शोकसमाविष्टो ननु त्यक्ष्यति जीवितम् (वा०रा० २.६६.११) इति वाल्मीकिप्रयोगे। त्यज् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → त्यज् लृट् → त्यज् तिप् → त्यज् ति → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → त्यज् स्य ति → चोः कुः (पा०सू० ८.२.३०) → तयक् स्य ति → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → तयक् ष्य ति → त्यक्ष्यति।

[२२०] अधिश्रित्य इत्यध्याहार्यमिति शेषः। त्यज् → कर्मवत्कर्मणा तुल्यक्रियः (पा०सू० ३.१.८७) → भावकर्मणोः (पा०सू० १.३.१३) → लृट् शेषे च (पा०सू० ३.३.१३) → त्यज् लृट् → त्यज् त → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → त्यज् स्य त → चोः कुः (पा०सू० ८.२.३०) → तयक् स्य त → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → तयक् ष्य त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → त्यक्ष्यते।

॥ इत्ययोध्याकाण्डीयप्रयोगाणां विमर्शः ॥

इत्यध्यात्मरामायणेऽपाणिनीयप्रयोगाणांविमर्शनामके शोधप्रबन्धे तृतीयाध्याये प्रथमपरिच्छेदः।

॥ अथ तृतीयाध्याये द्वितीयः परिच्छेदः ॥

॥ अथारण्यकाण्डीयप्रयोगाणां विमर्शः ॥

## ३.८२ गच्छामहे

मुने गच्छामहे सर्वे मुनिमण्डलमण्डितम्।
विपिनं दण्डकं यत्र त्वमाज्ञातुमिहार्हसि॥

– अ०रा० ३.१.२

इह श्रीरामभद्रोऽत्रिमाज्ञां याचते। अत्र गच्छामहे इति प्रयोगोऽपि नाऽपाणिनीयः। यद्यपि परस्मैपदत्वादात्मनेपदं न गच्छामः[२२१] इति सर्वविदितं तथाऽपि सम् उपसर्गसंयोजने समो गम्यृच्छिभ्याम् (पा०सू० १.३.२९) इत्यनेनाऽत्मनेपदम्। लुप्तत्वात् समुपसर्गः न श्रूयते।[२२२] लडपि वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन। मुनि-मण्डलमाश्रित्यातिशीघ्रं सङ्गता भविष्यामः इति रामभद्रस्य तात्पर्यम्।[२२३]

[२२१] गमॢँ गतौ (धा०पा० ९८२) → गम् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमान-सामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → गम् लट् → गम् मस् → कर्तरि शप् (पा०सू० ३.१.६८) → गम् शप् मस् → गम् अ मस् → इषुगमियमां छः (पा०सू० ७.३.७७) → गछ् अ मस् → छे च (पा०सू० ६.१.७३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → गतुँक् छ् अ मस् → गत् छ् अ मस् → स्तोः श्चुना श्चुः (पा०सू० ८.४.४०) → गच् छ् अ मस् → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → गच् छ् आ मस् → ससजुषो रुः (पा०सू० ८.२.६६) → गच् छ् आ मरुँ → खरवसानयोर्विसर्जनीयः (पा०सू० ८.३.१५) → गच् छ् आ मः → गच्छामः।

[२२२] सम् गमॢँ गतौ (धा०पा० ९८२) → सम् गम् → समो गम्यृच्छिभ्याम् (पा०सू० १.३.२९) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → सम् गम् लट् → सम् गम् महिङ् → सम् गम् महि → कर्तरि शप् (पा०सू० ३.१.६८) → सम् गम् शप् महि → सम् गम् अ महि → इषुगमियमां छः (पा०सू० ७.३.७७) → सम् गछ् अ महि → छे च (पा०सू० ६.१.७३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → सम् गतुँक् छ् अ महि → सम् गत् छ् अ महि → स्तोः श्चुना श्चुः (पा०सू० ८.४.४०) → सम् गच् छ् अ महि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → सम् गच् छ् आ महि → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → सम् गच् छ् आ महे → विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) → गच् छ् आ महे → गच्छामहे।

[२२३] यद्वा कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेनात्मनेपदम्। ३५२तमे पृष्ठे ३.५६ यास्ये इति प्रयोगस्य विमर्शं पश्यन्तु।

## ३.८३ तारयिष्यामहे

तारयिष्यामहे युष्मान्वयमेव क्षणादिह।
ततो नावि समारोप्य सीतां राघवलक्ष्मणौ॥

– अ०रा० ३.१.८

अत्र कर्मव्यतिहार आत्मनेपदम्।[२२४] निखिलं जगत्संसारसागराद्भवान् तारयति किन्तु भवन्तमपि वयं सरितस्तारयिष्यामहे इति क्रियाव्यत्यय आत्मनेपदम्।[२२५]

## ३.८४ आस्ते

इत्येवं भाषमाणौ तौ जग्मतुः सार्धयोजनम्।
तत्रैका पुष्करिण्यास्ते कह्लारकुमुदोत्पलैः॥

– अ०रा० ३.१.१५

आस्त[२२६] इति प्रयोक्तव्ये स्मयोगे लङ्कारः।[२२७]

---

[२२४] कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन।

[२२५] तॄ प्लवनतरणयोः (धा०पा० ९६९) → तॄ → हेतुमति च (पा०सू० ३.१.२६) → तॄ णिच् → तॄ इ → अचो ञ्णिति (पा०सू० ७.२.११५) → ता इ → उरण् रपरः (पा०सू० १.१.५१) → तार् इ → तारि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → लृट् शेषे च (पा०सू० ३.३.१३) → तारि लृट् → तारि महिङ् → तारि महि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → तारि स्य महि → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → तारि इट् स्य महि → तारि इ स्य महि → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → तारे इ स्य महि → एचोऽयवायावः (पा०सू० ६.१.७८) → तारय् इ स्य महि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → तारय् इ स्या महि → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → तारय् इ स्या महे → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → तारय् इ ष्या महे → तारयिष्यामहे।

[२२६] आसँ उपवेशने (धा०पा० १०२१) → आस् → अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) → अनद्यतने लङ् (पा०सू० ३.२.१११) → आस् लङ् → आस् त → आडजादीनाम् (पा०सू० ६.४.७२) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → आट् आस् त → आ आस् त → कर्तरि शप् (पा०सू० ३.१.६८) → आ आस् शप् त → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → आ आस् त → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → आस् त → आस्त।

[२२७] स्म इत्यध्याहार्यमिति भावः। आसँ उपवेशने (धा०पा० १०२१) → आस् → अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) → लट् स्मे (पा०सू० ३.२.११८) → आस् लट् → आस् त → कर्तरि शप् (पा०सू० ३.१.६८) → आस् शप् त → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → आस् त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → आस् ते → आस्ते।

## ३.८५ पलायतम्

यदि जीवितुमिच्छाऽस्ति त्यक्त्वा सीतां निरायुधौ।
पलायतं न चेच्छीघ्रं भक्षयामि युवामहम्॥

– अ०रा० ३.१.२९

अनुदात्तेत्त्वलक्षणस्याऽत्मनेपदस्यानित्यत्वात्परस्मैपदे लोङ्कारे मध्यमपुरुषे द्विवचने थसस्तमादेशे पलायतम् ।[२२८]

## ३.८६ अभिदुद्रुवे

इत्युक्त्वा राक्षसः सीतामादातुमभिदुद्रुवे।
रामश्चिच्छेद तद्बाहू शरेण प्रहसन्निव॥

– अ०रा० ३.१.३०

अभिदुद्राव[२२९] इति प्रयोक्तव्ये अभिदुद्रुवे इति प्रयुक्तम्। अत्रापि क्रियाविनिमय एव

[२२८] अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४)। परा अयँ गतौ (धा०पा० ४७४) → परा अय् → अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → परा अय् लोट् → परा अय् थस् → कर्तरि शप् (पा०सू० ३.१.६८) → परा अय् शप् तस् → परा अय् अ तस् → तस्थस्थमिपां तान्तन्तामः (पा०सू० ३.४.१०१) → परा अय् अ तम् → उपसर्गस्यायतौ (पा०सू० ८.२.१९) → पला अय् अ तम् → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → पलाय् अ तम् → पलायतम्। सामान्यतस्तु पलायेथाम् इति रूपम्। यथा त्वरमाणौ पलायेथां न वां जीवितमाददे (वा०रा० ३.३.८) इति वाल्मीकिप्रयोगे। परा अयँ गतौ (धा०पा० ४७४) → परा अय् → अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) → लोट् च (पा०सू० ३.३.१६२) → परा अय् लोट् → परा अय् आथाम् → कर्तरि शप् (पा०सू० ३.१.६८) → परा अय् शप् आथाम् → परा अय् अ आथाम् → लोटो लङ्वत् (पा०सू० ३.४.८५) → ङिद्वत्त्वम् → आतो ङितः (पा०सू० ७.२.८१) → परा अय् अ इय् थाम् → लोपो व्योर्वलि (पा०सू० ६.१.६६) → परा अय् अ इ थाम् → आद्गुणः (पा०सू० ६.१.८७) → परा अय् ए थाम् → उपसर्गस्यायतौ (पा०सू० ८.२.१९) → पला अय् ए थाम् → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → पलाय् ए थाम् → पलायेथाम्।

[२२९] यथा वालिपुत्रं महावीर्यमभिदुद्राव वीर्यवान् (वा०रा० ६.७०.२) इति वाल्मीकिप्रयोगे। अभि द्रु गतौ (धा०पा० ९४५) → अभि द्रु → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → परोक्षे लिट् (पा०सू० ३.२.११५) → अभि द्रु लिट् → अभि द्रु तिप् → परस्मैपदानां णलतुसुस्थलथुसणल्वमाः (पा०सू० ३.४.८२) → अभि द्रु णल् → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → अभि द्रु द्रु अ → हलादिः शेषः (पा०सू० ७.४.६०) → अभि दु द्रु अ → अचो ञ्णिति (पा०सू० ७.२.११५) → अभि दु द्रौ अ → एचोऽयवायावः (पा०सू० ६.१.७८) → अभि दु द्राव् अ → अभिदुद्राव।

आत्मनेपदम्।[२३०] रामादृते स्पर्शस्य कस्यचिदप्यनधिकारत्वात्।

## ३.८७ उपवेशयत्

अभिगम्य सुसम्पूज्य विष्टरेषूपवेशयत्।
आतिथ्यमकरोत्तेषां कन्दमूलफलादिभिः॥

– अ०रा० ३.२.३

विश् धातुः (विशँ प्रवेशने धा०पा० १४२४) अत्र णिजन्तः। तस्य उपउपसर्गेण संयोजनम्। पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण (भा०पा०सू० २.२.१९, ६.१.१३५, ८.१.७०) इति नियमेनाडागम उपउपसर्गसंयोजने उपावेशयत्।[२३१] अत्र विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इत्यनेनाडागमस्य लोपः। आगमकार्यस्यानित्यत्वाद्वा।[२३२]

## ३.८८ व्रजामि

अद्य मत्तपसा सिद्धं यत्पुण्यं बहु विद्यते।
तत्सर्वं तव दास्यामि ततो मुक्तिं व्रजाम्यहं॥

– अ०रा० ३.२.५

[२३०] कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन। अभि द्रु गतौ (धा०पा० ९४५) → अभि द्रु → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → परोक्षे लिट् (पा०सू० ३.२.११५) → अभि द्रु लिट् → अभि द्रु त → लिटस्तझयोरेशिरेच् (पा०सू० ३.४.८१) → अभि द्रु एश् → अभि द्रु ए → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → अभि द्रु द्रु ए → हलादिः शेषः (पा०सू० ७.४.६०) → अभि दु द्रु ए → अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (पा०सू० ६.४.७७) → ङिच्च (पा०सू० १.१.५३) → अभि दु द्रुवँङ् ए → अभि दु द्रुव् ए → अभिदुद्रुवे। सार्वधातुकमपित् (पा०सू० १.२.४) इत्यनेन ङिद्वत्त्वम् ग्क्ङिति च (पा०सू० १.१.५) इत्यनेन च गुणनिषेधः।

[२३१] विश् → हेतुमति च (पा०सू० ३.१.२६) → विश् णिच् → विश् इ → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → वेश् इ → वेशि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा। उप वेशि → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → अनद्यतने लङ् (पा०सू० ३.२.१११) → उप वेशि लङ् → लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा०सू० ६.४.७१) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → उप अट् वेशि लङ् → उप अ वेशि लङ् → उप अ वेशि तिप् → उप अ वेशि ति → कर्तरि शप् (पा०सू० ३.१.६८) → उप अ वेशि शप् ति → उप अ वेशि अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → उप अ वेशे अ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → उप अ वेशय् अ ति → इतश्च (पा०सू० ३.४.१००) → उप अ वेशय् अ त् → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → उपा वेशय् अ त् → उपावेशयत्।

[२३२] आगमशास्त्रमनित्यम् (प०शे० ९३.२)।

वर्तमानसामीप्याल्लट्।[२३३] शीघ्रं मुक्तिं व्रजिष्यामि[२३४] इति शरभङ्गस्य तात्पर्यम्।

## ३.८९ बभूवुः

अद्य मे क्रतवः सर्वे बभूवुः सफलाः प्रभो।
दीर्घकालं मया तप्तमनन्यमतिना तपः।
तस्येह तपसो राम फलं तव यदर्चनम्॥

– अ०रा० ३.३.४३

शरभङ्गः प्रेमविह्वलः श्रीरामं दृष्ट्वा कथयति अद्य मे क्रतवः सफला अभूवन्। अभूवन्[२३५] इति प्रयोक्तव्ये बभूवुः इति परोक्षप्रयोगोऽकार्यः। तथा हि भूधातोः (भू सत्तायाम् धा०पा० १) भूवादयो धातवः (पा०सू० १.३.१) इत्यनेन धातुसञ्ज्ञायां परोक्षे लिट् (पा०सू० ३.२.११५) इत्यनेन लिङ्कारे तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासाथान्ध्वमिड्वहिमहिङ् (पा०सू० ३.४.७८) इत्यनेन प्रथमपुरुषबहुवचने झिप्रत्यये परस्मैपदानां णलतुसुस्थलथुसणल्वमाः (पा०सू० ३.४.८२) इत्यनेनोसादेशे भुवो वुग्लुङ्लिटोः (पा०सू० ६.४.८८) इत्यनेन वुगागमे लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) इत्यनेन द्वित्वे पूर्वोऽभ्यासः (पा०सू० ६.१.४) इत्यनेनाभ्याससञ्ज्ञायां हलादिः शेषः (पा०सू० ७.४.६०) इत्यनेनाऽदिहल्शेषे ह्रस्वः (पा०सू० ७.४.५९) इत्यनेन ह्रस्वे भवतेरः (पा०सू० ७.४.७३) इत्यनेनोकारस्याकारे अभ्यासे चर्च (पा०सू० ८.४.५४) इत्यनेन जश्त्वे

---

२३३ वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन। व्रजँ गतौ (धा०पा० २५३) → व्रज् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → व्रज् लट् → व्रज् मिप् → व्रज् मि → कर्तरि शप् (पा०सू० ३.१.६८) → व्रज् शप् मि → व्रज् अ मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → व्रज् आ मि → व्रजामि।

२३४ व्रजँ गतौ (धा०पा० २५३) → व्रज् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → व्रज् लृट् → व्रज् मिप् → व्रज् मि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → व्रज् स्य मि → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → व्रज् इट् स्य मि → व्रज् इ स्य मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → व्रज् इ स्या मि → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → व्रज् इ ष्या मि → व्रजिष्यामि।

२३५ भू सत्तायाम् (धा०पा० १) → भू → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लुङ् (पा०सू० ३.२.११०) → भू लङ् → भू झि → लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा०सू० ६.४.७१) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → अट् भू झि → अ भू झि → च्लि लुङि (पा०सू० ३.१.४३) → अ भू च्लि झि → च्लेः सिच् (पा०सू० ३.१.४४) → अ भू सिच् झि → गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु (पा०सू० २.४.७७) → अ भू झि → झोऽन्तः (पा०सू० ७.१.३) → अ भू अन्ति → भुवो वुग्लुङ्लिटोः (पा०सू० ६.४.८८) → अ भू वुँक् अन्ति → अ भू व् अन्ति → इतश्च (पा०सू० ३.४.१००) → अ भू व् अन्त् → संयोगान्तस्य लोपः (पा०सू० ८.२.२३) → अ भू व् अन् → अभूवन्।

रुत्वे विसर्गे च बभूवुः।[२३६] प्रेमविह्वलतया भगवतश्चाक्षुषप्रत्यक्षे वा षड्ढ प्रत्यक्षेषु सकल-विस्मृततया पारोक्ष्याल्लिड्प्रयोगः।

## ३.९० वत्स्ये

पञ्चवट्यामहं वत्स्ये तवैव प्रियकाम्यया।
मृगयायां कदाचित्तु प्रयाते लक्ष्मणेऽपि च॥

– अ०रा० ३.४.५

अत्र क्रियाविनिमय आत्मनेपदम्।[२३७]

## ३.९१ जागर्ति

आनीय प्रददौ रामसेवातत्परमानसः।
धनुर्बाणधरो नित्यं रात्रौ जागर्ति सर्वतः॥

– अ०रा० ३.४.१३

स्मयोगे लट्।[२३८]

---

[२३६] भू सत्तायाम् (धा०पा० १) → भू → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → परोक्षे लिट् (पा०सू० ३.२.११५) → (पा०सू० ३.२.११५) → भू लिट् → भू तिप् → परस्मैपदानां णलतुसुस्थलथुस-णल्वमाः (पा०सू० ३.४.८२) → भू उस् → भुवो वुग्लुङ्लिटोः (पा०सू० ६.४.८८) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → भूवुँक् अ → भूव् उस् → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → भूव् भूव् उस् → हलादिः शेषः (पा०सू० ७.४.६०) → भू भूव् उस् → ह्रस्वः (पा०सू० ७.४.५९) → भु भूव् उस् → भवतेरः (पा०सू० ७.४.७३) → भ भूव् उस् → अभ्यासे चर्च (पा०सू० ८.४.५४) → ब भूव् उस् → बभूवुस् → ससजुषो रुः (पा०सू० ८.२.६६) → रुत्वम् → बभूवुरुँ → अनुबन्धलोपः → बभूवुर् → खरवसानयोर्विसर्जनीयः (पा०सू० ८.३.१५) → बभूवुः।

[२३७] कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन। वसँ निवासे (धा०पा० १००४) → वस् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → लृट् शेषे च (पा०सू० ३.३.१३) → वस् लृट् → वस् इट् → वस् इ → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → वस् स्य इ → सः स्यार्धधातुके (पा०सू० ७.४.४९) → वत् स्य इ → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → वत् स्य ए → अतो गुणे (पा०सू० ६.१.९७) → वत् स्ये → वत्स्ये। सामान्यतस्तु वत्स्यामि इति रूपम्। यथा चतुर्दश हि वर्षाणि वत्स्यामि विजने वने (वा०रा० २.२०.२९) इति वाल्मीकिप्रयोगे। वसँ निवासे (धा०पा० १००४) → वस् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → वस् लृट् → वस् मिप् → वस् मि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → वस् स्य मि → सः स्यार्धधातुके (पा०सू० ७.४.४९) → वत् स्य मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → वत् स्या मि → वत्स्यामि।

[२३८] स्म इत्यध्याहार्यमिति भावः। जागृ निद्राक्षये (धा०पा० १०७२) → जागृ → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लट् स्मे (पा०सू० ३.२.११८) → जागृ लट् → जागृ तिप् → जागृ ति → कर्तरि शप् (पा०सू० ३.१.६८) → जागृ शप् ति → जागृ अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → उरण् रपरः (पा०सू० १.१.५१) → जागर् अ ति → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → जागर् ति → जागर्ति।

## ३.९२ सेवते

आनीय सलिलं नित्यं लक्ष्मणः प्रीतमानसः।
सेवतेऽहरहः प्रीत्या एवमासन् सुखं त्रयः॥

– अ०रा० ३.४.१५

स्मयोगे लट्।[२३९]

## ३.९३ सङ्गच्छावः

भ्रातुराज्ञां पुरस्कृत्य सङ्गच्छावोऽद्य मा चिरम्।
इत्याह राक्षसी घोरा लक्ष्मणं काममोहिता॥

– अ०रा० ३.५.१५

इह समो गम्यृच्छिभ्याम् (पा०सू० १.३.२९) इत्यनेनाऽत्मनेपदत्वात् सङ्गच्छावहे।[२४०] किन्तु अत्र शम् इति पृथक्पदम्। अर्थात् शं शान्तिं गच्छावः इति तात्पर्यम्।[२४१] तालव्य-शकारो लेखनप्रमादान्मुद्रणप्रमादाच्च दन्त्यो लिखितो हस्तलेखेषु पुस्तकेषु च।

---

[२३९] स्म इत्यध्याहार्यमिति भावः। षेवृँ सेवने (धा०पा० ५०१) → षेव् → धात्वादेः षः सः (पा०सू० ६.१.६४) → सेव् → अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) → लट् स्मे (पा०सू० ३.२.११८) → सेव् लट् → सेव् त → कर्तरि शप् (पा०सू० ३.१.६८) → सेव् शप् त → सेव् अ त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → सेव् अ ते → सेवते।

[२४०] सम् गमॢँ गतौ (धा०पा० ९८२) → सम् गम् → समो गम्यृच्छिभ्याम् (पा०सू० १.३.२९) → वर्तमाने लट् (पा०सू० ३.२.१२३) → सम् गम् लट् → सम् गम् वहिङ् → सम् गम् वहि → कर्तरि शप् (पा०सू० ३.१.६८) → सम् गम् शप् वहि → सम् गम् अ वहि → इषुगमियमां छः (पा०सू० ७.३.७७) → सम् गछ् अ वहि → छे च (पा०सू० ६.१.७३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → सम् गतुँक् छ् अ वहि → सम् गत् छ् अ वहि → स्तोः श्चुना श्चुः (पा०सू० ८.४.४०) → सम् गच् छ् अ वहि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → सम् गच् छ् आ वहि → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → सम् गच् छ् आ वहे → मोऽनुस्वारः (पा०सू० ८.३.२३) → सं गच् छ् आ वहे → वा पदान्तस्य (पा०सू० ८.४.५९) → सङ् गच् छ् आ वहे → सङ्गच्छावहे।

[२४१] गमॢँ गतौ (धा०पा० ९८२) → गम् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → गम् लट् → गम् वस् → कर्तरि शप् (पा०सू० ३.१.६८) → गम् शप् वस् → गम् अ वस् → इषुगमियमां छः (पा०सू० ७.३.७७) → गछ् अ वस् → छे च (पा०सू० ६.१.७३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → गतुँक् छ् अ वस् → गत् छ् अ वस् → स्तोः श्चुना श्चुः (पा०सू० ८.४.४०) → गच् छ् अ वस् → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → गच् छ् आ वस् → ससजुषो रुः (पा०सू० ८.२.६६) → गच् छ् आ वरुँ → खरवसानयोर्विसर्जनीयः (पा०सू० ८.३.१५) → गच् छ् आ वः → गच्छावः।

## ३.९४ अनुधावति

इत्युक्त्वा विकटाकरा जानकीमनुधावति।
ततो रामाज्ञया खड्गमादाय परिगृह्य ताम्॥

– अ०रा० ३.५.१९

इहापि स्मयोगे लट्।[२४२] एवमेवैतादृशेषु सर्वेषु प्रयोगेषूह्यम्।

## ३.९५ पास्ये

तयोस्तु रुधिरं पास्ये भक्षयैतौ सुदुर्मदौ।
नो चेत्प्राणान्परित्यज्य यास्यामि यमसादनम्॥

– अ०रा० ३.५.२५

अत्र कर्मविनिमयादात्मनेपदम्।[२४३] एवमन्यत्रापि विभाव्यम्।

## ३.९६ आनयिष्यामि

अतस्त्वया सहायेन गत्वा तत्प्राणवल्लभाम्।
आनयिष्यामि विपिने रहिते राघवेण ताम्॥

– अ०रा० ३.६.१२

यदि मारीच एवायं तदा हन्मि न संशयः।
मृगश्चेदानयिष्यामि सीताविश्रमहेतवे॥
गमिष्यामि मृगं बद्ध्वा ह्यानयिष्यामि सत्वरः।
त्वं प्रयत्नेन सन्तिष्ठ सीतासंरक्षणोद्यतः॥

– अ०रा० ३.७.१०–११

नीधातोः (णीञ् प्रापणे धा०पा० ९०१) अनिड्वाल्लृङ्कार उत्तमपुरुषैक-वचने सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) इत्यनेन गुणे अतो दीर्घो यञि (पा०सू० ७.३.१०१) इत्यनेन दीर्घे आदेशप्रत्यययोः (पा०सू० ८.३.५९) इत्यनेन षत्वे आनेष्यामि

---

२४२ स्म इत्यध्याहार्यमिति भावः। अनु धावुँ गतिशुद्ध्योः (धा०पा० ६०१) → अनु धाव् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लट् स्मे (पा०सू० ३.२.११८) → अनु धाव् लट् → अनु धाव् तिप् → अनु धाव् ति → कर्तरि शप् (पा०सू० ३.१.६८) → अनु धाव् शप् ति → अनु धाव् अ ति → अनु धावति।

२४३ पा पाने (धा०पा० ९२५) → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → लृट् शेषे च (पा०सू० ३.३.१३) → पा लृँट् → पा इट् → पा इ → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → पा स्य इ → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → पा स्य ए → अतो गुणे (पा०सू० ६.१.९७) → पा स्ये → पास्ये।

इति पाणिनीयम्।[२४४] परम् आनीयत इत्यानयः।[२४५] आनयमाचरिष्याम्यानयिष्यामि इत्यानयधातोर्लृटीद्वम्भवः।[२४६]

## ३.९७ सन्तिष्ठ

गमिष्यामि मृगं बद्ध्वा ह्यानयिष्यामि सत्वरः।
त्वं प्रयत्नेन सन्तिष्ठ सीतासंरक्षणोद्यतः॥

– अ०रा० ३.७.११

समवप्रविभ्यः स्थः (पा०सू० १.३.२२) इत्यनेनाऽत्मनेपदं प्राप्तम्। सन्तिष्ठस्व[२४७] इति

[२४४] आ णीञ् → णी → णो नः (पा०सू० ६.१.६५) → आ नी → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → आ नी लृँट् → आ नी मिप् → आ नी मि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → आ नी स्य मि → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → आ ने स्य मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → आ ने स्या मि → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → आ ने ष्या मि → आनेष्यामि।

[२४५] एरच् (पा०सू० ३.३.५६) इत्यनेन भावेऽचि। आङ् णीञ् प्रापणे धा०पा० ९०१) → आ णी → णो नः (पा०सू० ६.१.६५) → आ नी → एरच् (पा०सू० ३.३.५६) → आ नी अच् → आ नी अ → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → आ ने अच् → एचोऽयवायावः (पा०सू० ६.१.७८) → आ नय् अ → आनय → विभक्तिकार्यम् → आनयः।

[२४६] प्रयोगस्यास्य सिद्धिः कृष्णिष्यति (बा०म० २६६५) इतिवत्। आनय → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → आनय क्विँप् → आनय व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → आनय → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → आनय लृट् → आनय मिप् → आनय मि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → आनय स्य मि → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → आनय इट् स्य मि → आनय इ स्य मि → अतो लोपः (पा०सू० ६.४.४८) → आनय् इ स्य मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → आनय् इ स्या मि → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → आनय् इ ष्या मि → आनयिष्यामि। यद्वा सप्तमाध्याये आनय इवाऽचरिष्यामि आनयिष्यामि। आनयतीत्यानयः। नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन कर्तर्यच्। नयतीति नयः इतिवत्। यथा विष्णुसहस्रनामस्तोत्रे रामो विरामो विरतो मार्गो नेयो नयोऽनयः (वि०स०ना० ५६)। अत्र सत्यभाष्ये सत्यदेववासिष्ठाः – ‘णीञ् प्रापणे’ धातोरच्प्रत्ययो ‘नयतीति नयः’ सर्वस्य नेतेत्यर्थः (वि०स०ना० स०भा० ५६)। नयशब्दो नेतरि इति शब्दकल्पद्रुमवाचस्पत्यौ च। एवं तर्हि आनय इवाऽचरिष्यामि आनयिष्यामि। सिद्धिः पूर्ववत्। रामो न गच्छति न तिष्ठति नानुशोचत्याकाङ्क्षते त्यजति नो न करोति किञ्चित् (अ०रा० १.१.४३) इत्यस्मिन्नेव ग्रन्थ उक्तत्वात्।

[२४७] सम् ष्ठा गतिनिवृत्तौ (धा०पा० ९२८) → धात्वादेः षः सः (पा०सू० ६.१.६४) → निमित्तापाये नैमित्तिकस्याप्यपायः → सम् स्था → समवप्रविभ्यः स्थः (पा०सू० १.३.२२) → लोट् च (पा०सू० ३.३.१६२) → सम् स्था लोट् → सम् स्था थास् → कर्तरि शप् (पा०सू० ३.१.६८) → सम् स्था शप् थास् → सम् स्था अ थास् → पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः (पा०सू० ७.३.७८) → सम् तिष्ठ अ थास् → थासस्से (पा०सू० ३.४.८०) → सम् तिष्ठ अ से → सवाभ्यां वामौ (पा०सू० ३.४.९१) → सम् तिष्ठ अ स् व → मोऽनुस्वारः (पा०सू० ८.३.२३) → सं तिष्ठ अ स् व → वा पदान्तस्य (पा०सू० ८.४.५९) → सन् तिष्ठ अ स् व → सन्तिष्ठस्व।

प्रयोगः पाणिनीयः। किन्तु तिष्ठ इति यावत्संसाध्य[२४८] पादपूर्त्यर्थं सम् इति निपातः प्रयुक्तः। अतो नाऽत्मनेपदम्। यथा ह हि नु ननु खलु किल हन्त इत्यादयः।[२४९]

## ३.९८ विश्रमस्व

कन्दमूलफलादीनि दत्त्वा स्वागतमब्रवीत्।
मुने भुङ्क्ष्व फलादीनि विश्रमस्व यथासुखम्॥

– अ०रा० ३.७.३९

दिवादित्वात् विश्राम्य इति प्रयोगः पाणिनीयो दीर्घे श्यनि परस्मैपदे।[२५०] अत्र

[२४८] ष्ठा गतिनिवृत्तौ (धा०पा० ९२८) → धात्वादेः षः सः (पा०सू० ६.१.६४) → निमित्तापाये नैमित्तिकस्याप्यपायः → स्था → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → स्था लोट् → स्था सिप् → स्था सि → कर्तरि शप् (पा०सू० ३.१.६८) → स्था शप् सि → स्था अ सि → पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छ-पश्यर्च्छधौशीयसीदाः (पा०सू० ७.३.७८) → तिष्ठ् अ सि → सेर्ह्यपिच्च (पा०सू० ३.४.८७) → तिष्ठ् अ हि → अतो हेः (पा०सू० ६.४.१०५) → तिष्ठ् अ → तिष्ठ।

[२४९] यद्वा सन् इति शत्रन्तं पृथक्पदम्। असँ भुवि (धा०पा० १०६५) → अस् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → अस् लट् → लटः शतृशानचावप्रथमासमानाधिकरणे (पा०सू० ३.२.१२४) → अस् शतृँ → अस् अत् → कर्तरि शप् (पा०सू० ३.१.६८) → अस् शप् अत् → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → अस् अत् → श्नसोरल्लोपः (पा०सू० ६.४.१११) → स् अत् → सत् → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपदिकसञ्ज्ञा → विभक्तिकार्यम् → सत् सुँ → सत् स् → उगिदचां सर्वनामस्थानेऽधातोः (पा०सू० ७.१.७०) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → स नुँम् त् स् → स न् त् स् → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → स न् त् → संयोगान्तस्य लोपः (पा०सू० ८.२.२३) → स न् → सन्। शतुः तिङ्शित्सार्वधातुकम् (पा०सू० ३.४.११३) इत्यनेन सार्वधातुकत्वात् अस्तेर्भूः (पा०सू० २.४.५२) इत्यस्याप्रवृत्तिः। हे लक्ष्मण त्वं प्रयत्नेन सीतासंरक्षणोद्यतः सन् तिष्ठ इति श्रीरामतात्पर्यम्।

[२५०] वि श्रमुँ तपसि खेदे च (धा०पा० १२०४) → वि श्रम् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → वि श्रम् लोट् → वि श्रम् सिप् → वि श्रम् सि → दिवादिभ्यः श्यन् (पा०सू० ३.१.६९) → वि श्रम् श्यन् सि → वि श्रम् य सि → शमामष्टानां दीर्घः श्यनि (पा०सू० ७.३.७४) → वि श्राम् य सि → सेर्ह्यपिच्च (पा०सू० ३.४.८७) → वि श्राम् य हि → अतो हेः (पा०सू० ६.४.१०५) → विश्राम्य।

त्रयोऽप्यंशा विमर्शकोटिमञ्चन्ति।[२५१] विश्रमणं विश्रमः।[२५२] विश्रममाचरति विश्रमति।[२५३] तदेव लोटि विश्रम।[२५४] हे स्व आत्मीय विश्रम।

## ३.९९ भक्षन्तु

शाद्वले प्राक्षिपद्रामः पृथक्पृथगनेकधा।
भक्षन्तु पक्षिणः सर्वे तृप्तो भवतु पक्षिराट्॥

– अ०रा० ३.८.३९

णिजन्तप्रसिद्धोऽयं भक्षयन्तु इति।[२५५] किन्तु णिजन्ताः शुद्धा अपि भवन्त्यतो

---

[२५१] यतो ह्यत्र दीर्घाभावः श्यन्नभाव आत्मनेपदञ्च।

[२५२] वि श्रमुँ तपसि खेदे च (धा०पा० १२०४) → भावे (पा०सू० ३.३.१८) → वि श्रम् घञ् → वि श्रम् अ → अत उपधायाः (पा०सू० ७.२.११६) → वृद्धिप्राप्तिः → नोदात्तोपदेशस्य मान्तस्यानाचमेः (पा०सू० ७.३.३४) → वृद्धिनिषेधः → वि श्रम् अ → विश्रम → विभक्तिकार्यम् → विश्रमः।

[२५३] विश्रम → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → विश्रम क्विँप् → विश्रम व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → विश्रम → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → विश्रम लट् → विश्रम तिप् → विश्रम ति → कर्तरि शप् (पा०सू० ३.१.६८) → विश्रम शप् ति → विश्रम अ ति → अतो गुणे (पा०सू० ६.१.९७) → विश्रम ति → विश्रमति।

[२५४] विश्रम → धातुसञ्ज्ञा (पूर्ववत्) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → विश्रम लोट् → विश्रम सिप् → विश्रम सि → कर्तरि शप् (पा०सू० ३.१.६८) → विश्रम शप् सि → विश्रम अ सि → अतो गुणे (पा०सू० ६.१.९७) → विश्रम सि → सेर्ह्यपिच्च (पा०सू० ३.४.८७) → विश्रम हि → अतो हेः (पा०सू० ६.४.१०५) → विश्रम।

[२५५] भक्षँ अदने (धा०पा० १५५७) (भ्लक्षँ/भक्षँ इति माधवीयाधातुवृत्तिः, भक्षँ इति मैत्रेयः) → भक्ष् → सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् (पा०सू० ३.१.२५) → भक्ष् णिच् → भक्ष् इ → भक्षि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → भक्षि लोट् → भक्षि झि → कर्तरि शप् (पा०सू० ३.१.६८) → भक्षि शप् झि → भक्षि अ झि → झोऽन्तः (पा०सू० ७.१.३) → भक्षि अ अन्ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → भक्षे अ अन्ति → एचोऽयवायावः (पा०सू० ६.१.७८) → भक्षय् अ अन्ति → अतो गुणे (पा०सू० ६.१.९७) → भक्षय् अन्ति → एरुः (पा०सू० ३.४.८६) → भक्षय् अन्तु → भक्षयन्तु।

नापाणिनीयता।[२५६]

॥ इत्यरण्यकाण्डीयप्रयोगाणां विमर्शः ॥

॥ अथ किष्किन्धाकाण्डीयप्रयोगाणां विमर्शः ॥

## ३.१०० आकाङ्क्षे

दाराः पुत्रा धनं राज्यं सर्वं त्वन्मायया कृतम्।
अतोऽहं देवदेवेश नाकाङ्क्षेऽन्यत्प्रसीद मे॥

– अ०रा० ४.१.७८

आकाङ्क्षे इत्यत्र परस्मैपदेन भवितव्यम्। धातोः परस्मैपदीयत्वात्। अतः आकाङ्क्षामि इति पाणिनीयम्।[२५७] आकाङ्क्षे इति तु कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इति सूत्रेणाऽत्मनेपदम्।[२५८] कर्मव्यतिहारो नाम क्रियाविनिमयः। अन्यकरणीय-कार्यस्यान्येन सम्पादनम्। यथा कौमुद्यां क्रियाविनिमये द्योत्ये कर्तर्यात्मनेपदं स्यात् (वै०सि०कौ० २६८०)। कृतभगवद्दर्शनस्यान्यत्काङ्क्षणं स्पष्टं क्रियाविनिमयः। यद्वा

---

२५६ भक्षँ अदने (धा०पा० १५५७) (भ्लक्षँ/भक्षँ इति माधवीयाधातुवृत्तिः, भक्षँ इति मैत्रेयः) → भक्ष् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → भक्ष् लोट् → भक्ष् झि → कर्तरि शप् (पा०सू० ३.१.६८) → भक्ष् शप् झि → भक्ष् अ झि → झोऽन्तः (पा०सू० ७.१.३) → भक्ष् अ अन्ति → अतो गुणे (पा०सू० ६.१.९७) → भक्ष् अन्ति → एरुः (पा०सू० ३.४.८६) → भक्ष् अन्तु → भक्षन्तु। यद्वा भक्षयन्तीति भक्षाः। नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन कर्तरि पचाद्यचि णेरनिटि (पा०सू० ६.४.५१) इत्यनेन णिलोपे विभक्तिकार्ये। भक्षा इवाऽचरन्तु भक्षन्तु। भक्ष → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → भक्ष क्विँप् → भक्ष व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → भक्ष → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → भक्ष लोट् → भक्ष झि → कर्तरि शप् (पा०सू० ३.१.६८) → भक्ष शप् झि → भक्ष अ झि → झोऽन्तः (पा०सू० ७.१.३) → भक्ष अ अन्ति → अतो गुणे (पा०सू० ६.१.९७) → भक्ष अन्ति → अतो गुणे (पा०सू० ६.१.९७) → भक्षन्ति → एरुः (पा०सू० ३.४.८६) → भक्षन्तु।

२५७ आ काक्षिँ काङ्क्षायाम् (धा०पा० ६६७) → आ काक्ष् → इदितो नुम् धातोः (पा०सू० ७.१.५८) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → आ का नुँम् क्ष् → आ कान् क्ष् → नश्चापदान्तस्य झलि (पा०सू० ८.३.२४) → आ कांक्ष् → अनुस्वारस्य ययि परसवर्णः (पा०सू० ८.४.५८) → आ काङ्क्ष् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → आ काङ्क्ष् लट् → आ काङ्क्ष् मिप् → आ काङ्क्ष् मि → कर्तरि शप् (पा०सू० ३.१.६८) → आ काङ्क्ष् शप् मि → आ काङ्क्ष् अ मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → आ काङ्क्ष् आ मि → आकाङ्क्षामि।

२५८ आ काङ्क्ष् (पूर्ववत्) → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → वर्तमाने लट् (पा०सू० ३.२.१२३) → आ काङ्क्ष् लट् → आ काङ्क्ष् इट् → आ काङ्क्ष् इ → कर्तरि शप् (पा०सू० ३.१.६८) → आ काङ्क्ष् शप् इ → आ काङ्क्ष् अ इ → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → आ काङ्क्ष् अ ए → अतो गुणे (पा०सू० ६.१.९७) → आ काङ्क्ष् ए → आकाङ्क्षे।

आकाङ्क्षणमाकाङ्क्षः पचाद्यज्भावे।[२५९] तस्मिन् आकाङ्क्षे। विषयत्वात्सप्तमी। ममाऽकाङ्क्षण इच्छायामन्यन्न। यद्वा आकाङ्क्षणमाकाङ्क्षा।[२६०] आकाङ्क्षाऽस्त्यस्येत्याकाङ्क्षम्। मनः। अर्शआदित्वादच्।[२६१] तस्मिन् आकाङ्क्षे त्वद्दर्शनेच्छावति मे मनसि नान्यत्किञ्चित्।

## ३.१०१ रक्षामहे

चतुर्द्वारकपाटादीन् बद्ध्वा रक्षामहे पुरीम्।
वानराणां तु राजानमङ्गदं कुरु भामिनि॥

– अ०रा० ४.३.३

इहाऽपि कर्मव्यत्ययादात्मनेपदम्।[२६२] यद्वा हे इति पृथक्पदम्। हे तारे वयं नगरीं रक्षाम इति प्रार्थनायां लोट्। सम्प्रश्ने वा। लोट् च (पा०सू० ३.३.१६२) इत्यनेन।[२६३]

---

[२५९] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन। बाहुलकाद्भावे।

[२६०] आ काङ्क्ष् (पूर्ववत्) → गुरोश्च हलः (पा०सू० ३.३.१०३) → आ काङ्क्ष् अ → अजाद्यतष्टाप् (पा०सू० ४.१.४) → आ काङ्क्ष् अ टाप् → आ काङ्क्ष् अ आ → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → आ काङ्क्ष् आ → आकाङ्क्षा → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपदिकसञ्ज्ञा → विभक्तिकार्यम् → आकाङ्क्षा सुँ → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → आकाङ्क्षा। अथ दोहदम्। इच्छा काङ्क्षा स्पृहेहा तृड्वाञ्छा लिप्सा मनोरथः॥ कामोऽभिलाषस्तर्षश्च सोऽत्यर्थं लालसा द्वयोः। (अ०को० १.७.२७–२८) इत्यमरः।

[२६१] अर्शआदिभ्योऽच् (पा०सू० ५.२.१२७) इत्यनेन। आकाङ्क्षा → अर्शआदिभ्योऽच् (पा०सू० ५.२.१२७) → आकाङ्क्षा अच् → आकाङ्क्षा अ → यचि भम् (पा०सू० १.४.१८) → भसञ्ज्ञा → यस्येति च (पा०सू० ६.४.१४८) → आकाङ्क्ष् अ → आकाङ्क्ष → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपदिकसञ्ज्ञा → विभक्तिकार्यम् → आकाङ्क्ष सुँ → अतोऽम् (पा०सू० ७.१.२४) → आकाङ्क्ष अम् → अमि पूर्वः (पा०सू० ६.१.१०७) → आकाङ्क्षम्।

[२६२] कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन। पुरीरक्षणं सैन्यवानराणां कर्म न तु सर्वेषां वानराणाम्। अत्र सर्वे वानराः (दुद्रुवुर्वानराः सर्वे किष्किन्धां भयविह्वलाः अ०रा० ४.३.१) बाला वृद्धा विकलाङ्गा अपि रक्षाकर्म कुर्वन्तीति कर्मव्यतिहारः। रक्षँ पालने (धा०पा० ६५८) → रक्ष् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → (पा०सू० ३.३.१३) → वर्तमाने लट् (पा०सू० ३.२.१२३) → रक्ष् लँट् → रक्ष् महिङ् → रक्ष् महि → कर्तरि शप् (पा०सू० ३.१.६८) → रक्ष् शप् महि → रक्ष् अ महि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → रक्ष् आ महि → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → रक्ष् आ महे → रक्षामहे।

[२६३] रक्षँ पालने (धा०पा० ६५८) → रक्ष् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → रक्ष् लोट् → रक्ष् मस् → कर्तरि शप् (पा०सू० ३.१.६८) → रक्ष् शप् मस् → रक्ष् अ मस् → आडुत्तमस्य पिच्च (पा०सू० ३.४.९२) → रक्ष् अ आट् मस् → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → रक्ष् आ मस् → लोटो लङ्वत् (पा०सू० ३.४.८५) → ङिद्वत्त्वम् → नित्यं ङितः → रक्ष् आ म → रक्षाम।

## ३.१०२ लिप्यसे

ध्यात्वा मद्रूपमनिशमालोचय मयोदितम्।
प्रवाहपतितं कार्यं कुर्वत्यपि न लिप्यसे॥

– अ०रा० ४.३.३५

वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेनाऽसन्नभविष्यत्काले वर्तमानम्।[२६४]

## ३.१०३ अनुसेविरे

चरन्तं परमात्मानं ज्ञात्वा सिद्धगणा भुवि।
मृगपक्षिगणा भूत्वा राममेवानुसेविरे॥

– अ०रा० ४.४.५

लिङ्कारप्रयोगात् अनुसिषेविरे[२६५] इति प्रयोक्तव्ये सिलोपाच्च सिद्धम् अनुसेविरे इति। अर्थात् विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इत्यनेनाऽदेर्हलोऽचश्च लोपे[२६६] अनुसेविरे इति। यद्वा अनुसेवां कृतवन्तः इति भूतकाल औणादिके डिरच् प्रत्यये भावे सप्तम्यन्ते च अनुसेविरे।[२६७] यद्वा अनुसेवनमनुसेवा।[२६८] अनुसेवामाचरत्यनु-

---

[२६४] लिपँ उपदेहे (धा०पा० १४३३) → लिप् → भावकर्मणोः (पा०सू० १.३.१३) → वर्तमान-सामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → लिप् लट् → लिप् थास् → सार्वधातुके यक् (पा०सू० ३.१.६७) → लिप् यक् थास् → लिप् य थास् → क्ङिति च (पा०सू० १.१.५) → लघूपधगुणनिषेधः → लिप् य थास् → थासस्से (पा०सू० ३.४.८०) → लिप् य से → लिप्यसे।

[२६५] अनु षेवृँ सेवने (धा०पा० ५०१) → अनु षेव् → धात्वादेः षः सः (पा०सू० ६.१.६४) → अनु सेव् → अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) → परोक्षे लिट् (पा०सू० ३.२.११५) → अनु सेव् लिट् → अनु सेव् झ → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → अनु सेव् सेव् झ → हलादिः शेषः (पा०सू० ७.४.६०) → अनु से सेव् झ → ह्रस्वः (पा०सू० ७.४.५९) → एच इग्घ्रस्वादेशे (पा०सू० १.१.४८) → अनु सि सेव् झ → लिटस्तझयोरेशिरेच् (पा०सू० ३.४.८१) → अनु सि सेव् इरेच् → अनु सि सेव् इरे → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → अनु सि षेव् इरे → अनुसिषेविरे।

[२६६] बाहुलकादपदस्यापि लोप इति शेषः।

[२६७] चेरुः इति चाध्याहार्यम्। कार्याद्विद्यादनूबन्धम् (भा०पा०सू० ३.३.१) केचिदविहिता अप्यूह्याः (वै०सि०कौ० ३१६९) इत्यनुसारमूह्योऽयमविहितो डिरच् प्रत्ययः। अनुसेवा → उणादयो बहुलम् (पा०सू० ३.३.१) → अनुसेवा डिरच् → अनुसेवा इर → डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् (वा० ६.४.१४३) → अनुसेव् इर → अनुसेविर → कृत्तद्धितसमासाश्च (पा०सू० १.२.४६) → प्रातिपदिक-सञ्ज्ञा → विभक्तिकार्यम् → अनुसेविर ङि → अनुसेविर इ → आद्गुणः (पा०सू० ६.१.८७) → अनुसेविरे।

[२६८] अनु पूर्वकात् षेवृँ सेवने (धा०पा० ५०१) धातोः गुरोश्च हलः (पा०सू० ३.३.१०३) इत्यनेन भावे स्त्रियां अप्रत्यये ततश्च अजाद्यतष्टाप् (पा०सू० ४.१.४) इत्यनेन टापि विभक्तिकार्ये।

सेवयति।[२६९] पुनः अनुसेव्यत[२७०] इति अनुसेव् हलन्तनपुंसकलिङ्गे।[२७१] लिङ्कारे इण् धातोः (इण् गतौ धा०पा० १०४५) कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेनाऽत्मनेपदम्। लिटस्तझयोरेशिरेच् (पा०सू० ३.४.८१) इत्यनेन इरेच् प्रत्यये ईयिरे।[२७२] विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इत्यनेन धात्विकारलोपे[२७३] इरे। अनुसेव् इरे इति अनुसेविरे।

## ३.१०४ समारभेत्

किं पुनर्भक्ष्यभोज्यादि गन्धपुष्पाक्षतादिकम्।
पूजाद्रव्याणि सर्वाणि सम्पाद्यैवं समारभेत्॥

– अ०रा० ४.४.२०

---

[२६९] अनुसेवा → तत्करोति तदाचष्टे (धा०पा० ग०सू० १८७) → अनुसेवा णिच् → अनुसेवा इ → णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरार्थम् (वा० ६.४.४८) → अनुसेव् इ → अनुसेवि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → अनुसेवि तिप् → अनुसेवि ति → कर्तरि शप् (पा०सू० ३.१.६८) → अनुसेवि शप् ति → अनुसेवि अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → अनुसेवे अ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → अनुसेवय् अ ति → अनुसेवयति।

[२७०] अनुसेवि → धातुसञ्ज्ञा (पूर्ववत्) → भावकर्मणोः (पा०सू० १.३.१३) → वर्तमाने लट् (पा०सू० ३.२.१२३) → अनुसेवि लट् → अनुसेवि त → सार्वधातुके यक् (पा०सू० ३.१.६७) → अनुसेवि यक् त → अनुसेवि य त → णेरनिटि (पा०सू० ६.४.५१) → अनुसेव् य त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → अनुसेव् य ते → अनुसेव्यते।

[२७१] अनुसेविधातोः सम्पदादिभ्यः क्विप् (वा० ३.३.१०८) इत्यनेन भावे क्विपि णेरनिटि (पा०सू० ६.४.५१) इति णिलोपे। बाहुलकान्नपुंसकलिङ्गम्।

[२७२] इण् गतौ (धा०पा० १०४५) → इ → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → परोक्षे लिट् (पा०सू० ३.२.११५) → इ लिट् → इ झ → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → इ इ झ → लिटस्तझयोरेशिरेच् (पा०सू० ३.४.८१) → इ इ इरेच् → इ इ इरे → असंयोगाल्लिट् कित् (पा०सू० १.२.५) → दीर्घ इणः किति (पा०सू० ७.४.६९) → ई इ इरे → इणो यण् (पा०सू० ६.४.८१) → ई य् इरे → ईयिरे।

[२७३] बाहुलकादपदस्यापि लोप इति शेषः। धातोरिकारौ धात्विकारौ तयोर्लोपः धात्विकारलोपस्तस्मिन् धात्विकारलोपे।

समापूर्वकात् रभ् धातोः (रभँ राभस्ये धा०पा० ९७४) विधिलिङि समारभेत[२७४] इति प्रयोक्तव्ये समारभेत् इति प्रयुक्तम्। समारभत इति समारभः। पचाद्यच्।[२७५] समारभ इवाचरेत् इति विधिलिङि भवेत् इव।[२७६]

## ३.१०५ प्रकारयेत्

दशावरणपूजां वै ह्यागमोक्तां प्रकारयेत्।
नीराजनैर्धूपदीपैर्नैवेद्यैर्बहुविस्तरैः॥

– अ०रा० ४.४.२९

[२७४] सम् आङ् रभँ राभस्ये (धा०पा० ९७४) → सम् आ रभ् → अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) → विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (पा०सू० ३.३.१६१) → सम् आ रभ् लिङ् → सम् आ रभ् त → कर्तरि शप् (पा०सू० ३.१.६८) → समारभ शप् त → समारभ अ त → अतो गुणे (पा०सू० ६.१.९७) → समारभ त → यासुट् परस्मैपदेषूदात्तो ङिच्च (पा०सू० ३.४.१०३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → समारभ यासुँट् त → समारभ यास् त → सुट् तिथोः (पा०सू० ३.४.१०७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → समारभ यास् सुँट् त → समारभ यास् स् त → लिङः सलोपोऽनन्त्यस्य (पा०सू० ७.२.७९) → समारभ या त → अतो येयः (पा०सू० ७.२.८०) → समारभ इय् त → लोपो व्योर्वलि (पा०सू० ६.१.६६) → समारभ इ त → आद्गुणः (पा०सू० ६.१.८७) → समारभे त → समारभेत।

[२७५] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन।

[२७६] समारभ → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → समारभ क्विँप् → समारभ व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → समारभ → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (पा०सू० ३.३.१६१) → समारभ लिङ → समारभ तिप् → समारभ ति → कर्तरि शप् (पा०सू० ३.१.६८) → समारभ शप् ति → समारभ अ ति → अतो गुणे (पा०सू० ६.१.९७) → समारभ ति → यासुट् परस्मैपदेषूदात्तो ङिच्च (पा०सू० ३.४.१०३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → समारभ यासुँट् ति → समारभ यास् ति → सुट् तिथोः (पा०सू० ३.४.१०७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → समारभ यास् सुँट् ति → समारभ यास् स् ति → लिङः सलोपोऽनन्त्यस्य (पा०सू० ७.२.७९) → समारभ या ति →अतो येयः (पा०सू० ७.२.८०) → समारभ इय् ति → लोपो व्योर्वलि (पा०सू० ६.१.६६) → समारभ इ ति → आद्गुणः (पा०सू० ६.१.८७) → समारभे ति → इतश्च (पा०सू० ३.४.१००) → समारभे त् → समारभेत्। यद्वा अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) इत्यपि समाधानम्।

प्रपूर्वकात् कृधातोः (डुकृञ् करणे धा०पा० १४७२) विधिलिङि प्रकुर्यात्[२७७] इति प्रयोक्तव्ये प्रकारयेत् इति प्रयुक्तम्। प्रकारमाचक्षीत इति प्रकारयेत्। आचक्षाण-णिजन्ताद्विधिलिङ्।[२७८]

## ३.१०६ हन्यसे

करोमीति प्रतिज्ञाय सीतायाः परिमार्गणम्।
न करोषि कृतघ्नस्त्वं हन्यसे वालिवद्द्रुतम्॥

– अ०रा० ४.४.४८

शीघ्रताबोधनार्थं वर्तमानसामीप्ये लट्।[२७९]

---

[२७७] प्र डुकृञ् करणे (धा०पा० १४७२) → प्र कृ → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (पा०सू० ३.३.१६१) → प्र कृ लिङ् → प्र कृ तिप् → प्र कृ ति → तनादिकृञ्भ्य उः (पा०सू० ३.१.७९) → प्र कृ उ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → उरण् रपरः (पा०सू० १.१.५१) → प्र कर् उ ति → यासुट् परस्मैपदेषूदात्तो ङिच्च (पा०सू० ३.४.१०३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → प्र कर् उ यासुँट् ति → प्र कर् उ यास् ति → सुट् तिथोः (पा०सू० ३.४.१०७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → प्र कर् उ यास् सुँट् ति → प्र कर् उ यास् स् ति → लिङः सलोपोऽनन्त्यस्य (पा०सू० ७.२.७९) → प्र कर् उ या ति → अत उत्सार्वधातुके (पा०सू० ६.४.११०) → प्र कुर् उ या ति → ये च (पा०सू० ६.४.१०९) → प्र कुर् या ति → इतश्च (पा०सू० ३.४.१००) → प्र कुर् या त् → प्रकुर्यात्।

[२७८] अत्र हेतुमण्णिज्न। अर्थानुपपत्तेः। प्रकार → तत्करोति तदाचष्टे (धा०पा० ग०सू० १८७) → प्रकार णिच् → प्रकार इ → णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरार्थम् (वा० ६.४.४८) → प्रकार् इ → प्रकारि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (पा०सू० ३.३.१६१) → प्रकारि लिङ → प्रकारि तिप् → प्रकारि ति → कर्तरि शप् (पा०सू० ३.१.६८) → प्रकारि शप् ति → प्रकारि अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → प्रकारे अ ति → यासुट् परस्मैपदेषूदात्तो ङिच्च (पा०सू० ३.४.१०३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → प्रकारे अ यासुँट् ति → प्रकारे अ यास् ति → सुट् तिथोः (पा०सू० ३.४.१०७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → प्रकारे अ यास् सुँट् ति → प्रकारे अ यास् स् ति → लिङः सलोपोऽनन्त्यस्य (पा०सू० ७.२.७९) → प्रकारे अ या ति → अतो येयः (पा०सू० ७.२.८०) → प्रकारे अ इय् ति → लोपो व्योर्वलि (पा०सू० ६.१.६६) → प्रकारे अ इ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → प्रकारय् अ इ ति → आद्गुणः (पा०सू० ६.१.८७) → प्रकारय् ए ति → इतश्च (पा०सू० ३.४.१००) → प्रकारय् ए त् → प्रकारयेत्।

[२७९] वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन। हनँ हिंसागत्योः (धा०पा० १०१२) → हन् → भावकर्मणोः (पा०सू० १.३.१३) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → हन् लट् → हन् थास् → सार्वधातुके यक् (पा०सू० ३.१.६७) → हन् यक् थास् → हन् य थास् → थासस्से (पा०सू० ३.४.८०) → हन् य से → हन्यसे।

## ३.१०७ वधयिष्यति

सुग्रीवः स्वयमागत्य सर्ववानरयूथपैः।
वधयिष्यति दैत्यौघान् रावणं च हनिष्यति॥

– अ०रा० ४.५.४७

वधमाचरन्तीति वधन्ति।[२८०] तान् प्रेरयति वधयति।[२८१] तद्भविष्यत्काले वधयिष्यति।[२८२] यद्वा वध् इति स्वतन्त्रश्चौरादिको धातुः। तस्माल्लृटि वधयिष्यति। मितां ह्रस्वः (पा०सू० ६.४.९२) इति ह्रस्वः।[२८३] यद्वा अयनमय्। भावे क्विप्।[२८४] वधस्य अय् इति वधय् शकन्ध्वादित्वात्पररूपे।[२८५] इषुँ इच्छायाम् (धा०पा० १३५१) दिवादिः।

---

[२८०] वध → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → वध क्विँप् → वध व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → वध → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → वध लट् → वध झि → झोऽन्तः (पा०सू० ७.१.३) → वध अन्ति → कर्तरि शप् (पा०सू० ३.१.६८) → वध शप् अन्ति → वध अ अन्ति → अतो गुणे (पा०सू० ६.१.९७) → वध अन्ति → अतो गुणे (पा०सू० ६.१.९७) → वधन्ति।

[२८१] वध → धातुसञ्ज्ञा (पूर्ववत्) → हेतुमति च (पा०सू० ३.१.२६) → वध णिच् → वध इ → णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरार्थम् (वा० ६.४.४८) → वध् इ → वधि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → वधि लट् → वधि तिप् → वधि ति → कर्तरि शप् (पा०सू० ३.१.६८) → वधि शप् ति → वधि अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → वधे अ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → वधय् अ ति → वधयति।

[२८२] वधि → धातुसञ्ज्ञा (पूर्ववत्) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → वधि लृट् → वधि तिप् → वधि ति → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → वधि स्य ति → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → वधि इट् स्य ति → वधि इ स्य ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → वधे इ स्य ति → एचोऽयवायावः (पा०सू० ६.१.७८) → वधय् इ स्य ति → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → वधय् इ ष्य ति → वधयिष्यति।

[२८३] बहुलमेतन्निदर्शनम् (धा०पा० ग०सू० १९३८) आकृतिगणोऽयम् (धा०पा० ग०सू० १९९२) भूवादिष्वेतदन्तेषु दशगणीषु धातूनां पाठो निदर्शनाय तेन स्तम्भुप्रभृतयः सौत्राश्चुलुम्पादयो वाक्यकारीयाः प्रयोगसिद्धा विक्लवत्यादयश्च (मा०धा०वृ० १०.३२८) इत्यनुसारमाकृतिगणत्वाच्चुरादिगण ऊह्योऽयं नामधातुः। सङ्ग्राम युद्धे (धा०पा० १९२२) संवर संवरणे (धा०पा० १९९२) इतिवत्। वृद्ध्यभावात् ज्ञपँ ज्ञानज्ञापनमारणतोषणनिशाननिशामनेषु (धा०पा० १६२४) इतिवन्मिदप्ययम्। वध् → सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् (पा०सू० ३.१.२५) → वध् णिच् → वध् इ → अत उपधायाः (पा०सू० ७.२.११६) → वाध् इ → मितां ह्रस्वः (पा०सू० ६.४.९२) → वध् इ → वधि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषा प्रक्रिया पूर्ववत्।

[२८४] अयँ गतौ (धा०पा० ४७४) → अय् → सम्पदादिभ्यः क्विप् (वा० ३.३.१०८) → अय् क्विँप् → अय् व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → अय् → विभक्तिकार्यम् → अय् सुँ → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → अय् ।

[२८५] शकन्ध्वादिषु पररूपं वाच्यम् (वा० ६.१.९४) इत्यनेन।

वधय् वधप्राप्तिमिच्छतीष्यति वधयिष्यति।[286]

## ३.१०८ प्रधर्षथ

कुतो वा कस्य दूता वा मत्स्थानं किं प्रधर्षथ।
तच्छ्रुत्वा हनुमानाह शृणु वक्ष्यामि देवि ते॥

– अ०रा० ४.६.४२

ण्यजन्तत्यागे रूपमिदम्।[287]

## ३.१०९ मृगयध्वम्

मृगयध्वमिति प्राह ततो वयमुपागताः।
ततो वनं विचिन्वन्तो जानकीं जलकाङ्क्षिणः॥

– अ०रा० ४.६.४६

अत्र श्रीरामेणाऽत्मीयत्वात्क्रियाफलस्य वानररूपकर्तृगामित्व आत्मनेपदम्।[288]

---

[286] लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य (भा०पा०सू० २.१.३६) इति नियमेन अय् इति शब्दं नपुंसकलिङ्गे पठित्वा द्वितीयायां विभक्तौ अय् अम् इति स्थिते स्वमोर्नपुंसकात् (पा०सू० ७.१.२३) इत्यनेनाम्लुकि अय् इत्येव। ३४९तमे पृष्ठे ३.५१ वधिष्यामि इति प्रयोगस्य विमर्शमपि पश्यन्तु।

[287] धृष् धातुः (धृषँ प्रसहने धा०पा० १८५०) आधृषीयान्तर्गणे पठितः। तत्र आ धृषाद्वा (धा०पा० ग०सू० १८०६) इति गणसूत्रस्याधिकाराद्वैकल्पिकणिच्प्रत्ययः। णिजभावे प्रधर्षथ इति रूपम्। प्र धृषँ प्रसहने → प्र धृष् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → प्र धृष् लट् → प्र धृष् थ → कर्तरि शप् (पा०सू० ३.१.६८) → प्र धृष् शप् थ → प्र धृष् अ थ → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → उरण् रपरः (पा०सू० १.१.५१) → प्र धर्ष् अ थ → प्रधर्षथ। णिचि तु प्रधर्षयथ इति रूपम्। धृष् → सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् (पा०सू० ३.१.२५) → धृष् णिच् → धृष् इ → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → उरण् रपरः (पा०सू० १.१.५१) → धर्ष् इ → धर्षि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा। प्र धर्षि → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → प्र धर्षि लट् → प्र धर्षि थ → कर्तरि शप् (पा०सू० ३.१.६८) → प्र धर्षि शप् थ → प्र धर्षि अ थ → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → प्र धर्षे अ थ → एचोऽयवायावः (पा०सू० ६.१.७८) → प्र धर्षय् अ थ → प्रधर्षयथ।

[288] मृग अन्वेषणे (धा०पा० १९००) चौरादिकधातुरागर्वीयत्वादात्मनेपदी। परन्तु मृगणां कुरुत इति प्राकृतेऽर्थे णिचि कृते तूभयपदी। यथा – निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजुच्यते (वा०प० ३.७.६०)। तत्रात्मनेपदप्राप्तेः कारणमिदं प्रादर्शि ग्रन्थकारैः। मृग णिच् → मृग इ → अतो लोपः (पा०सू० ६.४.४८) → मृग् इ → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → णिचश्च (पा०सू० १.३.७४) → लोट् च (पा०सू० ३.३.१६२) → मृग् इ लोट् → मृग् इ ध्वम् → कर्तरि शप् (पा०सू० ३.१.६८) → मृग् इ शप् ध्वम् → मृग् इ अ ध्वम् → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → मृग् ए अ ध्वम् → एचोऽयवायावः (पा०सू० ६.१.७८) → मृग् अय् अ ध्वम् → मृगयध्वम्।

## ३.११० स्थास्यामहे

पुनर्वैकुण्ठमासाद्य सुखं स्थास्यामहे वयम्।
इत्यङ्गदमथाऽश्वास्य गता विन्ध्यं महाचलम्॥

– अ०रा० ४.७.२२

सीतान्वेषणेऽसफलान् मरणे कृतनिश्चयान् वानरान् हनुमान् प्रतिबोधयति वैकुण्ठे सुखं स्थास्यामहे। इह उपान्मन्त्रकरणे (पा०सू० १.३.२५) इत्यनेनाऽत्मनेपदम्।[२८९] उप-शब्दस्य लोपः।[२९०]

## ३.१११ नयध्वम्

वाक्यसाहाय्यं करिष्येऽहं भवतां प्लवगेश्वराः।
भ्रातुः सलिलदानाय नयध्वं मां जलान्तिकम्॥

– अ०रा० ४.७.४८

इह सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः (पा०सू० १.३.३६) इत्यनेनाऽत्मनेपदम्। सम्मानेनेऽयं प्रयोगः। नयध्वम्।[२९१] सम्मानं कुरुत। तदिच्छापालनमेव सम्माननम्। उत्सञ्जने वाऽऽत्मनेपदम्।

## ३.११२ इयात्

तत्पुनः पञ्चरात्रेण बुद्बुदाकारतामियात्।
सप्तरात्रेण तदपि मांसपेशित्वमाप्नुयात्॥

– अ०रा० ४.८.२३

[२८९] उप ष्ठा गतिनिवृत्तौ (धा०पा० ९२८) → धात्वादेः षः सः (पा०सू० ६.१.६४) → निमित्तापाये नैमित्तिकस्याप्यपायः → उप स्था → उपान्मन्त्रकरणे (पा०सू० १.३.२५) → लृट् शेषे च (पा०सू० ३.३.१३) → उप लृँट् → उप स्था महिङ् → उप स्था महि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → उप स्था स्य महि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → उप स्था स्या महि → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → उप स्था स्या महे → उपस्थास्यामहे।

[२९०] विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इत्यनेन।

[२९१] णीञ् प्रापणे (धा०पा० ९०१) → णो नः (पा०सू० ६.१.६५) → नीञ् → नी → सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः (पा०सू० १.३.३६) → लोट् च (पा०सू० ३.३.१६२) → नी लोट् → नी ध्वम् → कर्तरि शप् (पा०सू० ३.१.६८) → नी शप् ध्वम् → नी अ ध्वम् → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → ने अ ध्वम् → एचोऽयवायावः (पा०सू० ६.१.७८) → नय् अ ध्वम् → नयध्वम्।

एति[२९२] इति प्रयोक्तव्ये इयात्[२९३] इति। आशंसावचने लिङ् (पा०सू० ३.३.१३४) इत्यनेन लिङ्लकारः।[२९४]

## ३.११३ म्रियेत

नाभिसूत्राल्परन्ध्रेण मातृभुक्तान्नसारतः।
वर्धते गर्भतः पिण्डो न म्रियेत स्वकर्मतः॥

– अ०रा० ४.८.३२

म्रियते[२९५] इति प्रयोक्तव्ये म्रियेत इति प्रयोगस्तु शकि लिङ् च (पा०सू० ३.३.१७२) इति सूत्रेण शक्यार्थे लिङ्प्रयोगे साधु।[२९६]

---

[२९२] इण् गतौ (पा०सू० १०४५) → इ → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → इ लट् → इ तिप् → इ ति → कर्तरि शप् (पा०सू० ३.१.६८) → इ अ ति → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → इ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → ए ति → एति।

[२९३] इण् गतौ (पा०सू० १०४५) → इ → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → आशंसावचने लिङ् (पा०सू० ३.३.१३४) → इ लिङ् → इ तिप् → इ ति → यासुट् परस्मैपदेषूदात्तो ङिच्च (पा०सू० ३.४.१०३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → इ यासुँट् ति → इ यास् ति → सुट् तिथोः (पा०सू० ३.४.१०७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → इ यास् सुँट् ति → इ यास् स् ति → लिङः सलोपोऽनन्त्यस्य (पा०सू० ७.२.७९) → इ या ति → क्ङिति च (पा०सू० १.१.५) → गुणनिषेधः → इ या ति → इतश्च (पा०सू० ३.४.१००) → इ या त् → इयात्।

[२९४] एवमेव आप्नुयात् इत्यत्रापि बोध्यम्।

[२९५] मृङ् प्राणत्यागे (धा०पा० १४०३) → मृ → म्रियतेर्लुङ्लिङोश्च (पा०सू० १.३.६१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → मृ लट् → मृ त → तुदादिभ्यः शः (पा०सू० ३.१.७७) → मृ श त → मृ अ त → रिङ् शयग्लिङ्क्षु (पा०सू० ७.४.२८) → ङिच्च (पा०सू० १.१.५३) → म् रिङ् अ त → म् रि अ त → अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (पा०सू० ६.४.७७) → ङिच्च (पा०सू० १.१.५३) → म् र् इयँङ् अ त → म् र् इय् अ त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → म् र् इय् अ ते → म्रियते।

[२९६] मृङ् प्राणत्यागे (धा०पा० १४०३) → मृ → म्रियतेर्लुङ्लिङोश्च (पा०सू० १.३.६१) → शकि लिङ् च (पा०सू० ३.३.१७२) → मृ लिङ् → मृ त → तुदादिभ्यः शः (पा०सू० ३.१.७७) → मृ श त → मृ अ त → रिङ् शयग्लिङ्क्षु (पा०सू० ७.४.२८) → ङिच्च (पा०सू० १.१.५३) → म् रिङ् अ त → म् रि अ त → अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (पा०सू० ६.४.७७) → ङिच्च (पा०सू० १.१.५३) → म् र् इयँङ् अ त → म् र् इय् अ त → लिङः सीयुट् (पा०सू० ३.४.१०२) → म् र् इय् अ सीयुँट् त → म् र् इय् अ सीय् त → सुट् तिथोः (पा०सू० ३.४.१०७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → म् र् इय् अ सीय् सुँट् त → म् र् इय् अ सीय् स् त → लिङः सलोपोऽनन्त्यस्य (पा०सू० ७.२.७९) → म् र् इय् अ ईय् त → लोपो व्योर्वलि (पा०सू० ६.१.६६) → म् र् इय् अ ई त → आद्गुणः (पा०सू० ६.१.८७) → म् र् इय् ए त → म्रियेत।

## ३.११४ क्षिपामि

लङ्कां सपर्वतां धृत्वा रामस्याग्रे क्षिपाम्यहम्।
यद्वा दृष्ट्वैव यास्यामि जानकीं शुभलक्षणाम्॥

– अ०रा० ४.९.२४

वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन लड्प्रयोगः।[२९७]

॥ इति किष्किन्धाकाण्डीयप्रयोगाणां विमर्शः ॥

॥ अथ सुन्दरकाण्डीयप्रयोगाणां विमर्शः ॥

## ३.११५ पश्यामि

अमोघं रामनिर्मुक्तं महाबाणमिवाखिलाः।
पश्याम्यद्यैव रामस्य पत्नीं जनकनन्दिनीम्॥

– अ०रा० ५.१.३

कृतार्थोऽहं कृतार्थोऽहं पुनः पश्यामि राघवम्।
प्राणप्रयाणसमये यस्य नाम सकृत्स्मरन्॥

– अ०रा० ५.१.४

अत्र शीघ्रताद्योतनाय वर्तमानसमीपे भविष्यति वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन लट्।[२९८]

---

[२९७] क्षिपँ प्रेरणे (धा०पा० १२८५) → क्षिप् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → क्षिप् लट् → क्षिप् मिप् → क्षिप् मि → तुदादिभ्यः शः (पा०सू० ३.१.७७) → क्षिप् श मि → क्षिप् अ मि → सार्वधातुकमपित् (पा०सू० १.२.४) → ङित्त्वम् → ग्क्ङिति च (पा०सू० १.१.५) → लघूपधगुणनिषेधः → क्षिप् अ मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → क्षिप् आ मि → क्षिपामि।

[२९८] दृशिँर् प्रेक्षणे (धा०पा० ९८८) → दृश् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → दृश् लट् → दृश् मिप् → दृश् मि → कर्तरि शप् (पा०सू० ३.१.६८) → दृश् शप् मि → दृश् अ मि → पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः (पा०सू० ७.३.७८) → पश्य् अ मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → पश्य् आ मि → पश्यामि।

## ३.११६ विवेक्ष्ये

विवेक्ष्ये[२९९] देहि मे मार्गं सुरसायै नमोऽस्तु ते।
इत्युक्त्वा पुनरेवाह सुरसा क्षुधितास्म्यहम्॥

– अ०रा० ५.१.१६

कर्मव्यतिहार आत्मनेपदम्।[३००]

## ३.११७ भक्षयेत्

सिंहिका नाम सा घोरा जलमध्ये स्थिता सदा।
आकाशगामिनां छायामाक्रम्याऽकृष्य भक्षयेत्॥

– अ०रा० ५.१.३५

अत्र विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (पा०सू० ३.३.१६१) इत्यनेन हेतुहेतुमतोर्लिङ् (पा०सू० ३.३.१५६) इत्यनेन वा लिङ्लकारः।[३०१]

---

[२९९] निवेक्ष्ये इति पाठभेदः। तत्र तु नेर्विशः (पा०सू० १.३.१७) इत्यनेनात्मनेपदम्।

[३००] कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन। वि विशँ प्रवेशने (धा०पा० १४२४) → वि विश् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → वि विश् लृट् → लृट् शेषे च (पा०सू० ३.३.१३) → वि विश् लृट् → वि विश् इट् → वि विश् इ → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → वि विश् स्य इ → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → वि वेश् स्य इ → व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः (पा०सू० ८.२.३६) → वि वेष् स्य इ → षढोः कः सि (पा०सू० ८.२.४१) → वि वेक् स्य इ → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → वि वेक् ष्य इ → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → वि वेक् ष्य ए → अतो गुणे (पा०सू० ६.१.९७) → वि वेक् ष्ये → विवेक्ष्ये।

[३०१] भक्षँ अदने (धा०पा० १५५७) → भक्ष् → सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् (पा०सू० ३.१.२५) → भक्ष् णिच् → भक्ष् इ → भक्षि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (पा०सू० ३.३.१६१) हेतुहेतुमतोर्लिङ् (पा०सू० ३.३.१५६) वा → भक्षि लिङ् → भक्षि तिप् → भक्षि ति → कर्तरि शप् (पा०सू० ३.१.६८) → भक्षि शप् ति → भक्षि अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → भक्षे अ ति → यासुट् परस्मैपदेषूदात्तो ङिच्च (पा०सू० ३.४.१०३) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → भक्षे अ यासुँट् ति → भक्षे अ यास् ति → सुट् तिथोः (पा०सू० ३.४.१०७) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → भक्षे अ यास् सुँट् ति → भक्षे अ यास् स् ति → अतो येयः (पा०सू० ७.२.८०) → भक्षे अ इय् ति → लोपो व्योर्वलि (पा०सू० ६.१.६६) → भक्षे अ इ ति → एचोऽयवायावः (पा०सू० ६.१.७८) → भक्षय् अ इ ति → आद्गुणः (पा०सू० ६.१.८७) → भक्षय् ए ति → इतश्च (पा०सू० ३.४.१००) → भक्षय् ए त् → भक्षयेत्।

## ३.११८ प्रसारयत्

दृश्यते नैव कोऽप्यत्र विस्मयो मे प्रजायते।
एवं विचिन्त्य हनूमानधो दृष्टिं प्रसारयत्॥

– अ०रा० ५.१.३७

अत्र विनाऽपि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इत्यनेनाकार-लोपः। आगमकार्यस्यानित्यत्वाद्वा।[३०२] प्रमाणं चात्र इको यणचि (पा०सू० ६.१.७७) इत्यत्र ङमुडागमाभावः।[३०३]

## ३.११९ प्रसीदताम्

धन्याहमप्यद्य चिराय राघव स्मृतिर्ममासीद्भवपाशमोचिनी।
तद्भक्तसङ्गोऽप्यतिदुर्लभो मम प्रसीदतां दाशरथिः सदा हृदि॥

– अ०रा० ५.१.५७

[३०२] आगमशास्त्रमनित्यम् (प०शे० ९३.२)। अडागमे कृते सामान्यतः प्रासारयत् इति रूपम्। यथा ततो वै स प्रजानान्दक्षिणं बाहुं प्रासारयत् (कृ०य० तै०ब्रा १.६.४.२) इत्यत्र। सृ गतौ (धा०पा० ९३५) → हेतुमति च → सृ णिच् → सृ इ → अचो ञ्णिति → उरण् रपरः → सार् इ → सारि → सनाद्यन्ता धातवः → धातुसञ्ज्ञा। प्र सारि → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → अनद्यतने लङ् (पा०सू० ३.२.१११) → प्र सारि तिप् → प्र सारि ति → लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा०सू० ६.४.७१) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → प्र अट् सारि ति → प्र अ सारि ति → कर्तरि शप् (पा०सू० ३.१.६८) → प्र अ सारि शप् ति → प्र अ सारि अ ति → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → प्र अ सारे अ ति → प्र अ सारय् अ ति → इतश्च (पा०सू० ३.४.१००) → प्र अ सारय् अ त् → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → प्रा सारय् अ त् → प्रासारयत्।

[३०३] यद्यागमकार्यं नित्यमभविष्यत्तर्हि इको यणचि (पा०सू० ६.१.७७) इति सूत्रे यण् अचि इति स्थिते ङमो ह्रस्वादचि ङमुण्नित्यम् (पा०सू० ८.३.३२) इत्यनेन ङमुडागमं कृत्वा इको यण्णचि इत्येवासूत्रयिष्यन् सूत्रकाराः। अत एव वाल्मीकीयरामायणे सुन्दरकाण्डे नवव्याकरणार्थवेत्ता हनुमान् लङि प्रविशम् इति प्रयुङ्क्ते – प्रदोषकाले प्रविशं भीतयाऽहं तयोदितः (वा०रा० ५.५८.५०)। अत्र तिलकशिरोमणिटीकाकारौ च – प्रविशं प्राविशम् (वा०रा० ति०टी० ५.५८.५०, वा०रा० शि०टी० ५.५८.५०)।

प्रसीदतु[३०४] इति प्रयोक्तव्ये प्रसीदताम्[३०५] इति प्रयोगः। कर्मव्यतिहार आत्मनेपदम्।[३०६]

## ३.१२० भोक्ष्यति

द्विमासाभ्यन्तरे सीता यदि मे वशगा भवेत्।
तदा सर्वसुखोपेता राज्यं भोक्ष्यति सा मया॥

– अ०रा० ५.२.४१

अत्र भुजोऽनवने (पा०सू० १.३.६६) इत्यनेनाऽत्मनेपदे सति भोक्ष्यते इति

[३०४] प्र षद्लृँ विशरणगत्यवसादनेषु (धा०पा० ८५४, १४२७) → प्र षद् → धात्वादेः षः सः (पा०सू० ६.१.६४) → प्र सद् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → प्र सद् लोट् → प्र सद् तिप् → प्र सद् ति → कर्तरि शप् (पा०सू० ३.१.६८) → प्र सद् शप् ति → प्र सद् अ ति → पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छ-पश्यर्च्छधौशीयसीदाः (पा०सू० ७.३.७८) → प्र सीद् अ ति → एरुः (पा०सू० ३.४.८६) → प्र सीद् अ तु → प्रसीदतु।

[३०५] प्र षद्लृँ विशरणगत्यवसादनेषु (धा०पा० ८५४, १४२७) → प्र षद् → धात्वादेः षः सः (पा०सू० ६.१.६४) → प्र सद् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → लोट् च (पा०सू० ३.३.१६२) → प्र सद् लोट् → प्र सद् त → कर्तरि शप् (पा०सू० ३.१.६८) → प्र सद् शप् त → प्र सद् अ त → पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः (पा०सू० ७.३.७८) → प्र सीद् अ त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → प्र सीद् अ ते → आमेतः (पा०सू० ३.४.९०) → प्र सीद् अ ताम् → प्रसीदताम्।

[३०६] कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन। प्रसन्नताभावस्तु जीवस्यैव धर्मो न ब्रह्मण इति ध्वनयितुं कर्मव्यतिहार आत्मनेपदप्रयोग इति भावः। मानसे गोस्वामिपादाश्च – प्रसन्नतां या न गताऽभिषेकतस्तथा न मम्लौ वनवासदुःखतः। मुखाम्बुजश्री रघुनन्दनस्य मे सदाऽस्तु सा मञ्जुलमङ्गलप्रदा॥ (रा०च०मा० २.म०२)। एतेन श्रीमद्भागवतेऽष्टमस्कन्धे पञ्चमाध्याये ब्रह्मस्तुतौ द्वादशवारं प्रयुक्तं प्रसीदताम् इत्यपि व्याख्यातम्। यथा – प्रसीदतां ब्रह्म महाविभूतिः (भा०पु० ८.५.३२) प्रसीदतां नः स महाविभूतिः (भा०पु० ८.५.३३.४३)।

पाणिनीयः।[३०७] किन्तु भोजनं भोजः।[३०८] भोजमाचरतीति भोजति।[३०९] तस्य लृङ्कारे भोक्ष्यति।[३१०] यद्वाऽत्रावनार्थे भुज् धातुः।[३११] रावणस्याभिप्रायोऽयम् मद्वशगा सती सीता राज्यं भोक्ष्यत्यधिष्ठात्री भूत्वा तत्प्रतिपालयिष्यति।

---

[३०७] भुज् → भुजोऽनवने (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → भुज् लृँट् → भुज् त → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → भुज् स्य त → एकाच उपदेशेऽनुदात्तात् (पा०सू० ७.२.१०) → इडागमनिषेधः → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → भोज् स्य त → चोः कुः (पा०सू० ८.२.३०) → भोग् स्य त → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → भोग् ष्य त → खरि च (पा०सू० ८.४.५५) → भोक् ष्य त → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → भोक् ष्य ते → भोक्ष्यते।

[३०८] भुज् धातोः नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन अच् प्रत्यये विभक्तिकार्ये। बाहुलकाद्भावेऽच्। तेन भोजः भोगः इति द्वावपि समानार्थकौ। यथा भागवते याचिष्णवे भूर्यपि भूरिभोजः (भा०पु० १०.८१.३४) इत्यत्र। अत्र टीकाकाराः – भूरिभोजो बहुभोगवान् (भा०पु० गू०दी० १०.८१.३४, भा०पु० अ०प्र० १०.८१.३४) भूरिभोजो बहुभोगः (भा०पु० नि०प्र० १०.८१.३४)। भोगः इति तु भुज् धातोः भावे (पा०सू० ३.३.१८) इत्यनेन घञि पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) इत्यनेन गुणे चजोः कु घिण्ण्यतोः (पा०सू० ७.३.५२) इत्यनेन कुत्वे विभक्तिकार्ये सिद्धम्।

[३०९] भोज → सर्वप्रातिपतिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → भोज क्विँप् → भोज व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → भोज → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → भोज लट् → भोज तिप् → भोज ति → कर्तरि शप् (पा०सू० ३.१.६८) → भोज शप् ति → भोज अ ति →अतो गुणे (पा०सू० ६.१.९७) → भोज ति → भोजति।

[३१०] आगमशास्त्रमनित्यम् (प०शे० ९३.२) इति परिभाषयाऽऽगमकार्यस्यानित्यत्वाद्बाहुलकादिडभावः। यद्वा भोजनं भोक्। णिजन्तात् भुज् धातोः (भुज् णिच् → भोजि) सम्पदादिभ्यः क्विप् (वा० ३.३.१०८) इत्यनेन भावे क्विपि णेरनिटि (पा०सू० ६.४.५१) इत्यनेन णिलोपे भोज् इति प्रातिपदिकं निष्पन्नम्। तस्य प्रथमाविभक्तावेकवचने भोक् भोग् इति रूपद्वयम्। भोज् सुँ → हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (पा०सू० ६.१.६८) → भोज् → चोः कुः (पा०सू० ८.२.३०) → भोग् → वाऽवसाने (पा०सू० ८.४.५६) → भोक्, भोग्। यथर्ग्वेदसंहितायाम् युवानो रुद्रा अजरा अभोग्घनो (ऋ०वे०सं० १.६४.३) इति मन्त्रे पदपाठे अभोक्ऽहनः सायणभाष्ये अभोग्घनः। भोजयन्तीति भोजः। न भोजः अभोजः। तेषां हन्तारः। 'बहुलं छन्दसि' (पा०सू० ३.२.८८) इति हन्तेः क्विप्। 'झयो होऽन्यतरस्याम्' (पा०सू० ८.४.६२) इति हकारस्य घत्वम्। 'इन्हन्पूषार्यम्णां शौ' (पा०सू० ६.४.१२) इति नियमाद्दीर्घाभावः। तदाचरिष्यति भोक्ष्यति। नामधातोरनुदात्तैकाच्त्वात् एकाच उपदेशेऽनुदात्तात् (पा०सू० ७.२.१०) इति सूत्रेणेडागमनिषेधः।

[३११] भुजँ पालनाभ्यवहारयोः (धा०पा० १४५४)। भुज् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → भुज् लृँट् → भुज् तिप् → भुज् ति → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → भुज् स्य ति → एकाच उपदेशेऽनुदात्तात् (पा०सू० ७.२.१०) → इडागमनिषेधः → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → भोज् स्य ति → चोः कुः (पा०सू० ८.२.३०) भोग् स्य ति → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → भोग् ष्य ति → खरि च (पा०सू० ८.४.५५) → भोक् ष्य ति → भोक्ष्यति।

## ३.१२१ अगाहत्

अगाहत्पुत्रपौत्रैश्च कृत्वा वदनमालिकाम्।
विभीषणस्तु रामस्य सन्निधौ हृष्टमानसः॥

– अ०रा० ५.२.५२

आत्मनेपदस्यानित्यत्वात्प्रयोगोऽयं परस्मैपदी।[३१२]

## ३.१२२ निर्दहिष्यति

निर्दहिष्यति रक्षौघांस्त्वत्कृते नात्र संशयः।
अनुज्ञां देहि मे देवि गच्छामि त्वरयाऽन्वितः॥

– अ०रा० ५.३.४९

निर्धक्ष्यति[३१३] इति प्रयोक्तव्ये निर्दहिष्यति इति प्रयुक्तम्। निर्दहतीति निर्दहः।[३१४] निर्दह

[३१२] अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) इत्यनेन। गाहृ् धातुः (गाहूँ विलोडने धा०पा० ६४९) आत्मनेपदी। तस्य लङ्लकारे प्रथमपुरुष एकवचने अगाहत इति रूपम्। गाहूँ विलोडने (धा०पा० ६४९) → गाह् → अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) → अनद्यतने लङ् (पा०सू० ३.२.१११) → गाह् लङ् → गाह् त → लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा०सू० ६.४.७१) → अट् गाह् त → अ गाह् त → कर्तरि शप् (पा०सू० ३.१.६८) → अ गाह् शप् त → अ गाह् अ त → अगाहत। स्वीकृत आत्मनेपदस्यानित्यत्वे परस्मैपदे अगाहत् इति रूपम्। गाहूँ विलोडने (धा०पा० ६४९) → गाह् → अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → अनद्यतने लङ् (पा०सू० ३.२.१११) → गाह् लङ् → गाह् तिप् → गाह् ति → लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा०सू० ६.४.७१) → अट् गाह् ति → अ गाह् ति → कर्तरि शप् (पा०सू० ३.१.६८) → अ गाह् शप् ति → अ गाह् अ ति → इतश्च (पा०सू० ३.४.१००) → अगाहत्। एतेन यूयं विवस्त्रा यदपो धृतव्रता व्यगाहतैतत्तदु देवहेलनम् (भा०पु० १०.२२.१८) इति भागवते रासपञ्चाध्याय्यां गोपीवस्त्रापहारे मध्यमपुरुषबहुवचनविवक्षायां कृतः व्यगाहत इति परस्मैपदप्रयोगोऽपि व्याख्यातः।

[३१३] निस् दहँ भस्मीकरणे (धा०पा० ९९१) → निस् दह् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → निस् दह् लृट् → निस् दह् तिप् → निस् दह् ति → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → निस् दह् स्य ति → दादेर्धातोर्घः (पा०सू० ८.२.३२) → निस् दघ् स्य ति → एकाचो बशो भष् झषन्तस्य स्ध्वोः (पा०सू० ८.२.३७) → निस् धघ् स्य ति → खरि च (पा०सू० ८.४.५५) → निस् धक् स्य ति → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → निस् धक् ष्य ति → ससजुषो रुः → (पा०सू० ८.२.६६) → निरुँ धक् ष्य ति → निर् धक् ष्य ति → निर्धक्ष्यति।

[३१४] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः (पा०सू० ३.१.१३४) इत्यनेन।

इवाऽचरिष्यतीति निर्दहिष्यति[३१५] इति प्रयोगे परिहारः।

## ३.१२३ निद्राति

अभिज्ञानार्थमन्यच्च वदामि तव सुव्रत।
चित्रकूटगिरौ पूर्वमेकदा रहसि स्थितः।
मदङ्के शिर आधाय निद्राति रघुनन्दनः॥

– अ०रा० ५.३.५३

इह स्म इति योजनीयम्। एवं लट् स्मे (पा०सू० ३.२.११८) इत्यनेन भूतकाले लङ्कारः।[३१६]

## ३.१२४ वदस्व

ततः प्रहस्तो हनुमन्तमादरात्पप्रच्छ केन प्रहितोऽसि वानर।
भयं च ते माऽस्तु विमोक्ष्यसे मया सत्यं वदस्वाखिलराजसन्निधौ॥

– अ०रा० ५.४.६

अत्र भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः (पा०सू० १.३.४७) इत्यनेनोपसम्भाषायां ज्ञाने वाऽऽत्मनेपदम्।[३१७]

---

[३१५] प्रयोगस्यास्य सिद्धिः कृष्णिष्यति (बा०म० २६६५) इतिवत्। निर्दह → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → निर्दह क्विँप् → निर्दह व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → निर्दह → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → निर्दह लृट् → निर्दह तिप् → निर्दह ति → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → निर्दह स्य ति → आर्धधातुकस्येड्वलादेः (पा०सू० ७.२.३५) → निर्दह इट् स्य ति → निर्दह इ स्य ति → अतो लोपः (पा०सू० ६.४.४८) → निर्दह् इ स्य ति → आदेशप्रत्ययोः (पा०सू० ८.३.५९) → निर्दह् इ ष्य ति → निर्दहिष्यति।

[३१६] निपूर्वकात् द्राधातोः (द्रा कुत्सायां गतौ धा०पा० १०५४) लङ्कारे प्रथमपुरुष एकवचने निद्राति। नि द्रा → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → नि द्रा लट् → नि द्रा तिप् → नि द्रा ति → कर्तरि शप् (पा०सू० ३.१.६८) → नि द्रा शप् ति → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → नि द्रा ति → निद्राति।

[३१७] वदँ व्यक्तायां वाचि (धा०पा० १००९) → वद् → भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः (पा०सू० १.३.४७) → लोट् च (पा०सू० ३.३.१६२) → वद् लोट् → वद् थास् → कर्तरि शप् (पा०सू० ३.१.६८) → वद् शप् थास् → वद् अ थास् → थासस्से (पा०सू० ३.४.८०) → वद् अ से → सवाभ्यां वामौ (पा०सू० ३.४.९१) → वद् अ स् व → वदस्व।

## ३.१२५ पश्यध्वम्

शब्देनैव विजानीमः कृतकार्यः समागतः।
हनूमानेव पश्यध्वं वानरा वानरर्षभम्॥

– अ०रा० ५.५.१३

अत्र कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन क्रियाविनिमय आत्मनेपदम्।[३१८]

॥ इति सुन्दरकाण्डीयप्रयोगाणां विमर्शः ॥

॥ अथ युद्धकाण्डीयप्रयोगाणां विमर्शः ॥

## ३.१२६ निवसस्व

भुङ्क्ष्व चेमानि पक्वानि फलानि तदनन्तरम्।
निवसस्व सुखेनात्र निद्रामेहि त्वराऽस्तु मा॥

– अ०रा० ६.७.१६

[३१८] परस्मैपदिनः दृश् धातोः (दृशिँर् प्रेक्षणे धा०पा० ९८८) लोट्लकारे मध्यमपुरुषे बहुवचने पश्यत इति रूपम्। दृश् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → दृश् लोट् → दृश् थ → कर्तरि शप् (पा०सू० ३.१.६८) → दृश् शप् थ → दृश् अ थ → पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः (पा०सू० ७.३.७८) → पश्य् अ थ → लोटो लङ्वत् (पा०सू० ३.४.८५) → ङिद्वत्त्वम् → तस्थस्थमिपां तान्तन्तामः (पा०सू० ३.४.१०१) → पश्य् अ त → पश्यत। आत्मनेपदे च पश्यध्वम् इति। दृश् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → लोट् च (पा०सू० ३.३.१६२) → दृश् लोट् → दृश् ध्वम् → कर्तरि शप् (पा०सू० ३.१.६८) → दृश् शप् ध्वम् → दृश् अ ध्वम् → पाघ्राध्मास्थाम्नादाण्दृश्यर्त्ति-सर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः (पा०सू० ७.३.७८) → पश्य् अ ध्वम् → पश्यध्वम्।

अत्र कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेनाऽत्मनेपदम्।[३१९]

## ३.१२७ निबोध

तमाह रावणो राजा भ्रातरं दीनया गिरा।
कुम्भकर्ण निबोध त्वं महत्कष्टमुपस्थितम्॥

– अ०रा० ६.७.५१

अत्र निपूर्वकोऽवगमार्थको बुध् धातुः (बुधँ अवगमने धा०पा० ११७२)। तत्राऽत्मनेपदत्वाल्लोड्लकारे मध्यमपुरुषैकवचने निबुध्यस्व इति पाणिनीयम्।[३२०] किन्तु बोधनं बोधः भावे घञि[३२१] ततश्च गुणे।[३२२] नितरां बोधो निबोधः। निबोधमाचर इति निबोध इत्थमाचारक्विबन्ताद्धातोर्लोट्। मध्यमपुरुष एकवचने सेर्ह्यपिच्च (पा०सू० ३.४.८७) इत्थं हि आदेशे अतो हेः (पा०सू० ६.४.१०५) इत्यनेन हेर्लुकि निबोध इत्यपि पाणिनीयम्।[३२३] यद्वाऽत्र बुध् धातुर्भ्वादिपरस्मैपदी (बुधँ अवगमने धा०पा० ८५८)। तस्य लोड्लकारे

[३१९] निपूर्वकात्परस्मैपदिनो वस् धातोः (वसँ निवासे धा०पा० १००५) लोड्लकारे मध्यमपुरुष एकवचने निवस इति रूपम्। नि वस् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → नि वस् लोट् → नि वस् सिप् → नि वस् सि → कर्तरि शप् (पा०सू० ३.१.६८) → नि वस् शप् सि → नि वस् अ सि → सेर्ह्यपिच्च (पा०सू० ३.४.८७) → नि वस् अ हि → अतो हेः (पा०सू० ६.४.१०५) → नि वस् अ → निवस। आत्मनेपदे च निवसस्व इति। नि वस् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → लोट् च (पा०सू० ३.३.१६२) → नि वस् लोट् → नि वस् थास् → कर्तरि शप् (पा०सू० ३.१.६८) → नि वस् शप् थास् → नि वस् अ थास् → थासस्से (पा०सू० ३.४.८०) → नि वस् अ से → सवाभ्यां वामौ (पा०सू० ३.४.९१) → नि वस् अ स् व → निवसस्व। अपि च – त्वराऽस्तु मा इति कथम् माङि लुङ् (पा०सू० ३.३.१७५) इत्यनेन सर्वलकारापवादत्वेन लुङो विधानात्। अस्य समाधानं दीक्षितैर्बालमनोरमायामुक्तम् – 'माऽस्तु' इत्यादौ तु 'मा' इत्यव्ययान्तरं प्रतिषेधार्थकमित्याहुः। 'आङ्माङोश्च' (पा०सू० ६.१.७४) इति सूत्रभाष्ये तु ङितो माशब्दस्य निर्देशात्प्रमाच्छन्द इत्यत्र तु न भवतीत्युक्तम्। 'मा'शब्दस्याव्ययान्तरस्य सत्त्वे तु तदेवोदाह्रियेत। 'माऽस्तु' इत्यत्र तु 'अस्तु' इति विभक्तिप्रतिरूपकमव्ययमित्यन्ये (बा०म० २२१९)।

[३२०] नि बुध् → अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) → लोट् च (पा०सू० ३.३.१६२) → नि बुध् लोट् → नि बुध् थास् → दिवादिभ्यः श्यन् (पा०सू० ३.१.६९) → नि बुध् श्यन् थास् → नि बुध् य थास् → थासस्से (पा०सू० ३.४.८०) → नि बुध् य से → सवाभ्यां वामौ (पा०सू० ३.४.९१) → नि बुध् य स् व → निबुध्यस्व।

[३२१] भावे (पा०सू० ३.३.१८) इत्यनेन।

[३२२] पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) इत्यनेन।

[३२३] निबोध → सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः (वा० ३.१.११) → निबोध क्विँप् → निबोध व् → वेरपृक्तस्य (पा०सू० ६.१.६७) → निबोध → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → लोट् च (पा०सू० ३.३.१६२) → निबोध लोट् → निबोध सिप् → निबोध सि → कर्तरि शप् (पा०सू० ३.१.६८) → निबोध शप् सि → निबोध अ सि → अतो गुणे (पा०सू० ६.१.९७) → निबोध सि → सेर्ह्यपिच्च (पा०सू० ३.४.८७) → निबोध हि → अतो हेः → निबोध।

मध्यमपुरुष एकवचनरूपमिदम् निबोध।[३२४] एतेन तान्निबोध द्विजोत्तम (भ०गी० १.७) इति गीतावचनमपि व्याख्यातम्।

## ३.१२८ न्यहनन्

दशकोट्यः प्लवङ्गानां गत्वा मन्दिररक्षकान्।
चूर्णयामासुरश्वांश्च गजांश्च न्यहनन् क्षणात्॥

– अ०रा० ६.१०.१७

न्यघ्नन् [३२५] इति प्रयोक्तव्ये न्यहनन् इति प्रयोगस्तु गणकार्यमनित्यम् (प०शे० ९३.३) इति नियमात् निपूर्वकात् हन् धातोः (हनँ हिंसागत्योः धा०पा० १०१२) लङि झि-प्रत्ययेऽडागमे शपि झोऽन्तः (पा०सू० ७.१.३) इत्यनेनान्तादेशे अतो गुणे (पा०सू० ६.१.९७) इत्यनेन पररूपे इतश्च (पा०सू० ३.४.१००) इत्यनेनेकारलोपे संयोगान्तस्य लोपः (पा०सू० ८.२.२३) इत्यनेन तकारलोपे न्यहनन्।[३२६]

---

[३२४] नि बुध् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लोट् च (पा०सू० ३.३.१६२) → नि बुध् लोट् → नि बुध् सिप् → नि बुध् सि → कर्तरि शप् (पा०सू० ३.१.६८) → नि बुध् शप् सि → नि बुध् अ सि → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → नि बोध् अ सि → सेर्ह्यपिच्च (पा०सू० ३.४.८७) → नि बोध् अ हि → अतो हेः (पा०सू० ६.४.१०५) → नि बोध् अ → निबोध।

[३२५] नि हनँ हिंसागत्योः (धा०पा० १०१२) → नि हन् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → अनद्यतने लङ् (पा०सू० ३.२.१११) → नि हन् लङ् → लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा०सू० ६.४.७१) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → नि अट् हन् लङ् → नि अ हन् लङ् → नि अ हन् झि → तिङ्शित्सार्वधातुकम् (पा०सू० ३.४.११३) → कर्तरि शप् (पा०सू० ३.१.६८) → अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) → नि अ हन् झि → सार्वधातुकमपित् (पा०सू० १.२.४) → ङित्त्वम् → गमहनजनखनघसां लोपः क्ङित्यनङि (पा०सू० ६.४.९८) → नि अ ह् न् झि → हो हन्तेर्ञ्णिन्नेषु (पा०सू० ७.३.५४) → नि अ घ् न् झि → झोऽन्तः (पा०सू० ७.१.३) → नि अ घ् न् अन्ति → इतश्च (पा०सू० ३.४.१००) → नि अ घ् न् अन्त् → संयोगान्तस्य लोपः (पा०सू० ८.२.२३) → नि अ घ् न् अन् → नि अघ्नन् → इको यणचि (पा०सू० ६.१.७७) → न्यघ्नन्।

[३२६] गणकार्यमनित्यम् (प०शे० ९३.३) इति नियमादत्र अदिप्रभृतिभ्यः शपः (पा०सू० २.४.७२) इति सूत्रं न प्रवर्तते। शपः पित्वात्त् सार्वधातुकमपित् (पा०सू० १.२.४) इत्यस्याप्रवृत्तौ शपो ङित्त्वं न। अङिति शपि परे गमहनजनखनघसां लोपः क्ङित्यनङि (पा०सू० ६.४.९८) इति सूत्रं न प्रवर्तते यतो हनोऽकारलोपाभावः। अकारलोपाभावे हो हन्तेर्ञ्णिन्नेषु (पा०सू० ७.३.५४) इत्यस्यापि प्रवृत्तिर्न। अतः कुत्वाभावः। नि हनँ हिंसागत्योः (धा०पा० १०१२) → नि हन् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → अनद्यतने लङ् (पा०सू० ३.२.१११) → नि हन् लङ् → लुङ्लङ्लृङ्क्ष्वडुदात्तः (पा०सू० ६.४.७१) → आद्यन्तौ टकितौ (पा०सू० १.१.४६) → नि अट् हन् लङ् → नि अ हन् लङ् → नि अ हन् झि → तिङ्शित्सार्व-धातुकम् (पा०सू० ३.४.११३) → कर्तरि शप् (पा०सू० ३.१.६८) → गणकार्यमनित्यम् (प०शे० ९३.३) → शब्लुगभावः → नि अ हन् अ झि → झोऽन्तः (पा०सू० ७.१.३) → नि अ हन् अ अन्ति → इतश्च (पा०सू० ३.४.१००) → नि अ हन् अ अन्त् → अतो गुणे (पा०सू० ६.१.९७) → नि अ हन् अन्त् → संयोगान्तस्य लोपः (पा०सू० ८.२.२३) → नि अ हन् अन् → नि अहनन् → इको यणचि (पा०सू० ६.१.७७) → न्यहनन्।

## ३.१२९ योत्स्यामि

घातयित्वा राघवेण जीवामि वनगोचरः।
रामेण सह योत्स्यामि रामबाणैः सुशीघ्रगैः॥

– अ०रा० ६.१०.५६

आत्मनेपदस्यानित्यत्वात्प्रयोगोऽयम्।[३२७]

## ३.१३० ससृजे

अस्त्रं राक्षसराजस्य जघान परमास्त्रवित्।
ततस्तु ससृजे घोरं राक्षसं चास्त्रमस्त्रवित्।
क्रोधेन महताऽऽविष्टो रामस्योपरि रावणः॥

– अ०रा० ६.११.२८

सृजँ विसर्गे (धा०पा० १४१४) परस्मैपदी धातुः। ततः ससर्ज इति रूपम्।[३२८] अत्र

[३२७] अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४)। आत्मनेपदे तु युधँ सम्प्रहारे (धा०पा० ११७३) इति धातोर्लृट्युत्तमपुरुष एकवचने योत्स्ये इति रूपम्। यथा गीतायाम् – न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह (भ०गी० २.९)। युध् → अनुदात्तङित आत्मनेपदम् (पा०सू० १.३.१२) → लृट् शेषे च (पा०सू० ३.३.१३) → युध् लृँट् → युध् इट् → युध् इ → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → युध् स्य इ → एकाच उपदेशेऽनुदात्तात् (पा०सू० ७.२.१०) → इडागमनिषेधः → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → योध् स्य इ → खरि च (पा०सू० ८.४.५५) → चर्त्वम् → योत् स्य इ → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → योत् स्य ए → अतो गुणे (पा०सू० ६.१.९७) → योत् स्ये → योत्स्ये। युध् → अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → युध् लृँट् → युध् मिप् → युध् मि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → युध् स्य मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → युध् स्या मि → एकाच उपदेशेऽनुदात्तात् (पा०सू० ७.२.१०) → इडागमनिषेधः → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → लघूपधगुणः → योध् स्या मि → खरि च (पा०सू० ८.४.५५) → योत् स्या मि → योत्स्यामि।

[३२८] सृजँ विसर्गे (धा०पा० १४१४) → सृज् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → परोक्षे लिट् (पा०सू० ३.२.११५) → सृज् लिँट् → सृज् तिप् → परस्मैपदानां णलतुसुस्थलथुसणल्वमाः (पा०सू० ३.४.८२) → सृज् णल् → सृज् अ → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → सृज् सृज् अ → उरत् (पा०सू० ७.४.६६) → उरण् रपरः (पा०सू० १.१.५१) → सर्ज् सृज् अ → हलादिः शेषः (पा०सू० ७.४.६०) → स सृज् अ → पुगन्तलघूपधस्य च (पा०सू० ७.३.८६) → उरण् रपरः (पा०सू० १.१.५१) → स सर्ज् अ → ससर्ज।

कर्मव्यतिहारादात्मनेपदम्।[३२९]

## ३.१३१ लिप्यसे

भूतं भविष्यद्भजन्वर्तमानमथाचरन्।
विहरस्व यथान्यायन् भवदोषैर्न लिप्यसे॥

– अ०रा० ६.१२.२७

अत्र लिप् धातोः (लिपँ उपदेहे धा०पा० १४३३) कर्मवाच्ये लङ्कारे मध्यमपुरुष एकवचनरूपम्।[३३०] वर्तमानसामीप्याद्भविष्यति वर्तमानता।[३३१]

## ३.१३२ गमिष्यामहे

अलङ्कृत्य सह भ्राता श्वो गमिष्यामहे वयम्।
विभीषणवचः श्रुत्वा प्रत्युवाच रघूत्तमः॥

– अ०रा० ६.१३.४२

गमेरिट् परस्मैपदेषु (पा०सू० ७.२.५८) इत्यनेनेड्विधानात् गम् धातोश्च (गमॢँ गतौ धा०पा० ९८२) परस्मैपदत्वात् गमिष्यामः।[३३२] समुपसर्गसंयोजने तु समो गम्यृच्छिभ्याम्

[३२९] कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन। प्राप्त आत्मनेपदे लिटि प्रथमपुरुष एकवचने ससृजे इति रूपम्। सृज् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → परोक्षे लिट् (पा०सू० ३.२.११५) → सृज् लिँट् → सृज् तिप् → लिटस्तझयोरेशिरेच् (पा०सू० ३.४.८१) → सृज् एश् → सृज् ए → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → सृज् सृज् ए → हलादिः शेषः (पा०सू० ७.४.६०) → सृ सृज् ए → उरत् (पा०सू० ७.४.६६) → उरण् रपरः (पा०सू० १.१.५१) → सर् सृज् ए → हलादिः शेषः (पा०सू० ७.४.६०) → स सृज् ए → सार्वधातुकमपित् (पा०सू० १.२.४) → ङित्त्वम् → ग्क्ङिति च (पा०सू० १.१.५) → लघूपधगुणनिषेधः → स सृज् ए → ससृजे।

[३३०] लिप् → भावकर्मणोः (पा०सू० १.३.१३) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → लिप् लँट् → लिप् थास् → सार्वधातुके यक् (पा०सू० ३.१.६७) → लिप् यक् थास् → लिप् य थास् → थासस्से (पा०सू० ३.४.८०) → लिप् य से → लिप्यसे।

[३३१] वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन।

[३३२] गम् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → लृट् शेषे च (पा०सू० ३.३.१३) → गम् लृँट् → गम् मस् → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → गम् स्य मस् → गमेरिट् परस्मैपदेषु (पा०सू० ७.२.५८) → गम् इट् स्य मस् → गम् इ स्य मस् → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → गम् इ स्या मस् → आदेशप्रत्यययोः (पा०सू० ८.३.५९) → गम् इ ष्या मस् → ससजुषो रुः (पा०सू० ८.२.६६) → गम् इ ष्या मरुँ → खरवसानयोर्विसर्जनीयः (पा०सू० ८.३.१५) → गम् इ ष्या मः → गमिष्यामः।

(पा०सू० १.३.२९) इत्यनेनाऽत्मनेपदे सङ्गंस्यामहे[३३३] उपसर्गलोपेऽपि गंस्यामहे किन्तु गमिष्यामहे इति त्वत्यन्तमसामञ्जस्यावहमिति चेत्। गमनं गमि इत्यत्र घिनुण् प्रत्ययः। शमित्यष्टाभ्यो घिनुण् (पा०सू० ३.२.१४१) इत्यत्र इतिशब्दप्रयोगाद्गमेरपि घिनुण्। घिनुण्प्रत्ययेऽनुबन्धकार्ये नपुंसकलिङ्गे क्रियाविशेषणत्वाद्द्वितीया। हे इति सम्बोधनम्। स्याम इति अस् धातोः (असँ भुवि धा०पा० १०६५) विध्यर्थे लिङ्लकार उत्तमपुरुषबहुवचनम्।[३३४] अर्थात् हे जना अयोध्यां प्रति वयं गमि गमनं प्रति स्यामोद्यता भवेम। यद्वा गम् इति डप्रत्ययान्तम्।[३३५] इषुधातुः (इषँ गतौ धा०पा० ११२७) दिवादिः। तस्य वर्तमानकाले कर्मव्यतिहार आत्मनेपदम्।[३३६] श्वः इति सन्निधानेनापि वर्तमानसमीपे लट्।[३३७] श्वो गं गमनमिष्यामहेऽभिलषामः[३३८] प्रयोगेऽस्मिन्नियमेव मे मनीषा।

---

[३३३] सम् गम् → समो गम्यृच्छिभ्याम् (पा०सू० १.३.२९) → लृट् शेषे च (पा०सू० ३.३.१३) → सम् गम् लृँट् → सम् गम् महिङ् → सम् गम् महि → स्यतासी लृलुटोः (पा०सू० ३.१.३३) → सम् गम् स्य महि → गमेरिट् परस्मैपदेषु (पा०सू० ७.२.५८) → इडभावः → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → सम् गम् स्या महि → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → सम् गम् स्या महे → मोऽनुस्वारः (पा०सू० ८.३.२३) → सं गं स्या महे → अनुस्वारस्य ययि परसवर्णः (पा०सू० ८.४.५८) → सङ्गंस्यामहे।

[३३४] असँ भुवि (धा०पा० १०६५) → अस् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → आशिषि लिङ्लोटौ (पा०सू० ३.३.१७३) → अस् लिङ् → अस् मस् → यासुट् परस्मैपदेषूदात्तो ङिच्च (पा०सू० ३.४.१०३) → अस् यासुँट् मस् → अस् यास् मस् → लिङः सलोपोऽनन्त्यस्य (पा०सू० ७.२.७९) → अस् या मस् → श्नसोरल्लोपः (पा०सू० ६.४.१११) → स् या मस् → नित्यं ङितः (पा०सू० ३.४.९९) → स् या म → स्याम।

[३३५] गमॢँ धातोः अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) इत्यनेन भावे डप्रत्यये डित्यभस्याप्यनुबन्धकरण-सामर्थ्यात् (वा० ६.४.१४३) इत्यनेन टिलोपे विभक्तिकार्ये गम् । अन्येष्वपि इत्यनेन बाहुलकाद्भावेऽपि। अपिशब्दः सर्वोपाधिव्यभिचारार्थः (का०वृ० ३.२.१०१)। गं गीतमितिवत्। यथा शब्दकल्पद्रुमे – गं, क्ली०, गीयते इति (गै गाने + भावे बाहुलकात् डः) गीतम्, इत्येकाक्षरकोषः। गम् → अन्येष्वपि दृश्यते (पा०सू० ३.२.१०१) → गम् ड → गम् अ → टेः (पा०सू० ६.४.१४३) → डित्त्वसामर्थ्यादभस्यापि टेर्लोपः (ल०सि०कौ० ३४३) → ग् अ → ग → विभक्तिकार्यम् → ग अम् → अमि पूर्वः (पा०सू० ६.१.१०७) → गम्।

[३३६] कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेन।

[३३७] वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) इत्यनेन।

[३३८] इष् → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → वर्तमानसामीप्ये वर्तमानवद्वा (पा०सू० ३.३.१३१) → वर्तमाने लट् (पा०सू० ३.२.१२३) → इष् लट् → इष् महिङ् → इष् महि → दिवादिभ्यः श्यन् (पा०सू० ३.१.६९) → इष् श्यन् महि → इष् य महि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → इष् या महि → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → इष् या महे → इष्यामहे।

## ३.१३३ प्रार्थयामि

प्रार्थयामि जगन्नाथ पवित्रं कुरु मे गृहम्।
स्थित्वाद्य भुक्त्वा सबलः श्वो गमिष्यसि पत्तनम्॥

– अ०रा० ६.१४.३६

अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) इति चक्षिङ् (धा०पा० १०१७) इत्यत्र ङित्करणेन ज्ञाप्यते। अतः प्रार्थयामि।[३३९]

॥ इति युद्धकाण्डीयप्रयोगाणां विमर्शः ॥

॥ अथोत्तरकाण्डीयप्रयोगाणां विमर्शः ॥

## ३.१३४ निजघ्ने

ब्राह्मणानृषिमुख्यांश्च देवदानवकिन्नरान्।
देवश्रियो मनुष्यांश्च निजघ्ने समहोरगान्॥

– अ०रा० ७.२.४७

आङो यमहनः (पा०सू० १.३.२८) इत्यनेनात्मनेपदे न्याजघ्ने।[३४०] विनाऽपि प्रत्ययं

---

[३३९] अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) इत्यनेन। प्र अर्थँ उपयाञ्चायाम् (धा०पा० १९०५) → प्र अर्थ् → सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् (पा०सू० ३.१.२५) → प्र अर्थ् णिच् → प्र अर्थ् इ → प्र अर्थि → सनाद्यन्ता धातवः (पा०सू० ३.१.३२) → धातुसञ्ज्ञा → अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प०शे० ९३.४) → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → प्र अर्थि लट् → प्र अर्थि मिप् → प्र अर्थि मि → कर्तरि शप् (पा०सू० ३.१.६८) → प्र अर्थि शप् मि → प्र अर्थि अ मि → सार्वधातुकार्धधातुकयोः (पा०सू० ७.३.८४) → प्र अर्थे अ मि → एचोऽयवायावः (पा०सू० ६.१.७८) → प्र अर्थय् अ मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → प्र अर्थय् आ मि → प्र अर्थयामि → अकः सवर्णे दीर्घः (पा०सू० ६.१.१०१) → प्रार्थयामि। ३६३तमे पृष्ठे ३.७७ प्रार्थय इति प्रयोगस्य विमर्शमपि पश्यन्तु।

[३४०] न्या हन् → आङो यमहनः (पा०सू० १.३.२८) → परोक्षे लिट् (पा०सू० ३.२.११५) → न्या हन् लिँट् → न्या हन् त → लिटस्तझयोरेशिरेच् (पा०सू० ३.४.८१) → न्या हन् एश् → न्या हन् ए → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → न्या हन् हन् ए → हलादिः शेषः (पा०सू० ७.४.६०) → न्या ह हन् ए → कुहोश्चुः (पा०सू० ७.४.६२) → न्या झ हन् ए → अभ्यासे चर्च (पा०सू० ८.४.५४) → न्या ज हन् ए → असंयोगाल्लिट्कित् (पा०सू० ६.४.९८) → कित्त्वम् → गमहनजनखनघसां लोपः क्ङित्यनङि (पा०सू० ६.४.९८) → न्या ज ह् न् ए → हो हन्तेर्ञ्णिन्नेषु (पा०सू० ७.३.५४) → न्या ज घ् न् ए → न्याजघ्ने।

पूर्वोत्तरपदलोपो वक्तव्यः (वा० ५.३.८३) इत्यनेन आङ् इत्यस्य लोपे निजघ्ने।[३४१]

### ३.१३५ काङ्क्षे

सत्येन च शपे नाहं त्वां विना दिवि वा भुवि।
काङ्क्षे राज्यं रघुश्रेष्ठ शपे त्वत्पादयोः प्रभो॥

– अ०रा० ७.९.५

काङ्क्षामि[३४२] इति प्रयोक्तव्ये काङ्क्षे[३४३] इति प्रयोगस्तु कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) इत्यनेनात्मनेपदे सति।[३४४]

॥ इत्युत्तरकाण्डीयप्रयोगाणां विमर्शः ॥

इत्यध्यात्मरामायणेऽपाणिनीयप्रयोगाणांविमर्शनामके शोधप्रबन्धे तृतीयाध्याये द्वितीयपरिच्छेदः।

इत्यध्यात्मरामायणेऽपाणिनीयप्रयोगाणांविमर्शनामके शोधप्रबन्धे तृतीयोऽध्यायः।

---

३४१ परस्मैपदे तु निजघान इति रूपम्। नि हन् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → परोक्षे लिट् (पा०सू० ३.२.११५) → नि हन् लिँट् → नि हन् तिप् → परस्मैपदानां णलतुसुस्थलथुसणल्वमाः (पा०सू० ३.४.८२) → नि हन् णल् → नि हन् अ → लिटि धातोरनभ्यासस्य (पा०सू० ६.१.८) → नि हन् हन् अ → हलादिः शेषः (पा०सू० ७.४.६०) → नि ह हन् अ → कुहोश्चुः (पा०सू० ७.४.६२) → नि झ हन् अ → अभ्यासे चर्च (पा०सू० ८.४.५४) → नि ज हन् अ → हो हन्तेर्ञ्णिन्नेषु (पा०सू० ७.३.५४) → नि ज घन् अ → अत उपधायाः (पा०सू० ७.२.११६) → नि ज घान् अ → निजघान।

३४२ काक्षिँ काङ्क्षायाम् (धा०पा० ६६७) → काक्ष् → इदितो नुम् धातोः (पा०सू० ७.१.५८) → मिदचोऽन्त्यात्परः (पा०सू० १.१.४७) → का नुँम् क्ष् → कान् क्ष् → नश्चापदान्तस्य झलि (पा०सू० ८.३.२४) → कांक्ष् → अनुस्वारस्य ययि परसवर्णः (पा०सू० ८.४.५८) → काङ्क्ष् → शेषात्कर्तरि परस्मैपदम् (पा०सू० १.३.७८) → वर्तमाने लट् (पा०सू० ३.२.१२३) → काङ्क्ष् लट् → काङ्क्ष् मिप् → काङ्क्ष् मि → कर्तरि शप् (पा०सू० ३.१.६८) → काङ्क्ष् शप् मि → काङ्क्ष् अ मि → अतो दीर्घो यञि (पा०सू० ७.३.१०१) → काङ्क्ष् आ मि → काङ्क्षामि।

३४३ काक्षिँ काङ्क्षायाम् (धा०पा० ६६७) → काङ्क्ष् (पूर्ववत्) → कर्तरि कर्मव्यतिहारे (पा०सू० १.३.१४) → वर्तमाने लट् (पा०सू० ३.२.१२३) → काङ्क्ष् लट् → काङ्क्ष् इट् → काङ्क्ष् इ → कर्तरि शप् (पा०सू० ३.१.६८) → काङ्क्ष् शप् इ → काङ्क्ष् अ इ → टित आत्मनेपदानां टेरे (पा०सू० ३.४.७९) → काङ्क्ष् अ ए → अतो गुणे (पा०सू० ६.१.९७) → काङ्क्ष् ए → काङ्क्षे।

३४४ एवमेव न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च (भ०गी० १.३२) इत्यत्र। विजयराज्यसुखानामकाङ्क्षा न राजोचिता।

बुध्वा श्रीगुरुपादपद्मरजसा संशुद्धया सादरं
कृत्वा लेखकमाप्तशीलयशसं शिष्यं शिशुं राघवम्।
बालो नष्टविलोचनो गिरिधरः शब्दान् विभाव्याऽत्मना
बध्नाति स्म निबन्धमेतममलं तोषाय सीतापतेः॥

इत्यध्यात्मरामायणेऽपाणिनीयप्रयोगाणांविमर्शः।

# सङ्केताक्षरसूची

| | |
|---|---|
| अ०को० | अमरकोषः |
| अ०को० व्या०सु० | अमरकोषे व्याख्यासुधा |
| अ०पु० | अग्निपुराणम् |
| अ०रा० | अध्यात्मरामायणम् |
| अ०शा० | अभिज्ञानशाकुन्तलम् |
| अग०सं० | अगस्त्यसंहिता |
| अहि०सं० | अहिर्बुध्न्यसंहिता |
| आ०रा० | आनन्दरामायणम् |
| आ०श्रौ०सू० | आपस्तम्बश्रौतसूत्रम् |
| आ०स०श० | आर्यासप्तशती |
| आ०सं० | आनन्दसंहिता |
| ई०उ० | ईशावास्योपनिषद् |
| उ०को० | उणादिकोषः (दयानन्दसरस्वतीव्याख्यासहितः) |
| उ०रा०च० | उत्तररामचरितम् |
| ऋ०वे०सं० | ऋग्वेदसंहिता |
| ऋ०वे०सं० सा०भा० | ऋग्वेदसंहितायां सायणभाष्यम् |
| ऋ०वे०सं० सा०भा० उ०प्र० | ऋग्वेदसंहितायां सायणभाष्य उपोद्घातप्रकरणम् |
| ए०को० | एकाक्षरकोषः |
| क०उ० | कठोपनिषद् |
| क०उ० रा०कृ०भा० | कठोपनिषदि श्रीराघवकृपाभाष्यम् |
| क०पु० | कल्किपुराणम् |
| क०स०सा० | कथासरित्सागरः |
| का० | कादम्बरी |
| का०वि०प० | काशिकाविवरणपञ्जिका (न्यासः) |

| | |
|---|---|
| का०वृ० | काशिकावृत्तिः |
| का०वृ०वा० | काशिकावृत्तिवार्त्तिकम् |
| का०सू०वृ० | काव्यालङ्कारसूत्रवृत्तिः |
| कि० | किरातार्जुनीयम् |
| कि० घ०व्या०म० | किरातार्जुनीये घण्टापथव्याख्यायां मङ्गलाचरणम् |
| कु०स० | कुमारसम्भवम् |
| कु०स० स०व्या० | कुमारसम्भवे सञ्जीविनीव्याख्या |
| कू०पु० | कूर्मपुराणम् |
| कृ०य० तै०आ० | कृष्णयजुर्वेदतैत्तिरीयारण्यकम् |
| कृ०य० तै०ब्रा | कृष्णयजुर्वेदतैत्तिरीयब्राह्मणम् |
| कृ०य० तै०सं० | कृष्णयजुर्वेदतैत्तिरीयसंहिता |
| ग०पु० | गरुडपुराणम् |
| ग०सं० | गर्गसंहिता |
| गी०गो० | गीतगोविन्दम् |
| गो०गृ०सू० | गोभिलगृह्यसूत्रम् |
| गो०पू०ता०उ० | गोपालपूर्वतापिन्युपनिषद् |
| च०सं० सू०स्था० | चरकसंहितायां सूत्रस्थानम् |
| चा०नी० | चाणक्यनीतिः |
| त०बो० | तत्त्वबोधिनी (ज्ञानेन्द्रसरस्वतीकृता) |
| त०वा० | तन्त्रवार्तिकम् |
| त०स० | तर्कसङ्ग्रहः |
| त०स० न्या०बो०व्या० | तर्कसङ्ग्रहे न्यायबोधिनीव्याख्या |
| त०स० प०व्या० | तर्कसङ्ग्रहे पदकृत्यव्याख्या |
| तै०उ० | तैत्तिरीयोपनिषद् |
| द०उ० | दशपाद्युणादिपाठः |
| द०उ०वृ० | दशपाद्युणादिवृत्तिः (युधिष्ठिरमीमांसकसम्पादिता) |
| द०रू० | दशरूपकम्  (धनञ्जयकृतम्) |
| दु०स०श० | दुर्गासप्तसती (मार्कण्डेयपुराणान्तर्गता) |
| दे०भा०पु० | देवीभागवतपुराणम् |
| धा०पा० | धातुपाठः |
| धा०पा० ग०सू० | धातुपाठे गणसूत्रम् |

| | |
|---|---|
| ध्व० | ध्वन्यालोकः |
| न०उ० | नलोपाख्यानम् |
| न०का० | नन्दिकेश्वरकाशिका |
| नर०पु० | नरसिंहपुराणम् |
| ना०पु० | नारदपुराणम् |
| नान्दी०पु० | नान्दीपुराणम् |
| नै०च० | नैषधीयचरितम् |
| न्या०सू० | न्यायसूत्रम् |
| प०उ० | पञ्चपाद्युणादिपाठः |
| प०उ० श्वे०वृ० | पञ्चपाद्युणादिपाठे श्वेतवनवासिवृत्तिः |
| प०त० | पञ्चतन्त्रम् |
| प०त० अ०टी० | पञ्चतन्त्रेऽभिनवराजलक्ष्मीटीका |
| प०म० | पदमञ्जरी |
| प०ल०म० | परमलघुमञ्जूषा |
| प०ल०म० ज्यो०टी० | परमलघुमञ्जूषायां ज्योत्स्नाटीका (कालिकाप्रसादशुक्लकृता) |
| प०शे० | परिभाषेन्दुशेखरः |
| प०स्मृ० | पराशरस्मृतिः |
| परा०उ० | पराशरोपपुराणम् |
| पा०सू० | पाणिनिसूत्रम् (अष्टाध्यायी) |
| प्र०ना० | प्रतिमानाटकम् |
| प्रौ०म० | प्रौढमनोरमा |
| बा०म० | बालमनोरमा |
| बृ०उ० | बृहदारण्यकोपनिषद् |
| बृ०ब्र०सं० | बृहद्ब्रह्मसंहिता |
| बृ०सं० | बृहत्संहिता |
| ब्र०उ० | ब्रह्मबिन्दूपनिषद् |
| ब्र०पु० | ब्रह्मपुराणम् |
| ब्र०सू० | ब्रह्मसूत्रम् |
| ब्रह्मा०पु० | ब्रह्माण्डपुराणम् |
| भ०का० | भट्टिकाव्यम् |
| भ०गी० | भगवद्गीता |

| | |
|---|---|
| भ०गी० रा०भा० | भगवद्गीतायां रामानुजभाष्यम् |
| भ०नी० | भर्तृहरिनीतिशतकम् |
| भा०उ० पा०सू० | भाष्य उद्योते पाणिनीयसूत्रम् |
| भा०प० | भाष्ये पस्पशाह्निकम् |
| भा०पा०सू० | भाष्ये पाणिनीयसूत्रम् |
| भा०पु० | श्रीमद्भागवतपुराणम् |
| भा०पु० अ०प्र० | श्रीमद्भागवतेऽन्वितार्थप्रकाशिका |
| भा०पु० गू०दी० | श्रीमद्भागवते गूढार्थदीपिका |
| भा०पु० नि०प्र० | श्रीमद्भागवते निगूढार्थप्रकाशः |
| भा०पु० बा०प्र० | श्रीमद्भागवते बालप्रबोधिनी |
| भा०पु० वं०टी० | श्रीमद्भागवते वंशीधरटीका |
| भा०पु० वी०रा०व्या० | श्रीमद्भागवते वीरराघवव्याख्या |
| भा०पु० श्री०टी० | श्रीमद्भागवते श्रीधरटीका |
| भा०पु० सि०प्र० | श्रीमद्भागवते सिद्धान्तप्रदीपः |
| भा०प्र० | भाष्ये प्रदीपः (कैयटकृतः) |
| भा०प्र० पा०सू० | भाष्ये प्रदीपे पाणिनीयसूत्रम् |
| भा०रा० | श्रीभार्गवराघवीयम् |
| भा०शि० | भाष्ये शिवसूत्रम् |
| भा०शि०सू० | भाष्ये शिवसूत्रम् |
| भृ०दू० | भृङ्गदूतम् |
| म०अ० | मधुराष्टकम् |
| म०पु० | मत्स्यपुराणम् |
| म०भा० | महाभारतम् |
| म०भा० भा०दी० | महाभारते भारतदीपिका (नीलकण्ठकृता) |
| म०सु०स० | महासुभाषितसङ्ग्रहः |
| म०स्मृ० | मनुस्मृतिः |
| म०स्मृ० कु०टी० | मनुस्मृतौ कुल्लूकभट्टटीका |
| म०स्मृ० मे०टी० | मनुस्मृतौ मेधातिथिटीका |
| म०स्मृ० राघ०टी० | मनुस्मृतौ राघवानन्दटीका |
| मा०भा० | मानसभारती (रामचरितमानसस्य संस्कृतपद्यानुवादः) |
| मा०धा०वृ० | माधवीया धातुवृत्तिः |

| | |
|---|---|
| मी०सू० | मीमांसासूत्रम् |
| मे०को० | मेदिनीकोषः |
| मे०दू० | मेघदूतम् |
| या०स्मृ० | याज्ञवल्क्यस्मृतिः |
| यो०सू० | योगसूत्रम् |
| यो०सू० भो०वृ० | योगसूत्रे भोजवृत्तिः |
| यो०हृ० दी०टी० | योगिनीहृदये दीपिकाटीका |
| र०वं० | रघुवंशम् |
| र०वं० द०टी० | रघुवंशे दर्पणटीका (हेमाद्रिकृता) |
| र०वं० स०व्या० | रघुवंशे सञ्जीविनीव्याख्या |
| र०वं० स०व्या०म० | रघुवंशे सञ्जीविनीव्याख्यायां मङ्गलाचरणम् |
| रा०उ०ता०उ० | रामोत्तरतापिन्युपनिषद् |
| रा०च०मा० | रामचरितमानसम् |
| रा०मी० | रामायणमीमांसा (करपात्रस्वामिकृता) |
| रा०र०स्तो० | रामरक्षास्तोत्रम् |
| ल०म० | लघुमञ्जूषा |
| ल०वि०स्मृ० | लघुविष्णुस्मृतिः |
| ल०शे० | लघुशब्देन्दुशेखरः |
| ल०शे० म० | लघुशब्देन्दुशेखरे मङ्गलाचरणम् |
| ल०सि०कौ० | लघुसिद्धान्तकौमुदी |
| ल०सि०कौ० भै०टी० | लघुसिद्धान्तकौमुद्यां भैमीटीका (भीमसेनशास्त्रिकृता) |
| लि० | लिङ्गानुशासनम् |
| वा० | वार्त्तिकम् |
| वा०प० | वाक्यपदीयम् |
| वा०प० हे०टी० | वाक्यपदीये हेलाराजटीका |
| वा०रा० | वाल्मीकीयरामायणम् |
| वा०रा० क०टी० | वाल्मीकीयरामायणे कतकटीका |
| वा०रा० ति०टी० | वाल्मीकीयरामायणे तिलकटीका |
| वा०रा० भू०टी० | वाल्मीकीयरामायणे भूषणटीका |
| वा०रा० शि०टी० | वाल्मीकीयरामायणे शिरोमणिटीका |
| वा०सं० | वाराहसंहिता |

| | |
|---|---|
| वाम०पु० | वामनपुराणम् |
| वाम०पु० स०मा० | वामनपुराणे सरोमाहात्म्यम् |
| वायु०पु० | वायुपुराणम् |
| वि०पु० | विष्णुपुराणम् |
| वि०स०ना० | विष्णुसहस्रनामस्तोत्रम् |
| वि०स०ना० स०भा० | विष्णुसहस्रनामस्तोत्रे सत्यभाष्यम् |
| वे०सा० | वेदान्तसारः |
| वै०भू०सा० | वैयाकरणभूषणसारः |
| वै०सि०का० | वैयाकरणसिद्धान्तकारिका |
| वै०सि०कौ० | वैयाकरणसिद्धान्तकौमुदी |
| व्यु०वा० का०प्र० | व्युत्पत्तिवादे कारके प्रथमा |
| श०ब्रा० | शतपथब्राह्मणम् |
| श०र० | शब्दरत्नः |
| शि०पु० | शिवपुराणम् |
| शि०म० | शिवमहिम्नःस्तोत्रम् |
| शि०व० | शिशुपालवधम् |
| शि०व० स०व्या०म० | शिशुपालवधे सर्वङ्कषाव्याख्यायां मङ्गलाचरणम् |
| शि०सू० | शिवसूत्रम् (माहेश्वरसूत्रम्) |
| शु०य०वा०मा० | शुक्लयजुर्वेदवाजसनेयिमाध्यन्दिनसंहिता |
| श्लो०वा० | श्लोकवार्त्तिकम् |
| श्वे०उ० | श्वेताश्वतरोपनिषद् |
| स०र० | सङ्गीतरत्नाकरः |
| स०र० सु०टी० | सङ्गीतरत्नाकरे सुधाकरटीका |
| सा०का० | साङ्ख्यकारिका |
| सा०का०गौ०भा० | साङ्ख्यकारिकायां गौडपादभाष्यम् |
| सा०द० | साहित्यदर्पणः |
| सी०सु०नि० | श्रीसीतासुधानिधिः |
| सी०सु०नि० भ०टी० | श्रीसीतासुधानिधौ भक्तिटीका |
| स्क०पु० | स्कन्दपुराणम् |
| स्व०शि० | स्वराष्टकशिक्षा |
| ह०च०चि० | हरचरितचिन्तामणिः |

| | |
|---|---|
| ह०ना० | हनुमन्नाटकम् |
| ह०ना०व्या० | हरिनामामृतव्याकरणम् |
| ह०व० | हरिवंशः |
| हि० | हितोपदेशः |

Originally authored in 1981, this book is the PhD dissertation of the polyglot and polymath Hindū saint Jagadguru Rāmānandācārya Svāmī Rāmabhadrācārya (then known as Ācārya Giridharalāla Miśra Prajñācakṣu). Svāmī Rāmabhadrācārya is the founder of Tulsi Peeth, a social and religious organization at Chitrakoot, and the founder and lifelong chancellor of a university for the differently abled at Chitrakoot. Without eyesight since the age of two months and without formal education till the age of 17 years, Svāmī Rāmabhadrācārya speaks 22 languages and has authored more than 100 books in Sanskrit and Hindi. In this work, Svāmī Rāmabhadrācārya has examined 'non-Pāṇinian' usages in the *Adhyātma Rāmāyaṇa* using traditional and novel methods drawing from the Pāṇinian framework. This edition of the book is edited and annotated by Nityānanda Miśra, a Sanskrit enthusiast who works in the investment banking industry at Mumbai. He is an initiated disciple of Svāmī Rāmabhadrācārya.

*"By authoring this gem of a work, Rāmabhadrācārya has opened a new direction of research in the science of Vyākaraṇa."*
—Madhav Deshpande

*"Svāmī Rāmabhadrācārya has examined many principles of Pāṇinian grammar with acute discernment."*
—Devarshi Kalanath Shastri

*"Deserves wide distribution. Clearly reflects a mastery of Pāṇinian methods and tradition."*
—George Cardona

**Shri Tulsi Peeth Seva Nyas**
Aamodavana, Post Naya Gaon
Chitrakoot, Satna, MP, India
http://jagadgururambhadracharya.org